व्यञ्जनाप्रपञ्चसमीक्षा

(तुलनात्मकप्रतीकतत्त्वविमर्शः)

डॉ० मुकुन्दमाधवशर्मा

VYAÑJANĀPRAPAÑCASAMĪKṢĀ

(A CRITIQUE ON COMPARATIVE SYMBOLISM)

Dr. MUKUNDA MADHAVA SHARMA

चौखम्भा ओरियन्टालिया


प्राच्यविद्या तथा दुर्लभ ग्रन्थों के प्रकाशक एवं विक्रेता

वाराणसी दिल्ली

॥ श्रीः ॥

चौखम्भा प्राच्यविद्या ग्रन्थमाला

१२



"भारतसर्वकारस्य शिक्षा-समाजकल्याणमन्त्रालयस्यार्थिक-
सहाय्येन प्रकाशिता"

व्यञ्जनाप्रपञ्चसमीक्षा

(तुलनात्मकप्रतीकतत्त्वविमर्शः)

लेखकः

डा० मुकुन्दमाधवशर्मा

एम० ए०, पी-एच० डी०, डी० लिट्०, काव्यतीर्थः,
गुवाहाटीविश्वविद्यालयीयसुरवाग्विभागे प्रफेसराह्वः प्रधानः



चौखम्भा ओरियन्टालिया
प्राच्यविद्या एवं दुर्लभ ग्रन्थों के प्रकाशक तथा विक्रेता
वाराणसी दिल्ली

प्रकाशक

चौखम्भा ओरियन्टालिया

पो० आ० चौखम्भा, पो० बाक्स नं० ३२

गोकुल भवन, के. ३७/१०९, गोपाल मन्दिर लेन

वाराणसी–२२१००१ (भारत)

टेलीफोन : ५२९३९ टेलीग्राम : गोकुलोत्सव

शाखा—बंगलो रोड, ९ यू० बी० जवाहर नगर

दिल्ली–११०००७

© चौखम्भा ओरियन्टालिया

प्रथम संस्करण १९७९

अन्य प्राप्तिस्थान

चौखम्भा विश्वभारती

पो० बाक्स नं० १३९

चौक (चित्रा सिनेमा के सामने)

वाराणसी

फोन : ६५४४४

CHAUKHAMBHA PRACHYAVIDYA SERIES
No. 12

Published with financial assistance from the Ministry of Education and Social Welfare, Government of India

VYAÑJANĀPRAPAÑCASAMĪKṢĀ

('A CRITIQUE ON COMPARATIVE SYMBOLISM)

By
Dr. MUKUNDA MADHAVA SHARMA
M. A., Ph. D., D. Litt., Kāvyatīrtha
Professor and Head of the Department of Sanskrit,
Gauhati University

CHAUKHAMBHA ORIENTALIA
A House of Oriental and Antiquarian Books
VARANASI DELHI

Publishers

CHAUKHAMBHA ORIENTALIA

P. O. Chaukhambha, Post Box No. 32

Gokul Bhawan, K. 37/109, Gopal Mandir Lane

VARANASI-221001 (India)

Telephone : 52939 Telegram : Gokulotsav

Branch—Bungalow Road, 9 U. B. Jawahar Nagar,

DELHI-110007

© *Chaukhambha Orientalia*

First Edition 1979

Printers—Vidya Vilas Press, Varanasi.

समर्पणम्

ग्रन्थकृदिष्टदेवतास्वरूपाणां परमाराध्यचरणानां

डा० वी० राघवन्-महोदयानां

सपर्याविधानार्थं सश्रद्धं

सबहुमानं समर्पितोऽयं

ग्रन्थः ।



भूमिका

अस्य प्रस्तूयमानस्य ग्रन्थस्यादौ भूमिकेयमवतार्यते। परन्तु येयं भूमिका सर्वाग्रमेव प्रतन्यते सा खलु समग्रस्यापि ग्रन्थस्य विरचनं परिसमाप्यैव विरच्यत इति नितरामेव चित्रम्। किन्तु इयमेव विश्वप्रपञ्चस्यैव रीतिरिति कुतोऽस्या निष्कृतिः। तथा हि समग्रोऽपि विश्वप्रपञ्च एकस्यैव परमात्मतत्त्वस्य विजृम्भितम्। तच्च तत्त्वमादावन्ते च सममेव वरीवृत्यते। चिरन्तनपरमात्मतत्त्वापेक्षया आद्यन्तविभागोऽपि औपाधिक एव। यदेवादि तदेवान्तम्। आह च भगवान् श्रीकृष्णः—सर्गाणामादिरन्तश्च मध्यं चैवाहमर्जुन—(गीता-१०-३२) इति। एतदपि च तत्त्वमस्मिन्नेव ग्रन्थे प्रतिपाद्यते यत् संसार एव मोक्षस्यांकुरः, सृष्टिक्रम एव लयक्रमस्य सद्भाव इति (पृ० २४३)। लयेनैव च सृष्टिक्रमस्य सूचना भवति, यतो हि सृष्टिलयाभ्यामेव संसारचक्रं प्रवर्तते (पृ० २४४)। तस्य तावत् संसारचक्रस्यानाद्यनन्तप्रवाहे नास्त्येव आद्यन्तविचारावकाशः। अत एवेयं भूमिकापि आदौ स्थापिताप्यन्ते विनिर्माणमर्हति, अन्ते विनिर्मिताप्यादौ स्थापनमर्हति। किञ्च, प्रतिपादयिष्यमाणेन—विन्दावेव विश्वप्रपञ्चस्य सम्भावना (पृ० २२७)। इति न्यायेन भूमिका एव प्रतिपादयिष्यमाणस्य समग्रस्यापि व्यञ्जनादर्शनस्य सूचनार्थमस्तीति समुन्नेयम्। किञ्च, व्यञ्जनाप्रपञ्चसमीक्षाक्रमेण ब्रह्माण्डपिण्डाण्डयोरभेद एव विश्वप्रपञ्चस्य मूलमिति दर्शयिष्यते। तेनैव क्रमेणादावुपलभ्यमानाया भूमिकाया अपि ग्रन्थस्यांकुररूपत्वेन समग्रेण निबन्धेन अभेद एव। एवमेव समग्रस्यापि विश्वप्रपञ्चस्य विभिन्नवस्तूनां परमात्मतत्त्वेनाभेदस्तथा परस्परमप्यभेद एव। एतदेव सारूप्यतत्त्वं व्यञ्जनातत्त्वस्यापि मूलम् (पृ० २२९)। किञ्च, एकमेव मूलं दर्शनं सर्वत्राप्यनुषक्तमस्तीति कृत्वा ध्वनितत्त्व-रसतत्त्व-स्फोटतत्त्व-प्रतीकतत्त्वोपासनातत्त्वादिकानामप्यभेद एवेत्यस्मिन् ग्रंथे यथामति यथासाध्यं प्रदर्शयिष्यते। प्रथमतस्तु केवलं शब्दव्यापाररूपाया एव व्यञ्जनायाः स्वरूपमनुसन्धायान्ततो गत्वा गुरुजनशुभाशंसनानुगृहीतमानसेनैव तत्सारूप्यदर्शनमहमधिगतवान् इति प्रथमत एव विनिवेद्यमस्ति। तस्य च चिन्तारत्नराज्यस्य मार्गणे कथमहं गुरुवर्यैर्नियोजित इति तदपि समासेन विज्ञापयामि।

ग्रन्थस्य विरचनार्थं सर्वप्राथम्येनास्मद्गुरुवर्यैः स्वर्गीयाध्यापकनरेन्द्रचन्द्रवेदान्ततीर्थैस्तथा परमाराध्यपादैः श्रीमद्भिः डा० सातकडिमुखोपाध्याय-डॉ० सितांशुशेखरवागची-डॉ० अमियकुमारचक्रवर्तिप्रमुखैरहं विशेषभावेन

समुत्साहित आसम्। व्यञ्जनातत्त्वमेवाधिकृत्य कश्चन शोधग्रन्थो मया विरचनीय इति विशेषनिर्देशस्तु परमपूज्यचरणैरस्मद्गुरुभिः साम्प्रतं स्वर्गतैः डा० कान्तिचन्द्रपाण्डेयमहोदयैरेव प्रदत्तः। १९६७ तमे खिस्ताब्दे ग्रन्थविनिर्माणस्य प्रारम्भिकदशायामसमसंस्कृतसमितेर्वार्षिकसमावर्तनस्य महोपदेशकरूपेणासमप्रदेशमागत्य गुवाहाटीविश्वविद्यालयनगर्यामस्मदुदवसित एव कृपापूर्वकमावासं कल्पयद्भिरस्मद्गुरुवर्यैः डा० कृष्णगोपालगोस्वामि-महोदयैरपि ग्रन्थविरचनशैलीं प्रशंसद्भिरहं नितरां समुत्साहितः। तदनु तस्यैवाब्दस्याक्टूबरमासे ग्रन्थस्य प्राथमिकलेखं परिसमाप्य पश्चिमवंगदेशस्य वीरभूममण्डलस्य अस्मद्गुरुवर्यैः स्वावस्थित्या तीर्थक्षेत्रतां नीतं स्वनामधन्यं रातमाग्राममहमगच्छम्। तत्र च न केवलं पञ्च दिवसानि पूज्यचरणानां डा० सातकडिमुखोपाध्यायमहोदयानां स्वभवनमन्दिर एव सविधपरिसर्पणसुख-सौभाग्यमेवान्वभवमपि तु ग्रन्थस्यांशविशेषांस्तेषां सविधे वाचयित्वा महार्हमनन्यसम्भवमुपदेशसन्दोहमप्यहमाप्नवम्। परमश्रद्धाभाजनैः लखनऊ-विश्वविद्यालयस्यावसरप्राप्तैरुपाचार्यैः के. ए. सुब्रह्मण्य आयारमहोदयैर-प्युपदेशविशेषेणाहमधमर्णतां नीतः। एषां सर्वेषामपि पुण्यश्लोकानां विद्वद-पश्चिमानां चरणारविन्देषु भक्तिविगलितहृदयेन मदीयामपारां कृतज्ञतां विज्ञापयामि।

अस्य ग्रन्थस्य विनिर्माणविधौ अनुशीलनीयग्रन्थक्रयार्थं भ्रमणव्ययार्थञ्च सहस्ररूप्यकपरिमितेन द्रविणेन विश्वविद्यालयानुदानायोगेनानल्पमानुकूल्यं विहितमिति हेतोरनुदानायोगकर्तृपक्षेभ्योऽपि आन्तरिकीं कृतज्ञतां ज्ञापयामि।

किञ्चास्य ग्रन्थस्य प्रकाशनार्थं भारतसर्वकारस्य शिक्षा तथा समाज-कल्याणमन्त्रालयेन मुद्रणव्ययार्धवहनेन वित्तीयसहायता विधीयते। अतस्तन्मन्त्रालयकर्तृपक्षेभ्योऽपि सश्रद्धं कृतज्ञतां विज्ञापयामि। ग्रन्थस्यास्य प्रकाशनविधावानुकूल्यप्रदर्शनेन चौखम्भा ओरियन्टालीयाकर्तृपक्षाः विशेष-भावेनास्माकं धन्यवादमर्हन्ति।

शोधग्रन्थपरीक्षकाणां परमाराध्यचरणानां गुरुरूपेणास्माभिस्सदैव नमस्कृतानां डा० वी० राघवन महोदयानामुपदेशमनुसृत्य साम्प्रतं ग्रन्थोऽयं पूर्वमीमांसोत्तरमीमांसारूपेण द्विधा विभक्तो वर्तते। आशास्ये यदस्य विभाग-प्रकारस्य तात्पर्यं वाचकमहाभागेषु स्वबदातं स्यात्।

एवंविधासु भूमिकासु साधारणतोऽन्यद् यद्यदपेक्ष्यते तत्तत्सर्वमपि प्रायशः प्रथमदर्शन आमुख एव प्रतिपादितमस्तीत्यत्रैव विरम्यते। इति

१ माघे
वि० सं० २०३५

विदुषां विधेयः—
मुकुन्दमाधवशर्मा

सूचीपत्रम्

विषयः पृष्ठांकः

पूर्वमीमांसा

प्रथमं दर्शनम् १–२६

आमुखम् ... १

मंगलाचरणम् ... ,,

अनुबन्धचतुष्टयम् ... १३

प्रयोजनविवेकः ... १८

संस्कृतभाषाव्यवहारकारणानि ... १९

अधिकारिनिरूपणम् ... २३

सम्बन्धविनिश्चयः ... २४

किञ्चिन् नम्रनिवेदनम् ... २५

द्वितीयं दर्शनम् २७–१४५

व्यञ्जनास्वरूपनिरूपणम् ... २७

भामहस्य काव्यालङ्कारे प्रतीयमानार्थपरामर्शः ... ३१

दण्डिनः काव्यादर्शे प्रतीयमानार्थपरामर्शः ... ३२

उपमायां सादृश्यस्य प्रतीयमानत्वप्रसङ्गः ... ३३

काव्यादर्शे अन्येऽपि प्रतीयमानार्थपरामर्शाः ... ३७

भट्टोद्भटस्य काव्यालङ्कारसारसंग्रहे प्रतीयमानार्थस्योल्लेखः ३८

गौणवृत्तेरुल्लेखः ... ४१

वामनस्य प्रतीयमानार्थपरामर्शः ... ४१

रुद्रटस्य काव्यालङ्कारे व्यञ्जनापरामर्शः ... ४२

व्यंग्यार्थस्य त्रैरूप्यम् ... ४४

अभिव्यज्यतेपदस्य पर्यायाः ... ४७

रसस्य काव्यार्थत्वे तथा व्यञ्जनायाः
स्वरूपनिरूपणे पूर्वपरम्परानुसन्धानम् ... ४९

मुनिप्रदत्तषाडवरसदृष्टान्तविमर्शः ... ५०

व्यञ्जनाव्यापारपरामर्शः ... ५४

शक्तिव्यापारवृत्तिप्रभृतिपदानां तात्पर्यम् ... ५४

ध्वन्यालोके वृत्त्यादिपदतात्पर्यम् ... ६२

व्यञ्जनाव्यापारस्वीकारे आनन्दवर्धनस्य वाचोयुक्तिः
तत्राभिधाव्यञ्जनयोर्भेदः ... ६३
प्रसंगतस्तात्पर्यशक्तिस्वरूपविमर्शः ... ६४
लक्षणाव्यञ्जनयोर्भेदः ... ६७
मीमांसकदृष्ट्या व्यञ्जनाव्यापारसमीक्षा ... ७१
व्याच्यार्थं प्रति शब्दस्य व्यञ्जकत्वम् ... ७४
शब्दस्य वाच्यव्यञ्जकत्वे पाश्चात्यानां संवादः ... ७६
व्याकरणशास्त्रे व्यञ्जनाप्रपञ्चः ... ७८
स्फोटस्वरूपविमर्शः ... ८०
काव्यप्रकारेण ध्वनिना स्फोटतत्त्वस्य सम्बन्धः ... ८६
व्याकरणशास्त्रे व्यञ्जनाव्यापारस्वीकारः ... ९८
निपातार्थविचारः—निरुक्ते निपातप्रसंगः ... ९९
निपातानां द्योतकत्वस्य स्वरूपनिर्वचनम् ... १०५
कर्मप्रवचनीयस्य द्योतकत्वम् ... १०८
व्याकरणशास्त्रे व्यञ्जनास्वरूपम् ... ११०
नैयायिकदृष्ट्या व्यञ्जनाव्यापारसमीक्षा ... ११७
आनन्दवर्धनमते अनुमानाभिव्यञ्जनयोर्भेदः ... ११८
व्यक्तिविवेककारवचोविवेचनम् ... १२२
महिमभट्टानुमतव्यक्तिलक्षणविमर्शः ... १२९
महिमभट्टप्रदर्शिताभिव्यक्तिप्रकाराणां बीजम् ... १३२
आनन्दवर्धनाभिमतव्यक्तिस्वरूपपरिष्करणम् ... १३७
इन्द्रचापाभिव्यक्तेर्वैशिष्ट्यम् ... १३८
धनिकस्य मतेऽभिव्यक्तिस्वरूपम् ... १३९
अर्थापत्यभिव्यञ्जनयोस्सम्बन्धः ... १३९
श्रुतार्थापत्तिस्वरूपविवेचनम् ... १४१
भोजराजमते श्रुतार्थापत्तेः स्वरूपम् ... १४२
अर्थापत्तिव्यञ्जनयोर्विशेषः ... १४४

तृतीयं दर्शनम् १४६–२०३

वाग्व्यवहारे व्यञ्जनायाः प्रयोगः ... १४६
व्यंग्यार्थप्रशंसा ... १४६
वैदग्ध्यप्रशंसा ... १४९
वैदिकवाङ्मये अभिव्यञ्जना ... १५०
वेदेषु समाधिभाषा ... १५७

उपनिषदि व्यंग्यार्थप्राधान्यम् ... १५६
रूपककथायाः स्वरूपम् ... १६०
मन्त्रब्राह्मणयोर्व्यंग्यार्थविमर्शः ... १६४
लौकिकवाक्येषु निन्दाप्रशंसे ... १६७
लौकिकवाग्व्यवहारे अर्धाक्षरभणितानि ... १६६
ग्रन्थनामानां व्यञ्जकत्वम् ... १७२
नान्दीश्लोकस्याभिव्यञ्जकत्वम् ... १७६
स्वकीयकृतिस्तुतेरभिव्यञ्जनम् ... १७६
महाकाव्यप्रारम्भे वस्तुनिर्देशः ... १८०
नान्दीश्लोकतः प्रस्तावनादिकम् ... १८२
रूपकेषु पताकास्थानकादिकम् ... १८३
आय्रणितत्त्वस्य वैशिष्ट्यम् ... १८५
वाग्व्यवहारे काकोरभिव्यञ्जकत्वम् ... १८८
अनुकारशब्दस्याभिव्यञ्जकत्वम् ... १६१
काव्ये विभावादिसमाक्षेपः ... १६२
दृश्यकाव्येषु वास्तविकं तथा क्रियात्मकं प्रतीकम् ... १६५
आधुनिकपाश्चात्त्यनाटकेषु प्रतीकात्मकत्वम् ... १६७
नवीनकाव्येष्वभिव्यञ्जना ... १६८
अभिधानादभिव्यञ्जनं प्रति ... २००

उत्तरमीमांसा

चतुर्थं दर्शनम् २०४–२५०

भारतीयप्रतीकवादस्य ऐतिह्यम् ... २०४
परब्रह्मतत्त्वस्य प्रतीकेन प्रकाशनम् ... २०४
प्रतीकोपासनाया उपयोगित्वम् ... २०५
ब्रह्मणः सर्वव्यापकत्वे प्रतीकोपासनाया युक्तियुक्तता ... २०८
न प्रतीके न हि सः ... २१०
परब्रह्मणो देवताभिः सम्बन्धः ... २१३
प्रतीकस्यापि प्रतीकम् ... २१६
मन्त्र-यन्त्र-मुद्राप्रभृतीनां प्रतीकत्वम् ... २१८
समासेन यन्त्ररहस्यम् ... २२१
श्रीयन्त्ररहस्यम् ... २२३
रत्नद्वीपप्रतीकरहस्यम् ... २२७

मुद्रादिपञ्चमकारतत्त्वम् ... २३०
चर्यापदादिषु प्रतीकप्रयोगः ... २३२
पूजादिकर्मसु प्रतीकप्रयोगः ... २३५
देवालयस्य प्रतीकरूपता ... २३६
पताकारहस्यम् ... २३८
मन्दिरगात्रप्रत्युप्तानां मूर्तीनां तात्पर्यम् ... २४२
नटराजमूर्तितात्पर्यम् ... २४४
रसतत्त्वोपासनातत्त्वयोः सम्बन्धः ... २४६
भारतीयचित्रकलाया अभिव्यञ्जनासामर्थ्यम् ... २४७
न हि संगीतात् परा विद्या ... २४८

पञ्चमं दर्शनम् २५१–२७६

पाश्चात्त्य प्रतीकवादस्य ऐतिह्यम् ... २५१
सिम्बलिजिम्तत्त्वस्य स्वरूपम् ... २५१
मालार्मेमतपरामर्शः ... २५३
प्रतीकवादिनामभिव्यञ्जनावादित्वे कारणम् ... २५६
बौड्लेयार्मतस्य पृष्ठभूमिः—एद्गार् एल् एन् पो २५७
उइलियाम् बाट्लार येट्स् ... २५८
आर् जि कलिङ् उद् ... २६०
प्रतीकवादानुषक्तं दर्शनम् ... २६१
प्रतिभादर्शनम् ... २६२
मध्ययुगीयख्रिस्तीयधर्मव्यवस्थायां प्रतीकव्यवहारः ... २६५
प्लटिनास्महोदयस्य नव्यप्लेटनिक्मतवादः ... २६८
सिंहावलोकनेन भारतीयप्रतिभातत्त्वस्य परामर्शः ... २७०

षष्ठं दर्शनम् २७७–२८६

विश्वप्रपञ्चस्य व्यञ्जनाप्रपञ्चत्वम् ... २७७
विश्वप्रपञ्चस्य प्रतीकरूपत्वम् ... २७७
सारूप्यादेव हृदयसंवादः ... २७९
रूपं रूपं प्रतिरूपो बभूव ... २८०
रूपारूपस्वरूपोपलब्धये ज्ञानविज्ञानदृष्टिः ... २८१
ब्रह्मप्रपञ्चयोः सम्बन्धः ... २८२
विश्वप्रपञ्च एव व्यञ्जनाप्रपञ्चः ... २८४
अनुशीलितग्रन्थपञ्जी ... २८७–२९५

संकेतसूचिका

अ. भा.	अभिनवभारती
अ. वे.	अथर्ववेद
ऋ. सं.	ऋग्वेदसंहिता
ऐ. ब्रा.	ऐतरेयब्राह्मणम्
कठ.	कठोपनिषद्
का. द.	काव्यादर्शः
का. प्र.	काव्यप्रकाशः
का. लं.	काव्यालंकारः
का. सा. सं.	काव्यालंकारसारसंग्रहः
का. सू. वृ.	काव्यालंकारसूत्रवृत्तिः
खि.	खिस्ताब्दः
गा. स.	गाथासप्तशती
चर्या. सं.	चर्यापदसंख्या
चौ. सं. सि.	चौखम्बा संस्कृत सिरीज
छा. उ.	छान्दोग्योपनिषद्
जै. सू.	जैमिनिसूत्रम्
तु.	तुलनीयम्
तै. ब्रा.	तैत्तिरीयब्राह्मणम्
तै. सं.	तैत्तिरीयसंहिता
ध्व.	ध्वन्यालोकः
ना. शा.	नाटचशास्त्रम्
नृ. ता. उ.	नृसिंहतापनी उपनिषद्
प. ल. म.	परमलघुमञ्जूषा
पा.	पाणिनीयसूत्रम्
पृ.	पृष्ठसंख्या
प्र. वा.	प्रमाणवार्तिकम्
भा.	भागवतपुराणम्
भा. प.	भाषापरिच्छेदः
भामह का. लं.	भामहकृतः काव्यालंकारः

मु. उ.	मुण्डकोपनिषद्
मी. सू.	मीमांसासूत्रम्
रु. का. लं.	रुद्रटकृतः काव्यालंकारः
वा. प.	वाक्यपदीयम्
वेणी.	वेणीसंहारः
वे. सू.	वेदान्तसूत्रम्
व्य. वि.	व्यक्तिविवेकः
व्य. वि. वि.	व्यक्तिविवेकविमर्शः
श. ब्रा.	शतपथब्राह्मणम्
शाकु.	अभिज्ञानशाकुन्तलम्
शा. भा-	शाबरभाष्यम्
श्लो. वा.	श्लोकवार्तिकम्
श्वे. उ.	श्वेताश्वतरोपनिषद्
सं.	संस्करणम्
सं. सि. आफिस	—संस्कृत सिरीज आफिस्
सा. का.	सांख्यकारिका
सा. द.	साहित्यदर्पणम्
सा. सू.	सांख्यसूत्रम्
सू.	सूत्रसंख्या
हि. सं.	हिन्दीसंस्करणम्

A. E. = Aesthetic Experience According to Abhinavagupta

Lit. Crit = Literary Criticism : A Short History

Significance of prefixes = The Significance of Prefixes in Sanskrit Philosophical Terminology

Symbolism = Myths and Symbols in Indian Art and Civilization

॥ श्रीः ॥

व्यञ्जनाप्रपञ्चसमीक्षा

प्रथमं दर्शनम्

आमुखम्

ओं अग्निमीले पुरोहितं यज्ञस्य देवमृत्विजम् ।
होतारं रत्नधातमम् ॥ (ऋ० सं० १-१-१)

अनेन ऋङ्मन्त्रेण ग्रन्थप्रारम्भे मंगलाचरणं विधीयते सर्वथा शिष्टाचारबोधितत्वात्[1] गुरूपदेशादात्मनश्च मंगलाचरणे निरतिशयविश्वासयुक्तत्वात्। 'प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तत' इति न्यायानुसारं **भाषापरिच्छेदादिषु** ग्रन्थेषु मंगलस्य सार्थक्यं बाहुल्येन विचारितम्। उक्तं च **भाषापरिच्छेदे मुक्तावल्यां** मंगलं न विघ्नध्वंसं प्रति कारणं न चाऽपि ग्रन्थपरिसमाप्तिं प्रतीत्याशंक्य मंगलं विघ्नविघाताय ग्रन्थपरिसमाप्तिश्चादृष्टादिकारणकलापादिति सिद्धान्तितम्। यथा तथा वास्तु इयं शास्त्रयुक्तिः, अस्माकन्तु सर्वेषामपि हृदये मंगलाचरणं प्रति स्वाभाविकी काचन महती श्रद्धा वर्तत इति न केनचिदपलपितुं शक्यते। सर्वैरपि शिष्टजनैः सर्वेषु देशेषु सर्वकालेषु स्वस्वविशेषकर्मप्रारम्भे किञ्चिन्मंगलमनुष्ठीयते स्वतः प्रणोदिततयैव। तेषु तेषु जनेषु केवलं मंगलाचरणविधिरेव भिद्यते न तु मंगलाचरणस्यान्तर्निहितं तत्त्वम्। ये तावद् धर्मभावापन्नास्ते स्वकीयामिष्टदेवतां स्तुवन्ति। ये च धर्मनिरपेक्षास्तेपि इष्टदेवताविशेषसपर्यां विनैव मांगलिकघण्टावादनादिकर्मभिर्मंगलमाचरन्ति। तद्यथा क्रीडामहोत्सवविशेषानुष्ठानप्रारम्भे अखण्डज्योतिःसूचकः (आंगलभाषायाम् ओलिम्पिक् फ्लेम् इत्युक्तः) प्रदीपः प्रज्वाल्यते। अथ ये चापि नियमेनैव नास्तिकास्तेपि प्रकारान्तरेण मंगलमनुतिष्ठन्ति। तद्यथा सोभियेतदेशीयाः कम्युनिष्टमतावलम्बिनोऽपि नास्तिकाः

---

१. 'अविगीतशिष्टाचारविषयत्वेन मंगलस्य सफलत्वे सिद्धे' इत्यादिकं सिद्धान्तमुक्तावल्यामवलोकनीयम्। 'मंगलाचरणे शिष्टाचारात् फलदर्शनात् श्रुतितश्चेति' (सांख्यदर्शनम्, ५-१) इत्यादिकमप्यत्रावलोकनीयम्।

सभासमारोहादिप्रारम्भे प्रायशः शान्तिप्रतीकभूतस्य शुभ्रपारावतयुगलस्य वियति उन्मोचनेन मंगलाचरणं कुर्वन्ति । एवं चास्तिकनास्तिकतटस्थरूपाणां त्रिविधानामपि मनुजानां कृते मंगलं किञ्चिदस्त्येव । यद्यपि च मंगलेन विघ्नविघातो जायत इति न्यायवैशेषिकमते सिद्धान्तितं तथापि नास्तिकादीनामपि मंगलाचरणदर्शनेनास्माभिर्मंगलाचरणस्योपयोगित्वं साधारण्येनैवं कल्प्यते यत् मंगलाचरणेन विघ्नशंकासहितानां तथा विघ्नशंकारहितानामपि मनसि कोऽपि नवीनोद्यम आविर्भवति येन च प्रारब्धकर्मणि स्वत एव साफल्यं सम्भवति । मंगलाचरणे इष्टदेवतास्तवनेन हृदि देवतानुग्रहरूपामतिरिक्तशक्तिमेवाऽकलयति धार्मिकः । धर्मनिरपेक्षभावेन चानुष्ठितेषु मंगलेषु मांगलिकानां शोभनपदार्थानां दर्शनेन मनसि कल्पनया वा यावानाह्लाद उपजायते स एव नवीनोत्साहबीजम् । कस्यचन पदार्थस्य दर्शने वस्तुतस्तस्य स्वरूपमेव मनसि सन्धार्यते प्रत्यक्षे 'केदारकुल्या'-न्यायेन चेतसस्तदाकारप्राप्तेरिति वेदान्तदर्शनादिषु[1] प्रतिपादितत्वात् । एवं च वस्तुतो दर्शनकल्पनयोरभेद एव । अत एव—

धेनुर्वत्सप्रयुक्ता वृषगजतुरगा दक्षिणावर्तवह्नि-
र्दिव्यस्त्रीपूर्णकुम्भा[2] द्विजनृपगणिकापुष्पमालापताकाः ।
सद्योमांसं घृतं वा दधि मधु रजतं काञ्चनं शुक्लधान्यं
दृष्ट्वा श्रुत्वा पठित्वा फलमिह लभते मानवो गन्तुकामः ॥

---

१. 'तत्र यथा तडागोदकं छिद्रान्निर्गत्य कुल्यात्मना केदारान् प्रविश्य तद्वदेवचतुष्कोणाद्याकारं भवति, तथा तैजसमन्तःकरणमपि चक्षुरादिद्वारा निर्गत्य घटादिविषयदेशं गत्वा घटादिविषयाकारेण परिणमते, स एव परिणामो वृत्तिरित्युच्यते ।'''तथा च अयं घट इत्यादिप्रत्यक्षस्थले घटादेस्तदाकारवृत्तेश्च बहिरेकत्र देशे समवस्थानात्तदुभयावच्छिन्नं चैतन्यमेकमेव, विभाजकयोरप्यन्तःकरणवृत्तिघटादिविषययोरेकदेशस्थत्वेन भेदाजनकत्वाद् ।' इत्यादिकं वेदान्तपरिभाषायां प्रत्यक्षपरिच्छेदे द्रष्टव्यम् । 'इन्द्रियप्रणालिकया चित्तस्य बाह्यवस्तूपरागात्तद्विषया सामान्यविशेषात्मनोऽर्थस्य विशेषावधारणप्रधाना वृत्तिः प्रत्यक्षं प्रमाणम्' । (योगसूत्रभाष्यम्, १·७) इत्यप्यत्रावलोकनीयम् ।

२. तुलनीयः—"शुकं पिकं पूर्णघटं तुरङ्गमं द्विपं प्रदीपं पतिपुत्रिणीं सतीम् ।
सजीवमत्स्यं चटचाटकादिकं ददर्श रामो जयसूचकं शुभम् ॥"
इति श्रीकविसूर्यविरचिते विघ्नेशजन्मोदयनाटके तृतीयाङ्के एकविंशतिसंख्यकः श्लोकः ।
(Vide S. N. Sarma, *Rūpakatrayam*)

इत्यभियुक्तस्य मंगलोपदेशकग्रन्थे दर्शनश्रवणपठनानां समबलत्वं सूचितम्। श्रवणपठनयोश्च कल्पनास्थानीयत्वमित्यवदातम्। अस्मिन्नेव च ग्रन्थे इष्टदेवतास्तुतिं विनैव कथं मंगलमाचरितुं शक्यते तदपि सूचितम्। धेनुर्वत्सप्रयुक्ता इत्येवं तस्मिन् ग्रन्थे उल्लिखितानां धेनुप्रभृतीनां मंगलात्मकत्वं निर्विवादं येन तेषां मनसि चिन्तनमपि फललाभसूचकं भवति। अनेनैव न्यायेन मंगलार्थं विहिते नान्दीश्लोके मंगलसूचकानां पदानां प्रयोग उपदिश्यते यथा—

मांगल्यशंखचन्द्राब्जकोककैरवशंसिनी।
पदैर्युक्ता द्वादशभिरष्टाभिर्वा पदैरुत॥

(**साहित्यदर्पणम्**, ६–२५) इति।

एवं तर्हि सर्वकर्मप्रारम्भ एव यन्मंगलमनुष्ठीयते तन्मंगलं भाविनि काले विघ्नहानिस्तथा फललाभः स्याताम् इति सूचयति। परन्तु इयं सूचना नानुमानात्मिका। मांगल्ययुक्तान् पदार्थान् पश्यतः शृण्वतः पठतश्च जनस्य मनसि आविर्भूयमाना नवीना स्फुर्तिर्नानुमानेनेच्छापूर्वकतयोपलभ्यते परन्तु स्वतस्स्फुर्तभावेन हृदि आविर्भवति। सेयं स्वतस्फुर्तिः प्रदीपद्वारेण घटस्य यथा प्रकाशः अथवा विभावादिभिः सहृदयहृदये रसस्य यथाऽभिव्यञ्जनं तथा सती व्यञ्जनातो न भिद्यते। तटस्थनास्तिकाभ्यामुपयुज्यमानं प्रदीपपारावतयुगलादिकमपि सर्वथाभीष्टसाफल्यप्रतीकभूततया सार्थकत्वेनाभिव्यञ्जकमेव। प्रतीकभूतश्च प्रतिनिधिः सर्वथा मूलवस्तुनोऽभिव्यञ्जक एवेति यथास्थानं सोपस्तम्भं प्रतिपादयिष्यते। अत्र मंगलवाक्यत्वेनोपन्यस्तः अग्निमीलेति ऋङ्मन्त्रोऽपि बहुतरानर्थानभिव्यनक्ति। अयं च मन्त्रः **ऋग्वेदस्य** प्रथममण्डलस्य प्रथमसूक्ते प्रथमा ऋक्। **ऋग्वेदश्च** पृथिव्यामुपलभ्यमानेषु ग्रन्थेषु सर्वप्राचीनः गभीरतमतत्त्वार्थसंवलितत्वेन तथा काव्यीयसौन्दर्यसमन्वितत्वेन च नितरां परां काष्ठामधिरूढः पाश्चात्यानामपि महत्तमां श्रद्धां लभते। **ऋग्वेद** एव न केवलं भारतीयानामपि तु सकलानामेव मनुजानां प्राचीनतममैतिह्यमावहति। तत्र पुनरियमेकैव ऋगेवं बहुतरार्थाभिव्यञ्जकत्वेनानल्पगौरवस्थानभूतं वैदिकवाङ्मयगतप्रतीकसमुत्कर्षं द्योतयति प्रकामम्। तन्मन्त्रस्यैव सर्वप्राथम्येन पठनेन वैदिकवाङ्मयगतगौरवस्य धारका बाहकाश्च येऽस्मत्पूर्वजा मनुजास्तेऽपि अत्र व्यञ्जनादर्शनात्मकग्रन्थप्रारम्भे सबहुमानं स्मर्यन्ते।

किंच सर्वेष्वपि लभ्यमानेषु ग्रन्थेषु कालिकसर्वप्राथम्यं समश्नुते वेद एव। अभ्यर्हितं पूर्वमिति न्यायेन कालिकप्राथम्यवत एवाभ्यर्हितत्वम्। वेदेषु च सर्वत्र सर्वप्राथम्येन ऋग्वेद एवाम्नायते। एतच्च ऋग्वेदस्य प्राथम्यं सायणेन

ऋग्वेदभाष्योपक्रमणिकायां सुनिपुणमुपस्थापितम् । तथा हि 'प्राथम्यं पुरुषसूक्ते विस्पष्टम्—

तस्माद् यज्ञात् सर्वहुतः ऋचः सामानि जज्ञिरे।
छन्दांसि जज्ञिरे तस्माद् यजुस्तस्मादजायत ॥
(**ऋग्वेदः** १०-९०-९) इति ।'

पुनरप्यभिहितं सायणेन—"न केवलम् ऋचां पाठप्राथम्येन अभ्यर्हितत्वं किन्तु यज्ञांगदाढर्च्यहेतुत्वादपि ।

तथा च तैत्तिरीया आमनन्ति—

'यद् वै यज्ञस्य साम्ना यजुषा क्रियते शिथिलं तद् । यद् ऋचा तद् दृढम् ।'
(तै० सं० ६-५-१०-३) इति ।"

उपनिषद्वाक्येष्वपि ऋग्वेदस्य प्राथम्येन नामोल्लेखस्तस्याभ्यर्हितत्वमेवाभिव्यनक्ति । तथा हि—

"छान्दोगाश्च प्राथम्ये सनत्कुमारं प्रति नारदवाक्यमेवमामनन्ति—ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणं चतुर्थम् (**छा० उ०** ७-१-२) इति । मुण्डकोपनिषद्यप्येवमाम्नायते—'ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः' (**मु० उ०** १-१-५) इति ।

"तापनीयोपनिषद्यपि मन्त्रराजपादेषु क्रमेणाध्ययनमेवमामनन्ति—'ऋग्यजुः सामार्थवाणश्चत्वारो वेदाः सांगाः सशाखाश्चत्वारः पादा भवन्ति' (**नृ० ता० उ०** १-२) इति ।"

एवं क्रमेणाभ्यर्हितस्य ऋग्वेदस्य तत्रापि चाभ्यर्हितस्य प्रथममन्त्रस्य मंगलवाक्यत्वेनोपयुज्यमानत्वात् प्रस्तुतग्रन्थस्यापि अभ्यर्हितत्वमाकलय्यते ।

अयं च अग्निमील इति मन्त्रः स्वयम् ओंकारेण प्रारभ्यते । ओंकारस्तु मंगलस्यापि मंगलस्वरूपः । ओंकारश्च न केवलम् अ-उ-म इति वर्णत्रयमेव बोधयति अपि तु तथाविधं महत्तरमर्थमभिव्यनक्ति यस्मिन् समग्रस्यापि वैदिकवाङ्मयस्य तत्त्वार्थोऽन्तर्निहितोऽस्ति । ओंकार एव कथमभिव्यञ्जकानाम् अन्यतमं प्रकृष्टं निदर्शनं भवतीत्यग्रे चतुर्थदर्शने दर्शयिष्यते ।

अग्निमील इति मन्त्रो यद् अ-कारेण प्रारभ्यत इति तदपि तात्पर्यपूर्णम् । संहितासु मन्त्राणां संकलनदशायामिच्छापूर्वकतयैव साभिप्रायमेव अ-कारेण प्रारब्धोऽयं मन्त्रः सर्वप्राथम्येन स्थापित इत्यस्माकं प्रतिभाति । तथा हि शब्दसंघातरूपोऽयं वेदराशिः । शब्दश्चाक्षरात्मकः । अक्षरेषु अ-कारः सर्वप्रथमः सर्वप्रधानभूतश्च । किं च ओंकारे विद्यमानानामक्षराणामप्यकार एव प्रथमः । अ-कार एव ब्रह्मविष्णोर्नामधेयम् । अपि च श्रूयमाणानां वर्णानां

सर्वप्राथम्येन कण्ठ एव स्फूर्तिर्भवति। तत एव श्रूयमाणेषु वर्णेषु कण्ठ्यवर्णा एव सर्वप्राधान्यं विगाहन्ते। 'अकुहविसर्जनीयानां कण्ठ' इति वैयाकरणवाक्य-निर्दिष्टदिशा तेष्वपि अ-कारः प्राथम्येनाम्नातः सर्वप्रधानः। भगवतापि गीतासु सार्थकभावेनोक्तम्—

अक्षराणामकारोऽस्मि द्वन्द्वः सामासिकस्य च।
अहमेवाक्षयः कालो धाताहं विश्वतोमुखः॥
(गीता, १०-३३)

अस्यायमाशयः। अक्षरेषु अहं (भगवान्) अ-कारः। समासेषूभयपदप्रधान-त्वाल्लक्ष्यार्थरहितत्वेन प्रधानो द्वन्द्वः। स चाप्यहमेव। अक्षयः कालः नित्यः सीमारहितोऽथ च संहर्तृरूपः कार्यजातानामेव साधारणकारणभूतः अहमेव। अहमेव च धाता चतुर्मुखो ब्रह्मा इति। अत्र द्वन्द्वेन न केवलं समासविशेष एव किन्तु समग्रस्यापि प्रपञ्चस्योभयप्राधान्येन द्वन्द्वरूपात्मकत्वमित्यपि सूच्यत इत्यस्माकं प्रतिभाति। प्रपञ्चस्य च क्षराक्षरशुभाशुभेत्यादिक्रमेण द्वन्द्वरूपा-त्मकत्वं यदस्ति तदग्रे यथास्थानं विशदीकरिष्यते। तथाप्यत्रैव प्रसंगतः **कालिकापुराणतः** स्मर्यते—

यो लोकमीशः सततं विभर्ति यः पालयत्यन्तकरस्तथान्ते।
इदं समस्तं भ्रममभ्रमं वा यदीयरूपं च नमोऽस्तु तस्मै॥

(कालिकापुराणम् १०-३४, चौखम्बासंस्करणे १०-३१) इति। व्यञ्जनवर्णानां नामतो निर्देशदशायामकारसाहचर्यं विना उच्चारणमेव न सम्भवति। तदेवं व्यञ्जनवर्णस्य स्वरूपाभिव्यक्तये अ-कार आवश्यकः। सति चैवं व्यञ्जनवर्णा अभिव्यञ्जनयोग्याः। अ-कारस्तु आलोकस्थानीयोऽ भिव्यञ्जक इत्येवंक्रमेणापि अ-कारस्य प्राधान्यमनपह्नवनीयमस्ति।

एवमेकस्याप्यक्षरमात्रस्य भूयान् व्यंग्यार्थ आविर्भवति। तदिमां व्यंग्यार्था-भिव्यञ्जनशक्तिमेव परामृश्य अक्षराणां नादब्रह्मरूपाणां शब्दानां च बलवत्त्वं स्वीकृतं भारतीयदार्शनिकैः विशेषतस्तु तान्त्रिकैः। पाश्चात्त्यदेशीयैरपि आधुनिककविभिरक्षराणामर्थनिरपेक्षरूपेणापि काचन प्रबला शक्तिर्वर्तत इति स्वीक्रियते। किं च भारतीयशास्त्रेष्वपि वर्णानां प्रातिस्विकभावेन शक्ति-विशेषाः स्वीक्रियन्ते। तत्रोदाहरणं यथा ष-कारस्य बलसूचकत्वम्। 'प्राणः ष-कारो यच्च बलं ण-कारः' इति विष्णुमित्रो वर्गद्वयवृत्तौ। षत्वे स्थैर्यं प्रतीयते। 'सेधतेर्गतौ' (पा० ८-३-११३) षत्वं न। अभिसेधयति गाः। परन्तु प्रतिषेधयति शिष्यम् अकार्यात्। अत्र गतिरोधो विवक्षितः। अतः

षत्वम् ।[1] उदाहरणं यथा ए-कारः । "अयं प्रत्यगात्मतां द्योतयति । 'सत्यमेव जयते नानृतम् ।', 'यदा पश्यः पश्यते रुक्मवर्णम् ।' (मुण्डक ३-१) ।

'टित आत्मनेपदानां टेरे' (पा० ३-४-७६)

यजति	यजते
अध्येति	अधीते
ददाति	दत्ते ।···

'तुमर्थे सेऽसेन्·····' इत्यादयः (पा० ३-४-६-११) ये प्रत्ययाः छन्दसि विहिताः ते ए-कारान्ताः ऐ-कारान्ता वा । जीवसे । पिबध्यै । कर्तवे । सूर्यं दृशे ।"[2]

ए-कारस्य तात्पर्यबाहुल्यं **शब्दकल्पद्रुमोद्धृते कामधेनुतन्त्रेऽपि यथा**—

"ए-कारं परमं दिव्यं ब्रह्मविष्णुशिवात्मकम् ।
रजनीकुसुमप्रख्यं पंचदेवमयं सदा ॥
पंचप्राणात्मकं वर्णं तथा विन्दुत्रयात्मकम् ।
चतुर्वर्गप्रदं देवि स्वयं परमकुण्डली ॥" इति ।

एतच्चाक्षरविषयकं व्यंग्यार्थतत्त्वं यथास्थानमग्रेऽपि विचारयिष्यते । परन्तु इदमत्रावधेयम् । अकारस्य यथा ब्रह्मविष्णुबोधकत्वं तथैवाग्निपदस्यापि देवतावाचकत्वमस्ति । वैदिककालादारभ्य आधुनिककालपर्यन्तं प्रायशः सर्वैरपि भारतीयग्रन्थ्यकृद्भिः देवतावाचकशब्दैरथवा भद्रादिवाचकशब्दैर्ग्रन्थ-प्रारम्भः क्रियते । उच्यते चाभियुक्तैः—

देवतावाचकाः शब्दाः ये च भद्रादिवाचकाः ।
ते सर्वे नैव निन्द्याः स्युर्लिपितो गणतोऽपि वा ॥

इति । एतत्समयानुसारं च भारविना स्वकीयं काव्यं देवतावाचकेन श्रीशब्देन प्रारब्धम् । प्रतिसर्गं सैव रीतिरनुसृता । प्रतिसर्गं चान्तिमे पद्ये देवतावाचकं लक्ष्मीपदं प्रयुक्तम् । तद्यथा 'श्रियः कुरूणाम्' इति प्रथमपद्यं **किरातार्जुनीयस्य** प्रथमे सर्गे ।

विधिसमयनियोगाद् दीप्तिसंहारजिह्मं
शिथिलवसुमगाधे भग्नमापत्पयोधौ ।
रिपुतिमिरमुदस्योदीयमानं दिनादौ
दिनकृतमिव लक्ष्मीस्त्वां समभ्येतु भूयः ॥ इति च प्रथमसर्ग-स्यान्तिमं पद्यं देवतावाचकलक्ष्मीपदसमन्वितम् ।

---

१. श्रीकृष्णस्वामिशर्मा, 'कतिपये शब्दवर्णाः', प्राच्यभारती, १-१, पृ० ३६.
२. तत्रैव

माघः खलु सम्पूर्णरूपेण भारविमेवानुसरति। तत्समानजातीयत्वेन भारविमप्यतिशेते। यत्र चाग्रजः 'श्रियः कुरूणाम्' इति पद्येन काव्यं प्रारभते तत्रानुजः माघः 'श्रियः पतिः श्रीमति शासितुं जगद्' इति पद्येन स्वीयां सरस्वतीमातनोति। प्रतिसर्गं प्रथमपद्यं श्रीशब्दसमन्वितं प्रतिसर्गं चान्तिममपि पद्यं श्रीशब्दसमन्वितमिति अहो पाटवमथच मंगलं प्रति दौर्बल्यपारवश्यं कवीनाम्।

न केवलं काव्येष्वेवेयं शैली। शास्त्रेष्वपि सैव रीतिः सादरमनुसृता। तथा हि पाणिनिना स्वीयं व्याकरणशास्त्रं भद्रवाचकेन वृद्धिशब्देन प्रारब्धम्। 'वृद्धिरादैच्' इति सूत्रस्यैवाष्टाध्याय्यां प्रथमाध्याये प्रथमपादे सर्वप्राथम्येन पठितत्वात्। उच्यते च महाभाष्यकारेण—'मंगलादीनि हि शास्त्राणि प्रथन्ते वीरपुरुषकाणि च भवन्त्यायुष्मत्पुरुषकाणि च, अध्येतारश्च वृद्धियुक्ता यथा स्युः' इति। (पा० १-१-१ इत्यत्र **महाभाष्यम्**)।

पुनर्महाभाष्य एव पस्पशायामप्यभ्यधायि 'सिद्धे शब्दार्थसम्बन्धे' इति सूत्रे आदौ नित्यार्थं सिद्धशब्दप्रयोगसार्थक्यमुपवर्णयता पतञ्जलिना यथा—

'किं पुर्नरनेन वर्ण्येन? किं न महता कण्ठेन नित्यशब्द एवोपात्तः, यस्मिन्नुपादीयमानेऽसन्देहः स्यात्?

मंगलार्थम्। मांगालिक आचार्यो महतः शास्त्रौघस्य मंगलार्थं सिद्धशब्दमादितः प्रयुङ्क्ते। मंगलादीनि हि शास्त्राणि प्रथन्ते वीरपुरुषाणि च भवन्त्यायुष्मत्पुरुषा च, अध्येतारश्च सिद्धार्था यथा स्युरिति।' (**महाभाष्यम्**, पस्पशा०, पृ० ५६)। पुनः पा० १-३-१ इति सूत्रस्य भाष्येऽपि तेनैवमभ्यधायि—

'मांगलिक आचार्यो महतः शास्त्रौघस्य मंगलार्थं बकारमादितः प्रयुङ्क्ते। मंगलादीनि मंगलमध्यानि मंगलान्तानि हि शास्त्राणि प्रथन्ते वीरपुरुषाणि च भवन्त्यायुष्मत्पुरुषाणि च, अध्येतारश्च मंगलयुक्ता यथा स्युः।' इत्यलं बहुना।

अधुना अग्निमीले इति ग्रन्थस्य सार्थक्यं पदार्थानुसरणपुरस्सरमनुसन्धीयते। तथा हि सायणः—

'अग्निनामकं देवमीले। स्तौमि। कीदृशमग्निम्। यज्ञस्य पुरोहितम्। यथा राज्ञः पुरोहितस्तदभीष्टं सम्पादयति तथाग्निरपि यज्ञस्यापेक्षितं होमं सम्पादयति। यद्वा यज्ञस्य सम्बन्धिनि पूर्वभागे आहवनीयरूपेणावस्थितम्। पुनः कीदृशम्? देवं दानादिगुणयुक्तम्। पुनः कीदृशम्? होतारम् ऋत्विजम्। देवानां यज्ञे होतृनामक ऋत्विगग्निरेव। तथा च श्रूयते (ऐ० ब्रा० ३-१४) 'अग्निर्वै देवानां होतेति'। पुनरपि कीदृशम्। रत्नधातमम। यागफलरूपाणां रत्नानामतिशयेन धारयितारम्। पोषयितारं वा।'

इदमत्रावधेयम् । यत्र यत्र सायणेन कस्यचन ग्रन्थस्य यद्वेति पदेनार्थान्तरमुपन्यस्यते न तत्र तस्य स्वकीयमस्थैर्यं शंकनीयम् । अपितु एकाधिकोऽपि अर्थस्तत्र तत्र सम्भवतीति आशयः । एवं श्लिष्टपदप्रयोगद्वारेणान्यथा वा एकस्यैव वाक्यस्य बहवोऽपि विवक्षिता एवार्था वेदेष्वपि सम्भवन्ति । एवमेकस्मिन्नेव स्थले अर्थाधिक्यं यत् सम्भवति तदेव व्यंग्यार्थात्मकस्य ध्वनिकाव्यस्य भित्तिरूपमित्यग्रे दर्शयिष्यते ।

अयं चात्र स्तूयमानः अग्निः परःशतेष्वपि देवेषु सर्वप्रधानरूप इति प्रतीयते । तस्मादेव च कारणादत्रैवं स्तूयते । प्राधान्यं च प्राथम्यं सूचयति । एतदेवाग्निप्राथम्यं सूचयन्तो यास्कादयो बहुधा अग्निशब्दस्य निर्वचनं दर्शयन्ति । तथा च यास्कः—'अग्निः पृथिवीस्थानस्तं प्रथमं व्याख्यास्यामोऽग्निः कस्मादग्रणी र्भवत्यग्रं यज्ञेषु प्रणीयते' इत्यादि । अस्याशयं व्याचिक्षाषुस्सायणाचार्योऽप्याह—

'.....कस्मात् प्रवृत्तिनिमित्तादग्निशब्देन देवताभिधीयत इति प्रश्नस्याग्रणीरित्यादिकमुत्तरम् । देवसेनामग्रे स्वयं नयतीत्यग्रणीः ।.....तथा च ब्राह्मणान्तरम् । अग्निर्वै देवानां सेनानीरिति । एतदेवाभिप्रेत्य बह्वृचा मन्त्रब्राह्मणे आमनन्ति । अग्निर्मुखं प्रथमो देवतानामिति मन्त्रः (ऐ० ब्रा० १-१) । तथा तैत्तिरीयाश्चामनन्ति । (तै० ब्रा० २-४-३-३)' 'अग्निरग्रे प्रथमो देवतानाम्' इति मन्त्रः । 'अग्निरवमो देवतानाम्' इति च । वाजसनेयिनस्त्वेवमामनन्ति । 'स वा एषोऽग्रे देवतानामजायत तस्मादग्निर्नामेति । यज्ञेष्वग्निहोत्रेष्टिपशुसोमरूपेष्वग्रं पूर्वदिग्वत्यां हवनीयदेशं प्रति गार्हपत्यात् प्रणीयत इति द्वितीयं प्रवृत्तिनिमित्तम् ।—' इति ।[1] एवं पूर्वोद्धृतसायणव्याख्यानादेवाग्नेरग्रस्थानीयत्वमवदातं स्यात् । तत्रोद्धृतयोः श्रुतिवाक्ययोरवमपदं च न निकृष्टार्थबोधकमपि तु कनिष्ठार्थबोधकमेवेति प्रतिभाति । कनिष्ठार्थबोधकत्वं च नवीनोद्यमशालित्वबोधनार्थं न तु जन्मकालिकापकर्षबोधनार्थमिति निपुणैरुन्नेयम् । तत्रैव च गार्हपत्याहवनीयभेदेनाग्निप्रकारद्वयस्योल्लेखः कृतः । तृतीयस्तु प्रकारः दक्षिणाग्निरिति । एतच्चाग्नित्रयमत्र स्तूयमानेनैवाग्निना सूच्यते तस्यैव त्रिरूपत्वात् । तदेव चाग्नित्रयं त्रयीविद्याया अपि प्रतीकभूतं त्रिणाचिकेत-त्रिसूपर्णशब्दाभ्यामप्युच्यते ।[2] त्रिसुपर्णपदेन च गायत्री-त्रिष्टुप्-जागतीति त्रयाणां छन्दसां बोधः । एतान्येव च वाग्देवताया

---

१. ऋग्वेदः १-१-१ इत्यत्र सायणभाष्यम् ।

२. V. S. Agarwala, *Presidential Address*, XXII All India Oriental Conference, P. 28

रूपाणि। वाग् एव सुपर्णी (अथवा हिरण्यपक्षः हंसः) या खलु पत्रयोः चालनेन मर्त्यानां भूलोकगतानाममर्त्यैः द्युलोकगतैः पदार्थैः सम्बन्धं घटयति। अग्निसूर्यावेव च भूलोकद्युलोकयोः प्रतीकभूतौ नियतप्राणप्रदातारौ स्तः। ('धर्मा समन्ता' इति ऋ० सं० १०-११४-१)। मातरिश्वना अथवा उभयोः मध्यवर्तिभिः प्राणैरुभावपि सम्बद्धौ स्तः। द्युलोकस्थः सूर्यः यथा प्राणप्रदाता भूलोकस्थोऽग्निरपि तथैव। एवमुभयोः भिन्नदेशगतत्वेऽपि अभिन्नत्वम्। तथैव समग्रमपि विश्वं विपरीतधर्मयुग्मैरेव विरचितमस्ति। यत्रामृतमस्ति तत्रास्ति मृत्युरपि। एवं क्रमेणैवाहोरात्रं, सदसत्, कृष्णार्जुनादिकानां युगलानां सद्भावः श्रुतिषु स्वीकृतः। तद्यथा **ऋक्संहितायाम्** 'अहश्च कृष्णमहरर्जुनं च' (६-९-१) इति। एवं विपरीतधर्मयुगले स्वीकृतेऽपि परमार्थतः समग्रमपि विश्वमेकतत्त्वात्मकमेव इत्येव भारतीयदर्शनसिद्धान्तः। एतच्च दिङ्मात्रेण सूचितं द्वैताद्वैततत्त्वमेव समग्रस्यापि व्यञ्जनातत्त्वस्य बीजभूतमित्यग्रे[1] यथास्थानं प्रपञ्चयिष्यते।

यजुर्वेदे शतरुद्रीयाध्याये (१६) च रुद्रस्तु अग्निरेव प्राणाग्निरूपः समग्रस्यापि प्राणिलोकस्य प्रेरकः। ऋ०सं० २-१-६ इत्यत्र तथा श० ब्रा० ५-३-१ (अग्निर्वै रुद्रः) इत्यत्र चाग्निरुद्रयोरभेदः।

प्राणस्पन्दनस्य सृष्ट्युन्मुखता एव प्रजापतिः हिरण्यगर्भः यत्र हिरण्यमेव प्राणाः। तथा **चाथर्ववेदे**—'सुवर्णमात्मन्नपश्यत्तत् प्राजन्यत्' (**अ० वे० व्रात्यसूक्तम्** ११५-१२) इति। एवं च प्राणस्वरूपाग्निरेव प्रत्यण्डं वर्तमानमादिमं प्राणतत्त्वम्।

'तत्रैतावग्नी आधत्त हिमं धर्मं च रोहितम्' (**अ० वे०** १३-१-४६) इति श्रुत्यनुसारमुष्णशीतक्रमेणाग्नेः रूपद्वयम्। तदपि च पूर्वोक्तद्वैताद्वैततत्त्वसूचकम्। स एवाग्निः दिवा मित्ररूपेण रात्रौ च वरुणरूपेण परिचीयते। स एव चान्तरिक्षे सविता दिवि च इन्द्रः। तथा च श्रुतिः—

स वरुणः सायमग्निर्भवति स मित्रो भवति प्रातरुदयन्।
स सविता भूत्वान्तरिक्षेण याति स इन्द्रो भूत्वा तपति मध्यतो दिवम्॥
(अ० वे० १३-३-१३)

एवमेव द्वैतरूपापन्नोऽयमग्निः समग्रस्यापि प्रपञ्चस्याकर्षणविकर्षणक्रमेण प्राणानर्पयति।

एवं क्रमेण तर्हि अस्माभिस्तूयमानोऽयमग्निः समग्रस्यापि प्रपंचस्य जीवनशक्तेः प्रतीकभूतः। तथैव च वैदिकवाङ्मये सर्वा अपि देवतास्तथा सर्वा अपि कथाः प्रतीकभूतत्वेनैव ग्रहणीया प्रायश इत्यग्रे प्रपञ्चयिष्यते।

---

१. उपासनातत्त्वे, प्रतीकतत्त्वे, रसतत्त्वे च

यद्यपि परमात्मतत्त्वमेवोपासितव्यमस्ति उपासकस्य तथाप्यवलोकनायोग्यत्वात् तत्तत्त्वस्य किंचिदवलोकनयोग्यमपेक्ष्यते वस्तु यदुपासनास्थानं स्यात्। तस्मादेव कारणादादिमकालादारभ्य मनुजैर्बहुधा सूर्योपासना कृता। सूर्योपि दूरस्थस्तथा केवलं दिवा एवोपलभ्यमानः वर्षासु चानुपलभ्यमानः दूरत एव सामयिकभावेनोपासनास्थानं भवति। अग्निस्तु न केवलं शैत्यापनोदनेनोपयोगी तथान्नादिपाकार्थमुपयुज्यमानः अपि तु सर्वदा सर्वकालमनायासलभ्य इति स एव सन्निकृष्टः प्रकृष्टतमः देवः बहुधा सेव्यते बहुधा स्तूयते च। बौद्धैस्तु प्रत्यक्षायोग्यत्वान्नास्ति ईश्वर इत्युच्यते। तत्पक्षमपाकर्तुं कालिदासेन **शाकुन्तलनान्दीश्लोके** ईशस्य प्रत्यक्षा अष्टमूर्तयः परामृष्टाः—यत्र चाग्निरन्यतमः प्रत्यक्षेष्वपि प्रत्यक्षतमः।

अधुना व्यञ्जनाप्रपञ्चसमीक्षायां मंगलाचरणे अग्निस्तुतेः विशेषप्रयोजनमुपन्यस्यते—

अग्निरेवालोककारणम्। चाक्षुषप्रत्यक्षे आलोको निमित्तकारणम्। आलोके सत्येव चाक्षुषप्रत्यक्षसम्भवात्।[1] तथा च **कारिकावल्याम्**—

उद्भूतरूपं नयनस्य गोचरो·····

गृह्णाति चक्षुः सम्बन्धादालोकोद्भूतरूपयोः॥ (१. ५४-५५)

अनुभूतिस्मृतिभेदेन बुद्धेरर्थात् ज्ञानस्य द्वैविध्यम्। तत्र चानुभूतिरेव प्रधानतरा, पूर्वानुभूतस्यैव स्मरणसम्भवात्। अनुभूतिष्वपि प्रत्यक्षं सर्वप्रधानम्।[2] प्रत्यक्षेषु चाक्षुषप्रत्यक्षम्। यत्कृते आलोकस्य सहकारित्वमवश्यमेवापेक्ष्यते। तस्मादालोकसहकृतेन चाक्षुषप्रत्यक्षेणैव ज्ञानसामान्यस्योपलक्षणं स्यात्।[3]

---

१. तुलनीयम्—'न ह्यप्रवर्तितप्रदीपास्तमसि तत्त्वार्थसार्थमध्यक्षयन्ति।' काव्यमीमांसा–२, पृ० २

२. 'सर्वा चेयं प्रमितिः प्रत्यक्षपरा' (न्यायसूत्रभाष्यम् १-३) इति तुलनीयम्। सर्वा इत्यभिनवभारत्यां (कविसंस्करणे) समुपलब्धः पाठः। (पृ० २८१)। स एव पाठः ग्नोलि-महोदस्यापि सम्मतः (AE पृ० १९)। न्यायसूत्रभाष्यस्य पुणा ओरियेन्टेल बुक् एजेन्सि संस्करणे गृहीतः (पृ० ११) 'सा चेयम्' इति पाठस्तु चिन्त्यः। 'प्रत्यक्षपरेति। प्रत्यक्षमेव परं प्रधानमस्याः। प्रत्यक्षस्य परता च तदनन्तरमेव जिज्ञासाया निवृत्तेः इति' म. म. गंगानाथ झा महोदयानां टिप्पणी। (पृ० ११)

३. तु०—'प्रतीयमानस्य चान्यभेददर्शनेपि रसभावमुखेनैवोपलक्षणं प्राधान्यात्।' (ध्वन्यालोकः, १, पृ. ८९–९०) किञ्च दृशधातोरेव ज्ञानसामान्यबोधकत्वमप्यत्र परामर्शनीयम्। आलोकालोचनलोचनादिशब्दानामपि व्युत्पत्ति-

अतएव चालोकः ज्ञानसामान्यस्यैव प्रतीकम्। आलोक एव लोकव्यवहारेषु ज्ञानपर्यायः।[1] ज्ञानमेव सत् ज्ञानमेवामृतम्। तस्मादेवोपनिषत्सु 'असतो मा सद्गमय तमसो मा ज्योतिर्गमय मृत्योर्माऽमृतं गमय' (बृहदाण्यकोपनिषत् १-३-३०-३१) इति ऋषिप्रार्थना श्रूयते।[2] तस्मात् साभिप्रायमेव व्यञ्जना-विषयकतत्त्वज्ञानानुसन्धानप्रारम्भे स्तूयतेऽयम् आलोकप्रभवोऽग्निः।

यदेवात्रास्माभिर्विचार्यमाणं व्यञ्जनातत्त्वं तदेव पाश्चात्त्यैः प्रतीक-तत्त्वनाम्ना वैशद्येन विचार्यते। तदेवात्र भूयोभूयः परामृश्यमानं पाश्चात्यानां

रत्रानुसन्धेया। ज्ञापकमात्रे च नेत्रपदस्य व्यवहारो यथा वाक्यपदीये (१. ११८)—शब्देष्वेवाश्रिता शक्तिर्विश्वस्यास्य निबन्धनी। यन्नेत्रः प्रतिभात्मायं भेदरूपः प्रतीयते॥ इति। 'यः शब्दो नेत्रं ज्ञापकं यस्य सः यन्नेत्रः' इति भावप्रदीपटीका (पृ. ९४)

१. पाश्चात्त्यानामपि व्यवहारे आलोकः (लाइट्) ज्ञानं बोधयति अन्धकारश्च (डार्कनेस्) अज्ञानं बोधयति।

२. अत्रापि सदसदादिभेदेन विपरीततत्त्वयुगलानां परामर्शःद्वैताद्वैततत्त्वमेव द्रढयति। किञ्च ज्ञानलोचनालोकादीनां सम्बन्धविषये इदमप्यत्रावधेयम्—नव्यप्लेटोनिक-भावधारायाः प्रवाहकप्रवरस्य प्लोटिनास्महोदयस्य मते सौन्दर्यग्राहकं सर्वोत्तम-मिन्द्रियं लोचनमेव। यदुक्तं 'सौन्दर्यं प्रधानतः लोचनेन्द्रियसमक्षमेव पदं कुरुते।' Beauty addresses itself chiefly to sight (*Lit Crit.* p. 121)। लोचनेन्द्रियस्य महत्त्वस्य बीजमेतदेव यन् नव्यप्लेटोनिकानामभिमतः विषयेन्द्रियाभेदसम्बन्धो लोचनेन्द्रिय एव स्फुटं परिचीयते। विषयेन्द्रिय-योरभेद एव ज्ञानस्य बीजम्। एतदेव प्रकारान्तरेणाभिहितं प्लोटिनास्महोदयेन यथा—'लोचनस्य सूर्यसदृशत्वाभावे सूर्यदर्शनसामर्थ्यं न स्यात्। तथैव आत्मनः स्वकीयसौन्दर्याभावे आद्यसौन्दर्या-(परमसौन्दर्या-) नुभूतिसामर्थ्यं न स्यात्' इति। Never did the eye see the sun unless it had first become sunlike, and never can the soul have vision of the First Beauty unless itself be beautiful. (—*Enneads*, I. vi. 9., *Lit. Crit.* p.121) एतत्तु न्यायवैशेषिकरीत्या लोचनस्य तेजःपदार्थत्वस्वीकरणेन तुल्यम्। तथा चोच्यते—

'ननु चक्षुषस्तैजसत्वे किं मानमिति चेत्, चक्षुस्तैजसं परकीयस्पर्शाद्यव्यञ्जकत्वे सति परकीयरूपव्यञ्जकत्वात् प्रदीपवत्, प्रदीपस्य स्वीयस्पर्शव्यञ्जकत्वात्।' इति (भाषापरिच्छेदे १.२६ कारिकायां मुक्तावली)।

प्रतीकतत्त्वं सिम्बलिजिम्तत्त्वनाम्नापि निर्दिश्यते । यस्य च चिन्तानायकस्य मतं सिम्बलिजिम् तत्त्वे बाहुल्येनानुसृतं सः कोलेरिज्नामा आंगलकविः व्यञ्जनाप्रधानकाव्यविरचनकुशलस्य केवेरुद्भावनशक्तिम् इमाजिनेशन् पदेनाभिधत्ते । तत्पर्यायस्तु संस्कृतालंकारशास्त्रे प्रतिभा इति । वक्ष्यमाणस्य व्यञ्जनाप्राधान्यात्मकस्य ध्वनितत्त्वस्य प्रवर्तकैः श्रीमद्भिरानन्दवर्धनादिभिः कवेः काचन अनन्यसाधारणप्रतिभा एव कविकर्मबीजरूपेण स्वीकृता । उच्यते च भट्टतोतेन—'प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता' इति ।[1] प्रतिभाबलेनैव व्यञ्जनाप्रधानं काव्यजातं विरच्यते महाकविभिः । प्रतिभा एव व्यञ्जनाप्रयोगे प्रधानं कारणम् । प्रतिभा एवान्यैरनवलोकनयोग्यमलौकिकं वस्तुतत्त्वजातं कवेः समक्षं समुद्भावयति तदनन्तरमेव तद्वस्तुतत्त्वजातं यथायोग्यभावेन वर्णयति कविः । प्रतिभाशब्दश्च भा-दीप्ताविति धातोः साधितः । एवं क्रमेण प्रतिभाशक्तेरालोकस्थानीयत्वेनालोकबीजभूतोऽयमग्निः कविप्रतिभाया अपि प्रतीकभूतस्सन् ग्रन्थस्य विषयभूतमन्यतमं प्रधानं वस्तु सूचयति । किञ्च प्रतिभातत्त्वमथवा व्यञ्जनातत्त्वं सुचारुरूपेण सर्वप्राथम्येन श्रीमदानन्दवर्धनेनैव स्वकीये **ध्वन्यालोकाख्ये** ग्रन्थे प्रतिपादितम् । स च **ध्वन्यालोकः** प्रस्तुतग्रन्थस्योपजीव्यभूतः । तस्य च ग्रन्थस्य नाम्नि आलोकपदं सार्थकभावेनैव प्रयुक्तमस्ति ।[2] प्रकृते चाग्निरालोकात्मकस्सन् ध्वन्यालोकग्रन्थस्यापि प्रतीकभूतः ।

ध्वन्यालोके व्यञ्जनास्वरूपनिर्णयक्रमेण प्रदीपेण घटस्याभिव्यञ्जनमेव व्यञ्जनाया उदाहरणत्वेन वारं वारं परामृष्टम् । तत्र प्रदीपोऽभिव्यञ्जकः घटोऽभिव्यञ्जनीयः । प्रदीप आलोकात्मकः । एवमालोकात्मकोऽग्निरेव सर्वेष्वप्यभिव्यञ्जकेषु सर्वप्रधान इति किमु वक्तव्यम् । तस्मादत्र व्यञ्जनाप्रपञ्चसमीक्षायां सर्वप्राथम्येनाभिव्यञ्जकेसु सर्वप्रधानोऽयमग्निरेव स्मर्यते । किं चास्य ग्रन्थस्य षष्ठदर्शने प्रतिपादयिष्यमाणदिशा विश्वप्रपञ्चस्य व्यञ्जनाप्रपञ्चत्वस्थापने श्रुतिरेवास्माभिः प्रकृष्टप्रमाणत्वेनोपस्थापिता । तत एव सकलप्रमाणमौलिभूतायाः श्रुतेर्गरिष्ठत्वसूचनार्थमप्यत्र श्रुतिवाक्येनैव मंगलमाचरितम् । इति मंगलाचरणम् ॥

---

१. 'नवनवोल्लेखशालिनी' इत्यपि पाठान्तरं ग्नोलिमहोदयप्रभृतीनामभिमतम् (*AE.* Introduction, p. xxx)

२. प्रतिभानवद्भिर्ग्रन्थकृद्भिर्ग्रन्थनामकरणदशायामेव भूयानर्थोऽभिव्यज्यते । अधिकन्तु तृतीयदर्शने 'ग्रन्थनामानां व्यञ्जकत्वम्' इति परिच्छेदे द्रष्टव्यम् ।

अथानुबन्धचतुष्टयम्

विषयविवेकः

भारतीयशास्त्रेषु तथा शास्त्रविषयकेषु ग्रन्थेषु आदौ अनुबन्धचतुष्टयं प्रतिपाद्यत इति शिष्टजनानुशीलिता शैली शोभनभावेनैवानुस्रियते प्राचीनैस्तथार्वाचीनैरपि उपजीव्यभूतैः पूर्वसूरिभिः।[1] अनुबन्धचतुष्टयं च नामतः—विषयः, प्रयोजनम्, अधिकारी, सम्बन्धश्चेति। **साहित्यदर्पणादिषु** अर्वाचीनेषु ग्रन्थेषु वैशद्येन विस्पष्टमेवानुबन्धचतुष्टयं प्रतिपादितम्। **ब्रह्मसूत्रादौ प्राचीनेष्वपि** सूत्रनिबद्धत्वादतिसंक्षिप्तरूपेष्वपि[2] समासेनैवानुबन्धचतुष्टयं प्रतिपादितमिति टीकाकृद्भिः सुनिपुणं समुट्टंकितम्।[3] एवं शिष्टाचारानुमोदनक्रमेणात्रापि तत् प्रतिपाद्यते।

अस्मिन् ग्रन्थे व्यञ्जनाव्यापारस्य तत्त्वं वैशद्येन समीक्ष्य व्याख्यायते। व्यञ्जनाव्यापारस्य समीक्षा भारतीयशास्त्रेषु विशेषतः शब्दार्थविषयकेष्वेव शास्त्रेषु प्रारब्धा। शब्दार्थविवेकश्च प्रायेण निरुक्त-व्याकरण-मीमांसा-न्यायालंकारादिशास्त्रेषु। परन्तु शब्दार्थवैभवविवेको वस्तुतः वेदेष्वेव प्रारब्धः। शब्दप्रधानश्च वेदराशिः। वेदराशिरेव स्वयं वाग्रूपः। वाग्देवता च तत्र

---

१. (१) अथ प्राधान्येनाभिधेयस्वरूपमभिदधदप्रधानतया प्रयोजनप्रयोजनं तत्सम्बद्धं प्रयोजनं सामर्थ्यात्प्रकटयन्नादिवाक्यमाह—काव्यस्यात्मेति। (ध्वन्यालोक १-१-कारिकायां लोचनम्, पृ० २)

(२) ध्वनिस्वरूपमभिधेयम्। अभिधानाभिधेयलक्षणं ध्वनिशास्त्रयोर्वक्तृश्रोत्रोर्व्युत्पाद्यव्युत्पादकभावः सम्बन्धः। विमतिनिवृत्त्या तत्स्वरूपज्ञानं प्रयोजनम्, शास्त्रप्रयोजनयोः साध्यसाधनभावसम्बन्ध इत्युक्तम्। (लोचनम् पृ० ३४-३५)

२. सूत्रस्य स्वल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम्।
अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः॥' इति लक्षणलक्षितत्वात्।
लघूनि सूचितार्थानि स्वल्पाक्षरपदानि च।
सर्वतः सारभूतानि सूत्राण्याहुर्मनीषिणः॥ (वायुपुराणम्, ५९-१४२)
इत्यप्यत्र तुलनीयम्।

३. B. K. Sengupta, *A Critique on the Vivaraṇa School*, pp. 1–3
वाचस्पतिमिश्रेण च **न्यायसूचीनिबन्धे** गोतमस्य 'प्रमाणप्रमेयसंशयप्रयोजनम्' इत्यादिमाभ्यां 'द्वाभ्यां सूत्राभ्यामभिधेयप्रयोजनसम्बन्धप्रकरणं' भवतीत्यभिहितम्। (**न्यायसूत्रम्**, पृ. ९)

विशेषेण स्तूयते । वागेव हिरण्यपक्षा सुपर्णीति पूर्वमेवोक्तम् । तत्र सरस्वतीति नाम्ना वाग्देवतायाः स्तुतिर्यथा—

पावका नः सरस्वती वाजेभिर्वाजिनीवती
यज्ञं वष्टु धियावसुः ॥ (ऋ० सं० १-३-१०) इति ।

शब्दपरिवृत्त्यसहमानत्वाच्चायं वेदराशिः शब्दप्रधानः । परन्तु नैवं वेदस्य शब्दप्राधान्येनार्थनैरपेक्ष्यं शंकनीयम् । शब्दार्थयोस्तत्राभिन्नत्वकल्पनात् । शब्दार्थयोर्नियतसंपृक्तत्वमेव विश्वप्रपञ्चस्य मूलम् । शब्द एव ब्रह्म । शब्दस्यैवार्थरूपेण विवर्तनात् जगतः प्रक्रिया अर्थात् सूचना भवतीति सुविस्पष्टं प्रतिपादितं भर्तृहरिणा यथा—

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥ (वाक्यपदीयम् , १-१)

कालिदासेनापि एतदेव तत्त्वं सुनिपुणं निरणायि यथा—

वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥[1] (रघुवंशम् , १-१)

तथा च **वाक्यपदीये हरिवृषभवृत्तौ** (१-११८) समुद्धृतेयं कस्यचिदुक्तिः—

वागेवार्थं पश्यति वाग् ब्रवीति वागेवार्थं निहितं संतनोति ।
वाच्येव विश्वं बहुरूपं निबद्धं तदेतदेकं प्रविभज्योपभुंक्ते ॥ इति ।

वेदस्य शब्दराशिर्यथा याथातथ्येन ग्रहणीयोऽर्थराशिरपि तथैव सावधानं सुनिपुणं समुन्नेय इति वेदेष्वेव प्रतिपादितं यथा—

सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत ।
अत्रा सखायः सख्यानि जानते भद्रैषा लक्ष्मीर्निहिताधि वाचि ॥
(ऋ० सं० १०-७१-२)

उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम् ।
उतो तस्मै तन्वं विसस्रे जायेव पत्ये उशती सुवासाः ॥
(ऋ० सं० १०-७१-२६)

इत्येवमादिषु स्थलेषु सम्यक्तया वेदराशेरर्थोऽपि ग्रहणीय इति बहुधा सूपपादितम् ।

निरुक्तादिशास्त्रप्रारम्भात् प्रागेव वेदेषु शब्दार्थगतमर्थविषयकमभिव्यञ्जकत्वं च सुपरिचितमासीदिति विषये सक्तुमिवेत्यादिकमेव प्रमाणमिति

---

१. एतदेव द्वैतरूपापन्नयोः स्वरूपतोऽद्वैतरूपत्वमेव द्वैताद्वैततत्त्वमित्यस्माभिरभिहितं समग्रस्यापि व्यञ्जनातत्त्वस्य मूलमिति पूर्वमपि प्रतिपादितमग्रेपि सुविशदं प्रतिपादयिष्यते ।

यथास्थानं मन्त्रव्याख्यानपुरस्सरं दर्शयिष्यते। निरुक्तादिपूर्वोक्तशास्त्राणां च प्राधान्येन शब्दार्थसम्बन्धविषयकत्वात् प्रसंगप्राप्ततयैव तैर्व्यञ्जनातत्त्वं मनाक्स्पृष्टम्। परन्तु अलंकारशास्त्रेषु कालक्रमेण व्यञ्जनातत्त्वमेव प्रधानोपजीव्यरूपं संजातमित्यप्यवधेयम्। अलंकारशास्त्रेषु विस्पष्टतया व्यञ्जनाया उल्लेखः सर्वप्राथम्येन **नाट्यशास्त्रे** समुपलभ्यते। तदनन्तरं ततोऽपि विस्पष्टतरभावेनानन्दवर्धनेन **ध्वन्यालोके** प्रत्यपादि। रसगंगाधरकारनिर्दिष्टदिशा आनन्दवर्धन एव सकलालंकारिकसरणिव्यवस्थापकः। ततस्तन्मतानुसारिभिरभिनवगुप्त-मम्मटविश्वनाथकविराजादिभिरपि व्यञ्जनातत्त्वं महता समुत्साहेनोरीकृतम्। आनन्दवर्धनेन तु व्यञ्जनास्वरूपं प्रतिपादयता विशेषतः काव्यविशेषभूतस्य व्यञ्जनाप्रधानस्य ध्वनेरेव तत्त्वं निरणायि। तथैव च तेन **ध्वन्यालोकस्य** प्रथमकारिकायां प्रतिज्ञातमासीत्। यथा—

काव्यस्यात्मा ध्वनिरिति बुधैर्यः समाम्नातपूर्व-
स्तस्याभावं जगदुरपरे भाक्तमाहुस्तमन्ये।
केचिद्वाचां स्थितमविषये तत्त्वमूचुस्तदीयं
तेन ब्रूमः सहृदयमनःप्रीतये तत्स्वरूपम्॥ (**ध्व०** १-१) इति।

ध्वनितत्त्वप्रतिपादनायोद्धुरकन्धरोऽयमानन्दवर्धनः प्राधान्येन शब्दार्थगतमेव व्यञ्जनातत्त्वं वैशद्येन व्याचकार। परन्तु तस्मिन्नपि सुनिपुणं प्रतिपादिते व्यञ्जनातत्त्वे व्यामोहा विप्रतिपत्तयश्च सञ्जाता भूयांसः परवर्तिनां केषांश्चनालंकारिकाणां महिमभट्ट-भट्टनायक-मुकुलभट्टप्रभृतीनां तथा काव्यार्थवैभवविमुखानामनुमानादिप्रक्रियामात्रसमासक्तचेतसां जरन्नैयायिकानां जयन्तभट्टादीनां तथा नव्यनैयायिकजगदीशतर्कालंकारप्रभृतीनामिति विमृश्य पुनरपि महत्तरैर्युक्तिजालैर्व्यञ्जनातत्त्वं सुदृढं स्थापयितुं प्रववृतिरे मम्मटभट्टप्रभृतय आलंकारिकप्रवराः। सति चैवमस्मिन् ग्रन्थे पुनरपि पूर्वाचार्याणां व्यञ्जनाख्यशब्दव्यापारस्वरूपविषयकं मतं यथोपयोगं संगृह्य अर्थापत्त्यनुमानप्रभृतिभ्यश्च तद्व्यापारस्य विविक्तविषयत्वं सूक्ष्मेक्षिकया विचार्य व्यञ्जनातत्त्वं सुस्फुटं प्रतिपाद्यते।

वाग्व्यवहारसौकर्यमेव मनुजानां महत्तममैश्वर्यम्। वाग्व्यवहारेणैव परस्परं भावानां विनिमयः सम्भवति। यत्र यत्रैव मनुजेन प्रयुज्यते काचन वाक् तत्र तत्रैव स्वकीयहृद्गतः कोऽपि भाव एव प्रकटीक्रियते। कस्यापि जनस्यानुभूतेः प्रकाशनेनान्यस्य हृदये समानुभूतिराविर्भवति। यमेवार्थमभिप्रेत्य शब्दं प्रयुंक्ते वक्ता प्रायशस्तमेवार्थमवगच्छति श्रोता चेतीयं स्थितिः पास्परिकमलौकिकं हृदयसंवादतत्त्वमेव पिशुनयति प्रकामम्। तदेवं प्रायः सर्वोऽपि वाग्व्यवहारो लोकानां हृद्गतभावाभिव्यञ्जनपरकतयाभिव्यञ्जनारूप एवेति वैशद्येन

प्रदर्शयद्भिरप्यस्माभिर्यथास्थानमभिघातो व्यञ्जनाया विविक्तविषयत्वमपि विस्पष्टं निभालयिष्यते।

यद्यपि वाग्व्यवहार एव भावप्रकाशविषये सर्वप्रधानं साधनं तथापि भाव-प्रकाशायान्यान्यपि बहुनि साधनानि जगत्प्रपञ्चमञ्चमञ्चन्ति। तेषु चान्यतमं प्रधानं साधनं चेष्टा नाम। चेष्टायामेवाभिनयस्य नृत्यादिकानां च शारीरिकचेष्टासाध्यानामन्तर्भावः। अन्यतमञ्च चित्रांकनम्। चित्रांकन एव विभिन्नरूपाणां भूयो भूयः व्यवहृतानां मुद्राचिह्नादिकानामन्तर्भावः। ततोऽन्यच्च भास्कर्यम्। भास्कर्यं न केवलं प्रस्तरप्रत्युप्तानामपि तु मृत्ति-कादिनिर्मितानामपि तथैव न केवलं देवादिमूर्तीनामपि तु वस्तुजातानामेव विग्रहाणामपि ग्रहणम्। एतद्भिन्नं स्थापत्यं गृहादिनिर्माणविषयकम्। केवलं व्यवहारोपयोगिषु गृहादिषु कथं भावाभिव्यञ्जकत्वमाविर्भवतीत्यग्रे विस्पष्टं प्रतिपादयिष्यते। पुनरन्यदप्यस्ति भावप्रकाशसाधनं संगीतं नाम। संगीतेनैव वाच्यार्थरहितानां हुंकार-चित्कार-शीत्कारादीनां ग्रहणम्। एवं क्रमेण साहित्य-संगीतचित्रांकन-भास्कर्य-स्थापत्यरूपाणां पाश्चात्यैः स्वीकृतानां पञ्च-प्रकाराणामेव सुकुमारकलानां (फाइन् आर्टस् पदेनाभिहितानां) भावाभि-व्यञ्जकत्व एव सार्थक्यमित्ययमपरः ग्रन्थस्य प्रतिपादनीयो विषयः। अस्मद्-गुरुवर्यैस्तु डा० कान्तिचन्द्रपाण्डेयमहोदयैः सुकुमारकलानां स्वतन्त्रकलेति नाम निर्मातृभिः स्वकीये **स्वतन्त्रकलाशास्त्रे** सुकुमारकलानां साहित्य-संगीत-वास्तुकलाभेदेन त्रैविध्यं प्रतिपादितम्। तासु च तिसृष्वपि कलासु पार्यन्तिकदशायां यथाक्रमं रसब्रह्म-नादब्रह्म-वास्तुब्रह्मरूपेण ब्रह्मतत्त्वस्यै-वोपलब्धिर्जायत इत्येतदपि वैशद्येनास्य ग्रन्थस्य प्रतिपिपादयिषितम्। प्रसंगतस्त्वेतदत्रैव वक्तव्यमस्ति यत् पूर्वोक्तासु कलासु संगीत एवाभिनयस्य तथास्माभिरभिव्यञ्जकत्वेन स्वीकृतायाः चेष्टाया अन्तर्भावः। वास्तुकलायामेव च चित्रांकनभास्कर्ययोः, वास्तुकलायामेव मन्दिरादिनिर्माणक्रमेणानिवार्य-भावेनैव प्रायशो भित्तिचित्राणां तथा शालभञ्जिकादिनामप्युपस्थापन-दर्शनात्।[1] एवं क्रमेण सर्वेषामपि सुकुमारकलासमाकलितानां ललितोचित-सन्निवेशचारूणां वस्तुजातानां भावप्रकाशकत्वम् अभिव्यञ्जनक्रमेणैवेति

---

१. एवं रंगशिरः कृत्वा दारुकर्म प्रयोजयेत्।
ऊहप्रत्यूहसंयुक्तं नाना शिल्पप्रयोजितम्॥
नाना सञ्जवनोपेतं बहुव्यालोपशोभितम्।
ससालभञ्जिकाभिश्च समन्तात् समलंकृतम्॥ (नाट्यशास्त्रम् २।७५-७६
इत्यादिकमप्यत्र तुलनीयम्।

व्यजनाप्रपञ्चसमीक्षामुखेन निभालयिष्यतेऽस्मिन् ग्रन्थे। तदर्थं ग्रन्थस्य द्वितीये दर्शने व्यञ्जनायाः स्वरूपं सुविस्पष्टं प्रतिपाद्यते। सा च साधारण्येन निरूप्यमाणा व्यञ्जना वाग्व्यवहारव्यतिरिक्तानपि भावप्रकाशसाधन-प्रकारान् परिव्याप्नोति। तदनन्तरं तृतीये दर्शने वाग्व्यवहारेषु विशेषतः काव्येषु व्यञ्जनायाः प्रयोगस्य सार्थक्यं तथा वैतत्यं विशदीक्रियेते।[1]

भावप्रकाशस्यामूर्तं साधनं शब्दो नाम। तदितराण्यपि पूर्वोदाहृतानि साधनानि प्रायशो मूर्तान्येव। मूर्तश्च भावप्रकाशसाधनं प्रतीकपदेन व्यवह्रियते। प्रतीकञ्च न केवलं हृद्गतस्य भावस्य एव द्योतकमपि तु यस्य तत्प्रति-निधिभूतं तस्यापि वस्तुविशेषस्याभिव्यञ्जकं भवति। एवमुपासनादिषु मूर्तरूपेणाननुभूयमानस्य ब्रह्मतत्त्वस्य प्रतीकानि बाहुल्येनोपयुज्यन्ते। सति चैवमुपासनातत्त्वेन करम्बितं प्रतीकतत्त्वस्य किञ्चन महदैतिह्यमस्ति भारतवर्षे। तदैतिह्यमपि भारतीयप्रतीकतत्त्वम् इति नाम्ना ग्रन्थस्य चतुर्थे दर्शने प्रतन्यते। प्रसंगतश्च तस्मिन्नेव दर्शने प्रतीकभूतानां मुद्रामन्त्रयन्त्र-चिह्नादिकानामपि केषांचित् सुविशदः विमर्शः समुपस्थाप्यते।

पाश्चात्त्यैस्तु काव्यविषयकव्यञ्जनातत्त्वं **सिम्बलिजिम्**—पदेनाभिधीयते इति पूर्वमेव प्रतिपादितम्। तेषां सिम्बलिजिम्-तत्त्वमपि एकतः मूर्ति-व्यवहारेण सम्बद्धमपरतश्च प्रतिभासम्भूतकाव्यगतरसस्य तत्त्वेन। सिम्ब-लिजिम्-तत्त्वञ्च मध्ययुगादारभ्य वर्तमानकालपर्यन्तं शर्मण्यादिदेशेषु क्रमशो वर्धमानेन यत्नेनाभिनिवेशेन च समीक्ष्यते तत्तद्देशजैर्बुधजनैः। एवं च समीक्षादशायां ते पाश्चात्त्यमनीषिणो भारतीयमनीषामश्चमेवाश्चन्तीति सर्वथा बुधजनानां हृदयसंवादो वर्तत इत्येतदवितथतत्त्वमेव स्फुटीभवदस्माक-मनल्पमाह्लादमाकलयतीति भारतीयप्रतीकतत्त्वं तथा पाश्चात्त्यसिम्बलिजिम्-तत्त्वम् इत्युभयोरेकत्राध्ययनस्यैवावसरोऽयं संप्राप्तः। तस्माच्च ग्रन्थस्य पञ्चमे दर्शने प्रथमं पाश्चात्त्यप्रतीकतत्त्वं प्रतिपाद्य भारतीयप्रतीकतत्त्वेन तस्य

---

१. तदेवमाद्यदर्शनत्रयेण मुख्यभावेन शाब्दगतमेव व्यञ्जनातत्त्वं विशदीकृतम्। इदमेव तत्त्वमलंकारशास्त्रे परामृष्टमस्ति। अत ऊर्ध्वमुपन्यस्यमानं व्यञ्जनातत्त्वं प्रतीकतत्त्वनाम्नाभिधानयोग्यमापातत एवालंकारशास्त्रे नोपलभ्यते। प्रतीको-पासनादिकमेवास्य विषयः। अत एव आपातत व्यञ्जनातत्त्वात् प्रतीकतत्त्वस्य विविक्तविषयताऽऽविर्भवति। सति चैवमस्मिन् ग्रन्थे प्रतिपादयिष्यमाणदिशा सम्भवत्यपि रसतत्त्वप्रतीकतत्त्वोपासनातत्त्वानामभेदे वस्तुगत्या भेददर्शनाद् आद्यदर्शनत्रितयस्य पूर्वमीमांसेति नाम कृतमुत्तरदर्शनत्रितयस्य चोत्तर-मीमांसा इति।

संतुलनव्याजेनाभिव्यञ्जनातत्त्वस्यैव विशालतरं साम्राज्यं समुद्भास्यते। तदनु च षष्ठे दर्शने सिद्धान्तरूपेणैतत् प्रतिपादयितुमिष्यते यदयं समग्रोऽपि जगत्प्रपञ्चः मृद्घटवत्परिणामवादेनैव व्याख्यातो भवतु अथवा रज्जुसर्पवद् विवर्तवादेनैव भवतु उभयथापि सोऽयं प्रपञ्चः सत्यं ज्ञानमनन्तं ब्रह्मतत्त्वमभिव्यनक्ति। इतरथा च सद्रूपोऽसद्रूप एव वास्तु, अयं प्रपञ्चः सर्वथा परब्रह्मतत्त्वेनैवाभिव्यज्यते। तथा हि परब्रह्मतत्त्वस्य जगत्प्रपञ्चाभिव्यञ्जकत्वे मानं यथा 'स्वरूपं प्रकाशयन्नेव परावभासको व्यञ्जक इत्युच्यते' (**ध्वन्यालोकः** तृतीयोद्योतः) इति व्यञ्जकलक्षणालिंगितत्त्वं परब्रह्मतत्त्वस्य—

तमेव भान्तमनुभाति सर्वम्।
तस्य भासा सर्वमिदं विभाति॥ (**कठोपनिषद्** ५-१५) तथा

यज्ज्योतिरग्र्यं स्वपरप्रकाशं कूटस्थमव्यक्तमनन्तरूपम्।
नित्यञ्च दीर्घादिविशेषणाद्यैर्हीनं परं तच्च वयं न भिन्नाः॥
(**कालिकापुराणम्** ११-५६) इत्याद्यनुरोधात्।

॥ इति विषयविवेकः॥

प्रयोजनविवेकः

सर्वस्यैव हि शास्त्रस्य कर्मणो वापि कस्यचित्।
यावत् प्रयोजनं नोक्तं तावत् तत् केन गृह्यते॥ (**श्लोकवार्तिकम्** १-१२)

अस्य ग्रन्थस्य व्यञ्जनास्वरूपप्रतिपादनमेव आद्यं प्रयोजनम्। व्यञ्जनालक्षणसमीक्षणपुरस्सरं व्यञ्जनाविषयस्य इयत्ता-निर्धारणेनैव तत्स्वरूपं सुप्रतिपादितं स्यादिति मनसि कृत्वा सत्स्वपि शतशः ध्वन्यादितत्त्वव्याख्यानपरकेषु ग्रन्थेषु त्रिभिन्नविषयाणां विभिन्नरूपाणां व्यञ्जनानामेकत्र स्थापनेन इदंप्रथमतयैवेयमस्माभिः समीक्षा प्रारभ्यते। तच्च व्यञ्जनास्वरूपनिर्वचनमाधुनिकशोधकार्यपद्धतिं विधिनिबद्धभावेनानुसृत्य क्रियत इति प्रथमत एव निवेदनीयमस्ति। एवं च स्वयंसम्पूर्णभावेन व्यञ्जनास्वरूपप्रतिपादनं मूलप्रयोजनम्। व्यञ्जनास्वरूपप्रतिपादनेन तद्विषयकस्य शास्त्रजातस्य ज्ञानमाकलय्यते। एवं च व्यञ्जनातत्त्वज्ञानमेव पार्यन्तिकं प्रयोजनम्। आनन्दवर्धनेन यथा सहृदयमनःप्रीतये ध्वनिस्वरूपं प्रतिपादितं तथैवास्माभिरपि जिज्ञासूनां प्रीतये व्यञ्जनातत्त्वस्वरूपं यथामति यथाशक्ति प्रतिपाद्यते। एवञ्च प्रीतिरेव पार्यन्तिकप्रयोजनप्रयोजनम्।

इदमप्यत्र वक्तव्यमस्ति। शोधकर्ममार्गे प्राधान्येन शैलीद्वयं परिलक्ष्यते। तत्र एकस्यां वैज्ञानिकरीतिविशेषानुसरणक्रमेणैतिहासिकतथ्यानां यथायथं सटीप्पनं संकलनं संतुलनं वा भवति। एतदेव शोधकार्यं नियमसापेक्षं शोध-

कार्यमिति (मेथडिकेल् रिचर्स् इति) वक्तुं शक्यते। अपरायाञ्च शैल्यां शास्त्रीयतत्त्वानां व्याख्यानमथवा विश्लेषणमथवा याथार्थ्यनिरूपणं भवति। एतच्च शोधकार्यं मननसापेक्षं शोधकार्यमिति (इन्टार्प्रिटेटिभ् अथवा एनालिटिकेल् रिचर्स् इति) वक्तुं शक्यते। मननसापेक्षे शोधकार्ये महत्तर एवाभिनिवेशोऽपेक्ष्यते इति हेतोः साम्प्रतं तादृशे शोधकार्यं समासक्तानां संख्या क्रमशः परिक्षीयते। तथा हि अस्माकमेव पर्यवेक्षणे साम्प्रतं शोधकार्यं कुर्वतां विनेयजनानां द्वित्रा एव मननसापेक्षशोधकार्ये समादरशीलाः परिलक्ष्यन्ते। अस्मद्गुरुभिस्तु पूज्यपादैः डा० सातकडिमुखोपाध्यायमहोदयप्रभृतिभिः प्रायशो मननसापेक्षशोधकार्यं प्रत्येव समुत्साहिता अन्तेवासिनः। एवञ्च मननसापेक्षशोधकार्यात्मकेनैतद्ग्रन्थप्रणयनेनांशतोऽपि गुरुवर्याणां प्रीतिसाधनं स्यादिति तदपि महत्तरं फलमत्रास्माभिरपेक्ष्यते।

अत्रायं प्रश्नः समुदेति—ननु आधुनिके विज्ञानप्रधाने युगे को लाभः मननसापेक्षशोधकार्याभिनिवेशेन व्यञ्जनाव्यापारादिस्वरूपानुसन्धानेन। ऐहिकसुखसाधनभूतायां वैज्ञानिकचिन्तायामेव विनियुज्यतामयं श्रमः येनान्नपानादिप्राचुर्यं स्यात् सुन्दरतरगृहादिनिर्माणोपाय आविष्कृतो भवेद् अन्यथा च सर्वथा वास्तविकमैश्वर्यं समुदियादिति। सत्यस्मिन् प्रश्ने अस्माभिरेवमुच्यते। अन्नपानाद्यन्वेषणं गृहादिनिर्माणं वा मनुजानां तिर्यग्योनिगतैः साधारणम्। दृश्यते च पशूनामप्याहारान्वेषम्। दृश्यते पक्षिणामपि तृणाद्याहरणेन कुलायनिर्माणप्रयासः। मधुमक्षिकाणां यदावासनिर्माणनैपुण्यं तत्तु नितरां विस्मयमेवावहति। एवन्तर्हि ऐहिकसुखसाधनसमीहायां नास्ति मनुष्याणां विशेषगौरवम्। येन मनुष्याः गौरवमवगाहन्ते तत्तु तेषां मननैपुण्यं तिर्यग्योनिगतेषु सुविरलम्। सेयं मननपद्धतिरेव मनुष्याणां मनुष्यत्वमूलम्। तद्रहितत्वे केवलमैहिकसुखसाधनसमीहायां कदाचित्तेषां मनुष्यत्वमेव व्यपगच्छेदिति हेतोरैहिकसुखानुसन्धानसमनियतभावेन दार्शनिकतत्त्वनिचयानुधावनमप्यपेक्ष्यत इति सर्वथा सुसमञ्जस एवास्माकमयं प्रयास इत्यनुमन्यताम्।

अस्य ग्रन्थस्य संस्कृतवाङ्मयनिर्मितत्वेन च कानिचनावान्तरप्रयोजनानि संसाध्यन्ते। तान्यप्यत्र प्रसंगतो निवेद्यन्ते —

संस्कृतभाषाव्यवहारकारणानि

सुरभारत्यां शोधनिबन्धविरचनविषये अस्मद्गुरुवर्याणां डा० सातकडिमुखोपाध्यायमहोदयानामेवान्तेवासिनः **काव्यतत्त्वसमीक्षा**नामकग्रन्थप्रणेतारः डा० नरेन्द्रनाथचतुर्धरिण एव सरणिव्यवस्थापकाः। संस्कृतभाषाया

आश्रयणे प्राधान्येन ये हेतवस्तैरुरीकृतास्त एवास्माभिरपि स्वीकृताः। अतः सर्वप्राथम्येन तेषामेव सुरसरस्वतीमनूद्य ज्ञापयामः—

(१) 'प्रथमतस्तावद् भारतवर्षे संस्कृतपाठशालासु प्राचीननियमानुसारमद्यापि ये विनेया अधीयते तेषामपि आधुनिकगवेषणरीत्या तुलनामूलकदृष्टया नानाग्रन्थविप्रकीर्णानां वस्तुजातानामेकस्थानसमाहरणेन परस्परापेक्षया उपजीव्योपजीवकभावसमुट्टंकनेन च लिखितोऽयं ग्रन्थो यथार्थं दृष्टिपथमवतरतु। तेन च संस्कृतवाङ्मये समुपलब्धानां महार्घाणां रत्नानामनया प्राच्यप्रतीच्यप्रवर्तितशैलीसेवया विवेचनसमीहा तेष्वपि प्रवर्धतां नाम'।[1]

(२) किञ्च भारतवर्षे वैदेशिकशासनावसानादनन्तरं क्रमात् क्रमं क्षीयमाणायामांगलभाषाशिक्षायां साम्प्रतञ्च तत्तत्प्रदेशीयभाषायामेव शिक्षाव्यवस्थायां प्रवर्तमानायामायतिकाले आंगलभाषायां सुनिष्णातानां विदुषां संख्या अङ्गुलिगणनीयतां नातिक्रमिष्यति। सति चैवं संस्कृतभाषा एव विभिन्नप्रदेशानां योगसूत्ररूपेण वर्तमाना मननसापेक्षाणां गभीरतराणामध्ययनविषयाणां साधनरूपेण स्थास्यति। अस्मादपि कारणान्नवीननवीनतराणां ग्रन्थानां सुरसरस्वत्यामेव विनिर्माणमाशु प्रारम्भमपेक्षते।

(३) 'स्वतन्त्रे भारते संस्कृतस्य पुनरभ्युदयो ध्रुवं भावीति निश्चप्रचमेव वक्तुं शक्यते।' तदभ्युदयकामिभिरस्माद्विधैर्नवीननवीनतरान् विषयान् अवलम्ब्य ग्रन्थविरचनेन दिविसद्भाषाया सेवा प्रारब्धव्या इत्यस्माकं प्रतिभाति।

(४) पाश्चात्त्यदेशेष्वपि संस्कृतस्यानुशीलनमद्यापि सोत्साहं प्रवर्तते। परन्तु संस्कृतसाहित्यविषयकविचारविवेचनादिकरणार्थं शर्मण्यादिविभिन्नदेशीयानामपि साधारण्येन बोधगम्या भाषा सुरसरस्वतीं विना नैव काचित् समुपलभ्यते।[2] अद्यत्वे यद्यपि आंगलभाषा एव प्रायशः साधारण्येन बोधगम्या इत्यापाततः प्रतिभाति तथापि वस्तुतः सा न तथा सर्वजनप्रिया वरीवृत्यते इति हेतोरस्माकमिदं संस्कृतभाषावलम्बनमनुमन्यतां सुधीजनैः।

(५) गुवाहाटीविश्वविद्यालयीयसुरवागविभागे विंशतिवर्षाण्यध्यापनव्यापृतैरस्माभिरेतत् सम्यगनुभूतं यत् संस्कृतभाषायां विरचितानां शास्त्राणां

---

१. काव्यतत्त्वसमीक्षा, पृ० १५.

२. सेयं स्थितिरधोलिखितनैषधीयपद्ये वर्णितया स्थित्या तुलयितुं शक्यते। यदुक्तम्—

अन्योन्यभाषानवबोधभीतेः संस्कृत्रिमाभिर्व्यवहारवत्सु।
दिग्भ्यः समेतेषु नरेषु वाग्भिः सौवर्गवर्गो न नरैरचिह्नि॥

(नैषधचरितम्, १०–३४)

व्याख्यानं संस्कृतभाषायामेवान्तेवासिनां कृते अधिकतरबोधसौकर्याय भवति। तस्मादस्माभिरस्मदीयविभागे अध्यापनसाधनत्वेन प्रायशः संस्कृतमेव प्रयुज्यते। ततश्चाधुना शिष्यशिक्षायै दृष्टान्तस्थापनाय च स्वयं संस्कृत एव ग्रन्थविरचनार्थं समुत्सहामहे।

(६) गुवाहाटीनगर्यां १९६५ वर्षे स्वनुष्ठिते अखिलभारतीयप्राच्यविद्यासम्मेलनस्य द्वाविंशाधिवेशने पण्डितपरिषदि[1] विभागीयसचिवभारमुद्वहद्भिरस्माभिरेतत् सुदृढभावेन समनुभूतं यदाधुनिकरीत्यापि शोधनिबन्धादिविरचने तथा शास्त्रीयविचारे संस्कृतमेव नितरां सफलभावेन प्रयुक्तं शक्यते। प्रयुक्ता च सती सेयं सुरसरस्वती अनर्गलं सावलीलं प्रवल्गति। तद्दर्शनसमुत्साहिततयाप्ययमस्माकमुद्यमः प्रवर्तते।

(७) एवम् अलीगढनगर्यामनुष्ठिते त्रयोविंशाधिवेशनेऽपि पण्डितपरिषदि[2] तथैवास्माभिस्समनुभूतम्। किञ्च उज्जयिन्यां १९६६ खृस्ताब्दीयकालिदाससमारोहेऽपि शोधनिबन्धपठनाधिवेशने[3] संस्कृतभाषाप्रयोगसौविध्यविषयेऽनुरूप एव भावोऽस्माकं हृदये पदं कृतवान्।

(८) **'संस्कृत् पोयेटिकस्'** नामके अचिरप्रकाशिते संस्कृतालंकारविषयके ग्रन्थे श्रीकृष्णचैतन्यमहोदयेन बाहुल्येन मूलसंस्कृतपदसंवलितानाङ्गलभाषाविनिर्मितान् ग्रन्थान् प्रति कटाक्षपातः कृतः।[4] तेन तु स्वयं संस्कृतालंकारशास्त्रनिहितानां तत्त्वानां नूतनतया प्रतिपादनं कृतम् आंगलभाषाज्ञानां कृते यैस्तावत् पार्थिवजनसंख्याया अर्धमेवाभिव्याप्तम्।[5] एवन्तस्य ग्रन्थे आंगल-

१. Proceedings of the XXII All India Oriental Conference, Appendix II. इत्यत्रास्मद्विनिबद्धा सचिवविवृतिर्द्रष्टव्या। 'माघे सन्ति त्रयो गुणाः' (प्राच्यभारती १-१) इति निबन्धस्तस्यामेव पण्डितपरिषदि अस्माभिः पठितोऽभवत्।

२. 'या सृष्टिः स्रष्टुराद्या' इति निबन्धः (सागरिका, ६-२) तस्यामस्माभिर्वाचित आसीत्।

३. यत्रापि च 'कालिदासीयकाव्येषु कर्मयोगस्य आदर्श' इति निबन्धोऽस्माभिस्समुपस्थापितः। स च निबन्धः पश्चात् विक्रम-पत्रिकायां प्रकाशित आसीत्।

४. *Sanskrit Poetics*, Preface, pp. vii-viii.

५. It does seem worthwhile, in the circumstances, to make a fresh attempt to communicate the ideas of the great Indian thinkers to the English-speaking world which is perhaps half the world today. (*Ibid.*, p. viii)

भाषाज्ञानां कृते संस्कृतशास्त्राणां तात्पर्यं यथा निभालितं तथैवास्माभिरप्यत्र आंगलभाषाज्ञानरहितानामथच संस्कृतज्ञानसहितानामथवा तदुभयभाषा-ज्ञानसहितानामपि भारतीयानामभारतीयानाञ्च कृते न केवलं संस्कृत एवोपलब्धमपि तु तदितरास्वप्यांगलादिभाषासूपलब्धं समग्रमपि व्यञ्जना-तत्त्वमिहैव समुपस्थापितम्। एतेन न केवलं संस्कृतज्ञानां कृते आंगलादि-भाषानिबद्धानां तत्त्वानां दिग् उन्मीलिता न चापि केवलं संस्कृतज्ञानां कृते संस्कृतवाङ्मयोपलभ्या विविधा विमर्शा एकत्रैव संगतिपूर्णभावेन सन्निविष्टाः किन्तु संस्कृतेतरभाषालभ्यानां सिद्धान्तजातानामपि संस्कृतभाषायामेव समुपस्थापनादस्माभिस्संकृतभाषावैभववर्धनायापि यथासाध्यं प्रयतितमिति मन्यामहे।

(६) मान्यवरस्य संस्कृतायोगस्य मते संस्कृतमहाविद्यालयेषु साम्प्रतं पाश्चात्त्यदेशेष्वपि अस्मद्देशानुशीलितसदृशानां विभिन्नशास्त्राणां कीदृग-ध्ययनं भवतीति तस्य सम्यक् ज्ञानं प्रदेयम् तथा हि दर्शनविषयस्यान्तेवासि-विशेषस्य पाश्चात्त्यदेशीयदर्शन-तर्कशास्त्रादिविषयेऽपि किञ्चिज्ज्ञानं भवितु-मर्हति।...शास्त्राणामैतिहासिकदृष्ट्याध्ययनेन तथा तुलनात्मकाध्ययनेन पाठशालासु अस्मद्देशीयशास्त्राणामपि अध्ययनविषये काचिन्नवीना भूरि-फलप्रदा सरणिर्व्यवस्थापिता भवेदित्यायोगस्याशयः।[1] पाश्चात्त्यदेशीय-शास्त्राणां ज्ञानं साम्प्रतमांगलभाषामयग्रन्थेभ्योऽथवा तत्तत् प्रान्तीयभाषा-मयग्रन्थेभ्य एव समुन्नेतुं शक्यम्। किन्तु कालक्रमेण संस्कृतभाषायामेव पाश्चात्त्यदेशीयशास्त्राणां ज्ञानं सुलभं भवेदित्याशास्ते संस्कृतायोगः।[2] तदेवं

---

१. We further suggest that in the graduate and post-graduate classes of the Sanskrit college an adequate knowledge of the developments in the West in corresponding disciplines should be imparted. For instance a student of Darsana should have a fair knowledge of European Philosophy and Logic···It is also hoped that when this historical and comparative study takes root in the Pāṭhaśālās our Śāstras may be reformulated and enriched.

(*Report of the Sanskrit Commission*, 1956-57, p. 138).

२. He can have this from books written in Engish or in the regional languages. It may be hoped that, in course of time, books in Sanskrit itself will be available. (*Ibid*, p. 138, n. 2.).

पाश्चात्त्य-सिम्बलिजिम्-तत्त्व (प्रतीकतत्त्व)विषयकोऽस्मदुपज्ञोऽयं संस्कृत-भाषामयो निबन्धस्सुधीजनसौजन्यं साग्रहं प्रतीक्षते ।

(१०) सरस्वतीकण्ठाभरणादिग्रन्थसम्पादकैरानन्दरामबरुवामहोदयैरून-विंशशतिकायां भारतवर्षे आंगलशासने स्वे महिम्नि प्रतिष्ठिते सिविल्सा-र्विस्-पदाधिष्ठितत्वेपि सुरसरस्वतीसेवापरायणैरेतदुपलब्धमासीत् यन्मौलिक-संस्कृतभाषामयग्रन्थविरचनेनैव संस्कृतस्योन्नतिः स्यादिति । तदर्थं च तैरेव स्वयं १. महावीरचरितस्य जानकीरामभाष्यम्, २. आंगलभाषातः संस्कृते अनुवादार्थमभिधानम्, ३. धातुकोशश्चेति ग्रन्थजातं संस्कृतनिबन्धनिदर्शन-रूपेणाथवान्येषामपि संस्कृतभाषाविरचनसौविध्यविधानार्थं निरमायि। तेषाञ्च मते मौलिकसंस्कृतभाषामयग्रन्थविरचनमेव संस्कृतपाण्डित्यनिकषरूपम् । तदभावादेव तैस्तत्कालीनवाराणसेयसंस्कृतमहाविद्यालयाध्यक्षाः श्रीमन्तो हालमहोदया अपि कटाक्षीकृताः ।[1] एवं क्रमेण सर्वथा शिष्टजनसमर्थितत्वाद-स्माभिरप्ययं प्रयासः कृतः । एतदप्यत्राशास्यते यत् यद्यत्र गुरुकृपया किञ्चित् सारगर्भं तत्त्वं बुधजनसमर्थनीयमस्माभिरुपस्थापयितुं शक्यते तर्हि तदनुवादे-नापि यथाकालं लब्धुं प्रभविष्यन्ति संस्कृतानभिज्ञास्सुधीजनाः । अत एव काचन राजशेखरभणितिरेवात्र किञ्चिद् विपरिणमय्य समुपस्थाप्यते—

अत्थविसेसा ते चिअ सद्दा ते चिअ परिणमंतावि ।
तत्तविसेसो सस्तं[2] भासा जा होइ स होउ ॥ इति ॥
(अर्थविशेषास्त एव शब्दास्त एव परिणमन्तोपि ।
तत्त्वविशेषः शास्त्रं भाषा या भवतु सा भवतु ॥ इति छाया ।)

॥ इति प्रयोजनविवेकः ॥

अधिकारिनिरूपणम्

अधुना क्रमप्राप्ततयास्य ग्रन्थस्याधिकारी निरूप्यते । सर्वप्राथम्येन चायं ग्रन्थः शास्त्रतत्त्वविदुषां विपश्चितां परीक्षणार्थं सप्रश्रयं निवेद्यते । तथा हि—

---

१. We have one original Sanskrit note by Hall···(इति कस्यचित् टिप्पणी, p. 111) and it is quite sufficient to shew his acquaintance with the language. (Anundoram Borooah, *Bhavabhuti and his place in Sanskrit Literature*, p. 57)

२. 'उत्तिविसेसो कव्वं' इति मूलपद्ये (कर्पूरमञ्जरी, १-७) अविपरिणामित. पाठः ।

आ परितोषाद् विदुषां न साधु मन्ये प्रयोगविज्ञानम् ।
बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः ॥ (अभिज्ञानशाकुन्तलम् १-२)

अस्मिंश्च ग्रन्थे ससाध्वसं समुपस्थापितस्य व्यञ्जनातत्त्वस्य व्याख्यानस्य हेयोपादेयत्वं निर्णेतुं विद्वांसः पूर्वसूरय एव प्रभवन्ति । तथा चोच्यते—

तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः ।
हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा ॥ (रघुवंशम् १-१०)

ते च विद्वांसः परीक्षकाः सदसद्व्यक्तिहेतवः अभिव्यञ्जकत्वसाम्यादग्निरूपाः । कालिदासेनापि तेषामग्निसदृशत्वमाकलितम् । तदेवमादावेव मंगलाचरणे अग्निदेवतायाः स्तवनेन संभाव्यमानानां परीक्षकमहाभागानामपि सपर्यास्माभिस्सम्पादिता । विदुषां परीक्षकमहाभागानां सम्मते सत्ययं ग्रन्थो विविदिषुणामध्येतृजनानां व्यञ्जनातत्त्वजिज्ञासूनां कृते स्यादिति मन्तव्यम् ।[1] त एवाध्येतृजनाः अधिकारिणस्तेषामेव व्यञ्जनातत्त्वज्ञानरूपे फले स्वाम्यत्वं भावीति कल्पनीयम् तथा हि प्रसंगान्तरे श्रीमता विश्वनाथकविराजेनोक्तम्—

अधिकारः फले स्वाम्यमधिकारी च तत्प्रभुरिति । (साहित्यदर्पणम्, ६)

॥ इति अधिकारिविवेचनम् ॥

सम्बन्धविनिश्चयः

अनुबन्धचतुष्टयप्रसंगे सम्बन्धजिज्ञासायां ग्रन्थकृदभिष्टीकाकृद्भिश्च प्रायेण ग्रन्थविषययोरेव सम्बन्ध उदाह्रियते । तद्यथा साहित्यदर्पणे (प्रथमपरिच्छेदे) 'अस्य ग्रन्थस्य प्रतिपाद्यप्रतिपादकभावसम्बन्ध' इति । अभिनवगुप्तपादेन तु लोचने (पृ. ३५) ग्रन्थविषययोः, वक्तृश्रोत्रोः, शास्त्रफलयोश्चेति त्रयोपि सम्बन्धा समुदाहृताः ।[2] तदादर्शानुसारिभिरस्माभिरप्युच्यते—अत्र व्यञ्जनातत्त्वग्रन्थयोः प्रतिपाद्यप्रतिपादकभावः सम्बन्धः । ग्रन्थकृदध्येतृजनयोर्व्यु-

---

१. १९६८ खिस्ताब्दस्य मे मासे डि० लिट् संज्ञकोपाधिलाभार्थं कलिकाताविश्वविद्यालये प्रदानावसर एवमस्माभिर्भणितमासीत् । १९७० खिस्ताब्दस्य जनुवरीमासे तदुपाधिवितरणार्थमुक्तविश्वविद्यालयेन यथाविधि स्वीकृतोऽस्त्ययं ग्रन्थः । तत्र च पुण्यश्लोकः डा० कान्तिचन्द्र पाण्डेयस्तथा डा० सातकडिमुखोपाध्यायस्तथा डा० भी० राघवन् महाभाग इत्येते पण्डितवर्याः परीक्षका आसन् । तेषामनुमोदनक्रमेणैव साम्प्रतमयं ग्रन्थो जिज्ञासूनामध्येतृजनानां समक्षमवतार्यते ।

२. 'ध्वनिस्वरूपमभिधेयम्, अभिधानाभिधेयलक्षणो ध्वनिशास्त्रयोर्वक्तृश्रोत्रोर्व्युत्पाद्यव्युत्पादकभावः सम्बन्धः विमतिनिवृत्या तत्स्वरूपज्ञानं प्रयोजनम्, शास्त्रप्रयोजनयोः साध्यसाधनभावस्सम्बन्ध इत्युक्तम् । (लोचनम्, पृ० ३४-३५)

त्पाद्यव्युत्पादकभावः सम्बन्धः। व्यञ्जनातत्त्वज्ञानरूपं प्रयोजनं प्रागेव प्रतिपादितम्। ग्रन्थप्रयोजनयोश्च साध्यसाधनभावः सम्बन्धः।

॥ इति सम्बन्धविनिश्चयः ॥

॥ इत्यनुबन्धचतुष्टयप्रतिपादनम् ॥

किञ्चिन् नम्रनिवेदनम्

एतत्तु सप्रश्रयं निवेदनीयमस्ति यदस्माभिः प्राचीनानामर्वाचीनानां च विपश्चितां ग्रन्थकृतामांगलसंस्कृतादिभाषानिबद्धेभ्यो ग्रन्थेभ्यो महत् साहाय्यं समासादितम्। व्यञ्जनातत्त्वन्तु भारतीयैस्तथा पाश्चात्यदेशीयैर्महामनीषिभिश्चिरन्तनैरनादिकालादेव समुपलब्धम्। तस्मादस्माभिः प्रतिपादितमेतत् तत्त्वं सर्वथा नवीनतया न ग्रहणीयम्। किन्तु तस्यैव तत्त्वस्य स्वयंसम्पूर्णभावेन प्रतिपादने यद्वैचित्र्यमथवा यन्नूतनत्वमस्ति तत्तु सर्वथास्मदीयमेव। यथाह जयन्तभट्टः—

कुतो वा नूतनं वस्तु वयमुत्प्रेक्षितुं क्षमाः।
वचोविन्यासवैचित्र्यमात्रमत्र विचार्यताम् ॥ इति (न्यायमञ्जरी, १-८)।

तथाप्यस्मिन् ग्रन्थे यदि वाचकमहाभागैर्लेशतोपि किञ्चिन्नवीनं तत्त्वं सदयं परिचीयते तर्हि तत् पूर्वसूरिभिः कृतस्य यत्नस्यैव पार्यन्तिकं फलमिति मन्तव्यम्। किं बहुना—

ऊर्ध्वोर्ध्वमारुह्य यदर्थतत्त्वं धीः पश्यति श्रान्तिमवेदयन्ती।
फलं[1] तदाद्यैः परिकल्पितानां विवेकसोपानपरम्पराणाम् ॥

(अभिनवभारती, ६. पृ० २९८)

---

१. 'फलं' इति १९४६ ख्रिस्ताब्दीय-कवि-संस्करणसमर्थितः पाठः। ग्नोलिमहोदयेन तु 'अलं' इति पाठः प्रदत्तः। (एस्थेतिक् एक्स्पेरियेन्स०—पृ० १४)। स नास्मभ्यं रोचते। 'अलं' इत्यस्य तृतीयाविभक्तिसापेक्षत्वात् प्रकृते च तदभावात्। प्रथमार्धस्य 'यत्' इति पदस्य 'यतः' इत्यर्थं स्वीकृत्य द्वितीयार्धस्य 'तद्' इत्यस्य 'ततः' इत्यर्थो ग्रहणीयः यदि चेदलमित्यस्य निष्प्रयोजनमित्यर्थः क्रियते। सति चैवं 'परम्पराणाम्' इत्यत्र तृतीया स्यात्। 'यत्' इति अर्थतत्त्वस्य विशेषणम्, तेन 'तत्' इत्यस्यान्वयः इति चेद् 'अलम्' इत्यस्य 'समर्थम्' इत्यर्थः स्यात्। सति चैवं परम्पराणामित्यत्र चतुर्थीं विनान्वयोपपत्तिर्न स्यात्। ग्नोलिमहोदयस्तु 'अलम्' इत्यस्य निष्प्रयोजनम् इत्यर्थं स्वीकृत्यांगलानुवादे 'पूर्वसूरिभिः कृतस्य श्रमस्य परामर्शेनालमिति प्रतिपादयति।

इत्यस्मदुपजीव्यानां श्रीमदभिनवगुप्तपादानामेव वचनेनास्मदभिप्रायं विनिवेद्य समाप्यते प्रथमदर्शनम् ।

Tireless, the mind of man climbs ever higher to gaze on truth. What is the point of dwelling on the doctrines which have succeeded each other on the ladder of thought ? (p. 63).

अस्मन्मते तु नायमभिनवगुप्तपादस्याशयः । तथा हि 'आम्नायसिद्धे' इत्यत्र 'किमपूर्वमेतद्' इत्याशंक्य प्रकृतपद्ये स्वयमाविष्कृतमर्थतत्त्वं पूर्वाचार्यकृतश्रम-परम्पराफलमिति निवेद्य 'चित्रम्' इति पद्ये पूर्वाचार्यप्रदर्शितमार्गलाभे सति असाध्यापि प्रमेयसिद्धिः सुकरा भवतीति संस्थाप्य स्वयं यदर्थतत्त्वमाविष्कृतं तदपि सद्भिर्मूलप्रतिष्ठायाः फलमिति हेतोः परजनमतदूषणत्यागप्रतिज्ञा क्रियते 'तस्मात् सतामिति' चतुर्थे । एवञ्च प्रकृते पद्ये फलमितिपाठग्रहणेनैव सर्वं सुसमञ्जसं स्यात् । तस्मिन्नेव पूर्वसूरिसाहाय्यस्वीकाररूपे अर्थेऽस्माभिरत्रैतत् पद्यमुपन्यस्तम् इति शम् ।

द्वितीयं दर्शनम्

व्यञ्जनास्वरूपनिरूपणम्

श्रीमदानन्दवर्धनाचार्यः स्वकीये **ध्वन्यालोके** ध्वनितत्त्वं प्रतिपिपादयिषुः सर्वप्राथम्येन व्यञ्जनातत्त्वं निभालयति। तन्मते यस्मिन् काव्ये कोपि व्यंग्यार्थः वाच्यार्थात् प्रधानतरस्सन् समुल्लसति तदेव काव्यं ध्वनिरिति व्यपदिश्यते। (**ध्व०** १–१३)। स च व्यंग्यार्थः वाच्याद् दूरं विभेदवान्। (**ध्व०** १, पृ. ५२) इति ब्रुवतानन्दवर्धनेन **ध्वन्यालोकस्य** प्रथमोद्योत एव वाच्याद् व्यंग्यस्यात्यन्तं विशकलितत्वं सोदाहरणं प्रदर्शितम्। यत्तु शब्दार्थयुगलभूतं काव्यं सर्वप्राधान्येन वर्तमानं कञ्चन व्यंग्यमर्थं प्रत्याययति तदेव ध्वनिः। तस्मिंश्च काव्ये ध्वनिव्यपदेशस्तस्य व्यञ्जकत्वनिबन्धनः। यदेव व्यंग्यमर्थं समुद्भावयति तदेव व्यञ्जकत्वम्। यस्तु समुद्भावनरूपो व्यापारः स एव व्यञ्जनाव्यापार इति ध्येयम्। तथा चोच्यत आनन्दवर्धनेन—'प्रथमे हि विद्वांसो वैयाकरणाः, व्याकरणमूलत्वात् सर्वविद्यानाम्। ते च श्रूयमाणेषु वर्णेषु ध्वनिरिति व्यवहरन्ति। तथैवान्यैस्तन्मतानुसारिभिः सूरिभिः काव्यतत्त्वार्थदर्शिभिर्वाच्यवाचकसम्मिश्रः शब्दात्मा काव्यमिति व्यपदेश्यो व्यञ्जकत्वसाम्याद् ध्वनिरित्युक्तः।' इति (**ध्व०** १, पृ. १३२–१३५) एवन्तर्हि प्रधानतमव्यंग्यव्यञ्जकस्य काव्यस्य ध्वनिव्यपदेशे तस्य व्यञ्जकत्वमेव कारणम्। सति चैवमयमुदेति प्रश्नः—किं नाम व्यञ्जकत्वम्? को वा व्यञ्जनाव्यापार इति। उच्यते चानन्दवर्धनेन—'तदेवं व्यञ्जकमुखेन ध्वनिप्रकारेषु निरूपितेषु कश्चिद् ब्रूयात्—किमिदं व्यञ्जकत्वं नाम व्यंग्यार्थप्रकाशनम्।' इति (**ध्व०** ३, पृ. ४१३)। एवंरूपायां व्यञ्जकस्वरूपजिज्ञासायामानन्दवर्धनो निगदति—

(१) 'स्वरूपं प्रकाशयन्नेव परावभासको व्यञ्जक इत्युच्यते' इति (**ध्व०** ३, पृ. ४३१)।

(२) 'व्यञ्जकत्वमार्गे तु यदाऽर्थोऽर्थान्तरं द्योतयति तदा स्वरूपं प्रकाशयन्नेवासावन्यस्य प्रकाशकः प्रतीयते प्रदीपवत्।' (**ध्व०**, ३, पृ. ४२४)

(३) 'न हि व्यंग्ये प्रतीयमाने वाच्यबुद्धिर्दूरीभवति, वाच्यावभासाविनाभावेन तस्य प्रकाशनात्। तस्माद् घटप्रदीपन्यायस्तयोः, यथैव हि प्रदीपद्वारेण घटप्रतीतावुत्पन्नायां न प्रदीपप्रकाशो निवर्तते तद्वद्व्यंग्यप्रतीतौ वाच्यावभासः।' इति च (**ध्व०** ३, पृ. ४२१)

एतच्च व्यञ्जकत्वं केवलं वाच्यवाचकात्मककाव्य एवोपलभ्यमानमिति न। (१) 'न हि यैवाभिधानशक्तिः सैवावगमनशक्तिः। अवाचकस्यापि गीतशब्दादेर्रसादिलक्षणार्थावगमदर्शनात्। अशब्दस्यापि चेष्टादेरर्थविशेषप्रकाशनप्रसिद्धेः।' (ध्व० ३, पृ० ४१३) (२) 'तथा हि गीतध्वनीनामपि व्यञ्जकत्वमस्ति रसादिविषयम्। न च तेषां वाचकत्वं लक्षणा वा कथञ्चिल्लक्ष्यते। शब्दादन्यत्रापि विषये व्यञ्जकत्वस्य दर्शनाद्वाचकत्वादिशब्दधर्मप्रकारत्वमयुक्तम्।' (ध्व० ३, पृ. ४२८) (३) 'न च व्यञ्जकत्वं लिंगत्वरूपमेव आलोकादिष्वन्यथा दृष्टत्वात्।' (ध्व० ३, पृ. ४५३) इत्याद्यनुरोधात्। तथापि **ध्वन्यालोके** शब्दार्थगतं काव्यनिष्ठमेव व्यञ्जकत्वं विशेषतः सयुक्तिकं प्रतिपादितम्।

शब्दार्थगतं काव्यनिष्ठं यद्व्यञ्जकत्वं तत्तु व्यंग्यार्थप्रत्यायनमुखेनैवात्मानमासादयति। व्यंग्यार्थप्रत्यायनञ्च व्यञ्जनाव्यापारसापेक्षम्। सति चैवं व्यंग्यार्थस्य वाच्यादिवैलक्षण्येन सद्भावसाधनादेव व्यञ्जनाव्यापारस्याभिधादिव्यापारवैलक्षण्यं साधितं स्यात्। तस्मात् वाच्यव्यतिरिक्ततया समुपलभ्यमानस्यास्य व्यंग्यार्थस्य प्रतीयमानादिपर्यायशब्दव्यपदेशयोग्यस्यैव स्वरूपमत्र प्रथमं विचार्यते।

वाच्यार्थातिरिक्ततया प्रकाशमानोऽन्योऽपि व्यंग्यार्थो वाक्येषु कदाचित् समुदियाद् वाक्यप्रयोक्तुः प्रतिभायां सत्यामित्ययं भाव ऋग्वेदकालादेवोपलभ्यते। तथा चायम् ऋङ्मन्त्रः—

सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत।
अत्रा सखायः सख्यानि जानते भद्रैषा लक्ष्मीर्निहिताधि वाचि॥
(ऋ० सं० १०-१७-२)

अत्रायमाशयः—भृष्टयवादिचूर्णमिव परिपवनेन परिष्कुर्वन्तः धीरा धीमन्तः मनसा वाचं यस्मिन् स्थले अकृषत तत्र 'सखायः' सखिभावमापन्ना एव जनाः 'सख्यानि' सखिभावान् जानन्ति। तादृशपरिस्कृतवाक्प्रयोक्तृणां वाचि कल्याणी (भद्रा) लक्ष्मीः अर्थात् शोभा अर्थात् महती सम्पत्तिः निहिता वर्तते। एतदप्यत्रोह्यम्। शब्दानां सुचयनं विना वाक्ये यथा कथञ्चित् प्रयुक्ते सति यथा कथञ्चिदर्थाविर्भावः स्यात्। सुनिचितानां पदानां प्रयोगे सति कोपि विशेषोतिरिक्तोप्यर्थः समुल्लसति। तादृशे त्वर्थेधीरैर्मनोनिवेशपूर्वकमाविर्भविते वाक्ये वर्णितान् विषयान् प्रति धीराणां हृद्गतः सानुकम्पः सख्यभावविशेषोप्याविर्भवति। तमर्थमवगन्तुं श्रोतारोपि सखिभावसमन्विता अर्थादनुकम्पावन्तः सहृदयाः स्युः।

अनेनैवार्थविशेषेण वाक्यस्य भद्रा लक्ष्मीरर्थात् शोभना श्रीरर्थादनन्यसाधारणं लावण्यमाविर्भवेदिति ।[1]

एवन्तर्हि वाक्यस्यानन्यसाधारणशोभासम्पादकोऽयमर्थो न सर्वजनावबोधयोग्यः । यस्तु सखिभावमापन्नः, यस्य वक्त्रा हृदयसंवादो वर्तते स एवार्थमवधारयितुं प्रभवति नेतरः । अत एवोच्यते—

उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम् ।
उतो तस्मै तन्वं विसस्रे जायेव पत्य उशती सुवासाः ॥
(ऋ० सं० १०-७१-४) इति ।

अत्रायमाशयः । यस्तु श्रोता सखिभावसमन्वितो न भवति स वाचः विशिष्टं शोभनमर्थं नैवावधारयति । तेन च स वाचं पश्यन्नपि न पश्यतीत्युच्यते । स हि तां सम्यक् पश्यति यस्तस्या अर्थं जानाति । तदेवान्यथापि वर्ण्यते यदर्थावधारणाक्षमो जनः वाचं शृण्वन्नपि न शृणोतीति । येनैव हि सम्यक्तयार्थोऽवगम्यते तेनैव सा सम्यक् श्रुता भवति । परन्तु कस्मैचिदर्थज्ञाय सा एव वाक् 'तन्वं विसस्रे', शरीरं विवृणोति । अर्थो वाचः शरीरं तं विवृणोतीत्यर्थः । यथा कथञ्चित् शरीरस्य प्रदर्शने यथा कथञ्चिदापातलभ्यस्यार्थस्यावबोधः । शरीरस्य विस्रंसने विवृत्य प्रदर्शने तु विशिष्टस्यैवातिरिक्तस्यार्थस्य समुल्लास इति भावः । कथं वा वागात्मानं विवृणोतीत्याह—जायेव पत्य उशती सुवासाः । यथा हि जाया विवृतसर्वांगावयवा भूत्वा 'उशती' कामयमाना 'पत्ये' इष्टाय भर्त्रे प्रेम्णा-दर्शयेदात्मानं तथैव वाक् सखिभावसमन्वितायान्तर्निहितमपि विशिष्ट-

---

१. भद्रैषा लक्ष्मीरिति श्रुतिवाक्येन काव्यस्यापि श्रुतिप्रामाण्यं संसाधितमिति साहित्यमीमांसाकार इति डा० भी० राघवन् महोदयानामाशयः । यदुक्तम्—
"To give vedic prāmāṇya for poetry, he quotes the beautiful text भद्रैषा लक्ष्मीर्निहिताधिवाचि, which Bhavabhūti has adopted into a verse of his in his *Uttararāmacarita* (IV. 18). The S. M. says :

"तदेवं काव्यार्थभावनया रसेन [स्य]निरतिशयानन्दलाभस्य कविवचनेषु भद्रया लक्ष्म्या निधानस्य च श्रवणात् कविकाव्ययोः महत्त्वं, रसिकस्य च प्रयोजनं श्रुतिसिद्धमेवेति सर्वं समञ्जसम् ।"
(pp. 49 and 50, Mad Ms., TSS. Edn., p. 161)" इति ॥

[*Bhoja's Śṛṅgāraprakāśa*, p. 96]

मर्थजातं विवृत्य प्रदर्शयति, स्वकं निगूढं स्वरूपं प्रकाशयति इति भावः[1]।

एतन्मन्त्रयोरेवाभिप्राय आनन्दवर्धनेनाप्यत्रानूद्यमानासु कारिकासु अनुसृत इति प्रतिभाति। तथा हि भद्रैषा लक्ष्मीर्निहिताधिवाचि इति ग्रन्थस्यानुवादः यथा—

प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्।
यत्तत्प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवांगनासु॥
(ध्व० १-४, पृ० ४८-४९) इति।

अत्र सखायः सख्यानि जानते इति ग्रन्थस्यानुवादः यथा—

शब्दार्थशासनज्ञानमात्रेणैव न वेद्यते।
वेद्यते स तु काव्यार्थतत्त्वज्ञैरेव केवलम्॥ (ध्व० १-७) इति। तथैव उत त्वः पश्यन्न ददर्श वाचम् इति ऋचोऽनुरूपः भावोऽपि तत्रैव शब्दार्थशासनज्ञानेति कारिकायामेव।

'सक्तुमिव तितउना पुनन्तु यत्र धीरा मनसा वाचमक्रत' इत्यस्यानुरूपो भावो यथा—

सोऽर्थस्तद्व्यक्तिसामर्थ्ययोगी शब्दश्च कश्चन।
यत्नतः प्रत्यभिज्ञेयौ तौ शब्दार्थौ महाकवेः॥ (ध्व० १-८)[2] इत्यत्र।

---

१. तुः (क) यस्तित्याज सचिविदं सखायं न तस्य वाच्यपि भागो अस्ति।
यदीं शृणोत्यलकं शृणोति न हि प्रवेद सुकृतस्य पन्थाम्॥
(ऋ० सं० १०-७१-६)

(ख) कान्तेव सरसतापादनेनाभिमुखीकृत्य·····(काव्यप्रकाशः—१)

(ग) नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन।
यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम्॥
(कठोपनिषद्, १-२-२३)

२. 'एकः शब्दः सुप्रयुक्तः सम्यग्ज्ञातः स्वर्गे लोके च कामधुग् भवति' इत्यस्मिन् (साहित्यदर्पणे प्रथमपरिच्छेद उद्धृते) वेदवाक्येऽपि एकस्यापि शब्दस्य सुप्रयुक्तत्वं तन्निष्ठव्यंग्यार्थवैभवविवेचनयैवेति प्रतिभाति। सम्यग् ज्ञानमपि 'यत्नतः प्रत्यभिज्ञेयौ' इति न्यायेन व्यंग्यार्थपरिचयवत्त्वमेवाकलयति। एतदनुरूपो भावः चीनदेशीयस्य कन्फुसियस्महोदयस्य यथा—'प्रायेण हि एकेनैव पदेन पुरुषो विज्ञ इति परिचीयते एकेनैव च पदेन प्रायशो मूर्ख इति। तस्मादस्माभिर्यदुच्यते तत्र सावधानैर्भवितव्यम्।' इति।

"For one word a man is often deemed to be wise and for one word he is often deemed to be foolish. We ought to be

भामहस्य काव्यालंकारे प्रतीयमानार्थपरामर्शः

अयमेव वाच्यादर्थात् समुद्भाव्यमानोऽर्थ आनन्दवर्धनेन व्यंग्यार्थ इति व्यपदिश्यते। आनन्दवर्धनपूर्वभाविभिरप्यालंकारिकैरयं वाच्यव्यतिरिक्तोऽर्थो बहुधा परामृष्टः। तथा हि भामहस्य **काव्यालंकारे**—

(१) प्रतिवस्तूपमालक्षणे गुणसाम्यं प्रतीयत इत्युच्यते।[1] एतच्च गुणसाम्यं वस्तुत आनन्दवर्धनमते—

'प्रतीयमानमन्यदेव वस्तु', यद्यप्यस्यान्यस्यार्थस्य वाच्यव्यतिरिक्तत्वं भामहेन विस्पष्टतया नैव निभालितम्।

(२) समासोक्तिलक्षणेऽपि गम्यमानस्यान्यस्यार्थस्योल्लेखः कृतः। तथा हि—

यत्रोक्ते गम्यतेऽन्योऽर्थस्तत्समानविशेषणः।

सा समासोक्तिरुद्दिष्टा संक्षिप्तार्थतया (यथा)॥ (**काव्यालंकारः**, २–७९) इति भामहकृतं समासोक्तिलक्षणम्। अत्रापि चोल्लिख्यमानोऽयं गम्यमानः अन्योऽर्थ आनन्दवर्धनोक्तं प्रतीयमानमन्यदेव वस्तु।

(३) पर्यायोक्तं यदन्येव प्रकारेणाऽभिधीयते (**काव्यालंकारः**, ३–८) इति पर्यायोक्तलक्षणे परामृष्टोऽन्येन प्रकारेणाभिहितस्तु योऽर्थः सोप्याऽनन्दवर्धनोक्तमन्यदेव प्रतीयमानं वस्तु। यद्यप्यभिधानं नाम अभिधाशक्त्या अर्थस्य प्रतिपादनमथ च अन्येन प्रकारेणाभिधानं यत् तत्र शब्दबुद्धिकर्मणां विरम्य व्यापाराभाव इति न्यायानुरोधादभिधाशक्तिर्न प्रसरति तथापि अन्यस्यार्थस्य व्यञ्जनाव्यापारेण प्रतिपादनमपि प्रकारान्तरेणाभिधानमिति व्यपदेशं लभते। तदेवमत्राभिधानशब्दस्य साधारण्येन बोधनमेवार्थः। नत्वत्र तस्य पारिभाषिकार्थवत्त्वं शंकनीयम्।

(४) अपह्नुतिरभीष्टा च किञ्चिदन्तर्गतोपमा।

भूतार्थापह्नवादस्याः क्रियते चामिधा (यथा)॥ (**काव्यालंकारः**, ३–२१) इति लक्षणवाक्ये उपमाया अर्थात् सादृश्यस्यान्तर्गतत्वं नाम वस्तुतो वाच्यार्थादन्यत्वमेव। फलतस्तत् सादृश्यमपि अन्यदेव प्रतीमानं वस्तु।

(५) वाच्यातिरिक्तस्य व्यंग्यस्यार्थस्य वस्त्वलंकाररसादिभेदेन त्रैविध्यमस्ति। एतच्च यथास्थानमातनिष्यते। तथा हि व्यंग्यस्यालंकारस्योदाहरणं

---

careful indeed what we say." Confucious. (Ogden and Richards, *The Meaning of Meaning*. p. 209)

१. समानवस्तुन्यासेन प्रतिवस्तूपमोच्यते। यथेवानभिधानेपि गुणसाम्यप्रतीतितः॥ (काव्यालंकार, २–३४)

बथा सर्वेष्वलंकारेषु तत्तदलंकारातिरिक्तरूपेणाविष्क्रियमाणा अतिशयोक्तिः। सा च वाच्यालंकारातिरिक्ता सती वाच्यादन्या प्रतीयमाना एव। तथा चोच्यते भामहेनातिशयोक्तिमेव वक्रोक्तिरिति पर्यायेणाभिदधता यथा—

सेषा सर्वैव वक्रोक्तिरनयार्थो विभाव्यते।

यत्नोऽस्यां कविना कार्यः कोऽलंकारोऽनया विना॥(**काव्यालंकारः**, २-८५)

एतदनुरूप आशयः दण्डिणोऽप्युपलभ्यते यथा—

अलंकारान्तराणामप्येकमाहुः परायणम्।

वागीशमहितामुक्तिमिमामतिशयाह्वयाम्॥ (**काव्यादर्शः**, २-२२०)

इति। भामहाभिप्रायमेव विस्पष्टमभिप्रेत्य आनन्दवर्धनोपि ब्रूते—'तथा हि दीपकसमासोक्त्यादिवदन्येप्यलंकाराः प्रायेण व्यंग्यालंकारान्तरवस्त्वन्तरसंस्पर्शिनो दृश्यन्ते। यतः प्रथमं तावदतिशयोक्तिगर्भता सर्वालंकारेषु शक्यक्रिया। कृतैव च सा महाकविभिः कामपि काव्यच्छविं पुष्यति, कथं ह्यतिशययोगिता स्वविषयौचित्येन क्रियमाणा सती काव्ये नोत्कर्षमावहेत्। भामहेनाप्यतिशयोक्तिलक्षणे यदुक्तम्—

सैषा सर्वैव वक्रोक्तिरनयार्थो विभाव्यते।

यत्नोऽस्यां कविना कार्यः कोऽलंकारोऽनया विना॥ इति। तत्रातिशयोक्तिर्यमलंकारमधितिष्ठति कविप्रतिभावशात्तस्य चारुत्वातिशययोगोऽन्यस्य त्वलंकारमात्रतैवेति सर्वालंकारशरीरस्वीकरणयोग्यत्वेनाभेदोपचारात् सैव सर्वालंकाररूपेत्ययमेवार्थोऽवगन्तव्यः। (**ध्व०** ३, पृ० ४६४-६८)

दण्डिनः काव्यादर्शे प्रतीयमानार्थपरामर्शः

एवमेव दण्डिनः काव्यादर्शेऽपि प्रतीयमानोऽर्थः बहुधा परामृष्टः। तथा हि उदारगुणं लक्षयता दण्डिना प्रोच्यते—

(१) उत्कर्षवान् गुणः कश्चिद् यस्मिन्नुक्ते **प्रतीयते**।
तदुदाराह्वयं तेन सनाथा काव्यपद्धतिः॥
अर्थिनां कृपणा दृष्टिस्त्वन्मुखे पतिता सकृत्।
तदवस्था पुनर्देव नान्यस्य मुखमीक्षते॥
इति त्यागस्य वाक्येऽस्मिन् उत्कर्षः साधु लक्ष्यते॥

(**काव्यादर्शः**, १।७६-७८ क)

अत्र लक्ष्यते इति प्रतीयतेपर्यायः। अर्थिनामितिपद्ये सम्बोध्यमानस्य राज्ञः उत्कर्षवान् त्यागो नाम गुणः प्रतीयते। स चायमुत्कर्षवद्गुणविषयकोऽर्थः 'प्रतीयमानं पुनरन्यदेव वस्तु।'

(२) आशयस्य विभूतेर्वा यन्महत्त्वमनुत्तमम् ।
उदात्तं नाम तं प्राहुरलंकारं मनीषिणः ।। (काव्यादर्शः, २–३००)

इत्युदात्तालंकारलक्षणस्य लक्ष्ये संगतिं प्रदर्शयता दण्डिना प्रोच्यते—

गुरोः शासनमत्येतुं न शशाक स राघवः ।
यो रावणशिरश्छेदकार्यभारेप्यविक्लवः ।।
रत्नभित्तिषु संक्रान्तैः प्रतिबिम्बशतैर्वृतः ।
ज्ञातो लंकेश्वरः कृच्छ्रादाञ्जनेयेन तत्त्वतः ।।
पूर्वत्राशयमहात्म्यमत्राभ्युदयगौरवम् ।
सुव्यञ्जितमिति प्रोक्तमुदात्तद्वयमप्यदः ।।
(काव्यादर्शः, २।३०१-३०३)

पूर्वत्र प्रथमतरश्लोके आशयस्य राममनोवृत्तेः माहात्म्यं वाच्यार्थातिरिक्ततया प्रतीयमानं सदन्यदेव वस्तु । द्वितीये च रावणस्य सम्पदभ्युदयोऽपि प्रतीयमान एव न तु वाच्यार्थरूपेण समुपलभ्यते । एवञ्च प्रतीयमानमित्यस्मिन्नर्थे सुव्यञ्जितमिति दण्डिना विस्पष्टमेवोक्तम् । **तस्मादयं** प्रतीयमानोऽर्थः व्यञ्जनाव्यापारेणैवोपलभ्यते यद्यपि स व्यापारः अभिधाव्यापारातिरिक्ततया दण्डिना नैव परामृष्ट इति दिक् ।

उपमायां सादृश्यस्य प्रतीयमानत्वप्रसङ्गः

(३) एवमेव 'यथा कथञ्चित् सादृश्यं यत्रोद्भूतं प्रतीयते ।
उपमा नाम सा ।।' (**काव्यादर्शः**, २-१४) इत्यत्रापि सादृश्यं प्रतीयते अर्थात् वाच्यातिरिक्तान्यवस्तुरूपेणोपलभ्यते इत्याशय इति प्रतिभाति । परन्तूपमायां सादृश्यस्य प्रतीयमानत्वमथवा वाच्यत्वमेव वा इत्यस्मिन् विषये आलंकारिकाणां महान् एव मतभेदः । तथा हि साम्यं वाच्यमवैधर्म्यं वाक्यैक्ये उपमा **द्वयोः**' इति उपमालक्षणे विश्वनाथकविराजेन सादृश्यस्य कण्ठत एव वाच्यत्वं प्रतिपादितम् । सम्मटाचार्येण तु 'साधर्म्यमुपमा भेदे' इत्युपमालक्षणमुपनिबध्नता साधर्म्यस्यैवोल्लेखः कृतः न तु सादृश्यस्य । तदेवं केषांश्चन मते साधर्म्यं सादृश्यञ्चेति भिन्नावेव पदार्थौ भवतः । तदनुसारमेव सादृश्यस्य वाच्यत्वप्रतीयमानत्वनिर्णयप्रसंगः । किञ्च उपमाया श्रौती आर्थी चेति भेदद्वयदर्शनेन तदनुसारमपि सादृश्यसाधर्म्ययोः वाच्यत्वव्यंग्यत्वप्रसंगः समायाति । तथा हि सादृश्यमतिरिक्तः पदार्थ इति वैयाकरणमीमांसकादयः । साधर्म्यमेव सादृश्यमिति च नैयायिकसमयः । मम्मटीयोपमालक्षणव्याख्याने तु टीकाकृद्भिः प्रायश उभयोर्भेद एव उट्टंकितः । तदेवं साधर्म्यं नाम साधारणधर्मवत्त्वम् **इत्युद्द्योतकारः** । तत्र साधारणधर्मवत्त्वं च साधारणधर्मसम्बन्ध

एव। तथा सति मम्मटमते सादृश्यप्रयोजकसाधारणधर्मसम्बन्ध उपमेति फलितम्। मम्मटेनैव तावदभ्यधायि—'उपमानोपमेययोरेव न तु कार्य-कारणादिकयोः साधर्म्यं भवतीति तयोरेव समानेन धर्मेण सम्बन्ध उपमा' इति। सादृश्यन्तु साधर्म्यभिन्नमेव। तथा हि 'सादृश्यं च साधारणधर्म-सम्बन्धप्रयोज्यो धर्मविशेष' इति **उद्द्योतोक्तं** सादृश्यलक्षणम्। पुनरपि तत्रैव सादृश्यसाधर्म्ययोर्विभागप्रदर्शनमुखेनोच्यते—'सादृश्यप्रयोजकसाधारण-धर्मसम्बन्धो ह्युपमा सादृश्यं चातिरिक्तः पदार्थः' इति। तदेवं सादृश्य-स्यातिरिक्तपदार्थत्वमुरीकृत्य एव तस्य वाध्यत्वप्रतीयमानत्वे निभालयति नागोजीभट्टो यथा—'इवादियोगे साधारणधर्मसम्बन्धरूपोपमा वाच्या सादृश्यप्रतीतिस्त्वार्थी। सदृशादिपदयोगे सादृश्यप्रतीतिः शाब्दी उपमा त्वार्थी।' इति। (**लघुमञ्जूषायां** धात्वर्थनिपातार्थवादः)

एवमेव सादृश्यस्यातिरिक्तपदार्थत्वस्वीकरणाकरणाभ्यां मतद्वयदर्शनादेव पण्डितराजेनापि 'सादृश्यस्य पदार्थान्तरत्वे' तथा 'सादृश्यस्य समानधर्म-रूपत्वे' इत्युभयथा एव उपमायां शाब्दबोधप्रकारः सुविवृतः। (**रसगङ्गाधरः**, २. पृ० १८६ तथा १९०)। पण्डितराजस्य स्वमते तु सादृश्यस्य पदार्था-न्तरत्वमेवालङ्कारिकसमयाभिप्रेतम्। यदाह तुल्ययोगिताप्रकरणे—'प्रकृता-नामेवाप्रकृतानामेव वा गुणक्रियादिरूपैकधर्मान्वयस्तुल्ययोगिता। औपम्यं चात्र गम्यम्। तत्प्रयोजकस्य समानधर्मस्योपादानात्। वाचकाभावाच्च। अत एवालङ्कारिकाणामपि सादृश्यं पदार्थान्तरम्। न तु साधारणधर्मरूप-मिति विज्ञायते। अन्यथा औपम्यस्यात्र गम्यत्वोक्तेरनुपपत्तेः।' इति (**रसगङ्गाधरः**, २. पृ० ३१७)

एवन्तर्हि वाच्यव्यंग्यरूपेण उभयथा एव सादृश्यस्य बोधदर्शनात् दण्डिकृत-लक्षणे प्रतीयते इति पदं साधारण्येन तदुभयविधबोधपरामर्शकमेव भवतु इति चेदत्रास्माकं मते व्यंग्यार्थपरकत्वेनैव प्रतीयत इति पदं प्रयुज्यते। अन्यत्रापि व्यंग्यपरकत्वेनैव प्रतीयमानशब्दस्य प्रयोगदर्शनात्। तथा हि—

अम्भोरुहमिवाताम्रं मुग्धे करतलं तव।
इतिधर्मोपमा साक्षात् तुल्यधर्मप्रदर्शनात्॥ (**काव्यादर्शः**, २-१५)

इत्यत्र साधारणधर्मस्य साक्षादुपात्तत्वं प्रदर्श्यानुपदमेव तस्यानुपात्तत्वेना-क्षेपलभ्यत्वे प्रतीयमानशब्दमेवोपादत्ते यथा—

राजीवमिव ते वक्त्रं नेत्रे नीलोत्पले इव।
इयं प्रतीयमानैकधर्मा वस्तूपमैव सा॥
(**काव्यादर्शः**, २-१६) इति।

लुप्तोपमायां च कथमनुपात्तो धर्मादिराक्षेपेण लभ्यते कथं च तत्र व्यञ्जनाव्यापार एव प्रगल्भत इत्येतत् सर्वमग्रे दर्शयिष्यते। साम्प्रतन्तु अवदातमेतद् यद्वाच्यव्यतिरिक्तार्थान्तरविषयकत्वेनैव प्रतीयमान इति पदं साभिप्रायमेव प्रयुंक्ते दण्ड्याचार्यः। किन्तु कथं दण्डिप्रभृतीनां ग्रन्थेषु प्रतीयमानार्थबोधनार्थमपेक्ष्यमाणस्य व्यञ्जनाव्यापारस्य विस्पष्टं परामर्शो नास्तीत्यग्रे वक्ष्यते।

किन्तु नागोजीभट्टेन यदुक्तम् 'इवादियोगे उपमा वाच्या सादृश्यप्रतीतिस्त्वार्थी' इत्यादि तत्र किञ्चित् प्रष्टव्यमस्ति। तत्र तावत् किं नाम आर्थीत्वमिति नियमेनैवोदेत्ययं प्रश्नः। किन्तु आर्थीत्वतात्पर्यविषयेपि आलङ्कारिकाणामस्मदुपजीव्यभूतानां महानेव मतभेदः दृश्यते। तेन किं वयं कुर्मः। तथा हि 'आर्थत्वं च प्राथमिकान्वयबोधाविषयत्वम्' इति निदर्शनाप्रकरणे पण्डितराजः। (**रसगङ्गाधरः**, २ पृ० ३४०) किञ्च 'तथा अरविन्दमिव सुन्दरमित्यत्रेवाऽर्थे सादृश्येऽरविन्दस्य निरूपितत्वसंसर्गेणान्वयः.....अरविन्दवत्सुन्दरमित्यत्र वतेः 'तेन तुल्यम्' इति विहितस्य सादृश्यवदर्थकस्य सादृश्ये लक्षणा तस्य सुन्दरपदार्थैकदेशेन सुन्दरत्वेनान्वयादरविन्दमिव सुन्दरमित्यत्रेव बोधः। एकत्र शक्त्यापरत्र लक्षणया च सादृश्यप्रतिपादनाच्छ्रौत्यार्थी चेति।' (**रसगङ्गाधरः**, २ पृ० १८६-१८९)। पण्डितराजेन यदुक्तं तत्र सादृश्यस्य इवपदवाच्यत्वम्। आर्थीत्वं नाम लक्षणालभ्यत्वम् इति। ततो नागोजीभट्टमतस्य भेदः सुस्फुट एव। तन्मते हि सादृश्यस्य इवादिवाच्यत्वाभावात्। मन्मते तु मम्मटजगन्नाथयोर्विरोध एवास्य भेदस्य मूलम्। मम्मटमते हि साधर्म्यमुपमा, पण्डितराजमते सादृश्यमेव उपमा। यथाह—'सादृश्यं सुन्दरं वाक्यार्थोपस्कारकमुपमालंकृतिः' इति (**रसगङ्गाधरः**, २ पृ० १५७)। अत्र च पुनरियं शंका समुदेति—

ननु इवादीनान्तु वाचकत्वमालंकारिकेष्वप्यप्रसिद्धम्। तैरपि तावदिवादीनां द्योतकत्वमेवोररीक्रियते। कथं तर्हि सादृश्यस्य इवपदवाच्यत्वं पण्डितराजविश्वनाथकविराजप्रभृतीनां संगच्छते। इति शंकायामुच्यते—'तत्रेवादीनां द्योतकत्वमेव न वाचकत्वम्।.....इति वैयाकरणाः। उपसर्गाणां द्योतकत्वमावश्यकम्।.....इवादीनां तु वाचकत्वम्। बाधकाभावात्।.....इति नैयायिकाः।' (**रसगङ्गाधरः**, २ पृ० १९१) इति मतद्वयमुपनिबध्नता पण्डितराजेनात्र नैयायिकमतमेव स्वीक्रियत इत्यस्माकं प्रतिभाति। अत एव तद्वचनं सुसंगतमेवास्ते। यत्र तु इवादियोगे उपमा वाच्या इत्युक्तं तत्र उपमा नाम साधर्म्यं न तु सादश्यम। तत्रापि साधर्म्य-

मिवपदस्य न साक्षाद् वाच्यार्थः। किन्तु साधर्म्यस्य इवपदसमभिव्याहृत-पदशक्त्युद्बोधद्वारेण लक्षणया बोधितत्वेपि समग्रस्यापि वाक्यस्य वाच्यार्थ-विशेषस्यैव पिण्डीभूयोपस्थितत्वात् तन्निकुम्भितत्वेन साधर्म्यस्यापि वाच्यत्व-मुक्तम्। **दर्पणादिष्वपि** 'साम्यं वाच्यमवैधर्म्यम्' इत्यादिषु वाच्यवाक्यार्थ-करम्बितत्वेनैव इवपदबोधितत्वेपि सादृश्यस्य वाच्यत्वमुक्तं विशेषतस्तु रूप-कादिषु गम्यमानात् सादृश्यादस्य भेदमुपोद्बलयितुमित्यास्तां तावत्।

अत्र तावत्पुनरप्ययं प्रश्नस्समुदेति, किं नाम आर्थीत्वमिति। मम्मटमते आर्थीत्वं नाम अर्थविशेषस्य पर्यालोचनयार्थादनुसन्धानेन लभ्यत्वम्। यदाह—'तेन तुल्यं मुखम् इत्यादावुपमेये एव तत्तुल्यमस्य इत्यादौ चोपमान एव इदं च तच्च तुल्यम् इत्युभयत्रापि तुल्यादिशब्दानां विश्रान्ति-रिति साम्यपर्यालोचनया तुल्यताप्रतीतिरिति साधर्म्यस्यार्थत्वात्तुल्यादि-शब्दोपादाने आर्थी·····'इति। अत्र तावदार्थत्वं नामास्मन्मते व्यंग्यत्व-मेव। 'श्रौता आर्थाश्च ते यस्मिन्नेकदेशविवर्ति तत्।' (**काव्यप्रकाशः**, १०, सू० १४१) इत्यस्य व्याख्याने मम्मटेन स्वयमेवोच्यते—'केचिदारोप्य-माणाः शब्दोपात्ताः केचिदर्थसामर्थ्यादवसेयाः इत्येकदेशविवर्तनात् एकदेश-विवर्ति' इति। तदेवमर्थसामर्थ्यादवसेयत्वमेव आर्थत्वम्। तदेव व्यंग्यत्वम्। आनन्दवर्धनेनैवार्थसामर्थ्यलभ्यत्वे व्यंग्यत्वस्य स्वीकृतत्वात्। तथा चोक्तम्—'यत्रार्थः स्वसामर्थ्यादर्थान्तरमभिव्यनक्ति शब्दव्यापारं विनैव सोऽर्थशक्त्यु-द्भवो नामानुस्वानोपमव्यंग्यो ध्वनिः' इति (**ध्वन्यालोकः**, २)। सादृश्य-प्रतियोगित्वादिनिरूपणे अर्थपर्यालोचनाया अपेक्षितत्वे पण्डितराजेनापि तावद् व्यञ्जना प्रगल्भत इति स्वीकृतम्। यदुक्तम्—'अरविन्दमाननं च सममित्यत्र प्रथमं शब्दात्सादृश्यवदभिन्नमिति बोधे पश्चान्मानसी[1] वैयञ्ज-निकी वा परस्परनिरूपितसादृश्यस्य प्रतीतिः प्रसिद्धा निरूपितसादृश्यस्य वा' इति। (**रसगङ्गाधरः** २, पृ० १८६)

यत्त्वत्र केचन टीकाकर्तारः अर्थसामर्थ्यविसेयत्वमेव अर्थापत्तिगम्यत्व-मिति विवृण्वन्ति[2] तन्न सम्यक्। काव्ये अर्थसामर्थ्यविसेयस्य व्यंग्यत्वेना-

---

१. इयञ्च मानसी प्रतीतिः जगदीशतर्कालंकारसमर्थितमानसबोधरूपा। (शब्द-शक्तिप्रकाशिका, पृ० १५३-१५४) सा च न पण्डितराजाभिमता इति प्रतिभाति वैयञ्जनिकीति विकल्पस्योपस्थापनात्। यदुक्तम्—'व्याख्यान्तर-विकल्पस्य द्वयमिष्टं निबन्धनम्। पूर्वत्रापरितोषो वा व्याप्तिर्वा विषयान्तरे॥' इति कुमारिलभट्टेन।

२. 'अर्थवशलभ्यत्वात् आक्षेपगम्यत्वादित्यर्थः अर्थापत्तिगम्यत्वादिति यावत्।' (काव्यप्रकाशे बालबोधिनी, पृ० ५५२)

भिमतस्यार्थापत्तिगम्यत्वोक्तौ व्यञ्जनाया एव मूलोच्छेदप्रसंगः। कथं चोभयोरपि न संकरस्तदग्रे दर्शयिष्यत इत्यलमत्रैव बहुदूरं प्रसक्तानुप्रसक्तानुसरणेन।

काव्यादर्शे अन्येपि प्रतीयमानार्थपरामर्शाः

(४) दण्डिनः प्रतिवस्तूपमालक्षणेपि साम्यस्य प्रतीयमानत्वमेव न तु वाच्यत्वम्। तथा चोच्यते—

वस्तु किञ्चिदुपन्यस्य न्यसनात्तत्सधर्मणः।
साम्यप्रतीतिरस्तीति प्रतिवस्तूपमा.....॥ (**काव्यादर्शः** २।४६)

(५) "प्रतीयमानसादृश्योप्यस्ति सोप्यभिधीयते॥" (**काव्यादर्शः** २।१८९ ख) इत्यत्र व्यतिरेकालंकारभेदं दर्शयता दण्डिना पुनरपि सादृश्यस्य वाच्यादन्यत्वमर्थात् प्रतीयमानत्वं परामृष्टम्।

(६) प्रतीयमानशौक्ल्यादिसाम्ययोर्विषयदम्भसोः।
कृतः प्रतीतशुद्धयोश्च भेदोऽस्मिश्चन्द्रहंसयोः॥ (**काव्यादर्शः**२।१९५)

इत्यत्राप्यर्थविशेषस्य प्रतीयमानत्वं परामृष्टम्।

(७) समासोक्तिलक्षणे च दण्डिना प्रोच्यते—

वस्तु किंचिदभिप्रेत्य तत्तुल्यस्यान्यवस्तुनः।
उक्तिः संक्षेपरूपत्वात् सा समासोक्तिरिष्यते॥
(**काव्यादर्शः** २।२०५) इति।

अत्रान्यवस्तुन उक्तिस्तु नाभिधानं वाच्यरूपेण अपि तु प्रतीयमानार्थरूपेणैव प्रतिपादनम्।

इत्यपूर्वसमासोक्तिः पूर्वधर्मनिवर्तनात्।
समुद्रेण समानस्य पुंसो व्यापत्तिसूचनात्॥ (**काव्यादर्शः** २।२१३)

इत्यत्र सूचनपददर्शनात् समासोक्तेरप्यन्यद्वस्तु प्रतीयमानमेव।

(८) सूचनमेवाभिव्यञ्जनमिति चेदभ्युपगम्यते तर्हि आक्षेपालंकारोदाहरणेपि दण्डिना तथाविधः प्रतीयमानार्थः परामृष्टः। तथा हि—

न चिरं मम तापाय तव यात्रा भविष्यति।
यदि यास्यति यातव्यमलमाशंकयात्र ते॥
इत्यनुज्ञामुखेनैव कान्तस्याक्षिप्यते गतिः।
मरणं सूचयन्त्यैव सोऽनुज्ञाक्षेप उच्यते॥ (**काव्यादर्शः** २।१३५-१३६)

इत्यत्र मरणरूपोऽर्थः सूचितः प्रतीयमान एव।

(९) वाच्यार्थभिन्नेनान्यतरेणाप्यर्थेन दण्डिनः परिचय आसीदित्यस्य विस्पष्टतमं प्रमाणं तत्कृतं पर्यायोक्तलक्षणमेव। तथा हि वाच्यस्याभिधान-

माख्यानम्। वाच्यातिरिक्तस्य प्रतिपादनमेव प्रकान्तराख्यानम्। उच्यते च दण्डिना—

अर्थमिष्टमनाख्याय साक्षात् तस्यैव सिद्धये।
यत् प्रकारान्तराख्यानं पर्यायोक्तं तदिष्यते॥
(**काव्यादर्शः** २।२९५) इति।

(१०) किञ्च,

अन्यधर्मस्ततोऽन्यत्र लोकसीमानुरोधिना।
सम्यगाधीयते यत्र स समाधिः स्मृतो यथा॥
(**काव्यादर्शः** १-९३)

इत्यादिभिर्वचनैस्समाधिगुणस्य लक्षणोदाहरणे प्रदर्शयता दण्डचाचार्येण सादृश्यमूललक्षणास्वीकारव्याजेन तदन्तर्गतः प्रयोजनरूपो व्यङ्ग्योऽप्यर्थः मनाक्स्पृष्टः। न केवलमेतावदेव। भामहेन "सैषा सर्वैव वक्रोक्ति" रित्युक्तवता यथा सर्वेष्वपि काव्येषु व्यङ्ग्यार्थस्य सद्भावः स्वीकृतस्तथैव दण्डचाचार्येणापि—

तदेतत् काव्यसर्वस्वं समाधिर्नाम यो गुणः।
कविसार्थः समग्रोऽपि तमेनमनुगच्छति॥
(**काव्यादर्शः** १-१००)

इति वचनेन समग्रेऽपि काव्यसाम्राज्ये प्रतीयमानार्थस्य सद्भावस्स्वीक्रियते। तदेवं काव्यादर्शकारवचनैरपि "रीतिवादिभिर्ध्वनिमार्गो मनाक्स्पृष्टोऽपि न लक्षित" इति ध्वनिकारवचनं समर्थितमस्ति।

भट्टोद्भटस्य काव्यालङ्कारसारसंग्रहे प्रतीयमानार्थस्योल्लेखः

तदेतत् प्रकारान्तराख्यानं नाम शब्दार्थयोः प्राथमिको योऽभिधाव्यापारस्तद्व्यतिरिक्तेन व्यापारान्तरेणाभिधानम्। पर्यायोक्ते च प्रकारान्तराख्यानमभिधाव्यतिरिक्तेन व्यापारान्तरेण भवतीति सर्वप्राथम्येन भट्टोद्भटेन सूचितम्। तथा चोच्यते भट्टोद्भटेन—

पर्यायोक्तं यदन्येन प्रकारेणाभिधीयते।
वाच्यवाचकवृत्तिभ्यां शून्येनावगमात्मना॥
(**काव्यालंकारसारसंग्रहः** ४।६)

अयमाशयः—'वाचकस्याभिधायकस्य स्वशब्दस्य वृत्तिर्व्यापारो वाच्यार्थप्रत्यायनम्। **वाच्यस्य** त्वभिधेयस्य व्यापारो वाच्यान्तरेण सहाकांक्षासन्निधियोग्यतामाहात्म्यात् संसर्गगमनम्। एवंविधश्च यो वाच्यवाचकयोर्व्यापारस्तमन्तरेणापि प्रकारान्तरेणार्थसामर्थ्यात्मनावगमस्वभावेन यदव-

गम्यते तत्पर्यायेण स्वकण्ठानभिहितमपि सान्तरेण शब्दव्यापारेणावगम्यमानत्वात् पर्यायोक्तं वस्तु ।' इति । (**लघुवृत्तिः**, पृ० ५५)

अवगमात्मना प्रकारेण इत्यत्र वाच्यवाचकवृत्तिभ्यां शून्यत्वनिर्देशात् अयमपि अवगमात्मा शब्दव्यापार एवेति प्रतिभाति । इन्दुराजेनापि तथैव स्वीकृत्य व्याख्यायते 'सान्तरेण शब्दव्यापारेण' इति । न तु अयं शब्दार्थयोः साक्षात् सम्बन्धः किन्तु अर्थसामर्थ्यपरामर्शेनार्थः शब्दाद्व्यवहित इति परम्पराक्रमेणैवात्र शब्दार्थयोः सम्बन्धः । आनन्दवर्धनेन तु स्वयमेवावगमनमिति अभिव्यञ्जनपर्यायत्वेनैव गृहीतम् । तथा चोच्यत आनन्दवर्धनेन—'न हि यैवाभिधानशक्तिः सैवावगमशक्तिः । अवाचकस्यापि गीतशब्दादे रसादिलक्षणार्थावगमदर्शनात् ।' इत्यादि । तथापि उद्भटेन एतावदेव निभालितम् । शब्दव्यापारविषये तेन नैव किञ्चित् कुत्रचित् वैशद्येन विचारितम् ।

(२) आनन्दवर्धनेन वैशद्येन विचारितस्य व्यंग्यार्थस्यालंकाररूपो यः द्वितीयो भेदः स तु भट्टोद्भटस्यापि परिचितः । तथा चोच्यत आनन्दवर्धनेन स्वयमेव—'अन्यत्र वाच्यत्वे प्रसिद्धो यो रूपकादिरलंकारः सोऽन्यत्र प्रतीयमानतया बाहुल्येन प्रदर्शितस्तत्रभवद्भिर्भट्टोद्भटादिभिः । तथा च ससन्देहादिषूपमारूपकातिशयोक्तीनां प्रकाशमानत्वं प्रदर्शितमित्यलंकारान्तरस्यालंकारान्तरे व्यंग्यत्वं न यत्नप्रतिपाद्यम् ।' इति (**ध्वन्यालोकः** २।२६, पृ० २५८) । भट्टोद्भटस्यैव कारिकां समुद्धृत्य **लोचन**कारो ब्रूते—

'उपमानेन तत्त्वं च भेदं च वदतः पुनः ।
ससन्देहं वचः स्तुत्यै ससन्देहं विदुर्यथा ॥
(**काव्यालङ्कारसारसंग्रहः** ६।२)

इति तस्याः पाणिरयं नु मारुतचलत्पत्रांगुलिः पल्लवः

इत्यादावुपमा रूपकं वा ध्वन्यन्ते । अतिशयोक्तेश्च प्रायशः सर्वालङ्कारेषु ध्वन्यमानत्वम् ।' (**लोचनम्**, पृ० २५८) । ध्वन्यमानत्वं नाम प्राधान्येन प्रतीयमानत्वम् ।

एवंक्रमेण वाच्यार्थातिरिक्तस्य प्रतीयमानस्याऽनलङ्काररूपस्यालङ्काररूपस्य एव वार्थस्य परिचयवद्भिः 'वाच्यवाचकवृत्तिभ्यां शून्येनावगमात्मने'-त्यादि वदद्भिरपि भट्टोद्भटादिभिः प्रतीयमानार्थप्रत्यायनक्षमः शब्दस्य स व्यापारः विस्पष्टं न प्रदर्शितः । तादृशः व्यापारः व्यञ्जन-ध्वननावगमन-प्रत्यायनाक्षेपादिपर्यायव्यपदेश्यः आनन्दवर्धनेनैव वैशद्येन प्रतिपादितः ।

अयञ्च व्यञ्जनाव्यापारः द्योतनेति नाम्ना केवलं निपातेषु एव वैयाकरणैः स्वीकृतः। नैयायिकमीमांसकादिभिस्तु मुख्यगौणभेदेन शब्दानामभिधानव्यापारद्वयं स्वीकृतम्। ताभ्यां मुख्यगौणवृत्तिभ्यां व्यंग्यार्थो नैवोपलब्धुं शक्यते। नैयायिकमीमांसकादिभिर्मुख्यव्यापारस्य गौणव्यापारस्य च विचारे कृतेपि व्यञ्जनाव्यापारस्य नाम एव न गृहीतम्। आनन्दवर्धनपूर्वभाविभिरालङ्कारिकैरपि नैयायिकमीमांसकादिमतमभ्युपगम्यैव मुख्यगौणभेदेन व्यापारद्वयमेवोररीकृतम्। किन्तु तथापि तैर्बाहुल्येन शब्दव्यापारविमर्शो न कृतः। अलङ्कारशास्त्रे शब्दव्यापारविमर्शस्य यदस्ति गुरुत्वपूर्णं स्थानं तत्तु आनन्दवर्धनेनैव समुट्टङ्कितम्। तद्विधस्य विचारस्यालङ्कारग्रन्थेषु निवेशनार्थं तेनैव नवीना सरणिर्व्यवस्थापिता। तेनैव च व्यञ्जनाप्रधानं ध्वनितत्त्वमपि प्रतिष्ठितम्। तथापि कैश्चन पूर्वभाविभिरालङ्कारिकैर्गुणवृत्त्या काव्येषु व्यवहारं दर्शयद्भिः सोऽयं 'ध्वनिमार्गः मनाक् स्पृष्ट' इत्यानन्दवर्धनेन स्वयमेवोक्तम्।[1] किञ्च प्रतीयमानस्य वाच्यातिरिक्तस्यार्थान्तरस्य सद्भावमनुभवन्तोपि ये तावदानन्दवर्धनपूर्वभाविनो व्यंग्यार्थस्य स्वरूपं विस्पष्टं प्रदर्शयितुं न पारितवन्तस्तेषामेव कांश्चन कटाक्षीकृत्य आनन्दवर्धनो ब्रूते—

अस्फुटस्फुरितं काव्यतत्त्वमेतद् यथोदितम्।
अशक्नुवद्भिर्व्याकर्तुं रीतयः संप्रवर्तिताः॥
(**ध्वन्यालोकः**, ३-४६) इति।

अभिनवगुप्तपादेनाप्युच्यते—"भामहोक्तं 'शब्दश्चन्दोभिधानार्थः' इत्यभिधानस्य शब्दाद्भेदं व्याख्यातुं भट्टोद्भटो बभाषे—'शब्दानामभिधानमभिधाव्यापारः, मुख्यो गुणवृत्तिश्च'। वामनोपि 'सादृश्याल्लक्षणा वक्रोक्तिरि'ति।" (**लोचनम्**. पृ० ३२)

एवन्तर्हि भामहेन **काव्यालङ्कारस्य** प्रथमपरिच्छेदे नवमकारिकायामभिधाव्यापारस्योल्लेखमात्रं कृतम्। तद्व्याख्यानपरेण भट्टोद्भटेनाधुनाविलुप्ते **भामहविवरणे** किञ्चिद् विवृत्याभिधाव्यापारस्य मुख्यगौणभेदेन द्वैविध्यं प्रदर्शितम्। वामनेन तु गौणवृत्तेः सादृश्याल्लक्षणायाः प्रयोगोऽपि प्रदर्शितः 'सादृश्याल्लक्षणा वक्रोक्ति'रिति। किन्तु व्यंग्यार्थस्य स्वरूपं न केनापि विस्पष्टतरं निभालितम्।

---

१. ध्वन्यालोके १।१ कारिकाया वृत्तौ।

गौणवृत्तेरुल्लेख्यः

दण्डिनः **काव्यादर्शेपि** गुणवृत्तेरुपयोगः प्रदर्शितः। यदुक्तं—"निष्ठ्यूतोद्गीर्णवान्तादि गौणवृत्तिव्यपाश्रयादतिसुन्दरम्" इति (**का० द० १-९५**) "तेमी प्रयोगमार्गेषु गौणवृत्तिव्यपाश्रयाः। अत्यन्तसुन्दरा दृष्टाः" (**का० द० २-२५४**) इति च। भट्टोद्भटस्य **काव्यालंकारसारसंग्रहे** च

श्रुत्या संबन्धविरहाद् यत् पदेन पदान्तरम्।
गुणवृत्तिप्रधानेन युज्यते रूपकन्तु तत्॥ (१-११) इति।

वामनस्य **काव्यालंकारसूत्रवृत्तौ** लक्षणावृत्तेरुल्लेखोऽस्ति। मुख्यार्थबाधे मुख्यार्थसम्बद्धमबाधितं द्वितीयमर्थं या बोधयति शब्दस्य सैवारोपिता स्वाभाविकेतरा शक्तिः लक्षणा। मुख्यार्थेन लक्ष्यार्थस्य सम्बन्धः प्रायेण पञ्चविधः। तदाहुः—

अभिधेयेन सामीप्यात् सारूप्यात् समवायतः।
वैपरीत्यात् क्रियायोगाल्लक्षणा पञ्चधा मता॥ इति।

एषु पञ्चविधेषु सम्बन्धेषु सारूप्यसम्बन्धोऽर्थात् सादृश्यं यस्या लक्षणाया बीजं सा गौणी लक्षणा इत्युच्यते। सादृश्येतरसम्बन्धमूला च शुद्धा लक्षणा इत्युच्यते। यदाह विश्वनाथकविराजः—

सादृश्येतरसम्बन्धाः शुद्धास्ता सकला अपि।
सादृश्यात्तु मता गौणी तेन षोडशभेदिता॥

(**साहित्यदर्पणम् २-९**)।

गौणी शुद्धा चेत्युभयभेदयोरेव **साहित्यदर्पणादिषु** लक्षणेति साधारणं नाम। प्राचीनतरेषु च ग्रन्थेषु शुद्धाया एव लक्षणा इति नामधेयं सादृश्यमूलायास्तु गुणवृत्तिरिति। अत एव तेषु विलक्षणमेव वृत्तिद्वयं स्वीकृतम्। वामनेनापि गुणवृत्तिरर्थात् सादृश्यमूला लक्षणा लक्षणाया एव प्रकारविशेषरूपेण स्वीकृता। तथा चोच्यते वामनेन—

"सादृश्याल्लक्षणा वक्रोक्तिः। (४. ३. ४.)

बहूनि हि निबन्धनानि लक्षणायाम्। तत्र सादृश्याल्लक्षणा वक्रोक्तिरसाविति। यथा—उन्मिमील कमलं सरसीनां कैरवं च निमिमील मुहूर्तात्। अत्र नेत्रधर्मौ उन्मीलननिलीलने सादृश्यात् विकाससंकोचौ लक्षयतः।" इति (**काव्यालंकारसूत्रवृत्तिः ४-३**)

वामनस्य प्रतीयमानार्थपरामर्शः

न केवलं वाच्यव्यतिरिक्तः लक्ष्यार्थ एव अपितु प्रतीयमानार्थोऽपि वामनेन परिचितः। तथा हि 'उपमानाक्षेपाश्चाक्षेप' इत्याक्षेपालंकारलक्षणं कुर्वता

तल्लक्षणसूत्रवृत्तौ द्वितीयविधमाक्षेपं प्रतिपादयता वामनेनोच्यते—"उपमानस्य आक्षेपतः प्रतीतिरित्यपि सूत्रार्थः यथा—

ऐन्द्रं धनुः पाण्डुपयोधरेण शरद्दधानार्द्रनखक्षताभम्।
प्रसादयन्ती सकलंकमिन्दुं तापं रवेरभ्यधिकं चकार॥

अत्र शरद् वेश्येव इन्दुं नायकमिव रवेः प्रतिनायकस्येव इत्युपमानानि गम्यन्त इति।" (**का० सू० वृ०**) अत्र प्रयुज्यमाने आक्षेपपदं तथा गम्यन्तेपदम् आनन्दवर्धनेनापि प्रायेण प्रयुज्येते। तथा हि आक्षिप्तं नाम व्यंग्यं गम्यते नाम व्यज्यते—"आक्षिप्त एवालंकारः शब्दशक्त्या प्रकाशते" (**ध्व०** २-२१) तथा "न हि यैवाभिधानशक्तिः सैवावगमशक्तिः" (**ध्व०** ३, पृ. ४१७) इत्यादिदर्शनात्। एवन्तर्हि प्रतीयमानार्थः वामनेन परिचीयत इति निर्विवादम्।

इदमत्रावधेयम्। अभिनवगुप्तेन तु ऐन्द्रं धनुरित्यत्र न आक्षेपः किन्तु समासोक्तिरेवेति ब्रुवता तत्रत्यव्यंग्यार्थः सामर्थ्यादाकृष्ट इति निरणायि। यदुक्तं—"यदि वोपमानस्याक्षेपः सामर्थ्यादाकर्षणम्। यथा—

ऐन्द्रं धनुः पाण्डुपयोधरेण शरत् दधानार्द्रनखक्षताभम्।
प्रसादयन्ती सकलंकमिन्दुं तापं रवेरभ्यधिकं चकार॥

इत्यत्रेर्षाकलुषितनायकान्तरमुपमानमाक्षिप्तमपि वाच्यार्थमेवालंकरोतीत्येषा तु समासोक्तिरेव।" (**लोचनम्**, पृ. ११४)

किञ्च, "उपमेयस्य धुणातिरेकित्वं व्यतिरेकः (४-३-२२)" इति व्यतिरेकालंकारस्य साधारणलक्षणं सोदाहरणं समुपस्थाप्य व्यतिरेकालंकारस्य द्वितीयमपि भेदं समाकलयन्नाह—

"कश्चित्तु **गम्यमानगुणो** व्यतिरेकः। यथा—

कुवलयवनं प्रत्याख्यातं नवं मधु निन्दितम्
हसितममृतं भग्नं स्वादोः पदं रससम्पदः।
विषमुपहितं चिन्ताव्याजान्मनस्यपि कामिनां
चतुरललितैर्लीलातन्त्रैस्तवार्धविलोकितैः ॥"

अत्र च गम्यमानशब्देनैव प्रतीयमानार्थस्य सद्भावो वामनेनापि निर्विवादं स्वीकृत इति प्रतिभाति।

रुद्रटस्य काव्यालङ्कारे व्यञ्जनापरामर्शः

(१) शब्दव्यापारपरामर्शविषये रुद्रटस्य कियान् विशेषः परिलक्ष्यते। काव्यालंकारस्य सप्तमाध्यायेऽन्यप्राक्तनालंकारिकवैलक्षण्येन तेन अर्थस्वरूपं,

वाचकः शब्दः, अभिहितोऽर्थः, अर्थस्य द्रव्य-गुण-क्रिया-जातिरिति चत्वारो भेदाः, द्रव्यादिकानाञ्च प्रातिस्विकं वैशिष्ट्यम् इत्येते विषयाः परामृष्टाः। (**कारिकाः** १–६)

(२) सकलसमानविशेषणमेकं यत्राभिधीयमानं सत्।
उपमानमेव गमयेद् उपमेयं सा समासोक्तिः॥
(**काव्यालंकारः** ८–६७)

इत्यत्र गम्यमानोऽर्थः परामृष्टः।

(३) "रुद्रटेन तु भावालंकारो द्विधैवोक्तः" (**अलंकारसर्वस्वम्, पृ.** ६) इत्यादि ब्रुवता रुय्यकेण रुद्रटस्य भावालंकारे वस्तुव्यञ्जनाया नियमेनैव सद्भावो निभालितः। तथा हि—

यस्य विकारः प्रभवन्नप्रतिबद्धेन[1] हेतुना येन।
गमयति यदभिप्रायं तत्प्रतिबन्धं च भावोऽसौ॥
(**काव्यालंकारः** ७–३८)

इति भावालंकारस्य प्रथमप्रकारस्य लक्षणम्। अत्र गमयतीत्यनेनैवाभिप्रायस्य प्रतीयमानत्वं संख्यापितम्। तदुदाहरणं च—

ग्रामतरुणं तरुण्या नववञ्जुलमञ्जरीसनाथकरम्।
पश्यन्त्या भवति मुहुर्नितरां मलिना मुखच्छाया॥

इति। अत्र विकारो मुखमालिन्यं तस्य हेतुर्वञ्जुलमञ्जरीदर्शनं तच्चाप्रतिबद्धम्। सर्वदा तद्दर्शने तदभावात्। तच्च मालिन्यं तरुण्या भावं (वाचकैः शब्दैरनभिधीयमानमपि) प्रतिपत्तुः प्रकाशयति। एतच्च पद्यं व्यंग्यार्थसमन्वितत्वादेव मम्मटेनापि गुणीभूतव्यंग्योदाहरणत्वेन पठितम्। (**का० प्र०–१**) उच्यते च तस्मिन्नेव प्रसंगे—"अत्र वञ्जुललतागृहे दत्तसंकेता नागतेति व्यंग्यं गुणीभूतं तदपेक्षया वाच्यस्यैव चमत्कारित्वात्" इति। द्वितीयविधं भावालंकारं लक्षयन्नाह रुद्रटः—

अभिधेयमभिदधानं तदेव तदसदृशसकलगुणदोषम्।
अर्थान्तरमवगमयति यद्वाक्यं सोऽपरो भावः॥ (**काव्यालंकारः** ७–४०)

इति। अत्रायं भावः—यद् वाक्यं वाच्यं प्रतिपादयत्सत् वाच्यविलक्षगुण-

---

१. अभिनवगुप्तस्तु 'प्रभवन्नप्रतिबन्धस्तु हेतुना' इति पठति। प्रथमविधभावालंकारोदाहरणत्वेन 'एकाकिनी यदवलेति' पद्यं पठति यत्तु काव्यालंकारस्य मुद्रितपुस्तकेषु द्वितीयविधस्य भावालंकारस्योदाहरणत्वेन प्रदत्तम्। (लोचनम्, पृ०. १२९–१३०)

दोषादिसमन्वितं वक्त्राभिप्रायरूपमन्यमर्थं गमयति तस्मिन् द्वितीयविधः भावालंकारः। तदुदाहरणं यथा—

एकाकिनी यदवला तरुणी तथाहम्
अस्मिन् गृहे गृहपतिश्च गतो विदेशम्।
किं याचसे तदिह वासमियं वराकी
श्वश्रूर्ममान्धबधिरा ननु मूढ पान्थ॥ इति।

प्रकटप्रतिषेधार्थमेतन्नायिकावाक्यं तदत्यन्तविलक्षणं वासानुमतिविधिलक्षणमर्थमवगमयति। एवमेवाभिधेयावगम्यमानयोर्महान् भेदः परिलक्ष्यते। एतदेवाभिप्रेत्यात्यन्तं विशकलितयोर्वाच्यव्यंग्ययोर्भेदं प्रतिपिपादयिषुरानन्दवर्धनोप्यभिधत्ते—

"तथा हि आद्यस्तावत्प्रभेदो वाच्याद् दूरं विभेदवान्।
स हि कदाचिद् वाच्ये विधिरूपे प्रतिषेधरूपः॥" इति।

(ध्वन्यालोकः-१. पृ० ५२)

व्यंग्यार्थस्य त्रैरूप्यम्

ध्वन्यालोकस्य प्रथमोद्द्योते आनन्दवर्द्धनो वाच्यार्थाद् भिन्नं प्रतीयमानमर्थमभिलक्ष्य ब्रूते—"स हि अर्थो वाच्यसामर्थ्याक्षिप्तं वस्तुमात्रमलङ्काररसादयश्चेत्यनेकप्रभेदप्रभिन्नो दर्शयिष्यते। सर्वेषु च तेषु प्रकारेषु तस्य वाच्यादन्यत्वम्।" इति (**ध्वन्यालोक**-१, पृ० ५०)। किन्तु इतः पूर्वं परामृष्टेषूद्भटादीनां ग्रन्थेषु रसादिः प्रतीयमानार्थ एवान्तर्भाव्य न प्रदर्शितः। **काव्यादर्श**[1], भामहस्य **काव्यालङ्कारे**[2], वामनस्य **काव्यालङ्कारसूत्रवृत्तौ**[3],

---

१. मधुरं रसवद्वाचि वस्तुन्यपि रसस्थितिरिति (का० द० १-५१) माधुर्यलक्षणे, प्रेयोऽलङ्कारे, रसवदलंकारे. ऊर्जस्व्यलङ्कारे च। (का० द० २।२७५-२९२)। का० द० २।२९२ इत्यत्र माधुर्यगुणरसवदलङ्कारयोर्भेदे च।

२. (१) सर्गबन्धो महाकाव्यं महतां च महच्च यत्।
युक्तं लोकस्वभावेन रसैश्च सकलैः पृथक्॥ (काव्यालङ्कारः १।१९-२१)

(२) रसवद्दर्शितस्पष्टशृङ्गारादिरसं यथा (काव्यालङ्कारः ३।६)

(३) प्रेयोऽलंकारस्य ऊर्जस्व्यलंकारस्य च लंक्षणं न कृतम्। उदाहरणयोस्तूभयत्रापि भावस्याभिव्यञ्जनं भवतीत्युन्नेतुं शक्यते।

(४) कवेरभिप्रायकृतैः कथनैः कैश्चिदङ्किता। कन्याहरणसंग्रामविप्रलम्भोदयान्विता॥ (काव्यालङ्कारः १।२७)

३. दीप्तरसत्वं कान्तिः। दीप्ता रसाः शृङ्गारादयो यस्य स दीप्तरसः। तस्य भावो दीप्तरसत्वं कान्तिः। (का० सू० वृ०—३।२।१५)

उद्भटस्य **काव्यालङ्कारसारसंग्रहे**[1] तथा रुद्रटस्य **काव्यालङ्कारेऽपि**[2] बहुशः बहुधा रसादीनामुल्लेखः कृतः। किन्तु तेषु ग्रन्थेषु कुत्रापि स रसादिरन्यार्थकक्षायां न निक्षिप्तः। वस्तुतो रसादिरप्यर्थविशेष एव काव्यस्य इत्येव विस्पष्टं नोक्तम्। यैरपि वामनादिभी रसस्योल्लेखः कृतस्तैस्तु काव्यार्थविलक्षणतयैव रसः परिचीयत इति प्रतिभाति। ध्वनिवादिनान्तु मते यथा व्यंग्यं वस्तुमात्रं काव्यस्यार्थः, यथा च व्यंग्योऽलङ्कारः काव्यस्य प्रतीयमानोऽर्थस्तथैव रसोऽपि प्रतीयमानः अर्थविशेष एव। एतदेव मतं विस्पष्टयितुं रसनिष्पत्तिस्वरूपं प्रतिपिपादयिषुरभिनवगुप्तोऽ-

---

१. (१) रत्यातिकानां भावानामनुभावादिसूचनैः।

यत्काव्यं बध्यते सद्भिस्तत् प्रेयस्वदुदाहृतम्॥ इति प्रेयस्वतो लक्षणे (का० सा० सं० ४।२) अभिव्यञ्जितो रत्यादिर्भावः परामृष्टः। भट्टेन्दुराजस्य मते स्थायिव्यभिचारि-सात्त्विकभेदेनात्र रत्यादिकानां पञ्चाशत्संख्यकानां भावानामनुभावादिभिरर्थाद् अनुभाव-विभाव-व्यभिचारिभाव-स्वशब्दैः सूचनं भवति। विवृतिकारमते तु "पञ्चाशद्भावसूचनमिति व्याख्यानमयुक्तम्। हासादीनां च रसानां भेदस्यासिद्धत्वात्।" अत्र रत्यादीति पदेन च न शुद्धस्थायिभावा रसाभिव्यञ्जनबीजभूता गृह्यन्ते अपि तु ईषद्भिन्नरूपाः येषामभिव्यञ्जनेन भावध्वनिरेव लभ्यते न तु रसध्वनिः। तथा चोच्यते विवृतिकारेण "रतिरिह देवगुरुनृपादिविषया गृह्यन्ते। कान्ताविषयायाः स्तुतेः सूचने रसवदलङ्कारो वक्ष्यते।" इति। (वनहट्टिसम्पादितः का० सा० संग्रहः पृ० ९८-९९)। एवंक्रमेणात्र "रतिर्देवादिविषया व्यभिचारी तथाञ्जितः भावः प्रोक्तः" (का०प्र०-४) इति मम्मटप्रदर्शितदिशा भाव एव परामृष्टो यस्तु रसादिष्वेव धृतः ध्वनिवादिभिः।

(२) रसवदलङ्कारप्रसङ्गे नवरसाः शृङ्गारादयो नामत एव परामृष्टाः। (का० सा० सं० ४।३-४)। आलंकारिकेषु च भट्टोद्भटेनैव शान्तरसः सर्वप्राथम्येन स्वीकृत इत्यपि लक्षणीयम्।

(३) अनौचित्यप्रवृत्तानां कामक्रोधादिकारणात्।
भावानां च रसानां च बन्ध ऊर्जस्वि कथ्यते॥ (का० सा० सं०-४।५)
इत्यत्र रसाभासभावाभासौ परामृष्टौ।

२. रुद्रटस्य काव्यालङ्कारे १२।३ कारिकायां दशरसाः नामतो निगदिताः। द्वादशतः पञ्चदशाध्यायपर्यन्तं रसानां तदवान्तरभेदानां च लक्षणान्युदाहरणानि च वैशद्येन प्रतिपादितान्युपलभ्यन्ते। समुद्घोषितञ्च प्रथमाध्यायस्य चतुर्थकारिकायामेव—

ज्वलदुज्ज्वलवाक्प्रसरः सरसं कुर्वन् महाकविः काव्यम्।
स्फुटमाकल्पमनल्पं प्रतनोति यशः परस्यापि॥ इति।

भिनवभारत्यामभिधत्ते—"तत् काव्यार्थो रस" इति[1] (**अ० भा०** ६. पृ० २७८) एतच्च मूलग्रन्थकृतो भरतमुनेरप्यभिमतमित्यपि तत्रैव प्रदर्श्यते। यदुक्तं भरतेन—"काव्यार्थान् भावयन्तीति भावा इति" (**ना० शा०** ७. पृ० ३४२)। अस्य ग्रन्थस्यैव व्याख्याने विस्पष्टतरमुच्यतेऽभिनवगुप्तेन यथा—"को कवतेर्वा कवनीयं काव्यम्। तत्र च पदार्थवाक्यार्थौ रसेष्वेव पर्यवस्यत इत्यसाधारण्यात् प्राधान्याच्च काव्यस्यार्थाः रसाः। अर्थ्यन्ते प्राधान्येनेत्यर्थाः।" (**आ० भा०** ७. पृ० ३४३)। अस्य रसरूपस्यार्थस्य वाच्यार्थादन्यत्वं द्रढयितुं तत्रैवोच्यते—"न त्वर्थशब्दोऽभिधेयवाची।

---

१. रसस्य काव्यार्थत्वस्वीकरणे घटपटादिशब्दप्रतिपाद्येभ्योऽर्थेभ्यो रसादिरूपार्थस्य वैलक्षण्येनैव महती शंका जायते। तथा हि घटपटादिशब्दानामर्था घटपटादयो वस्तुरूपेणोपलभ्यन्ते, रसरूपार्थस्तु चेतसोऽवस्थाविशेषरूपोऽवास्तविकः। इयञ्च शंका एवं समाधातुमिष्यतेऽस्माभिः—परमलघुमञ्जूषायामुच्यते नागेशभट्टेन—"तस्मात् पदपदार्थयोः सम्बन्धान्तरमेव शक्तिः, वाच्यवाचकभावापरपर्याया। तद्ग्राहकञ्चेतराध्यासमूलकं तादात्म्यं, तदेव सम्बन्धः। उभयनिरूपिततादात्म्यवानुभय इत्यर्थपदयोर्व्यवहारात्।.....तादात्म्यं च तद्भिन्नत्वे सति तदभेदेन प्रतीयमानत्वमिति भेदाभेदसमनियतम्। अभेदस्याध्यस्तत्वाच्च न तयोर्विरोधः।

यत्तु तार्किकाः शब्दार्थयोस्तादात्म्यस्वीकारे मधुशब्दोच्चारणे मुखे माधुर्यरसास्वादापत्तिः, वह्निशब्दोच्चारणे मुखे दाहापत्तिरित्याहुः तन्न। भेदाभेदस्योपपादितत्वात्।

वस्तुतो बौद्ध एवार्थः शक्यः, पदमपि स्फोटात्मकं प्रसिद्धम्, तयोस्तादात्म्यम्। तत्र बौद्धे वह्न्यादावर्थे दाहादिशक्तिमत्त्वाभावात्। अत एव "शब्दाज्ञानानुपाती वस्तुशून्यो विकल्पः" इति विकल्पसूत्रं संगच्छते। शब्दज्ञानमात्रेणानुपाती बुद्धावनुपतनशीलो वस्तुशून्यः बाह्यार्थरहितः विशेषेण कल्प्यत इति विकल्पः, बुद्धिपरिकल्पित इति तदर्थः।"

एतत्तु निगदव्याख्यातप्रायमेव। सर्वेषामपि घटपटादिशब्दानामर्थः बौद्ध एव। तदेतद् बोद्धत्वं रसादिसाधारणमिति रसादीनामप्यर्थत्वे अविरोध एव स्वीकरणीयः। केवलं यत्र शक्यार्थस्य घटादिरूपस्य स्वशब्दवाच्यत्वं तत्र कदाचित् वास्तविकभावेन बुद्धेः बहिरपि सद्भावस्सम्भवति, रसादेस्तु सहृदयहृदयमात्रसंवेद्यस्य स्वशब्दवाच्यत्वं न सम्भवति। न च सम्भवति हृदयाद् बहिः रसादेर्वास्तविकः कोऽपि सद्भाव इति सर्वं सुसमञ्जसम्। पण्डितराजोऽपि मुखचन्द्रप्रभृतिरूपकालङ्कारस्थले वियद्गतस्य चन्द्रस्य मनुष्यदेहगतेन मुखेन तादात्म्यं कथं सम्भवतीति शङ्कामुपस्थाप्य पूर्वोक्तवैयाकरणराद्धान्तानुसारमेव समाधत्ते। तथा हि बौद्ध एव चन्द्रपदस्यार्थः बुद्धिस्थ एव च मुखपदस्यार्थः। तयोरुभयोरप्यर्थयोर्बुद्धिभूमौ तादात्म्यं सम्भवतीति नात्र कोऽपि दोषः शङ्कनीयः।

स्वशब्दानभिधेयत्वं हि रसादीनां ध्वनिकारादिभिर्दर्शितम्। तच्च मदीयादेव तद्विवरणात्सहृदयालोकलोचनादवधारणीयम्।..."इति। एवन्तर्हि रसोऽपि[1] काव्यस्य अर्थ एवेति निर्विवादम्। **ध्वन्यालोक**विरचनकालेऽपि कैश्चन रसस्य साक्षात् काव्यार्थत्वं न स्वीकृतमासीदिति प्रतिभाति। तत्र च मानं—"यैर्वा साक्षात् काव्यार्थता रसादीनां नाभ्युपगम्यते, तैस्तेषां तन्निमित्तता तावदवश्यमभ्युपगन्तव्या।" इति (**ध्व०** ३. पृ० ३७३)। सति चैवं रसस्वरूपप्रतिपादनप्रारम्भ एव तस्य काव्यार्थत्वप्रतिपादनम**भिनवभारत्यां** सर्वथा संगच्छते।

तस्मात्तत्कर्तव्यं यत्नेन महीयसा रसैर्युक्तम्।
उद्वेजनमेतेषां शास्त्रवदेवान्यथा हि स्यात्॥

(**रुद्रट. का० लं०** १२।२)

इत्यस्य नमिसाधुकृतवृत्तौ रसः काव्यार्थरूपेण गृह्यत इत्यापाततः प्रतिभाति। तथा चोच्यते—"ननु एवं सति सरसार्थमेव काव्यं स्यान्न तु नीरसार्थमिति नास्य सर्वजननीत्वं स्यात्।" इति। किन्तु अत्रापि वस्तुतः काव्यस्याभिधेय एव अर्थः सरसः रससहित इत्युच्यते न तु स्वयं रस एव अर्थ इति। रसस्तु तेन गुणकक्षायामेव निक्षिप्तः। तथा चोच्यते—"अलङ्कारमध्य एव रसा किं नोक्ताः। उच्यते—काव्यस्य हि शब्दार्थौ शरीरम्। तस्य च वक्रोक्तिवास्तवादयः कटककुण्डलादय इव कृत्रिमा अलङ्काराः। रसास्तु सौन्दर्यादय इव सहजा गुणाः इति भिन्नस्तत् प्रकरणारम्भः।" (**रुद्रट. का० लं०** पृ० ३६१) इति।

अभिव्यज्यते-पदस्य पर्यायाः

यस्तु वाक्यव्यतिरिक्तोऽन्योऽर्थः भट्टोद्भटादिभिः बहुधा परामृष्टः स कदाचित् प्रतीयते (**का० द०**, १-३६, २-१४, २-१६ इत्यादि), कदाचित् सूच्यते (**का० द०** २-२१३, **का० द०** २-१३६), कदाचिदवगम्यते (**का० सा० सं** ४-६, **रुद्रट, का० लं०** ७-३८, ८-६७), कदाचिदाक्षिप्यते (**का० सू० वृ०** ४-३-२७), कदाचित् प्रकारान्तरेणाभिधीयते (**भामह, का० लं०** ३-८), कदाचिच्च व्यज्यते (**का० द०** २-३०३) इत्युच्यते। किन्तु रसादिः कुत्रापि एषां पर्यायाणां कर्मत्वेन नोपस्थापितः। यत्तु—

---

१. रस्यते इति रसः इति व्युत्पत्त्या भाव-रसाभास-भावाभासादयोऽप्यत्र विवक्षिताः। तस्माद्रसपदस्य रसाद्यर्थ उपलक्षणम्।

रत्यादिकानां भावानामनुभावादिसूचनैः ।
यत्काव्यं बध्यते सद्भिस्तत् प्रेयस्त्वदुदाहृतम् ॥
(**का० सा० सं०** ४-२)

इत्यत्र भट्टोद्भटेन सूचनैरिति पदं प्रयुक्तं तस्य तात्पर्यमपि चिन्त्यम् । तथाहि (१) रत्यादिकानां भावनामनुभावादिभिः सूचनैः अथवा (२) रत्यादिकानां भावानां यथायोग्यानाम् अनुभावादीनां सूचनैरिति द्विधा व्याख्यातुं शक्यतेऽयं ग्रन्थः । प्रथमतरव्याख्याने (१) रत्यादयो भावा एव सूचनस्य कर्म । द्वितीयव्याख्याने (२) रत्याद्यभिव्यञ्जका अनुभावादय एव सूचनस्य कर्म । तत्र प्रथमतरव्याख्यानं स्वीकृत्य भट्टेन्दुराजेनोच्यते—"एतेषां पञ्चाशत्संख्यकानां भावानां सूचकाश्चत्वारोऽनुभावादयः । ते चानुभावो विभावो व्यभिचारी स्वशब्दश्च" इति । (**लघुवृत्तिः, पृ० ५१**) । **विवृति**-कारणामपि स एवाशय इत्युन्नेतुं शक्यते । तथा चोच्यते—"तेषां च (द्वा) चत्वारिंशतो रत्यादिभावनामनुभावैः सात्त्विकवाचिकाहार्यांगिकरूपैरभिनयैरादिग्रहणादुद्दीपनालम्बनरूपैर्विभावैः स्थायिभावत्वाद्रतेस्तु व्यभिचारिभिरपि सूचने व्यक्तौ यत्काव्यबन्धनं प्रेयस्वद्रत्याः प्रियतरया उपलक्षितं भाववृन्दमत्रास्तीति ।" (**का० सा० सं० नोट्स**, पृ० ९९) । यद्येवं रत्यादिरेव सूच्यते न तत्सम्बन्धिनोऽनुभावादयस्तर्हि वनहट्टिमहोदयसमुद्धृत-**विवृतिका**रवचने "रतिरिह देवगुरुनृपादिविषया गृह्यन्ते । कान्ताविषयायाः स्तुतेः सूचने रसवदलङ्कारो वक्ष्यते ।" इत्यत्र स्तुतेरित्यस्य स्थाने रतेरित्येव ज्यायान् पाठ इति स्वीकार्यम् । **विवृत्ति**कारेण च सूचने इत्यस्य व्यक्तौ इत्यर्थः कृतः । एतत्तु तस्य ध्वनिवादप्रभावान्विततया स्वकीयमतस्यैव समुद्भावनम् । भट्टोद्भटस्वरसत्वेन तु सूचनस्यानुमापनमित्येवार्थः कृतः । तथा हि अत्रायं पूर्वोद्धृतशेषः—"वह्नेः शीत (नि) वृत्तिरनुमीयत इति कारणस्यापि क्वचिद्गमकत्वाद्विभावैर्भवत्येव सूचनम् । रूपाद्रसानुमानं भवतीति व्यभिचारिणां सहकारिरूपाणामप्यस्ति गमकत्वम् । काव्यस्य तु सिद्धे गमकत्वे निर्विवादैवानुभावानां सूचकता । न चानुमितमात्रतया स्थितो भावः काव्यजीवितम् अपि तु साधारण्येन प्रतिपन्नो रसनाव्यापारगोचरः । एवं रसेऽपि गन्तव्यमत एव व्यंग्या रसभावतदाभासतत्प्रशमाः काव्यतत्त्वविद्भिरभिधीयन्ते । एतच्चाभ्युपगम्योक्तम् । वस्तुवृत्तपरीक्षायां रसभावादयोऽनुमेया एव न भवन्ति । न हि विभावानुभावव्यभिचारिणः कारणकार्यसहकारिरूपाः । तद्रूपत्वे कारणकार्यसहकारिसंयोगाद्रसनिष्पत्तिरिति ब्रूयात् । यथा चैतत्तथा परीक्ष्यमाणं ग्रन्थगौरवमानयतीति न प्रतन्यते ।" (वनहट्टि. **का० सा० सं०** पृपृ. ९९-१००) एवञ्च सूचनमित्यस्या-

नुमापनमित्येव ग्रन्थकृदभिप्रेतोऽर्थ इति **विवृति**काराशयः। अस्माभिस्तु पूर्वं दण्डिनः समासोक्त्यलंकारविचारप्रसंगे सूचनमित्यास्याभिव्यञ्जनमित्यर्थो गृहीतः। भट्टेन्दुराजमते तु सूचनं नाम अवगमनम्। प्रेयस्वदुदाहरण-व्याख्याने चोच्यते तेन—"एवमयं रत्यात्मको भावो वात्सल्यस्वभाव-श्चतुर्भिरनुभावादिभिरत्रावगमितः" (**का० सा० सं०**, पृ० ५२) इति। अवगमनञ्च कदाचिदनुमापनपर्यायः कदाचिच्चाभिव्यञ्जनपर्याय इति आयातस्तर्हि महान् व्यामोहविषयः। सति चैवमस्माभिरेवमनुमीयते—ध्वनिवादप्रवर्तनपूर्वभाविभिः यत्र यत्रैव सूचनमवगमनं प्रत्यायनमित्येवं रूपाणि पदानि प्रयुक्तानि तत्र तत्रैव साधारण्येनावबोधनमात्रमभिप्रेतम्। तच्चाव-बोधनमनुमानेनैव भवति अथवा अभिधा लक्षणाविलक्षणेनान्येन शब्दव्यापारे-णैव इति विचिकित्सा लेशतोपि न प्रकाशिता। केवलमभिधाव्यापाराभिधान-विलक्षणत्वमेव सूचितमस्माभिरत्राभिव्यञ्जनपर्यायत्वेन स्वीकृतैः सूचनादिभिः शब्दैरित्यास्तां तावत्।

रसस्य काव्यार्थत्वे तथा व्यञ्जनायाः स्वरूपनिरूपणे पूर्वपरम्परानुसन्धानम्

सर्वेषु च ध्वनिकारपूर्वभाविषु आलंकारिषु केवलं दण्डी एव अनज्-धातुतो निष्पन्नं सुव्यञ्जितमिति पदं प्रयुक्तवान् (**का० द०** २,३०३)। तदपि च साधारण्येनाभिहितवैलक्षण्येन प्रकाशितमित्यस्मिन्नेवार्थे प्रयुक्तमिति प्रति-भाति। सति चैवं सार्थकभावेन तथा परिच्छिन्नभावेन व्यञ्जनापदस्य प्रयोगः सर्वप्राथम्येन नाट्यशास्त्रकारेण एव कृत इत्यस्माभिर्वक्तुं शक्यते। रसस्य काव्यार्थत्वेन स्वीकरणमपि नाट्यशास्त्रकारोपज्ञमेव। यदुक्तम्—"न हि रसादृते कश्चिदर्थः प्रवर्तत" इति। (**ना० शा०** ६, पृ० २७२)। किन्तु नैत-न्निर्विवादं प्रमाणपदवीमवतरति। तथा ह्यास्याभिनवगुप्तकृतं व्याख्यानं यथा—"हि यस्मात् रसं विना विभावादिरर्थो बुद्धौ व्याख्येयतया न प्रवर्तते। यतश्च तं विनार्थः प्रयोजनं प्रीतिपुरस्सरं व्युत्पत्तिमयं न प्रवर्तते यतश्च रसं प्रत्यादृते रसनात्मकप्रतीत्येकघनविश्रान्ते सामाजिकलोकेऽन्यो भावादिरर्थः प्रविभागेन बुद्धौ न वर्तते।" इति (**अभिनवभारती**, ६ पृ० २७१)। किन्तु एतावतापि रसोप्यर्थ एवेति विस्पष्टं नोक्तम्। अत्र च कश्चिद् ब्रूयात्—"ननु **नाट्यशास्त्र**कारमतेपि नमिसाधुप्रदर्शितदिशा काव्यार्थस्य सहजो गुणविशेष एव रसः, न तु स्वयमेवार्थः" इति। तस्मादस्माभिरत्र रसस्य काव्यार्थत्व-कथने प्रमाणान्तरमनुसन्धीयते। तथा हि—(१) भावपदव्युत्पत्तिप्रतिपादन-मुखेनोच्यते—"वागङ्गसत्त्वोपेतान् काव्यार्थान् भावयन्तीति भावा इति"

(**ना० शा०** ७, पृ० ३४२)। अत्र परामृश्यमानः काव्यार्थस्तु रस एव। (२) तथा हि अत्र काव्यार्थस्य वागंगसत्त्वोपेतत्वं यथा कथितं तथैवाभिव्यज्यमानस्यास्वादयोग्यस्य स्थायिभावस्यापि वागंगसत्त्वोपेतत्वमुक्तं यथा "···नाना भावाभिनयव्यञ्जितान् वागंगसत्त्वोपेतान् स्थायिभावान् आस्वादयन्ति सुमनसः।" इति (**ना० शा०** ६, पृ० २८८-२८९)। (३) स एव चास्वादयोग्यः स्थायी रसः। तत्र प्रमाणं यथा—"यथा हि गुडादिभिर्द्रव्यैर्व्यञ्जनैरौषधिभिश्च षाडवादयो रसा निवर्त्यन्ते तथा नानाभावोपगता अपि स्थायिनो भावा रसत्वमाप्नुवन्तीति। अत्राह रस इति कः पदार्थः। उच्यते—आस्वाद्यत्वात्।" इति (**ना० शा०** ६, पृ० २८७-२८८)। (४) यथा हि 'काव्यार्थान् भावयन्तीति भावा' इत्युक्तं तथैवान्यत्रापि भावपदव्युत्पत्तिं प्रतिपादयन्नाह—

नानाभिनयसंबद्धान् भावयन्ति रसानिमान्।
यस्मात्तस्मादमी भावा विज्ञेया नाट्ययोक्तृभिः॥

(**ना० शा०** ७-३ पृ० ३४६) इति। एवञ्च भावयन्तीति आख्यातस्य कर्मभूतत्वात् रसा एव काव्यार्थाः। एवञ्चास्वादयोग्यानां शृंगारादिरसानां काव्यार्थत्वे सिद्धे आस्वादयोग्यत्वसाधारण्येन भाव-रसाभासभावाभासादीनामपि 'रस्यत इति रस' इति व्युत्पत्त्या रसादिरिति साधारणनाम्ना व्यपदिष्टानामपि रसस्थानीयत्वेन निर्विवादं काव्यार्थत्वमित्यलं बहुना।

"तत्र विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः" (**ना० शा०** ६, पृ० २७२) इति रससूत्रं व्याख्यानयन्नाह भरतमुनिः—

को दृष्टान्तः। अत्राह—यथा हि नाना व्यञ्जनौषधिसंयोगाद्रसनिष्पत्तिः तथा नानाभावोपगमाद्रसनिष्पत्तिः। यथा हि—गुडादिभिर्द्रव्यैर्व्यञ्जनैरोषधिभिश्च षाडवादयो रसा निर्वर्त्यन्ते तथा नानाभावोपगता अपि स्थायिनो भावा रसत्वमाप्नुवन्तीति। अत्राह—रस इति कः पदार्थः। उच्यते—आस्वाद्यत्वात्। कथमास्वाद्यते रसः। यथा हि नानाव्यञ्जनसंस्कृतमन्नं भुञ्जाना रसानास्वादयन्ति सुमनसः पुरुषा हर्षादींश्चाधिगच्छन्ति तथा नानाभिनयव्यञ्जितान् स्थायिभावानास्वादयन्ति सुमनसः प्रेक्षकाः हर्षादींश्चाधिगच्छन्ति। इति (**ना० शा०** ६, पृ० २८७-२८९)

मुनिप्रदत्तषाडवरसदृष्टान्तविमर्शः

(१) अस्माच्चैतदुन्नेतुं शक्यते यदास्वादगोचरः स्थायी एव रसः। अस्वादजनितो हर्षादिरपि रस एव। एवन्तर्हि रसचर्वणायां पर्यायद्वयमस्तीति फलितम्। प्रथमतः साधारण्येनानुभूयमानस्य स्थायिनः चर्वणा द्वितीयतः पार्यन्तिकदशायां केवलं विगलितवेद्यान्तरस्यानन्दमात्रस्यानुभवः। विगलित-

वेद्यान्तरत्वेन च स्थाय्यपि पार्यन्तिकदशायां वेद्यरूपेण न भासते। आत्मनश्चानन्दरूपत्वात् प्रमाता स्वात्मानमेवानुभवति। आत्मनश्च ज्ञानरूपत्वात् तस्मिन्ननुभवे ज्ञानभिन्नं ज्ञेयान्तरमपि नास्ति। वस्तुतस्तज्ज्ञानरूपमेव। तस्माच्च सच्चिदानन्दरूपस्य आत्मनोनुभवः ब्रह्मानुभवसदृशः। तदेवोच्यते मम्मटेन–"तत्कालविगलितपरिमितप्रमातृभाववशोन्मेषितवेद्यान्तरसम्पर्कशून्यापरिमितभावेन प्रमात्रा × × × गोचरीकृतश्चर्व्यमानतैकप्राणो × × × ब्रह्मास्वादमिवानुभावयन् अलौकिक-चमत्कारकारी शृंगारादिको रसः।" इति (**का० प्र०** ४, पृ० ९२-९३)। एतच्च रसस्य पर्यायद्वयमभिनवगुप्तसम्मतम्। तथा हि "अधिकारी चात्र विमलप्रतिभानशालिहृदयः। तस्य च 'ग्रीवाभंगाभिरामम्' (शाकु० अ १)···इत्यादिवाक्येभ्यो वाक्यार्थप्रतिपत्तेरनन्तरं मानसी साक्षात्कारात्मिकापहसिततत्तद्वाक्योपात्तकालादिविभागा तावत्प्रतीतिरुपजायते। तस्यां यो मृगपोतकादिर्भाति तस्य विशेषरूपत्वाभावाद् भीत इति त्रासकस्यापारमार्थिकत्वाद्भयमेव परं देशकालाद्यनालिंगितम्। तत एव भीतोऽहं भीतोऽयं शत्रुर्वयस्यो मध्यस्थो वा इत्यादि प्रत्ययेभ्यो ·····विलक्षणं निर्विघ्नप्रतीतिग्राह्यं साक्षादिव हृदये निर्विशमानं चक्षुषोरिव विपरिवर्तमानं भयानको रसः। तथाविधे हि भये नात्मात्यन्ततिरस्कृतो न विशेषत उल्लिखितः।" (**अभिनवभारती** ६ प० २७९) इत्यत्र स्थायिसंवेदनरूपः प्रथमः पर्यायः परामृष्टः।

"अस्मन्मते संवेदनमेवानन्दधनमास्वाद्यते। तत्र का दुःखाशंका। केवलं तस्यैव चित्रताकरणे रतिशोकादिवासनाव्यापारः।" (**अभिनवभारती**. ६. पृ. २९२) इत्यत्र च स्थाय्याद्यनालिंगितस्वसंवेदनरूपो द्वितीयः पार्यन्तिको वा पर्यायः परामृष्टः। एतच्च रसचर्वणापर्यायद्वयविषयेऽभिनवगुप्तस्याकूतमस्मद्गुरुभिः श्रीमद्भिः कान्तिचन्द्रपाण्डेयमहोदयैः सुविशदं निभालितमिति[1] सर्वथा विद्वदुपज्ञैवेयं वाचोयुक्तिरित्यलं बहुना।

(२) भरतमुनिवचने प्रदत्तं दृष्टान्तं व्याख्यानयन्नाह अभिनवगुप्तपादः— "व्यञ्जनमुपसेचनद्रव्यम्। तच्च नानातिक्तमधुरचुक्रादिभेदादधिकाञ्जिकादि। औषधयश्चिञ्चागोधूमदलहरिद्रादयः। द्रव्यं गुडादि। एषां पाककर्मेण सम्यग्योजनारूपात् कुशलसम्पाद्यात् संयोगात्। षाडवादय इति लोकप्रसिद्धेभ्यः परस्परविविक्तेभ्यो मधुरतिक्ताम्ललवणकटुकषायेभ्यो मिश्रेभ्यश्च विलक्षणः षाडवशब्दवाच्यः। तत्प्रधाना बहुतरा रसनयोग्याः

---

१. **Indian Aesthetics**, pp. 128–130

क्रियन्ते। तथैव नानाभावैर्विभावादिभिरुप समीपं प्रत्यक्षकल्पतां गता लोकापेक्षया ये स्थायिनो भावास्ते रस्यमानतैकजीविनं रसत्वं तत्र प्रतिपद्यन्ते।" इति (**अ० भा०** ६. पृ. २८८)। पुनरपि दृष्टान्तं प्रकृत उपयोजयन्नाह—"एतदुक्तं भवति—पाकरूपया सम्यग्योजनया तावदलौकिको रसो जायते। तत्र च प्रधानत्वेन जलस्य रसाभिव्यञ्जकत्वमिति व्यञ्जनं विभावस्थानीयम्। चिञ्चाहरिद्रादि अनुभावप्रायम्। द्रव्याणि तु गुडादीनि तदीयचुक्रादिरसविलक्षणमधुरादियोगाद् व्यभिचारिकल्पम्।" इति (**अ० भा०** ६. पृ. २८८)

(३) **इदमत्रावधेयम्**—अनेनैव मुनिप्रदत्तदृष्टान्तेन व्यञ्जनास्वरूपनिर्णयेऽस्माकं प्राथमिकं हस्तावलम्बनं वितरितम्। आस्वादगोचरस्थायिरूपो रसोऽभिव्यज्यते इत्येतदपि सर्वप्राथम्येन प्रतिपादितम्। यद्यपि मूले गुडादिद्रव्यानां व्यञ्जकत्वं नोक्तं तथापि तदभिनवगुप्तपादव्याख्यानत उन्नेयम्। तथा हि पुनरप्यनूद्यते—"तत्र च प्रधानत्वे जलस्य रसाभिव्यञ्जकत्वमिति व्यञ्जनं विभावस्थानीयम्।" इति। अत्राभिनवगुप्तेन व्यञ्जनस्योपसेचनद्रव्यत्वप्रतिपादनेनाऽऽप्यत्वं स्वीकृतम्। जलस्यैव सेचनकर्तृत्वयोग्यत्वात्। तदभावादेव 'वह्निना सिञ्चती'त्यत्र शाब्दबोधस्वीकारादर्शनात्।[२] मधुरादिषड्रसविलक्षणोऽयं षाडवरसः जलीये व्यञ्जन एव समवेतस्सन् आविर्भवति। एवं जलीयं जलीयं व्यञ्जनमेव षाडवरसस्याश्रयभूतम्। तथैवास्वादगोचरस्थायिभावोपि सकलसहृदयजनसाधारण्यमुपगतं नायिकाद्यालम्बनं समाश्रित्यैवाविर्भवतीति व्यञ्जनस्य यथा प्राधान्यं तथैव विभावस्यापीत्यभिनवगुप्तपादहृदयम्। एवञ्चाभिनवगुप्तपादेन व्यञ्जनस्यापि षाडवरसाभिव्यञ्जकत्वं स्वीकृतमित्यवदातम्। किञ्च जलस्य रसाभिव्यञ्जकत्वकथनाच्चैतदुन्नेतुं शक्यते यत् यदेतद् व्यञ्जकत्वमस्माभिस्स्वरूपतो निर्णेतुमिष्यते तन्न केवलं काव्य एवोपलब्धचरमपि तु काव्येतरविषयेष्वपीति। एतदेवास्माकं मूलं विवक्षितं वस्तु अग्रेपि यथास्थानं प्रतनिष्यते।

(४) यस्त्वत्र षाडवरसदृष्टान्तः भरतमुनिना प्रदत्तः स एवान्यैः ध्वनिमार्गानुसारिभिर्मम्मटविश्वनाथादिभिः पानकरसन्याय इति व्यपदेशेन समुपयुज्यते। तथा ह्यत्रांशतः समुद्धृते रससूत्रव्याख्यानपरके मम्मटीयग्रन्थे 'पानक-

---

१. 'नानाभूतै' रिति कविसमर्थितः पाठस्तु विस्पष्टविसंगतिदर्शनान्नादरणीय इति मामकीनः पक्षः।

२. 'एकपदार्थेऽपरपदार्थसम्बन्धो योग्यतेत्यर्थः। तज्ज्ञानाभावाच्च वह्निना सिञ्चतीत्यादौ न शाब्दबोधः।' (भाषापरिच्छेदे मुक्तावल्यां शब्दखण्डे)

रसन्यायेन चर्व्यमाण' इत्युच्यते। (**का० प्र०** ४. पृ. ९३)। किं बहुना, आंगलालंकारिकप्रवरेण एलियट्महोदयेनापि साम्प्रतं बहुविश्रुते 'अब्जेक्टिभ् कोरिलेटिभ्'तत्त्वे प्रायशः तादृश एव दृष्टान्तः समुपन्यस्तः।

एलियट्महोदयेनोच्यते—"कलायां भावस्य (रसादेः) प्रकाशनार्थमेक एव मार्गः वर्तते, स तु कस्यचन 'विषयगतस्य परस्परसम्बन्धिनः' समुद्भावनं नाम। अथवा (प्रकारान्तराभिधाने) स मार्गस्तु वस्तूनां समूहविशेषस्तथा स्थितिविशेषस्तथा घटनाप्रवाहविशेषरूपश्च। अत एव स मार्गस्तस्य भाव-विशेषस्य योगविशेषरूपः। तस्माच्चानुभूतिविशेषरूपेण परिणमनशीलेषु बाह्यवस्तुतत्त्वविशेषेषु समुपस्थापितेषु तत्क्षणादेव रसोऽभिव्यज्यते।" इति। तत्र मूलन्तु एवंरूपम्—

"The only way of expressing emotion in the form of art is by finding an "objective correlative", in other words, a set of objects, a situation, a chain of evtnts, which shall be the formula of that **Particular** emotion, so that when the external facts, which must turn in sensory experience, are given, the emotion is immediately evoked···" **(The Sacred Wood,** p. 100)

अत्र इमशन् इति पदस्य रस इत्यर्थः। सेट् अब् अव्जेक्त्स् (वस्तूनां समूहविशेषः) इत्यस्य आलम्बनविभाव इत्यर्थः। सितुवेशन् (स्थितिविशेषः) इत्यस्य उद्दीपनविभाव इत्याशयः। छेइन् अब् इभेन्त्स् (घटनाप्रवाहविशेषः) इत्यनेन चानुभावव्यभिचारिणः परामृष्टा इति प्रतिभाति। तत्रैव फर्मूला पदस्यायुर्वेदाभिमततया योग इत्यर्थोऽस्माभिः कृतः। आयुर्वेदे यथा विभिन्नानां रसायनानामौषधविशेष उपयुज्यमानानां योग इति साधारणं नाम तथैव पाश्चात्यचिकित्साशास्त्रेऽपि प्रस्तुतौषधविशेष उपयुज्यमानानां रसायनानां फर्मूला इति साधारणं नाम। एवमेवैतत् पदं पानकरसन्यायेन सादृश्यमा-कलयतीत्यलं बहुना।[1]

---

१. एलियट्महोदयस्तु काव्यरसाभिव्यक्तिप्रसंगे साधारणीकरणमपि स्वीकरोति। तथा हि तेनोक्तं—"काव्येऽभिव्यज्यमानो भावः खलु व्यक्तिगतो न भवति। स्वकृतकाव्ये आत्मनः सत्तां साकल्येन विलीय एव कविरेतन्नैर्व्यक्तिकत्वं समश्नुते" इति।

"The emotion of art is impersonal. And the poet cannot reach this impersonality without surrendering himself wholly to the work to be done" T. S. Eliot, **Selected Essays, 1917 1932** (New York, 1932), p. 11

व्यञ्जनाव्यापारपरामर्शः

यद्यपि भरतमुनिना दृष्टान्तद्वारेण व्यञ्जनाया स्वरूपं कियच्चित् समुद्घाटितं तथापि व्यञ्जना नाम काव्यस्य व्यापारविशेषोस्तीति तेन न प्रोक्तम् । तथा हि शब्दार्थयुगलं काव्यमित्यस्मिन् विषये प्रायशः सर्वेषामप्यालंकारिकाणां सन्मतिरुपलभ्यते । तस्मिंश्च काव्ये योर्थः समुपलभ्यते स शब्दस्यैव अर्थः । शब्दश्च शक्तिविशेषसहाय एवार्थं बोधयतीति सकलालंकारिकसमयः । स च शब्दः प्रथमतोऽभिधाशक्त्या वाच्यार्थं बोधयति । वाच्यार्थे बाधिते सति लक्षणाशक्त्याऽमुख्यं लक्ष्यार्थं बोधयति । एवञ्च यः कोऽप्यर्थः शब्दस्य शक्तिविशेषेणैवोपलब्धव्यः । सति चैवं दण्डि-भामह-भट्टोद्भटादिभिः परामृष्टोऽन्योर्थः शब्दस्य शक्तिविशेषेणैवोपलब्धव्यः । भरतमुनिना यो रसः काव्यार्थत्वेन स्वीकृतः सोऽपि शक्तिविशेषेणैव समासादनीयः । यत्र मीमांसकादिभिरभिधालक्षणाभेदेन शक्तिद्वयं स्वीकृतं तत्र आनन्दवर्धनेनाभिधेयलक्ष्यविलक्षणरसाद्यन्यार्थप्रत्यायने व्यञ्जना नाम शक्तिविशेषः प्रसरतीति प्रतिपादितम् । व्यञ्जनायाश्चाभिधालक्षणाभ्यां कियान् भेद इत्यग्रे स्फुटीभविष्यति ।

इदन्त्वत्रावधेयम् । अभिधादिविषये यथा शक्तिपदं प्रयुक्तं तथैव वृत्तिर्व्यापारश्चेत्येतत्पदद्वयमपि पर्यायेण प्रयुज्यते । तत्र तर्हि शक्त्यादिपदानां क आशय इति तदेव प्रथममनुसन्धीयते ।

शक्तिव्यापारवृत्तिप्रभृतिपदानां तात्पर्यम्

शब्दः शक्तिविशेषसहाय एवार्थं बोधयतीति प्रायशः सर्वसम्मतः । तत्र च संकेतलभ्यं वाच्यमर्थं यया शक्त्या बोधयति सा अभिधाशक्तिः । अभिधा-

---

एतदेव साधारणीकरणमभिलक्ष्य भट्टतोत आह—'नायकस्य कवेः श्रोतुः समानोऽनुभवस्तत' इति । अभिनवगुप्तोऽपि ध्वन्यालोकस्य 'कौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागत' इति वृत्तान्तं व्याख्यानयन्नाह—'न तु मुनेः शोक इति मन्तव्यम्' इति । (लोचनम्, पृ. ८६) अधिकन्तु अत्रैव 'काव्यप्रकारेण ध्वनिना स्फोटतत्त्वस्य सम्बन्ध' इति सन्दर्भेऽवलोकनीयम् । अन्यत्रापि एलियट्महोदय एवमाह—'न खलु काव्यं नाम व्यक्तिगतभावावेगस्योद्वेलः प्रकाशः ।···न खल्वेतद् व्यक्तित्वस्य प्रकाशो नाम किन्तु व्यक्तित्वान्मुक्तिरेव' इति ।

"Poetry is not a turning loose of emotion.....it is not the expression of personality, but an escape from Personality." **Ibid**, p. 10.

शक्तिरेव कैश्चन नैयायिकादिभिः केवलं शक्तिरित्युच्यते ।[1] अभिधायां बाधितायां लक्षणाशक्तिरभिधेयेन सम्बद्धं लक्ष्यमर्थं बोधयति। न खलु लक्ष्यार्थबोधने अभिधा प्रभवति । शब्दस्तु एकया शक्त्या एकमेवार्थं बोधयति । अर्थे बोधिते सति सा शक्तिर्विरमति । ततश्च तदतिरिक्तेऽप्यर्थे बोधनीये तद्भिन्ना अपरैव काचन शक्तिः प्रवल्गति । तस्माच्चायं न्यायः प्रवर्तते 'शब्दबुद्धिकर्मणां विरम्य व्यापाराभाव' इति (**सा० द०** ५) । तथा चोच्यते मीमांसकैः—'पदानि हि स्वं स्वं पदार्थमभिधाय निवृत्तव्यापाराणि' इति (**शा० भा०** १-१-२५) । अस्मन्मते वैयाकरणानाम् 'अर्थभेदे शब्दभेद' इति न्यायस्यापि शब्दानां विरम्य व्यापाराभावत्वमेव बीजम् । तथा चोच्यते नागेशेन—'अर्थपदयोस्तादात्म्यात् तत्तदर्थतादात्म्यापन्नः शब्दो भिन्न इति हेतोरर्थभेदे शब्दभेद इति व्यवहारः' इति । (**परमलघुमञ्जूषा** पृ. १२) । श्लिष्टपदविषये भाष्यकारोप्याह—'इष्यते च एकेनाप्यनेकस्याभिधानं स्यादिति तच्चान्तरेण यत्नं न सिद्धचति' इति (**महाभाष्यम्**, निर्णयसागरसंस्करणम्. पृ. ७३) । भट्टोद्भटेनापि श्लिष्टप्रसंगे अयमर्थभेदे शब्दभेदन्याय उररीकृतः । तथा चोच्यते भट्टेन्दुराजेन—'अर्थभेदेन तावच्छब्दा भिद्यन्त इति भट्टोद्भटस्य सिद्धान्तः' इति[2] (**लघुवृत्तिः** पृ. ५८) । अभिधायां विरतायां प्रवर्तमाना या लक्षणा नाम शक्तिस्तस्यापि लक्ष्यार्थवाच्यार्थसम्बन्धभेदानुसारं पञ्च भेदाः । यदाहुः "अभिधेयेन सामीप्यात् सारूप्यात् समवायतः ।

वैपरीत्यात् क्रियायोगाल्लक्षणा पञ्चधा मता ॥[3] इति ।

तेषु सादृश्य (सारूप्य) सम्बन्धमूला लक्षणा गौणी लक्षणा सादृश्येतरसम्बन्धमूला च शुद्धा लक्षणा इत्युच्यते । यथाह मम्मट :—

'भेदाविमौ च सादृश्यात्सम्बन्धान्तरतस्तथा ।

---

१. भाषापरिच्छेदः, शब्दखण्डम्, ८१, मुक्तावली. पृ. ३३१

२. शब्दार्थतत्त्वविदुषां पाश्चात्त्यपण्डितानामप्यस्मिन् मते संवादो यथा—'यदा तावदेकमेव प्रतीकमनेकार्थकं भवति तत्र परस्परभिन्नत्वेन द्वयोर्बहूनामेव वा प्रतीकानां स्वीकरणं ज्यायः' इति ।

"When a symbol seems to stand for two or more referents we must regard it as two or more symbols, which are to be differentiated." (Ogden and Richards, **The Meaning of Meaning**, p. 91)

अत्र प्रतीकपदं शब्दपर्यायम् ।

३ लोचने (पृ, २८) समुद्धृतः । अभिधावृत्तिमातृकायां (पृ. १७) मुकुलभट्टेन प्राचीनमीमांसकप्रवरभर्तृमित्रकृतत्वेनोपस्थापितः ।

गौणौ शुद्धौ च विज्ञेयौ' इति (**का० प्र० सू**–२।१६)। कैश्चित् च केवलं शुद्धा लक्षणा एव लक्षणा अपरा तु केवलं गुणवृत्तिरिति व्यपदिश्यते। **लोचने** भक्तपदनिर्वचनप्रसंगे तादृश एव भेद उपलभ्यते। तद्यथा—'भक्तिः प्रतिपाद्ये सामीप्यतैक्ष्ण्यादौ श्रद्धातिशयः, तां प्रयोजनत्वेनोद्दिश्य तत आगतो भाक्त इति गौणो लाक्षणिकश्च।' (**लोचनम्**. पृ. २९–३०)। अथचोभावपि भेदौ बोधयितुमानन्दवर्धनो गुणवृत्तिरिति पदमेव साधारण्येन प्रयुंक्ते, न तु लक्षणेति। यथा—

मुख्यां वृत्तिं परित्यज्य गुणवृत्त्यार्थदर्शनम्।
यदुद्दिश्य फलं तत्र शब्दो नैव स्खलद्गतिः॥ (**ध्व० १–१७**) इति।

वाचकत्वाश्रयेणैव गुणवृत्तिर्व्यवस्थिता।
व्यञ्जकत्वैकमूलस्य ध्वनेः स्याल्लक्षणं कथम्॥ (**ध्व० १–१८**) इति च।

किन्तु अभिनवगुप्तेन यैव गुणवृत्तिरित्युच्यते सैव उपचार इति व्यपदिश्यत आनन्दवर्धनेन। शुद्धा लक्षणा च तेन लक्षणेत्युच्यते। तत्र प्रमाणं यथा—'गुणवृत्तिस्तूपचारेण लक्षणया चोभयाश्रयापि भवति' इति। (**ध्व० ३. पृ. ४२३**)। यथा तथा वा भवतु।[1] एतावता एतत्तु परिस्फुटं स्याद् यत् शब्दस्य या अर्थबोधनक्षमता सा शक्ति-व्यापार-वृत्त्यादिपर्यायैर्व्यपदिश्यते। क्वचित्त्वस्मिन्नर्थे क्रियेति पदमपि प्रयुज्यते। यथा—(१) 'येषामपि स्वरूपविशेषप्रतीतिनिमित्तं व्यञ्जकत्वं यथा गीतादिशब्दानां तेषामपि स्वरूपप्रतीतेर्व्यंग्यप्रतीतेश्च नियमभावी क्रमः। तत्तु शब्दस्य क्रियापौर्वापर्यमनन्यसाध्यतत्फलघटनास्वाशुभाविनीषु वाच्येनाविरोधिन्यभिधेयान्तरविलक्षणे रसादौ न प्रतीयते।' (**ध्व० ३. पृ. ४०७–४०८**) (२) 'क्रिये वाच्यव्यंग्यप्रतीती यदि वाभिधाव्यापारो व्यञ्जनापरपर्यायो ध्वननव्यापारश्चेति क्रिये…'इत्यभिनवगुप्तस्य व्याख्यानम्। (**लोचनम्**. पृ. ४०८) (३) **काव्यप्रकाशे** (२।९) च

'मुख्यार्थबाधे तद्योगे रूढितोथ प्रयोजनात्।
अन्योर्थो लक्ष्यते यत् सा लक्षणारोपिता क्रिया॥' इति।

---

१. वस्तुतस्तु कुमारिलभट्टमते गुणवृत्तिः लक्षणा चेति द्वौ पृथगेव व्यापारौ स्तः। तथा चोच्यते—अभिधेयाविनाभूते प्रवृत्तिर्लक्षणेष्यते।
लक्ष्यमाणगुणैर्योगाद् वृत्तेरिष्टा तु गौणता॥ इति।
(तन्त्रवार्तिकम्. पृ. ३५४)।
अस्मिन् प्रसंगे का० प्र०—२. पृ. ५० इत्यवलोक्यतां Raja, **Indian Theories of Meaning**, p. 240 इति च।

पदगता येयमर्थावबोधनशक्तिः सा खलु मीमांसकैः स्वभावशक्तिरित्युच्यते। इयञ्च शक्तिर्मीमांसकानां मते पदार्थान्तरमेव। तथा हि मण्यादिसमवहितेन वह्निना दाहो न जन्यते, तच्छून्येन तु जन्यते। एवं मण्याद्यसमवधानदशायां दाहदर्शनाद् वह्नेः कारणत्वसिद्धावपि तत्समवधाने वह्नित्वस्य कारणतावच्छेदकत्वासिद्ध्या वह्नौ कश्चनाव्यभिचरितः कारणतावच्छेदकधर्मः स्वीकार्यः। कारणतावच्छेदकविशिष्टस्यैव कार्यजनकत्वात्। स च शक्तिरित्यभिधीयते। सा च शक्तिर्द्विधा सहजशक्तिराधेयशक्तिश्चेति। आद्या वह्न्यादिनिष्ठा स्वाश्रयसमवायिकारणजन्या तत्तदर्थनिरूपिता तत्तत्पदनिष्ठा च संकेतव्यंग्या सहजाता यावद्द्रव्यभाविनी नित्या। 'नित्ये नित्यैव सा शक्तिरनित्ये भावहेतुजे'ति तत् सिद्धान्तात्। स्वाश्रयभावहेत्वतिरिक्तप्रोक्षणादिजन्या व्रीह्यादिनिष्ठा द्वितीया। प्रोक्षणेन संस्कृते व्रीहौ कालान्तरभाविफलजननार्थं शक्तिराधीयते इति भावः। पदनिष्ठा पदार्थबोधनशक्तिरपि सहजशक्तेरेवावान्तरभेदमात्रम्। तथा चोच्यते पार्थसारथिमिश्रेण—

"× × ×स्वाभाविकत्वाद् वाचकत्वस्य। प्रत्यायकत्वं हि वाचकत्वम्। तच्च स्वभावशक्त्याप्युपपन्नं चक्षुरादीनामिव रूपादिषु। ननु तत्रापि संयोगसंयुक्तसमवायतत्समवायलक्षणः सम्बन्धो विद्यत एव। सत्यम्। स तु रसादिसाधारणः। शक्तिरेव त्वसाधारणं प्रत्यायकत्वे निमित्तम्। तद्वच्छब्दस्यापि स्वाभाविक्यैव शक्त्या प्रतिपादकत्वं भविष्यति" इति। (**न्यायरत्नमाला.** पृ. १०७)। अत्रायमाशयः। पदस्य पूर्वानुभूतपदार्थं प्रति स्मारकत्वमेव न त्वभिधायकत्वम्। पदश्रवणेन पदार्थः स्मर्यत इति युक्त्या अभिधायकत्वं स्मारकत्वान्नातिरिक्तम्। इति पूर्वपक्षः। स चैवं प्रतिसमाधीयते। वाचकत्वं स्मारकत्वादतिरिक्तः स्वभावशक्तिविशेष एव। यथा चक्षुः स्वभावत एव रूपं प्रत्याययति तथैव श्रूयमाणः शब्दः स्वभावत एवार्थं प्रत्याययति। ननु चक्षुषोपि रूपेण संयुक्तसमवायादिसम्बन्धसत्त्वात् सम्बन्धद्वारेण परम्परा-क्रमेणैव रूपप्रत्यायकत्वमिति कुतस्तत्र रूपप्रत्यायने सहजशक्तिप्रसंगः सहजशक्तौ सत्यां सम्बन्धादिसहकारिकारणविलक्षणतयैव वह्नेः दाह इव कार्यजनकत्वप्रसंगः स्यात्। इति चेद्रूपेण लोचनस्य यः सम्बन्धः स तु रसादिभिरपि वर्तते अथच रसादिर्लोचनेन न प्रकाश्यत इति हेतोः रूपप्रकाशे लोचनस्य रूपेण सम्बन्धः सहकारिरूपेण न स्वीकार्यः, केवलं प्रकाशनशक्तिरेव सहजा झटिति रूपप्रकाशे असाधारणं कारणमिति मन्तव्यम्। तथैव शब्दोप्यर्थं सम्बन्धस्मरणादिसहकारिकारणकलापं विनैव श्रूयमाणः सन्नेव स्वभावशक्त्यैव प्रकाशयति। तत्र पुनरप्येवं शंक्यते—ननु शब्दस्यार्थेन सम्बन्धविशेषोऽस्त्येव। तस्य कथमपलापः स्यात्। एवं स्मारकत्वमपि संस्कारोद्बोधेन

सम्भवति । संस्कारोद्बोधश्च सम्बन्ध्यर्थान्तरेणैव सम्भवति । सति चैवं स्मारकत्ववाचकत्वयोः उभयत्रापि सम्बन्धित्वं साधारणम् । तर्हि स्मारकत्वमेव स्वीक्रियताम् । अतिरिक्तवाचकत्वरूपसहजशक्तिविशेषस्वीकारे को वा स्यादनुकूलस्तर्कः । यदुक्तं प्रसंगान्तरे—

तस्माद् यत्रोभयोर्दोषः परिहारोपि वा समः ।
नैकः पर्यनुयोक्तव्यस्तादृगर्थविचारणे ॥ इति (**श्लोकवार्तिकम्**. २५२) ।

तथापि स्मारकत्वस्वीकारे अतिरिक्तवाचकत्वस्वीकारगौरवनिवृत्तेः[1] स्मारकत्वस्वीकरणमेव ज्यायः इति । तत्र पुनः समाधीयते—

'स्मारकत्वं तु संस्कारोद्बोधेन । न च सम्बन्ध्यर्थान्तरादर्शनेनासावुद्बोधयितुं शक्यते क्वचिदप्यदर्शनात् । ननु प्रत्यायकत्वमप्यसम्बन्धिनो नैव दृष्टम् । स्वाभाविकशक्तिशालिनामपि चक्षुरादीनां सम्बध्यैव प्रत्यायकत्वात् । अन्यथा दविष्ठानामपि ग्रहणप्रसंगात् । × × × तत्र प्रत्यायकत्वकल्पनमेव ज्यायः । शब्दानन्तरमर्थप्रत्ययदर्शनात्तस्यैव[2] तत्र कारणत्वं कल्पयितुं युक्तम् । न तु शब्दात् संस्कारोद्बोधः ततश्चार्थप्रतीतिरिति युक्तम् । प्रणाल्यां प्रमाणाभावात् । तस्मादभिधायकमेव पदं न स्मारकम् ।' (**न्यायरत्नमाला**, पृ. १०७)।

अत्रायमाशयः—शब्दस्य स्मारकत्वस्वीकारे शब्दश्रवणानन्तरं संस्कारोद्बोधादिक्रमेण वर्तमाना प्रणाली तु प्रमाणविरुद्धा । तस्मात् झटित्यर्थावगतिदर्शनात् वह्नेः दाहकत्वमिव शब्दस्यापि वाचकत्वं सहजशक्तिरेव । इति ।

न्यायवैशेषिकनये शक्तिः पदेन सह पदार्थस्य सम्बन्धः । स च सम्बन्धो नियतरूपः । यदुक्तं 'सा शक्तिश्चास्माच्छब्दादयमर्थो बोद्धव्य इतीश्वरेच्छारूपा ।' इति । सा च शक्तिः वृत्तिरिति पदेनापि व्यपदिश्यते इति पूर्वमेवोक्तम् । तथा हि—

पदज्ञानन्तु करणं द्वारं तत्र पदार्थधीः ।

---

१. तथा चोच्यते तार्किकरक्षायाम्—'कल्पनागौरवं यत्र तं पक्षं न सहामहे ।
कल्पनालाघवं यत्र तं पक्षं रोचयामहे ॥ इति ।

२. (१) महिमभट्टेनोद्धृतोयं श्लोकोप्यत्र तुलनीयः—
श्रुतिमात्रेण यत्रास्य तादर्थ्यमवसीयते ।
तं मुख्यमर्थं मन्यन्ते गौणं यत्नोपपादितम् ॥ इति ।
(व्यक्तिविवेकः १. पृ० ४७) ।
(२) 'वाच्यत्वं हि समयबलेन निर्व्यवधानं प्रतिपाद्यत्वं···' इति च लोचने (३, पृ. ४१९) द्रष्टव्यम् ।

शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी ॥ (**भाषापरिच्छेदः**, शब्दखण्डम् ८१) इति । अत्रायमाशयः—एकपदार्थे अपरपदार्थसंसर्गविषयकं ज्ञानमेव शाब्दबोधः । तत्र पदज्ञानमेव शाब्दबोधकरणम् । "पदजन्यपदार्थस्मरणं व्यापारः । तत्रापि वृत्त्या पदजन्यत्वं बोध्यम् । वृत्तिश्च शक्तिलक्षणान्यतरसम्बन्धः । अत्रैव (पदजन्यपदार्थोपस्थितावेव) शक्तिज्ञानस्योपयोगः । पूर्वं शक्तिग्रहाभावे पदज्ञानेऽपि तत्सम्बन्धेन तत्स्मरणानुत्पत्तेः । पदज्ञानस्य ह्येकसम्बन्धिज्ञानविधया पदार्थोपस्थापकत्वम् ।" एवमत्र पदपदार्थसम्बन्ध एव शक्तिः । सा च न सहजशक्तिरूपा पार्थसारथिमिश्रादिमीमांसकमतविरुद्धत्वेन पदस्य पदार्थस्मारकत्वात् पदज्ञानपदार्थस्मरणादिक्रमेण प्रणालीस्वीकारात् शब्दज्ञानसमनन्तरमेव झटित्यर्थबोधसम्भवात् । पदार्थप्रत्यायने तु परम्पराक्रमेणापि पदस्य कारणत्वं निर्बाधम् । तस्मिंश्च कारणत्वे न्यायवैशेषिकनये शक्तिव्यपदेशोऽपि न विरुध्यते । न खलु न्यायवैशेषिकैः गौरवभिया शक्तिर्नामातिरिक्तपदार्थः स्वीक्रियते । तथा चोच्यते—'मण्याद्यभावविशिष्टवह्ल्यादेर्दाहादिकं प्रति स्वातन्त्र्येण मण्याद्यभावादेरेव वा हेतुत्वं कल्प्यते ।' (**भाषापरिच्छेदः**, प्रत्यक्षखण्डम्. पृ. २३-२४) । अत्रायमाशयः—'अतिरिक्तशक्तिकल्पने भावकार्यमात्रस्य समवायिकारणजन्यत्वेन शक्तेरपि तथात्वात्, शक्त्यनुकूला शक्तिरपरा समवायिकारणे मन्तव्या । एवं सापि समवायिकारणजन्येति तदनुकूलशक्तिस्वीकारे शक्त्यनवस्था । तस्माल्लाघवात् मण्यभावविशिष्टवह्लित्वादिनैव हेतुत्वकल्पनमुचितमिति भावः ।' (**मुक्तावली-संग्रहः**, पृ. २३) । परन्त्वेवंक्रमेण यद्यपि अतिरिक्तः शक्तिपदार्थो न स्वीक्रियते तथापि न्यायनये शक्तिपदार्थ एव नास्तीति न । किन्तु कारणत्वमेव शक्तिः । तथा चोदयनाचार्यः—'अथ शक्तिनिषेधे किं प्रमाणम् । न किञ्चित् । तत् किमस्त्येव । बाढम् । न हि नो दर्शने शक्तिपदार्थ एव नास्ति । कोऽसौ तर्हि । कारणत्वम् ।' (**कुसुमाञ्जलिः** १।१३) । अत एव च शाब्दबोधकारणत्वे शक्तिव्यपदेशः संगच्छते ।

शक्तेः सहजशक्तिरूपत्वे तु लक्षणायां शक्तिव्यपदेशः चिन्त्यः । मीमांसानये च मुख्यार्थबाधे यथाकथञ्चिदनुसन्धीयमाना लक्षणा शक्तिव्यपदेशं विगाहमानापि स्वाभाविकेतरा सती अनायत्यैव समाश्रीयते, व्यपदिश्यते च जघन्येति । शक्तिर्लक्षणा चेत्यनयोः सर्वथा शक्तिरेव गरीयसी स्वाभाविकत्वात् । तथा चोच्यते शाबरभाष्ये—

श्रुतिलक्षणाविषये च श्रुतिर्ज्यायसी । (सू. १।४।२)
श्रुतिश्च लक्षणाया गरीयसी । (सू. ४।३।२६)
श्रुतिलक्षणाविषये च श्रुतिर्न्याय्या, न लक्षणा । (सू. ६।१।५१)

अगतिश्चैषा यल्लक्षणाश्रयणम्। (सू. ७।२।१३) इति। अस्मादेव च कारणाद् यस्मिन् समासे लक्षणाभावः स एव समासः ज्यायान्। दर्शितमेवैतत् प्रथमदर्शने 'अक्षराणामकारोस्मी'ति भगवद्वाक्यव्याख्यानप्रसंगे। अत एव च 'निषादस्थपतिं याजयेद्' इत्यत्र न तत्पुरुषो, लक्षणापत्तेः, किन्तु कर्मधारयो लक्षणाभावात्। न च निषादस्य संकरजातिविशेषस्य वेदानधिकाराद् यजनासम्भव इति वाच्यम्। निषादस्य विद्याप्रयुक्तेस्तत एव कल्पनात्।" (**भा० प०** शब्दखण्डे **मुक्तावली**, पृ. ३७७)। अत्रायमाशयः—'वास्तुमयं रौद्रं चरुं निर्वपेद्' इत्युपक्रम्य श्रूयते—'एतया निषादस्थपतिं याजयेद्' इति (**मी. सू.** ६।१।५१)। तत्र याजनस्य ब्राह्मणजीविकात्वेन रागप्राप्ततया विधानायोगाद् याजयेदित्यस्य यजेदित्यत्र तात्पर्यं बोध्यम्। तत्र रौद्रेष्टौ यागकर्ता निषादस्य स्थपतिरधिपतिरिति विग्रहेण कश्चित् त्रैवर्णिकः, निषादश्चासौ स्थपतिश्चेति विग्रहेण निषादो वेति पूर्वपक्षे तत्पुरुषे पूर्वपदलक्षणायां गौरवात् कर्मधारये तदभावात् तस्यैवौचित्यात् निषादः कर्तेति सिद्धान्तः। तथा च जैमिनिसूत्रम्—'निषादः स्याच्छब्दसामर्थ्याद्' इति (६. १. ५१)। **न्यायमालाविस्तरेप्युक्तम्**—

द्विजः स्थपतिरन्यो वा द्विजः षष्ठीसमासतः।

कर्मधारयमुख्यत्वान्निषादो रौद्रयागकृत्॥ इति। (६. १. १८, आनन्दाश्रमसंस्कृतग्रन्थावलिः, खि्रः १९४६. पृ. ३१०)

तदेवं लक्षणाया स्वाभाविकेतरत्वं द्योतयितुं विश्वनाथकविराजेनोच्यते—'लक्षणा शक्तिरर्पिता' (**सा० द०** २।९) इति। तद्वृत्तावपि तेनोच्यते—'सा शब्दस्यार्पिता स्वाभाविकेतरा ईश्वरादनुद्भाविता वा शक्तिर्लक्षणा नाम।' इति (**सा० द०** २ पृ. ३४)। मम्मटभट्टेनापि 'लक्षणाऽऽरोपिता क्रिया' इत्युच्यते। किन्तु तत्र तात्पर्यं भिन्नरूपम्। मम्मटमते तु मुख्येन अर्थेन एवामुख्योर्थः लक्ष्यते। येन लक्ष्यते स एव 'आरोपितः शब्दव्यापारः सान्तरार्थनिष्ठो लक्षणा'। अत्रायमाशयः—आरोपितः शब्दे कल्पितः। वस्तुतः शब्दे न वर्तते। मुख्योऽर्थ एवामुख्यमर्थं लक्षणाव्यापारेण बोधयति। शब्दस्य साक्षाद् बोधकत्वं नास्ति। मुख्यार्थबाधादिभिर्लक्ष्यार्थस्य शब्दाद् व्यवहितत्वात्। तस्मादेव सान्तरार्थनिष्ठ इति व्यापारविशेषणम्। वस्तुतस्तु 'गंगायां घोषः' इत्यत्र गंगाशब्देन प्रत्यायितं स्रोतः तीरं लक्षयतीत्यर्थव्यापारो लक्षणा न तु शब्दव्यापारः। तथापि वाच्यधर्मो वाचके शब्दे आरोप्यते। अतः शब्दोऽपि लाक्षणिक इत्यर्थः। एवञ्च तर्हि अर्थव्यापारस्य शब्दे आरोपितत्वादेव लक्षणाया आरोपितत्वमुच्यते मम्मटेन।

अभिनवगुप्तपादस्य मते तु क्वचिल्लक्षणाव्यापारः शब्दस्य, क्वचिदर्थस्य क्वचिच्च शब्दार्थयोरुभयोरपि। तथा चोच्यते—'ननु लक्षणा तावद् गौणमपि व्याप्नोति। केवलं शब्दस्तमर्थं लक्षयित्वा तेनैव सह सामानाधिकरण्यं भजते—सिंहो वटुः इति। अर्थो वार्थान्तरं लक्षयित्वा स्ववाचकेन तद्वाचकं सामानाधिकरणं करोति। शब्दार्थौ वा युगपत् तं लक्षयित्वा अन्याभ्यामेव शब्दार्थाभ्यां मिश्रीभवत इत्येवं लाक्षणिकाद् गौणस्य भेदः। यदाह—गौणे शब्दप्रयोगः न लक्षणायाम् इति'। (**लोचनम्**, पृ० १५२-१५३) एवञ्चात्र लक्षणाया शब्दार्थोभयनिष्ठत्वमेव स्वीकृतम्।

मीमांसकैस्तु अर्थ एव लक्षणा स्वीक्रियते इति प्रतिभाति। तथा हि पार्थसारथिमिश्रप्रदर्शितदिशा वाक्यार्थः लक्षणालभ्यः। तत्र पदार्थाः लक्षणया वाक्यार्थं बोधयन्ति। यदुक्तम्—

'इतरेषां तु शब्दानां स्वार्थरूपमेवाभिधेयमन्वितरूपस्तु वाक्यार्थः पदार्थगम्य इति। अत एव वाक्यार्थो लाक्षणिक इति मीमांसकः। अभिहितार्थसम्बन्धादभिगम्यमानत्वात्। × × ×

तस्मान्न वाक्यं न पदानि साक्षाद् वाक्यार्थबुद्धिं जनयन्ति किन्तु।
पदस्वरूपाभिहितैः पदार्थैः संलक्ष्यतेऽसाविति सिद्धमेतत्॥

(**न्यायरत्नमाला**, वाक्यार्थनिर्णयः ४३, पृ० १२५)

न्यायवैशेषिकैस्तु लक्षणाया शक्तिव्यपदेशं विहाय विस्पष्टमुक्तम्—'लक्षणा शक्यसम्बन्धस्तात्पर्यानुपपत्तितः' (**भा० प०** ८२) इति। लक्षणा मुख्यार्थनिष्ठा मुख्यार्थस्य लक्ष्यार्थेन सम्बन्धरूपा इत्यर्थः।

एवंक्रमेण शक्तिपदस्य इमे अर्था समुन्नेतुं शक्यन्ते—(१) सहजशक्तिः (२) कारणत्वम् (३) शब्दनिष्ठोऽर्थनिष्ठो वा सम्बन्धविशेषश्च।

अभिधायां लक्षणायाञ्चेत्युभयत्रापि व्यापारपदं प्रयुज्यते। तत्र व्यापारलक्षणन्तु 'तज्जन्यत्वे सति तज्जन्यजनकत्वम्' इति। न्यायवैशेषिकैः पदजन्यपदार्थस्मरणं व्यापार इत्युच्यत इति प्रागेवोक्तम्। तत्र चैवं लक्षणसंगतिः। पदार्थस्मरणं हि पदज्ञानजन्यं पदज्ञानजन्यशाब्दबोधजनकञ्चेति युक्तं पदजन्यपदार्थस्मरणस्य व्यापारत्वम्। यत्र तु अभिधाशक्तिर्लक्षणैव वा व्यापार इत्युच्यते तत्र कथं लक्षणसंगतिरिति पृच्छायामुच्यते। शब्द एव पदार्थबोधे मूलं कारणम्। शक्तिस्तु सहजशक्त्यादिरूपत्रयेऽपि शब्द एव समवेता सती पदार्थज्ञानकारणं भवतीति शब्दः शक्तेः समवायिकारणम् अथच पदज्ञानं प्रति जनकमेव इति कृत्वा अस्त्येवाभिधालक्षणयोर्व्यापारत्वमिति न कथञ्चिदपि चिरन्तनानां व्यवहारो विरुध्यते।

अभिधादिषु प्रयुज्यमानं वृत्तिपदमपि व्यापारपर्यायभूतम्। तस्माद् व्यापारलक्षणसंगत्या एवं वृत्तिव्यपदेशसंगतिः। यत्र तु **भाषापरिच्छेदे** पदजन्यपदार्थस्मरणमेव व्यापारः वृत्तिस्तु तद्भिन्ना सती शक्तिलक्षणान्यतरसंबन्ध इत्युच्यते तत्र कीदृशो वृत्तेरर्थ इति चेत् तत्र वृत्तिर्नाम शब्दस्यार्थेन संबन्धरूपो धर्मविशेष एव। आनन्दवर्धनेन तु वृत्तिरित्यस्य स्थले धर्मपदमेव प्रयुक्तमित्यनुपदमेव दर्शयिष्यते। 'लक्षणारोपिता क्रिया' इत्येवमादिषु स्थलेषु क्रिया व्यापाररूपा। शब्दस्य परम्पराक्रमेणार्थप्रत्यायनरूपा क्रिया इत्यर्थः। सति चैवं प्रत्यायनरूपक्रियायाः शब्दकर्तृकत्वात् शब्दसमवेतत्वात् शब्दजन्यत्वमथच अर्थप्रतीतिं प्रति कारणत्वमिति व्यापारत्वमपि निर्विवादम्। धर्मबोधकस्य वृत्तिपदस्यापि प्रयोगे न क्षतिः गुणक्रिययोरुभयोरपि धर्मपदव्यपदेशयोग्यत्वादिति दिक्।

ध्वन्यालोके वृत्त्यादिपदतात्पर्यम्

आन्तदवर्धनेन तु ध्वन्यालोके शक्तिवृत्तिव्यापारादीनि पदानि निर्विशेषमेव प्रयुक्तानीति प्रतिभाति। तथा हि—

(१) '.....अतश्च तत्प्रकाशिनो वाक्यस्य वाचकत्वमेव व्यापारः। किं तस्य व्यापारान्तरकल्पनया।' इत्यत्र वाचकत्वं व्यापारः वाचकत्वातिरिक्ततया कल्प्यमानं व्यञ्जकत्वमपि व्यापारः। (**ध्व०** ३, पृ० ४१५)

(२) '.....न हि यैवाभिधानशक्तिः सैवावगमनशक्तिः' (**ध्व०** ३ पृ० ४१७) इत्यत्र वाचकत्वमपि शक्तिरित्युच्यते, व्यञ्जकत्वमपि शक्तिरित्युच्यते।

(३) 'प्रसिद्धाभिधानान्तरसम्बन्धयोग्यत्वेन च तस्यार्थान्तरस्य प्रतीतेः शब्दान्तरेण स्वार्थाभिधायिना यद्विषयीकरणं तत्र प्रकाशनोक्तिरेव युक्ता।' (**ध्व०** ३, पृ० ४१८-४१९) इत्यत्र व्यंग्यत्वेनाभिमतस्यार्थान्तरस्य सम्बन्धयोग्यत्वकथनात्सम्बन्धपर्याया एव तदभिमता व्यञ्जनाशक्तिरित्युन्नेतुंशक्यते।

(४) वृत्तिरिति व्यपदेशस्तु केवलं गौणव्यापारविषय एव प्रयुक्तः—'मुख्यां वृत्तिं परित्यज्य गुणवृत्त्यार्थदर्शनम्' इत्येवमादिषु स्थलेषु। (**ध्व०** १।१७, पृ० १४८)। किन्तु तत्रापि शक्तिव्यापारादिपदेभ्यस्तस्य वृत्तिपदस्य वैलक्षण्यं किञ्चिन्नास्त्येवेति प्रतिभाति।

(५) 'अपि च व्यञ्जकत्वलक्षणो यः शब्दार्थयोर्धर्मः स प्रसिद्धसम्बन्धानुरोधीति न कस्यचिद्विमतिविषयतामर्हति।' (**ध्व०** ३, पृ० ४३६) इत्यत्र व्यञ्जकत्वं शब्दार्थयोः धर्मविशेष इत्युच्यते।

(६) 'शब्दव्यापारगोचरत्वं तु तस्यास्माभिरिष्यत एव, तत्तु व्यंग्यत्वेनैव न वाच्यत्वेन।' (**ध्व०** ३, पृ० ४१८) इत्यत्र च शब्दव्यापाररूपेण वाचकत्वव्यञ्जकत्वयोरविशेष एवेति स्फुटमेतत्।

एतत् सर्वमपि समीक्ष्यास्माभिरुन्नेतुं शक्यते यदानन्दवर्धनमते शब्दव्यापारस्तु शब्दनिष्ठः शक्तिविशेष एव। किन्तु तन्मते शक्तिरियं नातिरिक्तः पदार्थः। साधारण्येन कारणत्वरूपा धर्मविशेषरूपा एवेयं शक्तिः शब्दार्थसम्बन्धसहाया च। शक्तेरतिरिक्तपदार्थत्वस्वीकारे झटित्यर्थावबोधकत्वस्यानिवार्यत्वेन सम्बन्धस्मरणाद्यसिद्धेः। आनन्दवर्धनपरवर्त्तिविश्वनाथादिभिस्तु शक्तेः झटित्यवभासकत्वमेव स्वीकृतमिति प्रतीयते। यतो हि शब्दादर्थलाभार्थमन्तरा अविनाभावादिव्यापारास्तैर्वलादेवापाकृताः। तथा हीयं विश्वनाथकविराजस्य वाचोयुक्तिः—'तथा ह्यत्र गोशब्दाद् बाहीकार्थः प्रतीयते न वा? आद्ये गोशब्दादेव वा? लक्षिताद् वा गुणादविनाभावद्वारा? तत्र न प्रथमः, बाहीकार्थस्यासंकेतितत्वात्। न द्वितीयः अविनाभावलभ्यस्यार्थस्य शाब्दे अन्वये प्रवेशासम्भवात्। शाब्दो ह्याकांक्षा शब्देनैव पूर्यते।' इति। (**सा० द०** २, पृ० ४५-४६)। किन्तु आनन्दवर्धनाभिप्रेताः शब्दव्यापारा कदाचित् झटित्येव सम्बन्धस्मरणाद्यनालिगिततयैवार्थं 'प्रत्याययन्ति गीतादिशब्दैः रसादिलक्षणार्थप्रत्यायनमिव कदाचिच्चाविनाभावादिसम्बन्धसहत्वेनापि वस्तुमात्रविशेषव्यञ्जनायामिव। एतदप्यनुपदमेव स्फुटीभविष्यति।

व्यञ्जनाव्यापारस्वीकारे आनन्दवर्धनस्य वाचोयुक्तिः तत्राभिधाव्यञ्जनयोर्भेदः

ध्वन्यालोकस्य प्रथमोद्योते वाच्यव्यतिरिक्तस्य व्यंग्यार्थस्य सद्भावः प्रतिपादितः। तृतीयोद्योते आनन्दवर्धन एवं शंकते—'ननु अस्तु नाम वाच्यव्यतिरिक्तो व्यंग्य इत्यभिहितः कोऽपि अर्थः। तथापि स एव वाच्यार्थ इति वक्तुं युज्यते तत्परत्वाद् वाक्यस्य। तमर्थं प्रकाशयितुं वाक्यस्य यो व्यापारः प्रगल्भते सोऽपि वाचकत्वमेवास्तु। किं तत्र व्यञ्जना नाम व्यापारान्तरकल्पनेन। तात्पर्यविषयो योऽर्थः स एव मुख्यतया वाच्यस्सन्नभिधाव्यापारलभ्यः। या तत्रादिमतरवाच्यार्थस्य प्रतीतिः सा मुख्यतरवाच्यावबोधनस्य उपायमात्रम्। यथा वाक्यार्थप्रतीतेः पदार्थप्रतीतिरुपायः।' इत्यपि कश्चिद् ब्रूयात्। तदेवं प्रतिसमाधीयते—

(१) सर्वथा विलक्षणतया एव आदिमतरवाच्यार्थ-तात्पर्यविषयभूतवाच्यार्थयोः स्थितिः। वाच्यस्त्वर्थः साक्षाच्छब्दस्य सम्बन्धी, तदितरस्तु

अभिधेयसामर्थ्याक्षिप्तः शब्दसम्बन्धिसम्बन्धी। एवं विस्पष्टविलक्षणमर्थयुगलमवबोधयितुं शब्दस्यात्यन्तं विशकलितावेव व्यापारौ प्रगल्भेते। तयोरुभयोरेव व्यापारयोरवबोधनीयविषयभेदाद् भेदोऽनपह्नवनीयः। एवमभिधा व्यञ्जना चेति द्वावपि भिन्नौ व्यापारौ स्तः।

(२) तयोश्च व्यापारयोः रूपभेदोऽप्यनपह्नवनीयः। तथा हि अभिधाव्यापारः शब्दनिष्ठ एव सन् केवलं शब्दार्थमेव बोधयति। व्यञ्जनाव्यापारस्तु न केवलं वाचकशब्दमेव समाश्रित्य वर्तते किन्तु अवाचकगीतशब्दगतोऽपि सन् रसादिरूपमर्थमवबोधयति। किञ्च न केवलं वाचकावाचकभेदेन शब्दप्रकारद्वय एव अपितु अशब्दादिषु चेष्टादिष्वपि वर्तमानः अर्थविशेषावबोधनकारणं भवतीति उभयोरपि व्यापारयोः रूपभेदः सुस्फुट एव। एवमत्र व्यञ्जनारूपवैलक्षण्यकथनमुखेनैव व्यञ्जनाया विषयो महत्तर इत्यपि सूचितम्।

(३) यदुक्तं तात्पर्यविषयः वाक्यार्थ एव वाच्यार्थः। तात्पर्याविषयः प्राथमिको वाच्यार्थस्तु पदार्थस्थानीय इति तदपि न संगच्छते। तदेवोच्यते—'न हि पदार्थवाक्यार्थन्यायो वाच्यव्यंग्ययोः' इति। वाक्यार्थेऽवगते सति तदुपादानभूताः पदार्थाः विभक्ततया नोपलभ्यन्ते। किन्तु व्यंग्येर्थेऽवगते सति तदुपादानभूतः प्राथमिकवाच्यार्थोऽपि प्रतीतिपथान्नापसरति। तदेवोच्यते, 'न हि व्यंग्ये प्रतीयमाने वाच्यबुद्धिर्दूरीभवति, वाच्यावभासाविनाभावेन तस्य प्रकाशनात्। तस्माद् घटप्रदीपन्यायस्तयोः। यथैव हि प्रदीपद्वारेण घटप्रतीतावुत्पन्नायां न प्रदीपप्रकाशो निवर्तते तद्वद् व्यंग्यप्रतीतौ वाच्यावभासः।' इति (ध्व० ३. पृ. ४२०-४२१)

इदमत्रावधेयम्। योऽयं घटप्रदीपदृष्टान्तोऽत्र समुपस्थापितः स एव व्यञ्जनाया प्रकृष्टतमो दृष्टान्तः। व्यञ्जनाया पञ्चभेदान् प्रदर्शयता महिमभट्टेन तु पारिशेष्याद् घटप्रदीपन्यायेन व्यञ्जनाया एक एव प्रकार उररीकृत इत्यग्रे प्रदर्शयिष्यते। आनन्दवर्धनेन तु एतदपि सूचितं यद् व्यञ्जनाव्यापारो न केवलं शब्दार्थविषयक एव परन्तु शब्दभिन्नेष्वपि विषयेषु प्रदीपादिषु स प्रवर्ततेतरामिति।

प्रसंगतः तात्पर्यशक्तिस्वरूपविमर्शः।

इदमप्यत्रावधेयम्। आनन्दवर्धनस्य 'तस्माद् घटप्रदीपन्यायस्तयोः' इत्याद्यंशस्य व्याख्यानं लोचने उपस्थापयताभिनवगुप्तेनैवमभिधीयते—'एवं पदार्थवाक्यार्थन्यायं तात्पर्यशक्तिसाधकं प्रकृते विषये निराकृत्याभिमतां प्रकाशशक्तिं साधयितुं तदुचितं प्रदीपघटन्यायं प्रकृते योजयन्नाह—तस्मादिति।' (**लोचनम्**. ३. पृ. ४२१)। इतः प्रागप्यस्मिन् एव प्रसंग उक्तम्—

'नन्वेवं मा भूद् वाचकशक्तिस्तथापि तात्पर्यशक्तिर्भविष्यतीत्याशंक्याह न चेति।' एवमेव तात्पर्यशक्तिर्नाम अपरापि शक्तिरभिनवगुप्तेन नामग्रहणेन स्वीकृता। तस्याः स्वरूपन्तु लोचनस्य प्रथमोद्द्योतत एव समुन्नेयम्। तथा हि—

भम धम्मिअ वीसत्थो सो सुणओ अज्ज मारिओ देण।
गोलाणइकच्छकुडंगवासिणा दरिअसीहेण॥

(ध्व० १. पृ. ५२)

इत्येतस्मिन् पद्ये भ्रम इति भ्रमणविधिर्वाच्यार्थः। भ्रमणनिषेधस्तु व्यंग्यार्थः। अत्र व्यञ्जनाव्यापारस्वीकरणासहमानेन पूर्वपक्षेण तात्पर्यशक्त्या एव व्यंग्यार्थोप्युपलब्धव्य इति वक्तुमभिलष्यते। तदेव पूर्वपक्षमतमभिनवगुप्त एवं समुपस्थापयति—

'ननु तात्पर्यशक्तिरपर्यवसिता विवक्षया दृप्तधार्मिकतदादिपदार्थानन्वयरूपमुख्यार्थबाधबलेन विरोधनिमित्तया विपरीतलक्षणया च वाक्यार्थीभूतनिषेधप्रतीतिमभिहितान्वयदृशा करोतीति शब्दशक्तिमूल एव सोऽर्थः। एवमनेनोक्तमिति हि व्यवहारः, तन्न वाच्यातिरिक्तोऽन्योर्थ इति।' (**लोचनम्**. पृ. ५५-५६)

अस्य समाधानमुखेन आह—"नैतत्, त्रयो ह्यत्र व्यापाराः संवेद्यन्ते—पदार्थेषु सामान्यात्मस्वभिधाव्यापारः, समयापेक्षयार्थावगमनशक्तिर्ह्यभिधा। समयश्च तावत्येव, न विशेषांशे, आनन्त्याद्व्यभिचाराच्चैकस्य। ततो विशेषरूपे[1] वाक्यार्थे तात्पर्यशक्तिः परस्परान्विते, 'सामान्यान्यथासिद्धेर्विशेषं गमयन्ति हि' इति न्यायात्।" (**लोचनम्**. पृ. ५६-५७)। तस्मात् प्रथमकक्षायामभिधया सामान्यरूपं पदार्थमात्रं लभ्यते। "द्वितीयकक्षायां 'भ्रमे'-ति विध्यतिरिक्तं न किञ्चित् प्रतीयते, अन्वयमात्रस्यैव प्रतिपन्नत्वात्"। मुख्यार्थबाधाद्यभावादन्तरा न लक्षणा। तृतीयकक्षायां भ्रमणविध्यतिरिक्ततया यो भ्रमणनिषेधरूपोऽर्थः समुल्लसति स तु व्यञ्जनाव्यापारेणैव समुपलभ्य इति भावः।

एवंक्रमेणाभिनवगुप्तेन तात्पर्यशक्तिर्नाम शक्तिविशेषो वाक्यार्थबोधनक्षमः स्वीक्रियते। सा चेयं शक्तिरभिहितान्वयवादसमर्थितेति प्रतिभाति। अभिहि-

---

१. तुलनीयम्, "अर्थशक्तिमूलेऽपि विशेषे संकेतः कर्तुं न युज्यते इति सामान्यरूपाणां पदार्थानामाकांक्षासंनिधियोग्यतावशात्परस्परसंसर्गो यत्रापदार्थोऽपि विशेषरूपो वाक्यार्थस्तत्राभिहितान्वयवादे का वार्ता व्यंग्याभिधेयतायाम्।" इति। (का० प्र० ५. पृ. २१९)

तान्वयवादस्य प्रथमः प्रवक्ता कुमारिलभट्टः। तेन तु तात्पर्यं विलक्षणशक्ति-विशेषरूपेण न स्वीकृतम्। तथैव तन्मतानुसारिणा पार्थसारथिमिश्रेण। तेन खलु लक्षणयैव वाक्यार्थ उपलभ्यत इत्युच्यते। यदुक्तं—

तस्मान्न वाक्यं न पदानि साक्षाद् वाक्यार्थबुद्धिं जनयन्ति किन्तु।
पदस्वरूपाभिहितैः पदार्थैः संलक्ष्यतेऽसाविति सिद्धमेतत्॥

(**न्यायरत्नमाला.** वाक्यार्थनिर्णयः ४३. पृ० १२५) इति।

वस्तुतस्तु तात्पर्यं जयन्तभट्टेनैव सर्वप्राथम्येन शब्दशक्तिकक्षायां निक्षिप्तम्। तन्मतानुसारितयाभिनवगुप्तेनापि शक्तिरूपेणैव स्वीकृतम्।[1] अभिहियान्वयवादं प्रतिपादयता मम्मटेन तु **काव्यप्रकाशे** तात्पर्यस्य शक्ति-व्यपदेशः परिहृतः।[2] आनन्दवर्धनेनापि यत्र यत्र तात्पर्यमिति पदं प्रयुक्तं तत्र

---

१. Gaurinath Sastri, **The Philosophy of Word and Meaning,** pp. 220-222 etc.

२. (१) शब्दव्यापारविचारे (पृ. ७) तु अभिहितान्वयवादे लक्षणाया योगं प्रदर्शयता तात्पर्यशक्तेरपि नाम गृहीतम्। यथा—'उक्तान्वये च सा पश्चात्।

इहानन्त्याद् व्यभिचाराच्च वाक्यस्य वाक्यार्थ इव विशेषरूपे पदार्थे पदस्य संकेतः कर्तुं न पार्यते इति सामान्य एव संकेतः। आकांक्षासन्निधियोग्यतावशात् सामान्यानामभिहितानां सतामन्वय इति पदार्थानां वैशिष्ट्यम्। एवं चापदार्थोऽपि वाक्यार्थस्तात्पर्यशक्त्या प्रति-पाद्यते। अत्र पक्षे पूर्वमभिधा ततोऽन्वयबाधे लक्षणा।' (शब्दव्यापार-विचारः, पृ. ७)। अत्रायमाशयः। अभिधया सामान्यरूपः पदार्थ उपस्थाप्यते। लक्षणया परस्परमन्वययोग्यो विशेषरूपः पदार्थः। अन्वये जाते उपलभ्यमानः समुदायरूपः वाक्यार्थस्तु तात्पर्यशक्त्या इति भावः।

(२) 'एवंभूतायां प्रमाणैरप्रतिपन्नायां हि सामग्र्यामुपपत्तिमनपेक्ष्यापि समु-दयमाना प्रतीतिः केन निह्नोतुं शक्यत इति सिद्धमभिधातात्पर्यलक्षणा-व्यापारातिरिक्तं ध्वननम्।' (शब्दव्यापारविचारः पृ. १०) इत्यत्रापि अभिधादिसमकक्षतया तात्पर्यव्यापारमपि स्वीकरोति अथ च अभिधा-तात्पर्य–लक्षणेति क्रमेण पूर्वप्रदर्शितमेवाशयं द्रढयति।

(३) काव्यप्रकाशे पञ्चमोल्लासे व्यञ्जनाव्यापारस्थापनाय युक्तिजालमातन्वन् मम्मटाचार्यः वारं वारं यत् तात्पर्यपदं प्रयुंक्ते तस्य शक्तित्वं व्यापारत्वं वा नास्त्येवेति प्रतिभाति। तथा हि—

"……'यदेव विधेयं तत्रैव तात्पर्यम्' इत्युपात्तस्यैव शब्दस्यार्थे तात्पर्यं न तु प्रतीतमात्रे" इत्येवमादिषु शब्दस्यार्थं तात्पर्यं स्वीकृतमर्थात्

तत्रापि साधारण्येन तत्परस्य भावः तात्पर्यमित्येतावदेव विवक्षितम्। न तु तात्पर्यस्य शब्दशक्तित्वम्। तद्यथा।

१. अर्थशक्त्युद्भवस्तव्यो यत्रार्थः स प्रकाशते।
यस्तात्पर्येण वस्त्वन्यद् व्यनक्त्युक्तिं विना स्वतः॥

(ध्व० २।२२)

इत्यत्रस्थं तात्पर्यपदं व्याचिक्षासुरभिनवगुप्तोऽभिधत्ते—"स्वतस्तात्पर्येणेत्यभिधाव्यापारनिराकरणपरमिदं पदं ध्वननव्यापारमाह न तु तात्पर्यशक्तिम्।" इति। अत्रापि यद्यपि अभिनवगुप्तस्तात्पर्यशक्तिं शङ्कते, आनन्दवर्धनमते तात्पर्यपदस्यात्यन्तं भिन्नमेव तात्पर्यम्। अत्र विवक्षितस्त्वर्थ एवंरूपः—तात्पर्येण = तत्परतया = तदभिव्यञ्जनमात्रोन्मुखतया इति यावत्। तात्पर्यपदस्य एवंविध आशयः—

२. तत्परावेव शब्दार्थौ यत्र व्यंग्यं प्रति स्थितौ।
ध्वनेः स एव विषयो मन्तव्यः संकरोज्झितः॥

(ध्व० १, पृ० २४८)

इत्यस्मात्तथा—

३. अलङ्कारान्तरस्यापि प्रतीतौ यत्र भासते।
तत्परत्वं न वाच्यस्य नासौ मार्गो ध्वनेर्मतः॥

(ध्व० २।२७. पृ० २५६)

इत्यस्माच्च समर्थनीयो भवतीत्यास्तां तावत्।

अन्येऽपि धनञ्जयादयः केचन परवर्तिनः तात्पर्येणैव व्यंग्यमर्थं लब्धुं व्यवससुरित्यन्यदेतत्। अधुना प्रकृतमनुसरामः।

(४) आनन्दवर्धनमते—वाचकत्वं शब्दैकाश्रयं व्यञ्जकत्वन्तु शब्दाश्रयमर्थाश्रयं च शब्दार्थयोर्द्वयोरपि व्यञ्जकत्वस्य प्रतिपादितत्वात् इत्येवमपि वाचकत्वव्यञ्जकत्वयोर्भेदः समुन्नेयः।

लक्षणाव्यञ्जनयोर्भेदः

ननु व्यञ्जकत्वस्य यत् शब्दार्थोभयनिष्ठत्वं तत्तु लक्षणायामपि वर्तते। लक्षणायाश्चोभयनिष्ठत्वं प्रागेवात्र शक्तिव्यापारादिपदानां तात्पर्यनिर्णये प्रदर्शितम्। सति चैवमायातो लक्षणाव्यञ्जनयोस्संकर इति हेतोर्लक्षणाव्यञ्जनयोर्भेदमेवं प्रमापयत्यानन्दवर्धनो यथा—

शब्दस्यैवार्थबोधनप्रवृत्तिः स्वीकृता न तु वाक्ये वर्तमाना तात्पर्यशक्तिरत्र विवक्षितेति प्रतिभाति।

१. लक्षणा अमुख्यव्यापारः। व्यञ्जना तु मुख्यव्यापार इत्युभयोर्रूपभेदः। मुख्यार्थवाधानुसन्धानं विनापि वस्त्वलङ्काररसादिभेदेन त्रिरूपस्यापि व्यंग्यस्य समुल्लासदर्शनान्निर्विवादं व्यञ्जनाया अमुख्येतरत्वम्।

२. "अयं चान्यः स्वरूपभेदः—यद्गुणवृत्तिरमुख्यत्वेन व्यवस्थितं वाचकत्वमेवोच्यते। व्यञ्जकत्वं तु वाचकत्वादत्यन्तं विभिन्नमेव।" (ध्व० ३. पृ० ४२४)। अयमाशयः—मुख्यार्थबाधे सत्येव अभिधापुच्छभूता लक्षणा समुल्लसति। उभयोः समकालमेव समुल्लासो न सम्भवति इति गुणवृत्तिरेवामुख्यं वाचकत्वमित्युच्यते। व्यञ्जकत्वन्तु वाचकत्वेन सहैवात्मानं समासादयदपि अत्यन्तं विभिन्नं वर्तते। तद्यथा 'भम धम्मिअ' इति पद्ये वाचकत्वेन भ्रमणविधेर्बोधः व्यञ्जनया तु तद्विपरीतस्य निषेधस्य प्रतीतिः।

३. "गुणवृत्तौ यदा अर्थो अर्थान्तरमुपलक्षयति तदा उपलक्षणीयार्थात्मना परिणत एवासौ सम्पद्यते। यथा 'गङ्गायां घोष' इत्यादौ। व्यञ्जकत्वमार्गे तु यदार्थोऽर्थान्तरं द्योतयति तदा स्वरूपं प्रकाशयन्नेवासावन्यस्य प्रकाशकः प्रतीयते प्रदीपवत्।" (ध्व० ३. पृ० ४२४)। अत्रायमाशयः—'गङ्गायां घोष' इत्यत्र गङ्गापदस्य मुख्यार्थः प्रवाहः। स एवार्थः लक्षणया तीररूपेऽर्थे परिणतः यस्मादस्मिन् वाक्ये गङ्गातीरस्य एव बोधः, न तु पृथक्तया प्रवाहस्यापि। व्यञ्जकत्वमार्गे तु वाक्यार्थस्यापि बोधोऽभ्याहतः, तदतिरिक्ततया व्यंग्यार्थस्यापीति गुणवृत्तिव्यञ्जकत्वयोर्भेदः। तथा हि—

एवं वादिनि देवर्षौ पार्श्वे पितुरधोमुखी।
लीलाकमलपत्राणि गणयामास पार्वती॥

इत्येतस्मिन् पद्ये द्वितीयार्थे लीलाकमलपत्रगणनरूपोऽर्थः वाच्यः। पार्वती लज्जामनुभूतवतीत्ययमर्थस्तु व्यंग्यः। व्यंग्यार्थबोधकालेप्यत्र वाच्यबुद्धिर्न दूरीभवति। तस्मादत्र लीलाकमलपत्रगणनरूपो वाच्यार्थः प्रदीपस्थानीयः। पार्वतीलज्जाविषयकस्त्वर्थः घटस्थानीयः। व्यञ्जनास्वरूपबोधार्थायायं घटप्रदीपन्यायोऽतीव प्रयोजनीयः। तथैव स्वप्रकाशकत्वे सति परावभासकत्वमपि व्यञ्जकस्य विशिष्टं लक्षणम्।

४. यत्रात्मानं प्रकाशयन्नेवार्थोऽर्थान्तरं बोधयति तत्रापि यदि लक्षणा प्रवर्तत इत्युच्यते तर्हि लक्षणैव मुख्यः शब्दव्यापारः स्याद् यतो हि प्रायेणैव वाक्यानामतिरस्कृता वाच्यार्था व्यंग्यरूपान् तात्पर्यविषयभूतानर्थान्तरानवभासयन्ति।

५. तत्र लक्षणाव्यञ्जनयोरयं विषयभेदोप्यनपह्नवनीयः।

तथा हि—लक्षणया केवलं वस्तुमात्ररूपमेवार्थान्तरं समासादयितुं शक्यते। व्यञ्जनया तु वस्तुमात्ररूपमलङ्कारः रसादिरिति च त्रिविधोप्यर्थः

विषयीक्रियते। यदुक्तं—'विषयभेदोऽपि गुणवृत्तिव्यञ्जकत्वयोः स्पष्ट एव। यतो व्यञ्जकत्वस्य रसादयोऽलङ्कारविशेषा व्यंग्यरूपावच्छिन्नं वस्तु चेति त्रयं विषयः। तत्र रसादिप्रतीतिर्गुणवृत्तिरिति न केनचिदुच्यते न च शक्यते वक्तुम्। व्यंग्यालङ्कारप्रतीतिरपि तथैव। वस्तुचारुत्वप्रतीतये स्वशब्दानभिधेयत्वेन यत्प्रतिपादयितुमिष्यते तद्व्यंग्यम्। तच्च न सर्वं गुणवृत्तेर्विषयः प्रसिद्धयनुरोधाभ्यामपि गौणानां शब्दानां प्रयोगदर्शनात्। तथोक्तं प्राक्। यदपि च गुणवृत्तेर्विषयस्तदपि च व्यञ्जकत्वानुप्रवेशेन। तस्माद् गुणवृत्तेरपि व्यञ्जकत्वस्यात्यन्तविलक्षणत्वम्। वाचकत्वगुणवृत्तिविलक्षणस्यापि च तस्य तदुभयाश्रयत्वेन व्यवस्थानम्।' इति। (ध्व० ३. पृ० ४२५-४२७)

६. अधुना लक्षणाया अभिधायाश्च सममेव भेदं दर्शयितुमुच्यते—व्यञ्जकत्वं कदाचिद् वाचकत्वाश्रयेण वर्तते। यथा विवक्षितान्यपरवाच्ये ध्वनौ। कदाचिच्च गुणवृत्त्याश्रयेण वर्तते यथा अविवक्षितवाच्ये ध्वनौ। तदुभयाश्रितत्वात्तदेकतरेण व्यञ्जनायाः तादात्म्यं स्थापयितुं न शक्यते। किञ्च क्वचिद् वाचकत्वगुणवृत्तिनिरपेक्षतयैव व्यञ्जकत्वमुपलभ्यते रसादिव्यञ्जकेष्ववाचकेषु गीतध्वनिषु इति सर्वथा तदुभयानालिंगितत्वमपि व्यञ्जकत्वस्य सिद्धम्। अत्रेयं शङ्का समुदेति—ननु शब्दादन्यत्रापि गीतध्वन्यादिषु व्यञ्जकत्वस्य दर्शनाद् वाचकत्वगुणवृत्तिसाधारण्येन शब्दव्यापारत्वं नैव कल्पयितुं युज्यते। अर्थाद् वाचकत्वं गुणवृत्तिश्चेति द्वावेव शब्दव्यापारौ भवितुमर्हतः। व्यञ्जकत्वन्तु सर्वथा शब्दव्यापारविलक्षणमेव स्यात् इति। अत्रेदमानन्दवर्धनस्य समाधानम्—'यदि च वाचकत्वलक्षणादीनां शब्दप्रकाराणां प्रसिद्धप्रकारविलक्षणत्वेऽपि व्यञ्जकत्वं प्रकारत्वेन परिकल्प्यते तच्छब्दस्यैव प्रकारत्वेन कस्मान्न परिकल्प्यते।' इति (ध्व० ३. पृ. ४२८-४२९)। अयं भावः। अन्यत्रावाचकेषु गीतध्वन्यादिषु प्रदीपादिषु च यद्व्यञ्जकत्वं तद्भवतु वाचकत्वादेर्विलक्षणम्। वाचके शब्दे तु यद्व्यञ्जकत्वं तच्छब्दव्यापारप्रकारविशेषरूपेणैव स्वीकर्तुं युज्यते। व्यञ्जकत्वरूपे शब्दव्यापारप्रकारविशेषे स्वीकृते सति परावभासकत्वधर्मसारूप्येण तस्य सर्वसाधारणव्यञ्जकत्वादभेदोऽप्यवसाययितुं शक्यत इत्यग्रेदं प्रपञ्चयिष्यते।

७. यद्यपि क्वचिल्लक्षणासमाश्रयेण व्यञ्जकत्वं प्रवर्तते तथापि विवक्षितान्यपरवाच्ये ध्वनौ वाच्यवाचकयोः द्वयोरपि स्वरूपप्रतीतिरर्थान्तरावगमनञ्च दृश्येते इति तत्र गुणवृत्तिनिरपेक्षतयैव 'व्यञ्जकत्वव्यवहारो युक्त्यनुरोधी'। यतो हि 'स्वरूपं प्रकाशयन्नेव परावभासको व्यञ्जक' इति व्यञ्जकलक्षणस्य तत्र सुसंगतिरुपलभ्यते। यदुक्तम्—"अन्यो ब्रूयात्.....

अत एव च विवक्षितान्यपरवाच्ये ध्वनौ वाच्यवाचकयोर्द्वयोरपि स्वरूपप्रतीतिरर्थावगमनं च दृश्यत इति व्यञ्जकत्वव्यवहारो युक्त्यनुरोधी। स्वरूपं प्रकाशयन्नेव परावभासको व्यञ्जक इत्युच्यते, तथाविधे विषये वाचकत्वस्यैव व्यञ्जकत्वमिति गुणवृत्तिव्यवहारो नियमेनैव न शक्यते कर्तुम्।" इति (ध्व० ३. पृ० ४२९–४३१)

इदमत्रावधेयम्। अस्माभिरत्र पुनः पुनरनूदितं व्यञ्जकस्वरूपप्रकाशकं 'स्वरूपं प्रकाशयन्नेव परावभासको व्यञ्जक इत्युच्यते' (ध्व० ३. पृ० ४३१) इति वाक्यं व्याख्यानयन्नाह अभिनवगुप्तपादः—

'उच्यत इति प्रदीपादिः, इन्द्रियादेस्तु करणत्वान्न व्यञ्जकत्वं प्रतीत्युत्पत्तौ' इति (**लोचनम्** पृ० ४३१)। अस्माकं मतेऽस्य वचनस्यायमाशयः— इन्द्रियादीनां न्यायादिनये व्यञ्जकत्वे स्वीकृतेऽपि स्वप्रकाशकत्वे सति परावभासकत्वमिति व्यञ्जकलक्षणं तेषु साकल्येन न संगच्छते। तत्र साधारण्येन परावभासकत्वेनैव व्यञ्जकत्वं, स्वप्रकाशकत्वन्तु नियमेन नानुगतम्। तथा हि 'भूतगुणविशेषोपलब्धेस्तादात्म्यम्' (**न्यायसूत्रम्**, ३-१-६१) इति सूत्रेणेन्द्रियाणां भौतिकत्वं स्थापितम्। तत्र 'दृष्टो हि वाय्वादीनां भूतानां गुणविशेषाभिव्यक्तिनियमः। वायुः स्पर्शव्यञ्जकः। आपो रसव्यञ्जिकाः। तेजो रूपव्यञ्जकम्। पार्थिवं किञ्चिद् द्रव्यं कस्यचिद् द्रव्यस्य गन्धव्यञ्जकम्। अस्ति चायमिन्द्रियाणां भूतगुणविशेषोपलब्धिनियमः। तेन भूतगुणविशेषोपलब्धेर्मन्यामहे भूतप्रकृतीनीन्द्रियाणि नाव्यक्तप्रकृतीनीति।' इति **वात्स्यायनीयं भाष्यम्**। न च नासारन्ध्रमेवेन्द्रियमपि तु तद्गतः पार्थिवभाग एवेन्द्रियम्। तस्य च पार्थिवभागस्य सद्भावः गन्धाभिव्यञ्जनदर्शनादेवोन्नेय इति घ्राणेन्द्रियस्य गन्धाभिव्यञ्जकत्वे सत्यपि स्वप्रकाशकत्वं परम्पराक्रमेणैवावसेयम्। किञ्च वायुः स्वयमेव स्पर्शादनुमेयः। तस्माद् वायोः स्पर्शाभिव्यञ्जकत्वे सत्यपि स्वप्रकाशकत्वं प्रदीपवन्न झटित्यवबोधगोचरतामायाति। वायवीयत्वगिन्द्रियस्य स्वप्रकाशकत्वन्तु दूर एव आस्ताम्। तस्मान्न करणानामिन्द्रियाणामभिव्यञ्जकत्वमित्यभिनवगुप्तपादः। एवन्तर्हि नैयायिकैरिन्द्रियाणां यद्रूपादिव्यञ्जकत्वमुक्तं तत् खलु साधारणभावेन विषयस्य धीगोचरतापादनमेव न तु स्वप्रकाशसहकृतम्। तत्तु ज्ञापनमात्रं न तु स्वज्ञापनपूर्वकतया परावभासनमिति व्यञ्जकपदं तत्र प्रकाशमात्रबोधकं न तु तस्य कोऽपि पारिभाषिकोऽर्थः शङ्कनीय इति दिक्।

८. यद्यपि विवक्षितान्यपरवाच्ये ध्वनौ गुणवृत्तिनिरपेक्षता, न तथा अविवक्षितवाच्ये ध्वनौ। तत्र नियमेनैव गुणवृत्तेः सद्भावात्। तस्माद-विवक्षितवाच्ये गुणवृत्तिव्यञ्जकत्वयोः कथं भेद इति चेत् तत्रापि व्यञ्जक-

त्वेन न्यक्कृता सत्येव गुणवृत्तिः प्रवर्तते। न तु तदेकरूपा एव। तत्रापि च चारुतरार्थप्रत्यायने व्यञ्जकत्वमेव प्रगल्भते।[1] उक्तञ्च प्रथमोद्योत एव—

उक्त्यन्तरेणाशक्यं यत्तच्चारुत्वं प्रकाशयन्।
शब्दो व्यञ्जकतां विभ्रद् ध्वन्युक्तेर्विषयीभवेत्॥ इति (ध्व० १-१५)

मीमांसकदृष्ट्या व्यञ्जनाव्यापारसमीक्षा

वाचकत्वाद् व्यञ्जकत्वस्य विशेषं दर्शयितुमानन्दवर्धनेन पुनरप्युच्यते यत् शब्दार्थयोः वाच्यवाचकरूपः सम्बन्धो नियत एव। किन्तु व्यंग्यव्यञ्जकयोः कोऽपि नियतः सम्बन्धो नास्ति। उपाधिभेदेन एकस्यापि शब्दस्य विभिन्ना व्यंग्यार्था आविर्भवन्ति। उपाधयस्तु प्रकरणादिवैशिष्ट्यरूपाः। तदेवोच्यते—'...स त्वनियतः, औपाधिकत्वात्। प्रकरणाद्यवच्छेदेन तस्य प्रतीतेरितरथा त्वप्रतीतेः' (ध्व० ३. पृ. ४३६-४३७)

तत्रेयं शंका समुदेति। ननु 'औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धः'[2] इत्यादि-जैमिनीयसूत्रानुसारं मीमांसकाः शब्दस्यार्थेन सम्बन्धो नियतरूप[3] इति स्वी-

---

१. '...तस्मादविवक्षितवाच्ये ध्वनौ द्वयोरपि प्रभेदयोर्व्यञ्जकत्वविशेषाविशिष्टा गुणवृत्तिर्न तु तदेकरूपा' (ध्व० ३. पृ. ४३५) तत्र च '...यदि वा व्यञ्जकत्वलक्षणेन व्यापारविशेषेणाविशिष्टा न्यक्कृतस्वभावा आसमन्ताद्व्याप्ता।' इति लोचनम्।

२. औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धस्तस्य ज्ञानमुपदेशोऽव्यतिरेकश्चार्थेऽनुपलब्धेः तत्प्रमाणं बादरायणस्यानपेक्षत्वात् (जै. सू. ५) इति समग्रं सूत्रम्।

३. यस्तु नियतरूपः स एव नित्यरूपत्वेनाप्यत्राभिमतः। जैमिनीयसूत्रे च औत्पत्तिकशब्दो नित्यपर्याय इत्यभिनवगुप्तपादः। औत्पत्तिकशब्दान्नित्यरूपार्थलाभप्रकारं लोचने त्रिधा दर्शयति यथा—(१) 'जन्मना द्वितीयो भावविकारः सत्तारूपः सामीप्याल्लक्ष्यते।' अत्रायमाशयः। जन्म-सत्ता-विपरिणाम-वृद्ध्यपक्षय-विनाशरूपेषु षड्भावविकारेषु द्वितीयः सत्तारूपः जन्मपर्यायेणोत्पत्तिपदेन सामीप्याल्लक्ष्यते। सत्तारूपार्थेन च नित्यत्वं लभ्यते। (२) 'विपरीतलक्षणातो वानुत्पत्तिः' अर्थादुत्पत्तिपदेनानुत्पत्तिर्लक्ष्यते। अनुत्पत्तिरेव नित्यस्य लक्षणम्। यद्यपि च प्रागभावाप्रतियोगित्वे सति ध्वंसाप्रतियोगित्वं नित्यलक्षणं तथापि प्रागभावाप्रतियोगित्वरूपानुत्पत्तियोग्यत्वेनैव ध्वंसाप्रतियोगित्वमप्याक्षिप्यते प्रागभावाप्रतियोगिनो नियमेनैव ध्वंसाप्रतियोगित्वदर्शनात् प्रागभावप्रतियोगिव्यतिरिक्तस्योत्पत्तिरहितस्य भावमात्रस्यैव नित्यत्वव्याप्यत्वात्। (३) 'रूढ्या वा औत्पत्तिकशब्दो नित्यपर्यायः।' इति च। (लोचनम्. पृ० ४३८-४३९)। इदमत्रावधेयम्। आद्ययोः सामीप्यवैपरीत्यरूपसम्बन्ध-

कुर्वन्ति । तैस्तु मीमांसकैरयमनियतरूपो व्यंग्योऽर्थः कथमपि नाभ्युपगन्तव्य

द्वयमुदाहृतम् अभिनवगुप्तेन । तृतीयस्य तु रूढचां न कोऽपि सम्बन्धः समुदाहृतः । रूढचां यद्यपि लक्षणाव्यवहारस्तथापि रूढिलभ्योऽर्थः अभिधेयरूप एव प्रायशः । तथा चोच्यते भट्टकुमारिलेन—'निरूढा लक्षणाः काश्चित् सामर्थ्यादभिधानवत्' इति । अत्र खलु व्युत्पत्तिलभ्यस्यार्थस्यासंगतेरेव यथा कथञ्चिल्लक्षणाव्यवहारः । स च लक्ष्यार्थः लोकव्यवहारोपारूढः । एवञ्च रूढौ यो लक्ष्यार्थः लभ्यते सोऽभिधेयसदृश एव सन् तत्पूर्वभाविवाधितवाच्यार्थविशेषेणात्मानः सम्बन्धं नैव समुट्टंकयति । रूढिलभ्यस्यैवार्थस्य झटितिप्रतीतिपथावतरणात् सैव मुख्यप्रायः । परन्तु 'शक्तं पदम् । तच्चतुर्विधम् । क्वचिद् रूढं, क्वचिद् योगरूढं, क्वचिद् यौगिकरूढम्' (भा० प० शब्दखण्डम्.) इत्येवंरूपेषु नैयायिकादीनां वचनेषु रूढौ शक्यार्थस्यापि प्रकारविशेषः स्वीक्रियते । तेषां मते न हि खलु शब्दानां मुख्यार्थनिरूपणे नियमेनैव तेषां व्युत्पत्तिरनुसन्धीयते । उक्तञ्च महिमभट्टेन—'अन्यद्धि व्युत्पत्तिनिमित्तम् । अन्यच्च प्रवृत्तिनिमित्तम् । यथैकेषां मते गमनादिक्रिया गवादिशब्दानां व्युत्पत्तिनिमित्तम् एकार्थसमवायात् गोत्वादि प्रवृत्तिनिमित्तीकरोति । अत एव गच्छत्यगच्छति च गवि गोशब्दः सिद्धो भवति ।' (व्यक्तिविवेकः १. पृ. ३३) । अनूदितञ्च विश्वनाथकविराजेनापि—"अन्यद्धि शब्दानां व्युत्पत्तिनिमित्तम् । अन्यच्च प्रवृत्तिनिमित्तम् । व्युत्पत्तिलभ्यस्य मुख्यार्थत्वे 'गौः शेते' इत्यत्रापि लक्षणा स्यात् । 'गमेर्डोः' इति गम्धातोर्डोप्रत्ययेन व्युत्पादितस्य गोशब्दस्य शयनकालेऽपि प्रयोगात् ।" इति (साहित्यदर्पणम् २) एवन्तर्हि निरूढा नाम लक्षणाया प्रकारविशेष एव न स्यात् । विश्वनाथकविराजेन तु स्वयमेव स्वीकृत इति कथमेतत् । कथं वा रूढशक्यार्थरूढलक्ष्यार्थयोर्भेद इति शंकायामुच्यते—

'कर्मणि कुशल' इत्यत्र कुशग्राहिरूपार्थस्य व्युत्पत्तिलभ्यत्वेऽपि दक्षरूपस्यैव मुख्यार्थत्वम् । कुशल इति पदे प्रयुक्ते सति कुशग्राहिरूपस्यार्थस्य कदाप्यननुसन्धानात् । दक्षरूपस्यैवार्थस्य नियमेन झटित्युपस्थितेस्तत्रैव संकेतः कल्प्यते । 'श्वेतो धावति' इत्यत्र रूढिलक्षणायान्तु श्वेतपदस्य मुख्यार्थस्य श्वेतरूपस्य धावनकर्तृत्वासम्भवान्मुख्यार्थबाधे एव द्वितीयार्थस्य श्वेतगुणवान् इत्यस्य आविर्भावः । तत्र प्रथमतः श्वेतरूपस्य बोधः । स एव मुख्यार्थः । तस्मिन् बाधिते सत्येव श्वेतगुणवान् इति लक्ष्यार्थ आविर्भवति । तस्याश्च लक्षणायाः प्रयोगे रूढिरेव कारणं न तु प्रयोजनान्तरम् । किञ्च रूढशक्यार्थरूढलक्ष्यार्थयोर्भेदस्तावदेवमपि वक्तुं शक्यते । तयोः संकेतितार्थः शक्यार्थः । यत्र असंकेतितेऽपि अर्थे प्रयोगबाहुल्येन शब्दप्रतिपाद्यत्वं तत्र रूढिलक्षणांगीक्रियते । संकेतितस्यार्थस्य रूढिलभ्यतोऽपि प्रसिद्धतरत्वमिति दिक् ।

इति। तत्रोच्यते । मीमांसकैस्तावत् पौरुषेयापौरुषेयवाक्ययोर्भेदः स्वीक्रियते। स तु भेदः पौरुषेयवाक्यानां मिथ्यात्वनिबन्धनः। अपौरुषेयाणां तु श्रुतिवाक्यानां कदापि मिथ्यात्वं न स्यात्। मिथ्यात्वं चार्थनिष्ठम्। एवन्तर्हि मिथ्यामिथ्ययोर्वाक्ययोरर्थे विशेषः। अन्यथा समानरूपाणां शब्दानां प्रयोगे सति शब्दार्थसम्बन्धे चोभयत्रापि नियते सति कथमुभयोर्भेदः स्यात्। तस्मात् पौरुषेयवाक्ये यदेतन् मिथ्यात्वं तत्तु अपौरुषेयवाक्यापेक्षया भिन्नार्थबोधनेनैव भिन्नश्चायमर्थो नियतरूपादर्थाद् विलक्षणो व्यंग्यरूप एवेत्यभ्युपगन्तव्यम्। स चार्थो व्यञ्जकत्वेनैव समासादनीय इति।

पुनरपीयमत्र शंका समुदेति। ननु पौरुषेयाणि वाक्यानि प्राधान्येन पुरुषाभिप्रायमेव प्रकाशयन्ति। तद् यथा 'गामानय' इत्यस्मिन् वाक्ये समुच्चारिते न केवलं गवानयनरूपमेवार्थमवगच्छति श्रोता अपि तु 'अयं वक्ता गवानयनमभिप्रैति' इत्येवं रूपमप्यर्थमासादयति। उच्यते च **शाबरभाष्येऽपि**—'एवमयं पुरुषो वेदेति भवति प्रत्ययः न त्वेवमयमर्थः' इति। एवं क्रमेण प्रयोगदशायां वस्तुतः श्रोता वक्तुरभिप्रायमेवावैति। परन्तु सोऽभिप्रायरूपोऽर्थः व्यंग्य एव न त्वभिधेयः, शब्देनाभिप्रायरूपस्यार्थस्य वाच्यवाचकरूपसम्बन्धाभावात्। एवन्तर्हि सर्वेषामपि लौकिकवाक्यानां व्यञ्जकत्वं प्रसज्यते। सर्वेषामप्यभिप्रायविशेषपूर्वकत्वेनैव प्रयोगदर्शनात्। अपौरुषेयाणान्तु श्रुतिवाक्यानां वक्तुरभावेनाभिप्रायपूर्वकत्वाभावाद् व्यञ्जकत्वशंका नास्ति। तेन च व्यंग्यार्थरहितत्वेन श्रुतिवाक्येषु नियतरूपस्याभिधेयस्यैवाभिधानान् मिथ्यार्थकथनसम्भावनापि नास्ति। लौकिकवाक्यानान्तु सर्वेषामपि व्यञ्जकत्वं प्रसक्तम् इति। अत्रोच्यते—'वक्त्रभिप्रायप्रकाशनेन यद् व्यञ्जकत्वं तत् सर्वेषामपि लौकिकानां वाक्यानामविशिष्टम्। तत्त वाचकत्वान्न भिद्यते। व्यंग्यं हि तत्र नान्तरीयकतया व्यवस्थितम्। न तु विवक्षितत्वेन। यस्य तु विवक्षितत्वेन व्यंग्यस्य स्थितिः तद्व्यञ्जकत्वं ध्वनिव्यवहारस्य प्रयोजकम्।' इति (**ध्वन्यालोकः** ३. पृ. ४४१-४४२)। अत्रायमाशयः। गवानयनादिभिरर्थैरानयननियोगाभिप्रायादिरूपा अर्था ओतप्रोतभावेन नान्तरीयकतया सम्बद्धाः। तस्माद् वाच्येन सहाभिप्रायस्याप्यव्यभिचारेणोपस्थितिः। तस्मात् सर्वसाधारणोऽयमभिप्रायरूपो व्यंग्यो व्यंग्यरूपेण न परिचीयते सदैव। किन्तु काव्यवाक्येषु विशेषभावेन प्रत्यायितुमभिलषितः अभिप्रायरूप एवार्थः व्यंग्यरूपेण परिचीयते ध्वनिव्यपदेशप्रयोजकश्च भवति। यथा 'शिखरिणि क्व नु नाम' इत्यादि पद्ये। (ध्वन्यालोकः १. पृ० १३८)[1]

---

१. विवक्षितान्यपरवाच्यस्य ध्वनेः

वाच्यमर्थं प्रति शब्दस्य व्यञ्जकत्वम्

इदञ्चात्र व्यञ्जनाप्रपञ्चसमीक्षायां विशेषतोऽवधेयम्। प्रसंगतः 'तत्तु वाचकत्वान्न भिद्यते' इत्यानन्दवर्धनेन यदुक्तं तस्मादेवैतदवसाययितुं शक्यते यद् वस्तुतो व्यंग्योऽप्यर्थः वाच्यस्थानीयः वाच्योऽप्यर्थः शब्देनाभिव्यज्यमान-शरीर एव। यं वाच्यमर्थं प्रति शब्दस्य वाचकत्वं व्यञ्जकत्वाद् विविच्य प्रदर्शयितुमभिलष्यते तं प्रत्यपि वस्तुतः शब्दस्य व्यञ्जकत्वमेव।[1] तस्मिन्नपि

शिखरिणि क्व नु नाम कियच्चिरं किमभिधानमसावकरोत्तपः।
तरुणि येन तवाधरपाटलं दशति बिम्बफलं शुकशावकः॥
(ध्वन्यालोकः १. पृ० १३८)

इत्युदाहरणे'.....अनुरागिणश्च प्रच्छन्नस्वाभिप्रायख्यापनवैदग्ध्यचाटुविरचना-त्मकविभावोद्दीपनं व्यंग्यम्' इति लोचनवचनानुसारमभिप्रायविशेष एव व्यंग्यार्थः।

१. अत्रापि 'त्रयः प्रकाशाः स्वपरप्रकाशाः' इति दार्शनिकसमयः संगच्छते। तथा हि "द्विविधो हि प्रकाशकोऽर्थ उपाधिरूपः स्वतन्त्रश्चेति। तत्र ज्ञानशब्दप्रदीपादि रुपाधिरूपः। तदुक्तं—'त्रयः प्रकाशाः स्वपरप्रकाशा' इति।" (व्यक्तिविवेकः १ पृ० ८४)। अयञ्च 'त्रयः प्रकाशाः स्वपरप्रकाशा' इति समयः वैयाकरणाना-मप्यभिमतः। शब्दज्ञानदीपा एवात्र परामृष्टास्त्रयः प्रकाशाः। यदाह पुण्यराजः—'त्रीणि ज्योतिंषि त्रयः प्रकाशो योऽयं जातवेदा यश्च पुरुषेष्व-वान्तरः प्रकाशो यश्च प्रकाशयोः प्रकाशयिता शब्दाख्यः प्रकाशस्तत्रैतत् सर्व-मुपनिबद्धम्।' इति (वाक्यपदीये काशीसंस्करणे पुण्यराजटीका. पृ० ७)। ज्ञानशब्दयोस्स्वपरप्रकाशकत्वं परामृश्याह भर्तृहरिः—

आत्मरूपं यथा ज्ञाने ज्ञेयरूपं च दृश्यते।
अर्थरूपं तथा शब्दे स्वरूपं च प्रकाशते॥ (वाक्यपदीयम् १.५०) इति। अस्य व्याख्याने पुण्यराजोऽप्याह—'यथा ज्ञाने ज्ञेयं घटादिरूपम् अतीतमनागतं वर्तमानं च गृह्यते ज्ञानस्वरूपं च स्वप्रकाशत्वात् तावच्छब्दोऽप्यभिधेयतन्त्रस्त-द्रूपोपग्राही स्वरूपमपि प्रत्यवभासयति।' इति। तदेवं वाच्यमर्थं प्रत्यपि शब्दस्य साधारण्येन व्यञ्जकत्वं वैयाकरणस्यापि सम्मतमित्यलं बहुना।

इदन्त्वत्रावधेयम्। भर्तृहरिणा शब्दस्य ज्ञानात्मकत्वं ज्ञानस्यापि शब्दा-त्मकत्वमुररीकृतम्। तन्मते सर्वं ज्ञानं शब्दसंस्पृष्टम्। अर्थस्य तद्बोधकशब्दा-विनाभावेन प्रतीतेः। एतत्तु न सर्वसम्प्रतिपन्नं वादिविप्रतिपत्तिदर्शनात्। पुनश्च ज्ञानस्यापि स्वपरप्रकाशकत्वं वैयाकरणाभिमतं न सर्ववादिसम्मतम्। नैयायिकैरज्ञातस्यापि स्वरूपसतः ज्ञानस्य ज्ञेयबोधकत्वाभ्युपगमात्। अनन्तरन्तु ईदृशं व्यवसायात्मकं ज्ञानं मानसप्रत्यक्षेणानुव्यवसायापरपर्यायेण प्रत्यक्षीक्रियते

शब्दे व्यञ्जकलक्षणस्य सुसंगतत्वात्। स्वरूपं प्रकाशयन्नेव शब्दः वाच्यमर्थमभिधत्ते घटप्रदीपन्यायेन। एवन्तर्हि वाच्यत्वव्यंग्यत्वनिरपेक्षत्वेनैवार्थं प्रति

इति तेषामाशयः। मीमांसकानां मते ज्ञानं ज्ञाततालिंगेन अनुमीयते। बौद्धानां मते ज्ञानं स्वप्रकाशं स्वसंवेदनसिद्धम्। जैनानामपि तथा। शांकरवेदान्तिमते साक्षिज्ञानस्य स्वप्रकाशकत्वं सिद्धम्। वृत्त्यात्मकज्ञानस्य साक्षिण एव प्रकाशनादर्थादभिव्यञ्जनात्। एवं वादिविप्रतिपत्तौ सुमहत्यां जागरुकायां कस्य मतस्योपादेयत्वं कस्य वा हेयत्वमिति शंकायां स्वानुभव एव प्रमाणम्। अनुभवोऽपि यद्यपि सर्वजनसिद्ध एक एव तथापि तस्योपपादनन्तु दार्शनिकैः स्वसिद्धान्तानुसारेणान्यथा क्रियते। यदुक्तं नैषधे—'व्याख्या बुद्धिबलापेक्षा' इति।

अधुना प्रकृतमनुसरामि। व्यञ्जनावादिनामालंकारिकाणां मते तु ज्ञानस्य स्वप्रकाशत्वं सिद्धवत्कृत्य सिद्धान्तः प्रतिपाद्यते शब्दस्य ज्ञातस्य एव अर्थप्रतिपादकत्वात्। यद्यपि नैयायिकानामपि मते प्रत्यक्षभिन्नप्रमाणस्य ज्ञातस्यैव स्वव्यापारपाटवमंगीकृतं प्रत्यक्षस्य तु अज्ञातस्यैवार्थबोधकत्वमंगीकृतं तथापि ज्ञानस्य स्वप्रकाशत्वं स्वप्नेऽपि नाभ्युपगम्यते। अयञ्च भेद आलंकारिकाणां नैयायिकादिसमयाद् दुरपह्नवः। ज्ञानस्य स्वप्रकाशत्वे युक्तिदार्ढ्यं समस्ति। अस्माभिस्तु अप्रस्तुतार्थविमर्शनेन प्रस्तुतार्थप्रतिपत्तिविच्छेदभिया न तत्र प्रयत्न आस्थीयते। केवलम् एतदेव सूचयामः—ज्ञानस्य विषयस्य च युगपत्प्रकाशस्वीकारे—

सहोपलम्भनियमादभेदो नीलतद्धियोः।
भेदश्च भ्रान्तिविज्ञानैर्दृश्यतेन्दाविवाद्वये॥ (प्रमाणविनिश्चयः १) इति

धर्मकीर्तिप्रसञ्जितविज्ञानवादप्रसरः पदं लभेत इति भिया नैयायिकैरज्ञातस्यापि ज्ञानस्य ज्ञेयबोधकत्वमंगीकृतम्। मीमांसकानामपि ज्ञानस्य परोक्षत्वांगीकारे एतदेव बीजम्। परन्तु सहोपलम्भनियम उपायोपेयभावमुपजीव्य प्रवर्तते न तु तयोरभेदं प्रतिपादयति। चाक्षुषप्रत्यक्षज्ञाने आलोकस्य ज्ञानस्य नान्तरीयकत्वेऽपि न हि आलोकघटयोरभेदः केनापि अंगीकृतः। उक्तञ्च शंकराचार्येण 'सहोपलम्भनियमोऽपि प्रत्ययविषययोरुपायोपेयभावहेतुको नाभेदहेतुक इत्यभ्युपगन्तव्यम्।' (ब्रह्मसूत्रभाष्यम् २-२२८) इति। तेन हि सहोपलम्भनियमो गोमयपायसीयन्यायतुल्यतया प्रतिपादितः। गोमयं पायसं गव्यत्वादित्यनुमाने हेतुर्व्यभिचारी। एवं सहोपलम्भनियमोऽपि व्यभिचारदुष्टः। अत एव ज्ञानस्य स्वप्रकाशकत्वांगीकारेऽपि न बौद्धमतप्रवेशविभीषिका स्वस्थमतिं विभ्रमयेत्। अत एव स्याद्वादमञ्जर्यामप्युपलभ्यते—

शब्दस्य व्यञ्जकत्वमिति हि अनरालं तत्त्वम्। वाच्यत्वव्यंग्यत्वविशेषानुसन्धानन्तु लोकव्यवहारसिद्ध्यर्थं मनुजानां सहजसूक्ष्मेक्षिकानिबन्धनं चेति व्यञ्जकत्वसिद्धौ नानेन किञ्चिद् दूषणम्। यद्यपि चैतत्क्रमेण व्यञ्जकत्वेन वाचकत्वमप्यभिव्याप्तं तथापि विशिष्यवाचकत्वपरीक्षणं न परित्याज्यम्। उच्यते चानन्दवर्धनेन प्रसंगान्तरे—'न हि सामान्यमात्रलक्षणेनोपयोगिविशेषलक्षणानां प्रतिक्षेपः शक्यः कर्तुम्। एवं हि सति सत्तामात्रलक्षणे कृते सकलसद्वस्तुलक्षणानां पौनरुक्त्यप्रसंगः।' इति। (ध्वन्यालोकः ३. पृ० ४५७)

शब्दस्य वाच्यव्यञ्जकत्वे पाश्चात्यानां संवादः

एतदेव शब्दस्य वाच्यं प्रति व्यञ्जकत्वमभिप्रेत्य पाश्चात्यैः प्रतीकवादिभिः शब्दस्यार्थं प्रति साधारण्येन प्रतीकरूपत्वं स्वीक्रियते। यदेव प्रतीकं सिम्बलशब्दाभिधं तदेव व्यञ्जकमित्यग्रे दर्शयिष्यते। तथा हि प्रतीकतत्त्वं प्रतिपादयता आधुनिकदार्शनिकप्रवरेण आल्फ्रेड् नार्थ ह्वाइट्हेड्–महोदयेनोच्यते—

(१) 'केचन गभीरतररूपाः प्रतीकव्यवहारा भवन्ति। ते **च कृत्रिमरूपाः**[1] **सन्तोपि** अपरिहार्यरूपाः। लिखितरूपः कथितरूपो वा शब्दः तथाविधः प्रतीकव्यवहारविशेष एव। यस्तु ध्वनिरूपः शब्दः, पत्रे लिखित आकृतिविशेषरूपो वा शब्दः, स तु उदासीनः। (तेन यदाक्षिप्यते तदेव सजीवं व्यवहारयोग्यञ्च। मानो स तु शब्दः प्रतीकरूपः। श्रोतुर्मनसि अनेनानीय) भावविशेषः, आकृतिविशेषः, अनुभूतिविशेष एव वा अस्यार्थः।'[2] अत्र च

'ज्ञानं हि स्वपरसंवेदनम्। तदेवमनयोर्युगपद्ग्रहणात् सहोपलम्भनियमोऽस्ति अभेदश्च नास्ति।' (पृ० ११३) इत्यलं प्रस्तुतार्थप्रतिपत्तिविच्छेदापत्तेर्बहुपल्लवितेन।

१. वस्तुतस्तु यस्य व्यञ्जकस्य व्यवहारेण रसभावादेरनुभूतिरुपजनयितुं शक्यते तदेव व्यञ्जकं प्रतीकमिति (आङ्गलभाषायां सिम्बल् इति) वक्तुं युज्यते। अत एवात्र वाच्यार्थमात्रं प्रति वाचकशब्दस्याभिव्यञ्जकत्वे सत्त्वेऽपि तस्य कृत्रिमरूपमेव प्रतीकत्वं स्वीकृतमस्ति।

२. "There are deeper types of symbolism, in a sense artificial, and yet such that we could not get on without them. Language, written or spoken, is such a symbolism, The mere sound of a word, or its shape on paper, is indifferent. The word is a symbol, and its meaning constituted by the ideas, images, and emotions, which it raises in the mind of the hearer." **(Symbolism, Its Meaning and Effect, p, 2).**

ह्वाइटहेड्महोदयेन वाच्यव्यंग्यरूपाः अर्थाः साधारण्येन शब्दरूपप्रतीकलभ्या इत्युच्यन्ते ।

(२) 'शब्दविशेषः प्रतीकरूपः । किन्तु शब्दः लिखितोऽपि भवति कथितोऽपि भवति । कदाचिल्लिखितः शब्दः तस्यैव कथितं रूपमभिव्यनक्ति । ध्वनिरूपश्चाभिव्यज्यमानः स कथितशब्दस्तस्यार्थमभिव्यनक्ति ।'[1] अस्मादपि वचनाद् वाचकोऽपि शब्दस्तदविशेषेण व्यञ्जकश्च शब्दः प्रतीकरूपावेवेति लभ्यते । यस्तु प्रतीकः स नियमेनैव व्यञ्जक इत्यपि लभ्यते ।

डि मिनिङ् अव् मिनिङ्—ग्रन्थे वाच्यार्थं प्रति शब्दः प्रतीकभूत इत्युच्यते । प्रतीकभूतत्वादेव वाच्यं प्रति शब्दो व्यञ्जक इत्यवसेयम् । वाक्यञ्च वक्तुरभिप्रायबोधने प्रतीकमित्यपि तत्रैव प्रतिपादितम् । तथा हि—

शब्दो हि यदभिधीयते तद्विषयकं सूच्चारितध्वनिरूपं प्रतीकम् ।

वाक्यं हि श्रोतारं प्रति वक्तुर्हृद्गतमभिप्रायं प्रत्याययत् सूच्चारितध्वनिरूपं प्रतीकं भवतीति[2] तद्ग्रन्थकृतोः राद्धान्तः । तदेतत् सर्वमपि आनन्दवर्धनस्याप्यभिमतमित्यवदातम् ।

शब्दस्य सर्वसाधारण्येनार्थं प्रति प्रतीकभूतत्वं वासुदेवशरणाग्रवालमहोदयेनाप्याकलितम् । यदुक्तम्—'अनन्तानामर्थानामात्मसात्करणार्थं वाण्येव केवलं साधनम् । यद्यप्यस्य साधनस्यापि कियतीचन सीमा वर्तते । यतो ह्यमूर्तस्य अर्थस्य मूर्तेन (परिच्छिन्नेन) शब्देन सामग्र्येण आत्मसात्करणमसम्भवमस्ति । अत एवान्ततो गत्वा प्रत्येकशब्दः स्वीयमर्थं प्रति प्रतीकरूपेणैवावशिष्यते ।' इति ।[3]

---

1. "A word is a symbol, but a word can be either written or spoken. Now on occasions a written word may suggest the corresponding spoken word, and that sound may suggest a meaning." (**Ibid**, pp. 10-11).
2. "A word is an articulate sound symbol in its aspect of denoting something which is spoken about.

   A sentence is an articulate sound symbol in its aspect of embodying some volitional attitude of the speaker to the listener." (Ogden and Richards, **The Meaning of Meaning**, p. 230)

३. 'अनन्त अर्थ को आत्मसात् करने के लिए वाणी ही एकमात्र साधन है, यद्यपि इस साधन की भी सीमाएँ हैं । क्योंकि अमूर्त अर्थ को मूर्त शब्दों द्वारा समग्र रूप में पकड़ पाना असम्भव ही है, अत एव अन्ततोगत्वा प्रत्येक शब्द अपने अर्थ का प्रतीक मात्र ही बन कर रह जाता है ।' (वासुदेवशरण अग्रवाल,

एवमेव सति सम्भवे लौकिकवाक्येषु मिथ्यार्थत्वानुरोधेन तथा वक्तुरभिप्रायबोधकत्वानुरोधेन मीमांसकैरपि व्यञ्जनास्वीकारः समर्थनीय इत्युक्त्वा व्यञ्जनास्वीकारविषये वैयाकरणैः सह विरोध एव न शंकनीय इत्यभिधत्त आनन्दवर्धनः। तत्र सर्वथा वैयाकरणमतमाश्रित्यैव ध्वनिव्यवहारः प्रवर्तत इति तदेव हेतुः। तथा चोच्यते—'परिनिश्चितनिरपभ्रंशशब्दब्रह्मणां विपश्चितां मतमाश्रित्यैव प्रवृत्तोऽयं ध्वनिव्यवहार इति तैः सह किं विरोधाविरोधौ चिन्त्येते।' इति (ध्व० ३. पृ. ४४३-४४४)। तस्मादधुना वैयाकरणैर्व्यञ्जना कथं कुत्र स्वीक्रियते कथञ्च ध्वनिवादस्य वैयाकरणमतसापेक्षत्वं वैयाकरणनये वा व्यञ्जनायाः किं स्वरूपं इत्येतत् सर्वं प्रसंगतो विचार्यते।

व्याकरणशास्त्रे व्यञ्जनाप्रपञ्चः

यस्मिन् काव्ये वस्तुमात्रालंकाररसादिरूपेषु त्रिरूपेषु अन्यतमोऽर्थः प्राधान्येनाभिव्यज्यते स ध्वनिरित्युच्यते। तथा चोक्तम्—

यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।
व्यंक्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः॥
(ध्व० १–१३) इति।

अस्या कारिकायाः 'सूरिभिः कथित' इत्यंशस्य वृत्तौ आनन्दवर्धनेनोच्यते—

'सूरिभिः कथित' इति विद्वदुपज्ञेयमुक्तिः,[1] न तु यथाकथञ्चित् प्रवृत्तेति प्रतिपाद्यते। प्रथमे हि विद्वांसो वैयाकरणाः, व्याकरणमूलत्वात् सर्वविद्यानाम्। ते च श्रूयमाणेषु वर्णेषु ध्वनिरिति व्यवहरन्ति। तथैवान्यैस्तन्मतानुसारिभिः सुरिभिः काव्यतत्त्वार्थदर्शिभिर्वाच्यवाचकसम्मिश्रः शब्दात्मा काव्यमिति व्यपदेश्यो व्यञ्जकत्वसाम्याद् ध्वनिरित्युक्तः।' (ध्व० १. पृ० १३२-१३५)। अयमाशयः—(१) काव्यविशेषे ध्वनिव्यवहारोऽस्माभिः क्रियते। तादृशो व्यवहारः विद्वद्भिरेव प्रारब्ध इति शिष्टसमयानुगृहीतोऽ-

---

K. P. Bhatnagar Commemoration Volume, Kanpur, 1961, p. 332)

१. ध्वनेर्विद्वदुपज्ञत्वं श्रूयमाणवर्णेषु व्यञ्जकत्वस्वीकारात्। पुराकालादेव व्यञ्जकत्वं विशेषतोऽक्षरेषु अर्थाद् वर्णेष्वेव प्रसिद्धमासीदिति कालीदासीयपद्येपि स्पष्टम्। यथा—

अथाधिकस्निग्धविलोचनेन, मुखेन सीता शरपाण्डुरेण।
आनन्दयित्री परिणेतुरासीत्, अनक्षरव्यञ्जितदौर्हृदेन (रघुवंशम् १४-२६) इति।

यमस्माकं व्यवहारः। ते च ध्वनिपदप्रयोक्तारो विद्वांसो वैयाकरणा एव। त एव विद्वत्स्वपि सर्वाग्रगण्याः। (२) वैयाकरणाः श्रूयमाणवर्णेषु ध्वनिपदं प्रयुञ्जते। श्रूयमाणवर्णाः नादपदवाच्या ध्वनिपदेन व्यवहृताः स्फोटमभिव्यञ्जन्ति। अयमेव स्फोटो नित्यः शब्दब्रह्मरूपः। स स्फोट एव स्वरूपतः अर्थवान्। स्फोटो यथा शब्दरूपः तथैवार्थरूपोप्ययम्। स्फोट एव शब्दार्थयोरोतप्रोतभावेनावस्थानम्। (३) काव्यतत्त्वार्थदर्शिभिः वैयाकरणमतानुसरणक्रमेण व्यंग्यार्थप्रधानः काव्यविशेषोऽपि ध्वनिरित्युक्तः। सूरिभिः काव्यविशेष एव ध्वनिरिति विस्पष्टं नोक्तम्। अन्यदेव श्रूयमाणशब्दरूपं वस्तु ध्वनिरिति व्यपदिष्टम्। काव्यतत्त्वार्थदर्शिभिरालङ्कारिकैस्तु सादृश्यविशेषानुरोधेन काव्यविशेषे ध्वनिव्यपदेशः कृतः। सादृश्यन्तु प्रायेण प्रधानतरेणैव वस्तुना भवति। तस्मात् प्रधानतमविद्वद्भिर्वैयाकरणैः यो व्यवहारः कृतस्तेनैव सादृश्यमनुसृतम्। (४) श्रूयमाणवर्णेन काव्यविशेषस्य सादृश्यं व्यञ्जकत्वमूलकम्। अत एवोच्यते व्यञ्जकत्वसाम्यादिति। श्रूयमाणवर्णः स्फोटमभिव्यनक्ति। काव्यञ्च वस्तुमात्रमलङ्कारः रसादिश्चेति त्रिरूपेषु व्यंग्यार्थेषु अन्यतममभिव्यनक्ति। किमेतदभिव्यञ्जकं काव्यमिति चेद् वाच्यवाचकरूपौ शब्दार्थौ काव्यम्। उच्यते चानन्दवर्धनेन 'सहृदयहृदयाह्लादिशब्दार्थमयत्वमेव काव्यलक्षणम्' इति। (ध्व० ३)। (५) वस्तुतः न केवलं व्यञ्जकत्वमेव सादृश्यबीजमपि तु शब्दात्मत्वमपि इत्यस्माकं प्रतिभाति। काव्यव्यपदेश्यो ध्वनिः शब्दात्मा, शब्दसंघातरूपः। उच्यते चानन्दवर्धनेन पूर्वपक्षीयवचनव्याजेन—'काव्यविशेषो हि विशिष्टार्थप्रतिपत्तिहेतुः शब्दसन्दर्भविशेषः' इति। (ध्व० ३. पृ० ३००)।[1] श्रूयमाणवर्णोऽपि शब्द इत्युच्यते तस्य ध्वनिपदव्यपदेश्यत्वात्, ध्वनिपदस्यापि शब्दपर्यायत्वात्। यदाह **महाभाष्यकारः**—

'अथवा प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते। तद्यथा—शब्दं कुरु, मा शब्दं कार्षीः, शब्दकार्य्ययं माणवकः इति ध्वनिं कुर्वन्नेवमुच्यते। तस्माद् ध्वनिः शब्दः।' इति (**महाभाष्यम्**, पस्पशा. पृ. ४)। (६) व्यञ्जकस्य काव्यस्य वाच्यवाचकसंमिश्रत्वं निर्विवादम्। एतदेव मनसि निधाय मम्मटविश्वनाथादिभिः शब्दस्य व्यञ्जकत्वे अर्थस्य सहकारित्वमर्थस्य च व्यञ्जकत्वे शब्दस्य सहकारित्वमित्युक्तम्। यदुक्तम्—

शब्दबोध्यो व्यनक्त्यर्थः शब्दोप्यर्थान्तराश्रयः।
एकस्य व्यञ्जकत्वे तदन्यस्य सहकारिता॥
इति (साहित्यदर्पणम् २)।

---

१. पूर्वपक्षवचनत्वेपि एतदभ्युपगम्यैव ध्वनेः पदप्रकाशत्वं प्रसाध्यत आनन्दवर्धनेन।

तस्मात् काव्यव्यपदेश्यो ध्वनिः वाच्यवाचकसम्मिश्र इत्युक्तः। वाच्यवाचकसम्मिश्रत्वं श्रूयमाणवर्णे नास्ति। स्फोटस्यैव सार्थकत्वस्वीकारात्। तस्माद् वाच्यवाचकसम्मिश्रत्वे सत्यपि शब्दात्मकोऽयं काव्यव्यपदेश्यो ध्वनिः शब्दात्मकेन श्रूयमाणवर्णेन सादृश्यमश्नुत इति मतं द्रढयितुमुक्तं-वाच्यवाचकसम्मिश्रः सन् अपि शब्दात्मा इति भाव इति।

स्फोटस्वरूपविमर्शः

श्रूयमाणवर्णाः स्फोटाभिव्यञ्जका इत्युक्तम्। तत्रायं प्रश्नः समुदेति—ननु कीदृशोऽयं स्फोटपदार्थ इति। उच्यते-घट इति श्रूयमाणः शब्दः। तस्मिन् श्रूयमाणे घटपदे घ-अ-ट-अ इत्येते वर्णाः क्रमभावेन श्रूयमाणाः क्रमभावेन विलीयमानाश्च क्षणिका[1] भवन्ति। एवञ्च घ-वर्ण-श्रवण काले तदुत्तरभाविनोऽन्ये वर्णा न भवन्ति। अन्तिमस्य अ-कारस्योच्चारणकाले च तत्पूर्वभाविनोऽन्ये घ-कारादयो न वर्तन्ते। कथं तर्हि घ-अ-ट-अ वर्णाः समेत्य एकं घटशब्दं कुर्युः, अर्थं वा प्रतिपादयेयुः इति। अस्यां शंकायां वैयाकरणा एवं समादधते। घ-अ-ट-अ इत्येवंरूपैः श्रूयमाणवर्णैः स्वयमर्थो न प्रत्याय्यते। तैस्तु क्रमशः श्रूयमाणैः स्फोटाख्यो नित्यः अखण्डः आन्तरः शब्दः अभिव्यज्यते। स एव स्फोटः वस्तुतोऽर्थवान्। नित्यः अखण्डः स्फोटः सर्वगतः सन् वक्तुर्हृदये यथा वर्तते तथैव श्रोतुरपि। एवंक्रमेण वक्तुर्हृदये वर्तमानोऽयं स्फोटः कदाचित् श्रूयमाणवर्णैर्बहिः प्रकाश्यते। त एव श्रूयमाणवर्णाः श्रोत्रा श्रुताः श्रोतृहृद्गतं स्फोटमभिव्यञ्जन्ति इति तत्त्वम्। तदेवोच्यते—

> द्वावुपादानशब्देषु शब्दौ शब्दविदो विदुः।
> एको निमित्तं शब्दानामपरोऽर्थे प्रयुज्यते॥
>
> (वाक्यपदीयम् १-४४) इति।

अस्यायमाशयः—अत्र द्वौ शब्दौ परामृश्येते, एकः स्फोटरूपः, अपरः श्रूयमाणरूपः। श्रूयमाणरूप एव वैखरीरूप इत्युच्यते। तत्रैकोऽन्यतरस्य निमित्तम्। तद् यथा श्रूयमाणशब्दानां न वाचकत्वं किन्तु तदभिव्यंग्यस्फोटस्यैवेति स्फोटव्यञ्जकत्वादेव अर्थविवक्षया प्रयोक्ता शब्दान् वैखरीरूपान् प्रयुंक्ते इति स्फोटः एषां शब्दानां निमित्तमध्ययनेन वसतीत्यादौ फलस्यापि हेतुत्वदर्शनात्। अथ वा एकः स्फोटरूपः (यत्र निलीय स्थिताः

---

१. कालस्त्वेकोप्युपाधिभेदात् क्षणादिव्यवहारविषयः। उपाधिस्तु स्वजन्यविभागप्रागभावावच्छिन्नं कर्म, पूर्वसंयोगावच्छिन्नविभागो वा पूर्वसंयोगनाशावच्छिन्नोत्तरसंयोगप्रागभावो वा उत्तरसंयोगावच्छिन्नं कर्म वा।'

(सिद्धान्तमुक्तावली. पृ० १९२-१९३

येनानुगृहीताः श्रूयमाणाः शब्दा अर्थं प्रतिपद्यन्ते सः) शब्दानां वैखरीरूपाणां निमित्तम्। अपरः स्थानवाय्वभिघातरूपात् करणव्यापारात् श्रोत्रानुपाती वैखरीरूपः अर्थे प्रयुज्यते अर्थबोधेच्छया स्फोटप्रकाशनाय उच्चार्यते। यद्वा एकः करणव्यापारादुपजातक्रमः वैखरीरूपः श्रोतृबुद्धिस्थस्य अक्रमस्य प्रत्यायकस्य निमित्तम्, तदुपायत्वात् तस्य अपरः श्रोतृबुद्धिस्थः अक्रमः स्फोटः अर्थे अर्थबोधाय प्रयुज्यते उपस्थाप्यते तत्रैव प्रत्याय्यप्रत्यायकशक्तेरवस्थानादित्यर्थः।

अत्र श्रूयमाणवर्णस्य वैखरीवाग्रूपता परामृष्टा। वैखरी नाम वाचः अवस्थाविशेषः प्रकारविशेषो वा। तत्र परा पश्यन्ती मध्यमा वैखरी चेति वाचः रूपचतुष्टयं भवतीति केचित्। भर्तृहरिमते तु त्रिरूपा एव वाक् पराया अग्रहणादित्येके। तत्र प्रमाणत्वेनोपस्थापिता कारिका यथा—

वैखर्या मध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम्।
अनेकतीर्थभेदायास्त्रय्या वाचः परं पदम्॥

(**वा० प०** १-१४३) इति।

नागोजीभट्टास्तु सिद्धान्तशैवानां मतं, 'परा वाङ्मूलचक्रस्था पश्यन्ती नाभिसंस्थिता। हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा॥' इति तन्त्रशास्त्रं चाश्रित्य मूलाधारस्थपवनसंस्कारीभूता मूलाधारस्था शब्दब्रह्मरूपा स्पन्दशून्या विन्दुरूपिणी परा वागुच्यते, नाभिपर्यन्तमागच्छता तेन वायुनाऽभिव्यक्ता मनोगोचरीभूता पश्यन्ती वागुच्यते, ततो हृदयपर्यन्तमागच्छता तेन वायुनाऽभिव्यक्ता तत्तदर्थवाचकशब्दस्फोटरूपा श्रोत्रग्रहणायोग्यत्वेन सूक्ष्मा जपादौ बुद्धिनिर्ग्राह्या मध्यमा वागुच्यते, तत् आस्यपर्यन्तमागच्छता तेन वायुनोर्ध्वमाक्रामता च मूर्धानमाहत्य परावृत्य च तत्तत्स्थानेष्वभिव्यक्ता परश्रोत्रेणापि ग्रहणयोग्या वैखरी वागुच्यते इतिवाचश्चतुर्विधत्वमाहुः।[1]

वाक्यपदीयस्य 'वैखर्या मध्यमायाश्चे'ति कारिकाया **वृत्तौ**[2] अप्युच्यते—'सैषा त्रयी वाक् चैतन्यग्रन्थिविवर्तवद् अनाख्येयपरिमाणा तुरीयेण मनुष्येषु प्रत्यवभासते।' इति। वृत्तेरांगलानुवादकर्तुः आयारमहोदयस्य मते वाचः चतुर्थांऽश एव मनुष्याणां व्यवहारयोग्यः इत्येव वृत्तिग्रन्थस्य आशयः।

---

१. परमलघुमञ्जूषा. पृ. २६–२७

२. या वृत्तिः K. A. Subramaniya Iyer महोदयस्य मते भर्तृहरिणा विरचिता, Dr M. Biardeau महोदयाया मते तु भर्तृहरिभिन्नेन वृषभदेवेन विरचिता। (K. A. Subramaniya Iyer, **Vākyapadīya of Bhartṛhari**, Deccan Collage, Poona, Introduction, pp. XXXII–XXXVII.)

अत्रापि वृत्तौ 'तुरीयेण' इत्यनेन वाचः वैखरी नाम चतुर्थः प्रकारः न विवक्षितः किन्तु पश्यन्ती-मध्यमा-वैखरी-रूपाणां भेदानाम् एकैकस्य चतुर्भाग इत्येव विवक्षितम् । एतद्वृत्तिग्रन्थस्याव्यवहितपूर्वभावितया पश्यन्ती-मध्यमा-वैखरी-रूपाणां परामृष्टत्वात् तुरीयेणेति पदेन यदि वाचः चतुर्थप्रकारस्य परामर्शः स्यात् तर्हि पराया एव । सा तु मनुष्येषु न प्रत्यवभासते । तस्मात् पश्यन्ती-मध्यमा-वैखरीरूपासु अवस्थासु न समग्रापि वाङ् मनुष्ये प्रत्यवभासते किन्तु वाचः एकचतुर्थांश एव । डा० एम० वीयार्ड महोदयाया मते अत्रैव भर्तृहरिभिन्नः वृत्तिकारः अधस्तात् वाचः पश्यन्त्यादिव्यतिरिक्तं चतुर्थं प्रकारं परवर्तिसम्प्रदायप्रभावान्विततया प्रवर्तयितुं समीहते । एतदेव च कारिकाकारवृत्तिकारमतयोर्विशेषे प्रमाणान्तरम् ।[1] महोदयाया सिद्धान्ते याथातथ्यमस्तु वा मा भूत् भर्तृहरिमते त्रिरूपा एव वाग् इति तस्या अपि सम्मतम् ।

परन्त्वेवं क्रमेण वैयाकरणमार्गे परायाः नामापि न श्रूयत इति तु न । एवञ्च **वाक्यपदीयस्य** ब्रह्मकाण्डस्य द्वाविंशकारिकाया **हरिवृषभवृत्तेः** टीकायां **पद्धतौ** पश्यन्तीव्यतिरिक्तां काञ्चन परां प्रकृतिं परिचिनोति ।[2] तन्मते वृत्त्योक्ता प्रतिभा एव पश्यन्ती वाक् । पश्यन्त्येव सर्वविकाराणां प्रकृतिः । तामतीत्य वर्तमाना परा प्रकृतिः यस्यां परिचितायां भेदबुद्धिः साकल्येन दूरीभवति । तदेवं पराया अवश्यस्वीकार्यत्वे पश्यन्त्या एव रूपविशेषः परा इति समादधत आधुनिकाः । परापश्यन्त्योरभेदे स्वीकृत एव मध्यमायाः मध्यमेति व्यपदेशः संगच्छते इत्यपि युक्त्यन्तरम् ।

किञ्च **शारदातिलकादिषु**[3] तन्त्रग्रन्थेषु शब्दब्रह्म (कुण्डलिनी)-शक्ति-

---

1, "this is an attempt on the part of the **Vṛtti**, under the influence of a later tradition, to introduce a fourth stage of Vāk from below. This is another discripancy in doctrine between the Kārikā and the Vṛtti. (**Ibid,** Introduction, p. XXXIII.)

2. One thing to be noted is that Bhartṛhari, in the Vṛtti, speaks about going from *Pratibhā* which is understood by **Vr.** as *Paśyānti*, to *Parā Prakṛti*. In other words, there is a stage beyond *Paśyanti* called *Parā Prakṛti*. *Paśyanti* itself is called *sarvavikārāṇāṃ Prakṛtiḥ*. Thus *Paśyantī* is *Prakṛti* and after that comes *Parā Prakṛtih* (K. A. Subramaniya Iyer, *Vākyapadīya of Bhartṛhari*, p. 22)

3. **शारदातिलकम्**. १।१४, १०८, १०९ इत्येवमादिषु ।

ध्वनि-नाद-निरोधिका-अर्धेन्दु-बिन्द्वादिक्रमेण पराव्यतिरिक्ता अनेकेऽपि सूक्ष्म-सूक्ष्मतरा भेदाः स्वीकृताः, परन्तु एतत् सर्वमपि व्यञ्जनाप्रपञ्चसमीक्षायां नातीवप्रयोजनवदित्यत्रैव विरम्यते।

अत्रायं प्रश्नः समुदेति। ननु श्रूयमाणवर्णाः स्फोटाभिव्यञ्जका इत्युच्यन्ते। वाचः पश्यन्त्यादिप्रकारेषु केन कीदृशः सम्बन्धः स्फोटस्य इति। स चायं सम्बन्धो **वाक्यपदीये** ब्रह्मकाण्डे विस्पष्टं नोपलभ्यते। श्रूयमाण-वर्णैर्नादपदवाच्यैः स्फोटोऽभिव्यज्यत इति तु स्पष्टं यथा—

ग्रहणग्राह्ययोः सिद्धा नियता योग्यता यथा।
व्यंग्यव्यञ्जकभावेन तथैव स्फोटनादयोः॥ (**वा० प० १–९७**) इति।

श्रूयमाणवर्णा एव वैखरी इत्युच्यन्त इति पूर्वमेव प्रतिपादितम्। तत्र स्फोटवैखर्योः कार्यकारणभावमुपपादयन्नाह—

अरणिस्थं यथा ज्योतिः प्रकाशान्तरकारणम्।
तद्वच्छब्दोऽपि बुद्धिस्थः श्रुतीनां कारणं पृथक्॥ (**वा० प० १–४६**) इति।

अस्यायमाशयः। अरणिस्थः वह्निः विवर्तकाले यथा प्रकाशमानस्य वह्नेः कारणं भवति स च प्रकाश्यमानः वह्निः पुनरन्येषां प्रकाशकः तथैव बुद्धिस्थः अर्थाद् बुद्धिरन्तःकरणं तत्र शब्दान्तरबीजरूपेणावस्थितः अन्तःकरणावच्छिन्न-हृदयाकाशदेशस्थ इत्यर्थः। हृदयदेशे बुद्धिविषयीकृतः अविवृतः अक्रमः स्फोटाख्यः शब्दः वक्तृप्रयत्नाभिव्यंग्यः सन् पृथक् भिन्नानां श्रुतीनां भिन्न-भिन्नघटपटादिशब्दानां कारणं भवति। स चायं शब्दः परेण श्रुतः तद्बुद्धिस्थं स्फोटमभिव्यनक्ति। ततश्चार्थबोधः।

अत्र पुनर्नागोजीभट्टवचनमनुसन्धीयते। तेन चोक्तम्—

(१) परा वाङ् नाभिदेशेऽभिव्यक्ता पश्यन्तीत्युच्यते। सा एव पश्यन्ती हृदयदेशेऽभिव्यक्ता 'तत्तदर्थवाचकस्फोटरूपा श्रोत्रग्रहणायोग्यत्वेन सूक्ष्मा जपादौ बुद्धिनिर्ग्राह्या मध्यमा वागुच्यते।' इति (**प० ल० म०** पृ. २६)

(२) 'तत्र मध्यमाया यो नादांशस्तस्यैव स्फोटात्मनो वाचकत्वेनाक्षतिः।' (**लघुमञ्जूषा.** पृ. १८०) इत्यनेन मध्यमा नाद एव स्फोट इत्युक्तम्।

(३) '× × × तत्र मध्यमानादोऽर्थवाचकस्फोटात्मकशब्दव्यञ्जकः। × × × मध्यमानादश्च सूक्ष्मतरः कर्णपिधाने जपादौ च सूक्ष्मतरवायुव्यंग्यः शब्दः स्फोटात्मको ब्रह्मरूपो नित्यश्च।' (**प० ल० म०** पृ. २७)

एषु आद्ययोर्मध्यमा वागेव स्फोटः। अन्तिमे च मध्यमानादः स्फोट-व्यञ्जक इति महान् विरोधः। न चाद्ये शुद्धा वागेव स्फोटः, अन्तिमे च मध्यमाया नादांशः स्फोटाभिव्यञ्जकः शुद्धा मध्यमा वाक् तु स्फोटरूपा एव

इत्यभिप्रेतमिति वाच्यम्। द्वितीये मध्यमाया नादांशस्यैव स्फोटात्मकत्व-कथनात्। सति चास्मिन् विरोधे अस्माभिरेवं समाधीयते—

नित्यः सर्वगतः शब्दब्रह्मरूपः स्फोटः। स तु यथा नाभिदेशे, यथा च हृदयाकाशे वर्तते तथैव कण्ठताल्वादिष्वपि। किन्तु कण्ठताल्वाद्यभिघात-जनितः शब्दः अनित्य इति हेतोर्न तस्य स्फोटरूपता। यावद् वैखरीरूपतां न लभत इयं वाक् तावत् तस्या अखण्डत्वं नित्यत्वञ्चेति हेतोर्हृदयाकाशमभि-व्याप्य वर्तमाना मध्यमा वागेव स्फोटरूपा। नित्यस्यैव शब्दब्रह्मणो रूप-विशेषतया पश्यन्त्यपि स्फोटादभिन्ना। किन्तु परापश्यन्तीभ्यां नास्माकं व्यवहारसिद्धिः। वाग्ब्रह्मयोगिनां समाधौ निर्विकल्पकसविकल्पकज्ञान-विषयतया[1] लौकिकवाग्व्यवहारदशायां परापश्यन्त्योर्भानं न भवति। किन्तु मध्यमायाः भानं विना लौकिकवाग्व्यवहार एव न सम्भवति। घट इति पदं प्रयोक्तुमभिलषन् वक्ता प्रथमतः बुद्धावेव घटपदमनुभवति। एतच्च घट-पदस्यान्तरं भानं मध्यमाया नादांशस्य भानमिति वक्तुं शक्यते। वस्तुतस्तस्य अखण्डस्य स्फोटरूपस्य शब्दस्य घटपटादिरूपेण खण्डश उपलब्धिरौपाधिकी एव। मध्यमाया नादांशे अयमौपाधिको भेद उपलभ्यते। तस्माच्च हृदया-काशे घट इति औपाधिकः शब्दोऽनुभूयते प्रयोक्ता शब्दोच्चारणात् प्राक्, श्रोत्रा च शब्दश्रवणोत्तरमिति स्थितिः। परन्तु अयमौपाधिक आन्तरः घट-शब्दः अखण्डस्यैव नित्यस्य स्फोटस्यौपाधिकोंशविशेषः। यथा चाखण्डस्यापि खण्डश औपाधिकोपलब्धिः स्यादित्यग्रे (८५ पृष्ठे) दर्शयिष्यते। औपाधिक-खण्डोपलब्धेरखण्डस्य स्फोटस्यैवोपलब्धिर्जायत इत्युच्यताम्। अथवा खण्डश उपलभ्यमानः मध्यमानाद एव खण्डरहितं नित्यं स्फोटमभिव्यनक्ति इत्युच्य-ताम्। यथा तथा वा भवतु, श्रूयमाणवर्णैरुपलभ्यमानस्तु घटशब्दः वस्तुत एव मूर्तः।[2] तेनाभिव्यज्यमानस्तु आन्तरो घटशब्दो मध्यमानादरूपः अनु-रणनप्रख्यः। परन्तु मध्यमादशायामेव नित्यः परममहत्परिमाणवान् स्फोट उपलभ्यते। उपलब्धिस्तु पुनरपरेणाभिव्यञ्जनेन।[3] किन्तु सेयमभिव्यक्तिर-तीव सूक्ष्मरूपा। असंलक्ष्यक्रमतया व्यज्यमानश्च स्फोटो मध्यमानादेन ओत-

---

१. यदाह परमलघुमञ्जूषायां नागोजीभट्टः—'एतद् द्वयं (अर्थात् परा च पश्यन्ती च) वाग्ब्रह्मयोगिनां समाधौ निर्विकल्पकसविकल्पकज्ञानविषय इत्युच्यते।' इति (पृ. २६)।

२. मूर्तत्वं नाम अपकृष्टपरिमाणवत्त्वं परममहत्परिमाणभिन्नपरिमाणवत्त्वं वा।

३. यदुक्तम् 'मध्यमानादस्स्फोटं व्यञ्जयतीति शीघ्रमेव ततोऽर्थबोधः' इति (परम लघुमञ्जूषा. पृ. ३२)

प्रोतभावेन तथा सम्बद्धः यथा मध्यमा एव स्फोटरूपा इति वक्तुं युज्यते तादृशो व्यवहारोऽपि प्रवर्तते च। अयञ्च स्फोटो मध्यमादिभ्यः वाचः प्रकारेभ्यः अविलक्षणः प्रथमं श्रूयमाणवर्णैरभिव्यज्यते। तदनन्तरञ्च पश्यन्त्यादिकक्षासु क्रमात् क्रमशः सूक्ष्मसूक्ष्मतरभावेनानुरणनप्रख्येणाभिव्यज्यते। स च स्फोटो मध्यमादशायां घटपटादिक्रमेण भेदमौपाधिकं समश्नुते, किन्तु पश्यन्त्यादिस्तरेषु क्रमात् क्रमशः स औपाधिकोऽपि भेदः प्रलीयते। घण्टानिर्हादस्थानीयत्वेनायं स्फोटः सूक्ष्मसूक्ष्मतरतयाभिव्यज्यत इति हेतोः स्फोटस्य प्राथमिकाभिव्यञ्जकेषु श्रूयमाणवर्णेषु ध्वनिरिति व्यवहारः सर्वथा संगच्छते। अस्मन्मते श्रूयमाणवर्णैरभिव्यज्यते मध्यमादशायां वर्तमानः औपाधिकभेदवान् स्थूलः स्फोटः, तेन च सूक्ष्मसूक्ष्मतरत्वेन पश्यन्त्यादिस्थानीयः स्फोटोऽभिव्यज्यते। सा चाभिव्यक्तिः जपसमाधिप्रभृतिव्यापारेण यथायोगं समुन्नेया इति दिक्।

अत्र पुनरप्ययमपरः प्रश्नः। ननु अखण्डोऽयं स्फोट एकेनैव घ—वर्णेनाभिव्यक्तो भवतु, किमन्यैः वर्णैरिति। तत्रोच्यते—

यथानुवाकः श्लोको वा सोढत्वमुपगच्छति।
आवृत्त्या न तु स ग्रन्थः प्रत्यावृत्ति निरूप्यते॥
(वा० प० ८२) इति।

नादैराहितबीजायामन्त्येन ध्वनिना सह।
आवृत्तपरिपाकायां बुद्धौ शब्दोऽवधार्यते॥ (वा० प० ८४) इति च।

उभयोरयमाशयः—एकेन वर्णेन स्फोटस्य म्लिष्टप्रतीतिः स्यात्। न तु तया कार्यसिद्धिः। एवमुत्तरोत्तरवर्णेन स्पष्टस्पष्टतरत्वेनाभिव्यज्यमानस्सन् स्फोटः चरमेण वर्णेन विस्पष्टतममभिव्यक्तो व्यवहारोपयोगी भवतीति।

अधुना क्रमप्राप्ततया पुनरपीयं शंका समुदेति। ननु नित्यस्याखण्डस्य स्फोटस्य कथं घटपटादिशब्दरूपेण खण्डश उपलब्धिः स्यात्। यदि चेत् श्रूयमाणवर्णैरखण्डस्य समग्रस्यापि स्फोटस्य भानं तर्हि घटमानय इति वाक्यात् श्रोतुः कथं घटानयने प्रवृत्तिः, न तु परमहतः स्फोटस्य परब्रह्मरूपस्य बोधात् सर्वारम्भपरित्याग इति। तत्रोच्यते। घटशब्दोपलब्धये घ-अ-ट-अ इत्यादि वर्णैरखण्डस्य स्फोटस्य घटांश एवाभिव्यज्यते। तर्हि अंशवान् सखण्ड एवायं स्फोटः सावयवः कथमखण्ड इत्युच्यत इति चेदौपाधिकोऽयं घटपटादिभेदेन एकैस्यैव स्फोटस्य भेदः। यथा एकस्याखण्डस्य नित्यस्यापि कालस्य अद्य-श्व-इत्यादिक्रमेण मासवत्सरादिक्रमेण वा औपाधिको भेदः परिलक्ष्यते तथैव। स चायं क्रमरहितः स्फोट औपाधिकक्रमसहिततया भेदवान् इव जायते। यथाह भर्तृहरिः—

नादस्य क्रमजन्मत्वात् न पूर्वो नापरश्च सः।
अक्रमः क्रमरूपेण भेदवानिव जायते ॥
(**वा० प०** १-४८) इति।

ननु कथमन्यगतेन भेदेनान्यत्र भेदावसाय इति तत्रायं दृष्टान्तः **श्लोकवार्तिकतो** यथा—

मधुरं तिक्तरूपेण श्वेतं पीततया तथा।
गृह्णन्ति पित्तदोषेण विषयं भ्रान्तचेतसः ॥
तथा वेगेन धावन्तो नाव्यारूढाश्च गच्छतः।
पर्वतादीन् विजानन्ति भ्रमेण भ्रमतश्च तान्।
व्यञ्जकस्थमबुद्ध्वैवं व्यंग्ये भ्रान्तिर्भविष्यति ॥
इति (**श्लोकवार्तिकम्**. स्फोटवादः. श्लो० ४१-४४)

वाक्यपदीयेऽपि अन्यधर्मस्यान्यत्र भानं दृष्टान्तेनोपपाद्यते यथा—

प्रतिबिम्बं यथान्यत्र स्थितं तोयक्रियावशात्।
तत्प्रवृत्तिमिवान्वेति स धर्मः स्फोटनादयोः ॥
इति (**वा० प०** १-४९)।

अत्रायमाशयः—जले स्थितं चन्द्रप्रतिबिम्बं जलस्य चाञ्चल्यरूपक्रियावशात् चाञ्चल्यमन्वेति क्रियावांश्च परिलक्ष्यते। प्रतिबिम्बश्च जलमाश्रित्यैव प्रकाशते। तथैव श्रूयमाणवर्णानाश्रित्याभिव्यज्यमानः स्फोटोऽपि श्रूयमाणवर्णानां क्रमवत्त्वेन भेदवत्त्वेन च क्रमवान् भेदवान् चेति परिलक्ष्यत इत्यास्तां तावत्।

काव्यप्रकारेण ध्वनिना स्फोटतत्त्वस्य सम्बन्धः

ननु श्रूयमाणवर्णेषु स्फोटव्यञ्जकत्वमस्ति काव्येऽपि रसादिव्यञ्जकत्वमस्तीति व्यञ्जकत्वसाम्यात् काव्ये ध्वनिव्यपदेशः संगच्छते। उक्तञ्चानन्दवर्धनेन—'प्रथमे हि विद्वांसो वैयाकरणाः... ते च श्रूयमाणेषु वर्णेषु ध्वनिरिति व्यवहरन्ति। तथैवान्यैस्तन्मतानुसारिभिः सूरिभिः काव्यतत्त्वार्थदर्शिभिर्वाच्यवाचकसम्मिश्रः शब्दात्मा काव्यमिति व्यपदेश्यो व्यञ्जकत्वसाम्याद् ध्वनिरित्युक्तः।' (**ध्वन्यालोकः** १. पृ. १३२-१३५) इति। अत्र तथेति पदेन ध्वनिव्यपदेशप्रयोजकं व्यञ्जकत्वसाम्यमाक्षिप्यते। किन्तु यदि व्यञ्जकत्वसाम्यमात्रानुरोधेनैवायं ध्वनिव्यपदेशस्तर्हि कथमालंकारिकाणां वैयाकरणमतानुसारित्वम्। ननु व्यञ्जना केवलं वैयाकरणैरेव स्वीक्रियते, तस्मात्तत्सादृश्यमात्रानुधावनेनैव तन्मतानुसारित्वमिति चेत् सांख्यन्यायादिष्वपि व्यञ्जना बाहुल्येन स्वीकृता वर्तत इति छिद्यतामेषा वाचोयुक्तिः।

पुनश्च महता कण्ठेन यदुक्तं 'परिनिश्चितनिरपभ्रंशशब्दब्रह्मणां विपश्चितां मतमाश्रित्यैव प्रवृत्तोऽयं ध्वनिव्यवहार इति तैः सह किं विरोधाविरोधौ चिन्त्येते।' इति (**ध्वन्यालोकः** ३. पृ. ४४३-४४४) तत्रापि च मताश्रयणस्य विस्पष्टमुक्तत्वात् सादृश्यमात्रावगाहनचर्चा कथं संगच्छते। एवन्तर्हि ध्वनितत्त्वं वैयाकरणानां स्फोटतत्त्वं साकल्येनैवानुसरति, न तु तेन केवलं सादृश्यमात्रमेव समश्नुत इत्यस्माकं राद्धान्तः। स चास्माभिरत्र सुधीजनविभावनार्थमेवमुपस्थाप्यते—

अस्मन्मते आनन्दवर्धनोक्तं व्यञ्जकत्वसाम्यं न केवलं व्यञ्जनाव्यापारसमन्वितत्वमेव क्रोडीकरोति अपि तु व्यंग्यविषयगतमपि साम्यमभिव्याप्नोति। तथा वस्तुमात्रालंकाररसादिरूपस्त्रिविधः व्यंग्यार्थः काव्याद् व्यञ्जनाव्यापारेण लभ्यः। तेषु त्रिरूपेषु व्यंग्यार्थेषु रसादिरेव सर्वप्रधानः। रसादिषु च रसः। रसादिरपि प्रायशः रस्यते इति व्युत्पत्त्या रसपदेनाभिधीयते। एवं वस्तुमात्रादिरूपाणां व्यंग्यार्थानामाद्यौ वस्तुमात्रन्तथालंकारोऽभिधाव्यापारेणाप्यन्यथा लब्धुं शक्येते। रसस्तु व्यञ्जनाव्यापारमात्रगोचरः। व्यञ्जनाव्यापारस्तु रसरूपार्थलाभार्थमवश्यमभ्युपगन्तव्यः। एवं रसाथमभ्युपगते व्यञ्जनाव्यापारे वस्तुमात्रालंकाररूपव्यंग्यार्थद्योतनार्थमपि तस्याः प्रसक्तिः स्वीकार्या। तदेवं व्यंग्यार्थप्रकारेषु रसस्यैव सर्वप्राधान्यं सूचयन्नाह रुय्यकः—

'इह शब्दस्याभिधालक्षणाभेदेन द्विविधो व्यापारश्चिरन्तनैरभ्युपगतः न च तृतीयकक्षानिक्षिप्तेऽर्थे प्रगल्भते इति तत्र व्यापारान्तरमभ्युपगतम्। रसादौ च तत्तुल्यकक्षे व्यञ्जनमुपपादितमितीहापि तदेव समाश्रयितुं युक्तम्' इति। (**व्यक्तिविवेकविमर्शः** १) किञ्च प्रतीयमानार्थभेदेषु रसस्य सर्वप्राधान्यं सूचयन्नाह आनन्दवर्धनोऽपि—

काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा।
क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः॥ इति। (**ध्वन्यालोकः**१।५)।

तद्वृत्तावप्युच्यते—'प्रतीयमानस्य चान्यभेददर्शनेऽपि रसभावमुखेनैवोपलक्षणं प्राधान्यात्' इति। (**ध्व०** १. पृ. ८९-९०)। अभिनवगुप्तेन तु विपष्टतरमेव रसस्य सर्वप्राधान्यमुपपादितं यथा—

"तेन रस एव वस्तुत आत्मा, वस्त्वलंकारध्वनी तु सर्वथा रसं प्रति पर्यवस्येते इति वाच्यादुत्कृष्टौ तावित्यभिप्रायेण 'ध्वनिः काव्यस्यात्मेति' सामान्येनोक्तम्।" इति (**लोचनम्**. १ पृ. ८५) तदेवं रसतत्त्वमेव ध्वनितत्त्वस्य बीजं मूलमुपजीव्यञ्च इत्येतदपि सूचयन्नाह आनन्दवर्धनः—

".....रसादिरूपव्यंग्यतात्पर्यमेवैषां युक्तमिति यत्नोऽस्माभिराब्धो न ध्वनिप्रतिपादनमात्राभिनिवेशेन।" इति (**ध्वन्यालोकः** ३. पृ. ३६४-३६५)

तदेवं श्रूयमाणवर्णैर्यथा स्फोटोऽभिव्यंग्यस्तथा ध्वनावपि रस एव विशेषतोऽभिव्यंग्य इति निर्विवादम्। ततश्चेदं तत्त्वमत्राविर्भवति। 'रसो वै सः' **तैत्तिरीयोपनिषद्**. २।७) इति श्रुतिनिर्दिष्टदिशा रसस्तु ब्रह्मरूप एव। अभिनवगुप्तप्रदर्शितदिशा काव्याद्रसानुभवे आत्मा आत्मानमेवानुभवति। एवन्तर्हि काव्याद्रसानुभूतिलाभ एव ब्रह्मास्वादलाभो भवतु इति चेदस्ति रसास्वादब्रह्मास्वादयोर्वैलक्षण्यं किञ्चित्। तदेवमभिनवगुप्ताभिमत रसास्वादप्रकारं व्याख्यानयन्नाह मम्मटभट्ट :—

"·····सामाजिकानां वासनात्मतया स्थितः स्थायी रत्यादिको, नियतप्रमातृगतत्वेन स्थितोऽपि साधारणोपायबलात् तत्कालविगलितपरिमितप्रमातृभावोन्मीलितवेद्यान्तरसम्पर्कशून्यापरिमितभावेन प्रमात्रा सकलहृदयसंवादभाजा साधारण्येन स्वाकार इवाभिन्नोऽपि गोचरीकृतश्चर्व्यमाणतैकप्राणो विभावादिजीवितावधिः पानकरसन्यायेन चर्व्यमाणः पुर इव परिस्फुरन् हृदयमिव प्रविशन् सर्वाङ्गीणमिवालिंगन् अन्यत् सर्वमिव तिरोदधत्, ब्रह्मास्वादमिवानुभावयन् अलौकिकचमत्कारकारी शृंगारादिको रसः।" इति। (**काव्यप्रकाशः** ४. पृ. ९२-९३)। अत्र ब्रह्मास्वादमिव इत्यत्र इवेति पदस्याशयजिज्ञासायां 'ब्रह्मास्वादे मुक्तिदशायां ब्रह्ममात्रं प्रकाशते। रसे तु विभावाद्यपीति भेदात् सादृश्यम्।' इति **बालबोधिन्यां** झलकीकरमहोदयस्य व्याख्यानमवलोक्यताम्। एवं पण्डितराजेनापि अभिनवगुप्तमतव्याख्यानव्याजेनोच्यते—

"वस्तुतस्तु वक्ष्यमाणश्रुतिस्वारस्येन रत्याद्यवच्छिन्ना भग्नावरणा चिदेव रसः। सर्वथैव चास्याः विशिष्टात्मनो विशेषणं विशेष्यं वा चिदंशमादाय नित्यत्वं स्वप्रकाशत्वं च सिद्धम्। रत्याद्यंशमादाय त्वनित्यत्वमितरभास्यत्वं च। चर्वणा चास्य चिद्गतावरणभंग एव प्रागुक्ता, तदाकारान्तःकरणवृत्तिर्वा। इयं च परब्रह्मास्वादात् समाधेर्विलक्षणा, विभावादिविषयसम्बन्धितच्चिदानन्दालम्बनत्वात्। भाव्या च काव्यव्यापारमात्रात्। अथास्यां सुखांशभाने किं मानमिति चेत् समाधावपि तद्भाने किं मानमिति पर्यनुयोगस्य तुल्यत्वात्। 'सुखमात्यन्तिकं यत्तत्बुद्धिग्राह्यमतीन्द्रियम्' इत्यादि शब्दोऽस्ति तत्र मानमिति चेत्, अस्त्यत्रापि 'रसो वै सः, रसं ह्येवायं लब्ध्वानन्दीभवति' इति श्रुतिः, सकलहृदयप्रत्यक्षं चेति प्रमाणद्वयम्।·····इत्याहुरभिनवगुप्ताचार्यपादाः।" इति (**रसगंगाधरः** १. पृ. २३)

एवं मम्मटपण्डितराजयोर्मते रसचर्वणायां चिद्रूपस्यात्मनः साक्षात्कारदशायामात्मनः रत्याद्यवच्छिन्नत्वम। रसास्वादस्य ब्रह्मास्वादसहोदरत्वमात्रे च तदेव रत्याद्यवच्छिन्नत्वं हेतुः। एवमेव ब्रह्मास्वादसजातीयोऽपि ब्रह्मास्वादाद् विलक्षणोऽयं रसास्वाद इति मन्तव्यम्।

डा० कान्तिचन्द्रपाण्डेयमहोदयानां मते अभिनवगुप्तो रसचर्वण
अवस्थाद्वयं स्वीकरोति ।[1] चर्वणाया प्रथमावस्थायां रत्यादिस्थायिनो
भानं जायते । इयमेव अवस्था पण्डितराजस्य 'दिभावादिविषयसम्बलि
चिदानन्दलम्बनत्वाद्' इति ग्रन्थेन परामृश्यते । रसचर्वणायाः पार्यन्तिकद
यान्तु केवलं परमानन्दस्यैव **रत्याद्यवच्छेदकराहित्येनै**वानुभूतिर्जाय
यदुक्त**मभिनवभारत्याम्**—'अस्मन्मते संवेदनमेवानन्दघनमास्वाद्यते । तत्र
दुःखाशंका । केवलं तस्यैव चित्रताकरणे रतिशोकादिवासनाव्यापारः । त
बोधने चाभिनयादिव्यापारः ।' इति (पृ. २९२. **अभिनवभारती**—६
डा० पाण्डेयमहोदयेन समुद्धृते[2] **बृहतीविमर्शिन्या** हस्तलिखितपुस्तकेऽ
एवाभिप्रायः प्रकटीकृतः । यदुक्तं—

'.....निर्विघ्नास्वादरूपा च रसना । तद्गोचरीकार्याः चित्तवृत्तयो
न वेत्ययमर्थोऽभिनवभारत्यां नाट्यवेदविवृतौ व्युत्पादितोऽस्माभि
तत्कुतूहली तामेवावलोकयेत्···परन्तु तथोचितव्यवधानांशतिरस्क्रियास
धानहृदया लभन्ते एव परमानन्दम् ।' इति ।

पाण्डेयमहोदयानां मते रसचर्वणायाः पार्यन्तिकदशायां रत्यादि
वृत्तिरपि वासनायामेव विलीयते । सा चेयं दशा काश्मीरीयशैवदर्श
व्यतिरेकतुरीयातीतरूपा यस्याञ्च सर्वमपि वेद्यान्तरं वासनायां विली
चिदेवानन्दघनत्वेन प्रकाशते ।[3] शैवदर्शनमते आत्मसाक्षात्कारस्य व्यति
तुरीयातीताव्यतिरेकतुरीयातीतभेदेन पर्यायद्वयमस्ति । तत्र च व्यति
तुरीयातीतावस्थायां वेद्यं विषयान्तरं वासनायां निलीय वर्तते । अव्यति
तुरीयातीतावस्थायान्तु वेद्यान्तरं साकल्येन व्यपगच्छति । तदवस्थात
प्रमातुः प्रत्यावर्तनमपि नास्ति ।[4] इयमेवावस्था ब्रह्मोपलब्धिरूपा यस्

---

1. **Indian Aesthetics**, pp. 128–130
2. **Indian Aesthetics**, (मूलग्रन्थस्य १२९ पृष्ठे टिप्पणरूपेणोद्धृतोऽयं ग्र
pp. 428–429
3. "Aesthetic experience, therefore, according to Abhinavag
in its final stage, belongs to the lavel of Vyatireka Turiy
in which all objectivity merges in the sub-conscious an
Subject, the Self, shines in its Ānanda aspect."
(**Indian Aesthetics**, p.
4. "But Turiyātīta is of two types (i) in which the objec
persists in the subconscious and (ii) in which there is
absence of objectivity. The first is called 'Vyatireka Turiy

'न च पुनरावर्तते' (**छान्दोग्योपनिषद्, ८-१५**) इति श्रुतिवाक्यं सर्वथा संगच्छते ।[1]

तदेवं रसचर्वणायां पर्यायद्वयम् । (१) प्रथमपर्याये रत्याद्यवच्छिन्ना चिदेवोपलभ्यते । (२) द्वितीयपर्याये चिदेवोपलभ्यते किन्तु रत्यादिस्तु वासनायां निलीय वर्तते । अयश्च द्वितीयः पर्यायो व्यतिरेकतुरीयातीतस्थानीय इत्युच्यताम् । (३) ब्रह्मसाक्षात्कारस्तु एतद्द्वयापेक्षया तृतीयपर्यायगतः अव्यतिरेकतुरीयातीतस्थानीय इति व्यपदिश्यताम् ।

अस्मन्मते एषु पर्यायेषु प्रथमः मध्यमावागुपलब्धिरूपः, तत्र घटपटाद्यौपाधिकभेदवतां शब्दानामुपलब्धेः सत्त्वात् ।

द्वितीयश्च पश्यन्त्युपलब्धिरूपः, यत्र औपाधिकभेदरहितः स्फोट उपलभ्यते । नागोजीभट्टमते चायं सविकल्पकज्ञानविषयः ।[2]

तृतीयस्तु परावागुपलब्धिरूपः, यत्र सूक्ष्मतमः स्फोटो निर्विकल्पकज्ञानविषयतया साक्षात्क्रियते ।[3] एवञ्च न केवलं व्यजनाव्यापारसमन्वितत्वेनैव ध्वनिव्यपदेशयोग्यस्य काव्यस्य श्रूयमाणवर्णैः साम्यं किन्तु ध्वनिकाव्यश्रूयमाणवर्णयोः व्यञ्जनीयोऽपि विषयः सदृश एव ।

इदञ्चात्रावधेयम् । एक एव नित्योऽखण्डः सर्वगतः स्फोटः वक्तारं श्रोतारञ्चाभिव्याप्य वर्तते । तत एव वक्तृहृद्गत आन्तरः शब्दः स्फोटो वैखरीरूपेण बहिः प्रकाश्यमानः श्रोतुर्हृदगतं स्फोटमभिव्यनक्ति । एवमेव एक एव रसः रसभित्तिभूता चित्तवृत्तिर्वा कविं नायकं सामाजिकञ्चाप्यभिव्याप्य वर्तते । तस्मादेव च विभावादीनां स्थायिनश्च साधारणीकरणं सम्भवति । सहृदयश्च हृदयसंवादभाग् भवति । यदुक्तं भट्टतोतेन—'नायकस्य कवेः श्रोतुः समानोऽनुभवस्ततः ।' इति[3] तदपि रसस्य नित्यत्वमखण्डत्वञ्च दृढतरं सूचयति । यच्चोक्तं मम्मटेन—'·····अपरिमितभावेन प्रमात्रा सकलहृदय-

---

and the second is called 'Avyatireka Turiyātīta'. The latter is the highest stage, from which there is no descent."

(**Indian Aesthetics**, p. 122)

१. उदीर्णरागप्रतिरोधकं जनैरभिक्ष्णमक्षुण्णतयातिदुर्गमम् ।
उपेयुषो मोक्षपथं मनस्विनस्त्वमग्रभूमिर्निरपायसंश्रया ॥ शिशुपालवधम् १-३२)
इत्यप्यत्र तुलनीयम् ।

२. 'एतद्द्वयं वाग्ब्रह्मयोगिनां समाधौ निर्विकल्पकसविकल्पकज्ञानविषय इत्युच्यते ।'
(प० ल० म० पृ. २६)

३. लोचने प्रथमोद्द्योते (पृ० ९२) समुद्धृतम् ।

संवादभाजा साधारण्येन·····गोचरीकृत' इति तदप्यत्र प्रमाणत्वेन स्मरणीयम्।

परन्त्वेतदत्र विशेषतो परिलक्षणीयम्। अखण्डं यन्नित्यं वस्तु तदेकमेवाद्वितीयम्। तस्मादेव च कालः ब्रह्मणाभिन्नः। नित्यश्चायं शब्द एव ब्रह्म। रसो वै सः। तदेतदेकमेव नित्यं तत्त्वं ध्वनिमार्गे तथा शब्दमार्गे तथा योगमार्गे वाभिव्यज्यते। तदेवं स्फोटतत्त्वरसतत्त्वयोरभेदमेवोररीकृत्य आनन्दवर्धनेन स्वस्य वैयाकरणमतानुसारित्वं ख्यापितम् इति प्रतिभाति। ननु आनन्दवर्धनोपज्ञमेव एतत्तत्त्वमित्यत्र किं मानमिति चेन्न खलु मूलशास्त्रकृद्भिः सर्वमपि हृद्गतमाकूतं वैशद्येन निभाल्यते। तैः खलु भूयानपि भावराशिः पिण्डीकृत्योपस्थाप्यते। इयमेव तावत् चिरन्तनशैली मूलशास्त्रकाराणाम्। तस्मादेव च कारणादेकस्यापि ब्रह्मसूत्रस्य बहुधा विशदविशदतरं व्याख्यानं सम्भवति। न खलु अन्यान्यग्रन्थानां नवीननवीतराशयसमुद्भावने कोऽपि पर्यनुयोगावसर इति कुत आनन्दवर्धनभाषितेषु स समायाति इति विवेकशालिष्वेव वयमातिष्ठामहे।

तदत्रैतदपि तत्त्वं परिलक्ष्यताम्। अनित्यः श्रूयमाणवर्णः नित्यं स्फोटमभिव्यनक्ति। अनित्यश्च काव्यनाट्यगतो विभावादिर्नित्यं रसम्। एवमेवानित्योऽयं जगत्प्रपञ्चः नित्यं ब्रह्माभिव्यनक्ति। अनित्यमेव प्रतीकं नित्यं ब्रह्मतत्त्वमभिव्यनक्तीति अग्रे[1] सोदाहरणं प्रतनिष्यते। एवञ्चानित्यं यन्नित्यस्याभिव्यञ्जकं तदपि पूर्वोक्तं द्वैताद्वैततत्त्वमेव द्रढयति। वस्तुतस्त्वयमनित्यो नित्यस्यैव परिणामरूपः। सति चैवमनित्यो नित्याद्भिन्नोप्यभिन्न एव। यदुक्तम्—

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥ (**वा० प०** १।१।) इति।

अयमाशयः—अनादिनिधनम् उत्पादविनाशरहिततया नित्यं यद् ब्रह्म शब्दतत्त्वं भवति तदेवाक्षररूपेण विभक्तककारादिरूपवैखरीनादेनोपलक्षितं सदक्षरमिति व्यपदिष्टं सद् अर्थभावेन घटादिरूपेण विवर्तते, भासते। एवञ्च नित्यमेव ब्रह्मानित्यघटपटादिरूपेण विवर्तते। 'विवर्ततेऽर्थभावेन' इत्यस्य व्याख्याने **वृत्ति**कारोऽप्याह—एकस्यापि एकत्वहानिं विनैव आपातलभ्यबहुत्वस्वीकरणमुखेनान्येषामसतामनित्यानां रूपग्रहणमेव विवर्त इति।[2] अत्रैव

---

१. चतुर्थदर्शने।

२. 'विवर्ततेऽर्थभावेन। एकस्य तत्त्वादप्रच्युतस्य भेदानुकारेणासत्यविभक्तान्यरूपोपग्राहिता विवर्तः' इति हि तत्र वृत्तिकारस्य मूलवचनम्। (*Vākyapadīya I.* p. 8, Deccan College Monograph Series—32, 1966)

वृत्तिकारवचने द्वैताद्वैततत्त्वमपि विस्पष्टं समुपलभ्यते। एकमेव ब्रह्मतत्त्वं कथं नानात्वं भजते इति तदुपपादयन्नाह भर्तृहरिः—

एकमेव यदाम्नातं भिन्नं शक्तिव्यपाश्रयात्।
अपृथक्त्वेऽपि शक्तिभ्यः पृथक्त्वेनैव वर्तते॥ (**वा० प०** १।२) इति।

अस्यायमाशयः—"आवर्तबुद्बुदतरङ्गाख्या जलविकाराः परस्परं भिन्ना अपि जलमेव न ततो व्यतिरिक्ताः, तथा घटपटादयो विकाराः परस्परं भिन्ना अपि पृथिवीत्वेन न व्यतिरिक्ता, इति घटपटादीनां भेदः पृथिव्या एकत्वमिव, विलक्षणकार्योदयानुमीयमानवैलक्षण्याः शक्तयो ब्रह्मण एकत्वं न विरुन्धन्ति, इति घटादिरूपेण भिन्नत्वेपि पृथिव्याः स्वतोभिन्नत्ववत् शक्तिरूपेण ब्रह्मणो भिन्नत्वेऽपि स्वतोऽभिन्नत्वमिति ब्रह्मणि नानात्वं काल्पनिकमेकत्वं च वास्तवमिति न तयोर्विरोध इति भावः।"[1]

एतत् सर्वमपि वैयाकरणमतमानन्दवर्धनेन हृदयेनानुसृतमिति प्रतिभाति। तथा हि तन्मते कविरपि स्रष्टा स च रससमाहितचेतास्सन्नेव स्रष्टा भवति। एवञ्च कविवाङ्निर्मितौ नित्यो रस एवानित्यस्य काव्यजगतः सृष्टेः बीजम्। सा चेयं कवेः सृष्टिक्षमता प्रतिभा इत्युच्यते। यदुक्तं 'प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता' इति। आनन्दवर्धनश्च प्रायशः कवेः प्रतिभानवत्वं रससमाहितचेतस्त्वञ्च सममेव परामृशति। तेन च रससमाहितचेतस्त्वेनैवेयं प्रतिभा[2] प्रगल्भत इति प्रतिभाति। तद्यथोक्तमानन्दवर्धनेन—

'.....अलंकारान्तराणि हि निरूप्यमाणदुर्घटनान्यपि **रससमाहितचेतसः प्रतिभानवतः कवेरहंपूर्विकया** परापतन्ति।' (**ध्वन्यालोकः** २. पृ. २२१-२२२) इति।

कवेः सृष्टिकर्तृत्वे प्रमाणं यथा—

अपारे काव्यसंसारे कविरेकः प्रजापतिः।
यथास्मै रोचते विश्वं तथेदं परिवर्तते॥
(**ध्वन्यालोकः** ३. पृ. ४९८) इति।

कविवाङ्निर्मितौ रसहेतुकत्वे प्रमाणं यथा—
दृष्टपूर्वा अपि ह्यर्थाः काव्ये रसपरिग्रहात्।
सर्वे नवा इवाभान्ति मधुमास इव द्रुमाः॥
(**ध्वन्यालोकः** ४।४. पृ. ५२८) इति।

---

१. सूर्यनारायणशुक्लप्रणीतवाक्यपदीयभावप्रदीपाद् (पृ. ५) उद्धृतोऽयमंशः।
२. प्रतिभातत्त्वञ्च पञ्चमदर्शने वैशद्येन प्रतिपादयिष्यते।

अतोऽपि विस्पष्टतरं प्रमाणन्तु—

काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा ।
क्रौञ्चद्वन्द्वियोगोत्थः शोकः श्लोकत्वमागतः ॥

(**ध्वन्यालोकः** १।५) इति

कारिका यत्रादिकाव्यस्यैव निर्मितिः कवेः रससमाहितचेतस्त्वेनैव समभवदित्युक्तम् । श्लोकरूपेण परिणतः शोकस्तु न मुनेः व्यक्तिगतः शोकः किन्तु रसस्थानीय एव । तदेव च 'शोको हि करुणस्थायिभाव' इति वृत्त्या सूचितम् ।[1] 'आदिकवेः शोक एव श्लोकतया परिणतः' इत्युच्यत आनन्दवर्धनेन (पृ. ८८) । अभिनवगुप्तेन तूच्यते—'न तु मुनेः शोक इति मन्तव्यम् ।' (**लोचनम्**. पृ. ८६) प्रत्युत 'क्रौञ्चस्य द्वन्द्वियोगेन... यः शोकः स्थायिभावः...स एव...हृदयसंवादतन्मयीभवनक्रमादास्वाद्यमानतां प्रतिपन्नः करुणरसरूपतां लौकिकशोकव्यतिरिक्तां स्वचित्तद्रुतिसमास्वाद्यसारां प्रतिपन्नो रसपरिपूर्णकुम्भोच्चलनवत्...शोकरूपतां प्राप्तः—

मा निषाद प्रतिष्ठां त्वममगः शाश्वतीः समाः ।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम् ॥ इति ।'

(**लोचनम्** , पृ. ८५-८६)

एवञ्चानन्दवर्धनमते कवेः स्वकीयः शोक एव श्लोकरूपतया परिणतः । अभिनवगुप्तमते नायं कवेः स्वकीयः शोकः । किन्तु श्लोकरूपतया परिणतेः प्रागेव रसरूपतां गतः । एवन्तर्हि आनन्दवर्धनाभिनवगुप्तयोर्विरोध एव इत्येके ।[2] अस्मन्मते तु नास्त्यत्र कोऽपि विरोधः । आनन्दवर्धनमतेऽपि वस्तुतो नायं कवेः स्वार्थपरतयानुभूतो व्यक्तिगतः शोकः । किन्तु सकलप्राणिहृदयसंवादभजनपूर्वकतया साधारण्येनैवानुभूतः सन् करुणरसस्थानीयः । किञ्च यद्ययं कवेः शोकः रसरूपतया न स्वीक्रियते तर्हि 'काव्यस्यात्मा स एवार्थः' इति स्वकीयग्रन्थेनैव विसंगतिः स्यात् । यद्यपि च विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिरिति सूत्रानुसारं काव्यनाट्यगतविभावादिव्यञ्जितस्य स्थायिनः सहृदयैरनुभूयमानत्व एव रसव्यपदेशयोग्यत्वं तथापि

---

१. व्यंग्यार्थप्रधानध्वनिकाव्यनिर्माणक्षमता खलु कवेः सृष्टिक्षमताविशेष इत्युच्यते । किन्तु वस्तुमात्रादिभेदेन त्रिरूपोऽपि व्यंग्यार्थः सचेतसामेव बुद्धावबभासते । सचेतस एव रससमाहितचेतस इति समुन्नेतुं शक्यते । तथा चोच्यते—

तद्वत्सचेतसां सोऽर्थो वाच्यार्थविमुखात्मनाम् ।
बुद्धौ तत्त्वार्थदर्शिन्यां झटित्येवावभासते ॥ (ध्वन्यालोकः १।१२) इति ।

2. K. Krishnamoorthy, **Theory of Suggestion in Poetry**, pp. 156-158.

आनन्दवर्धनेन खलु कविनापि सचेतसा सहानुभूतिशीलतयानुभूयमानोऽपि स्थायी रस इत्युच्यते। नोचेत् कथमुक्तमानन्दवर्धनेन—

शृंगारी चेत्कविः काव्ये जातं रसमयं जगत्।
स एव वीतरागश्चेन्नीरसं सर्वमेव तत्॥

(**ध्वन्यालोकः** ३. पृ. ४९८) इति।

तदेवं नास्त्येव मूलग्रन्थकारटीकाकारयोर्विरोधः। एतच्च कविहृद्गतस्य रसस्य तात्पर्य**मभिनवभारत्यां** विस्पष्टतरमुपलभ्यते। यतश्चाभिनवगुप्तस्यानन्दवर्धनेन न विरोधः प्रत्युताभिनवगुप्तस्यानन्दवर्धनमतानुसारित्वमेवेत्यपि चानायासं समुन्नेतुं शक्यते। तथा हि—

यथा बीजाद् भवेद् वृक्षो वृक्षात्पुष्पं फलं यथा।
तथा मूलं रसाः सर्वे तेभ्यो भावा व्यवस्थिताः॥

(**नाट्यशास्त्रम्** ६।३८. पृ. २९४) इति।

कारिकाया व्याख्याने अभिनवगुप्त आह—

'ननु यदि भावेभ्यो रसास्तर्हि कथमुक्तं न हि रसादृते कश्चिदप्यर्थः प्रवर्तते। तेन पूर्वं त एवोद्देश्याः इत्याशंक्याह—यथेत्यादिना। बीजं यथा वृक्षमूलत्वेन स्थितं तथा रसाः। तन्मूला हि प्रीतिपूर्विका व्युत्पत्तिरिति त एव व्याख्यानार्हाः। कविगतसाधारणीभूतसंविन्मूलश्च काव्यपुरस्सरो नटव्यापारः। सैव च संवित्परमार्थतो रसः। सामाजिकस्य च तत्प्रतीत्या वशीकृतस्य पश्चादपोद्धारबुद्ध्या विभावादिप्रतीतिरिति प्रयोजनं नाट्ये काव्ये सामाजिकधियि च। तदेवं मूलं बीजस्थानीयः[1] कविगतो रसः। कविर्हि सामाजिकतुल्य एव। तत एवोक्तं 'शृंगारी चेत्कविः' (**ध्वन्यालोक** ३-४२) इत्यानन्दवर्धनाचार्येण। ततो वृक्षस्थानीयं काव्यम्। तत्र पुष्पादिस्थानीयोऽभिनयादिनटव्यापारः। तत्र फलस्थानीयः सामाजिकरसास्वादः। तेन रसमयमेव विश्वम्।' इति (**अभिनवभारती**. ६. पृ. २९४)

रसादेव कविवाङ्निर्मितेर्यद्रहस्यं तदेव स्फोटतत्त्वस्यापि रहस्यमित्यस्मदभिप्राये अभिनवगुप्तवचनमेव दृढतमं प्रमाणम्। तथा हि 'तेन रसमयमेव विश्वम्' इत्युत्क्वानुपदमेवोक्तवानभिनवगुप्तः 'अत्र च विज्ञानवादो द्विधाभिधानं स्फोटतत्त्वं सत्कार्यवाद एकत्वदर्शनमित्यादि च द्रष्टव्यम्' इति।[2] (**अभिनवभारती**. ६, पृ. २९४)

---

१. मन्मते 'बीजस्थानीयत्वात्कविगतो रसः' इति हि ज्यायान् पाठः।

२. अभिनवगुप्तपादपरामृष्टेषु विज्ञानवादप्रभृतिषु एकत्वदर्शनमेव अद्वैतवाद इति सुविशदमेतत्। सत्कार्यवादस्तु सांख्यदर्शनाभिमतो वादविशेषोऽत्रैव द्वितीयदर्शने महिमभट्टस्याभिव्यक्तिलक्षणस्य बीजानुसन्धाने प्रतनिष्यते। विज्ञान-

किञ्च कवेः सृष्टिकर्तृत्वे मम्मटवचनमपि किञ्चित् प्रमाणमस्ति । यदुक्तम्—

वादोऽपि पञ्चमदर्शने कान्त् महोदयस्य दर्शनस्य विचारप्रसंगे समुपस्थापयिष्यते । स्फोटतत्त्वन्तु इतः प्रागेव वैशद्येन निभालितम् । यत्त्वत्र द्विधाभिधानं नाम तत्त्वं परामृष्टं तदेव न तथा अवदातम् । तथापि प्रसंगसंगत्या अहिर्बुध्न्यसंहितोक्तेन 'द्विधाभावमृच्छति' इत्यनेनास्य कश्चन सम्बन्धोऽस्तीति वयं सम्भावयामः । तथा हि अभिनवभारत्यां प्रकृतग्रन्थे कवेः स्वानुभूतिपूर्वकतया एव सृष्टिर्भवतीति प्रदर्श्यते । यदाह—'सैव च संवित्परमार्थतो रसः । × × × तदेवं मूलं बीजस्थानीयः कविगतो रसः ।' इति अहिर्बुध्न्यसंहितायामपि भगवता संकल्पपूर्वकतया सृष्टिर्भवतीत्युच्यते । अभिनवभारत्यां 'तेन रसमधमेव विश्वम्' इत्यनेन कार्यकारणयोरभेदस्संसाधितः । अहिर्बुध्न्यसंहितायामपि एकस्या एव शक्तेः कार्यकारणभावेन द्विधाभावगमनं प्रतिपादितम् । तत एव तत्रापि कार्यकारणयोरभेदः समुन्नेयः । तदेवमुभयोरपि ग्रन्थयोर्मतसाम्यमस्ति प्रकामम् । (यदियमहिर्बुध्न्यसंहिताऽपि काश्मीरदेशे विनिर्मिता आसीदिति पण्डितानां मतं तदप्यस्मिन् प्रसङ्गे विशेषभावेन तात्पर्यपूर्णमस्ति ।) सति चैवं सूरिभिस्स्वयमेवात्रानूदिता अहिर्बुध्न्यसंहिताश्लोकाः परामृश्यन्ताम्—

"अथ शुद्धेतरसृष्टिवर्णनं नाम षष्ठोऽध्यायः

(तत्र शक्तितद्वतोर्भेदवदभेदस्याप्युपपत्तिः)

अहिर्बुध्न्यः—

योऽसौ नारायणो देवः परमात्मा सनातनः ।
अहंभावात्मिका शक्तिस्तस्य तद्धर्मधर्मिणी ॥ १ ॥
ताविमावेकधैवोक्तौ भेद्यभेदकभावतः ।
पृथक्त्वेन च शास्त्रेषु जगद्धेतुतयोदितौ ॥ २ ॥ × × ×

अथ शुद्धेतरसृष्टिवर्णनं नाम सप्तमोऽध्यायः । × × ×

(अध्यायद्वयसंक्षेपः)

भूयश्च शृणु संक्षेपमिमं नारद तत्त्वतः ॥ ६४ ॥
एका शक्तिर्हरेर्विष्णोः सर्वभावानुगामिनी ।
देवी षाड्गुण्यपूर्णा सा ज्ञानानन्दक्रियामयी ॥ ६५ ॥
भाव्यभावकभावेन सा द्विधाभावमृच्छति ।
भावकस्तत्र संकल्पः सुदर्शनमयो हरेः ॥ ६६ ॥
अव्याघातस्तु यस्तस्य सा सुदर्शनता मुने ।
ज्ञानमूलक्रियात्मासौ स्वच्छः स्वच्छन्दचिन्मयः ॥ ६७ ॥

नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम् ।
नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति ॥

(**का० प्र०** १।१) इति ।

कविहृद्गतो रसः श्लोकरूपतयार्थात् शब्दरूपेण परिणतः । शब्द एव च कविवाङ्निर्मितिरूपेण । रसस्थानीयः स्फोटश्च वैखरीरूपतया व्यक्तककारादिरूपशब्दरूपेण परिणतः । स एव च शब्दोऽर्थभावेन घटादिरूपेण इति भावः । अत्रोच्यते—ननु कविना यन्निर्मीयते तत्तु अवास्तवं, जगत्प्रपञ्चे तु यन्निर्मितं तद्वास्तवं घटपटादिरूपतया परिलक्ष्यमाणत्वादित्युभयोः समशीर्षिकतया स्थापनं न युज्यत इति चेद् वस्तुतो घटपटादिरप्यवास्तव एव न तु घटपटादीनामपि पारमार्थिकी सत्ता विद्यते । घटपटादयस्तु परमार्थतोऽनित्याः । यत् खलु स्वरूपेण सत् तस्य कदापि असत्ता न सम्भवति । स्वरूपस्यानपायित्वात् । अतः घटपटादिपदार्थानामपायोपजनधर्माणां पारमार्थिकी सत्ता न यौक्तिकी । तदेवमुभयोरभेद एव ।

यत्तु शब्दब्रह्मतत्त्वविदामुपनिषद्भूतं तत्त्वं तन्मते श्रोत्रा अनुभूयमानो यः शब्दार्थः स एव घटपटादिरूपेण बहिरुपलभ्यमानः पदार्थः । तस्मादेव च सर्वेषामपि पदार्थानां 'पदस्य अर्थः' इति व्युत्पत्त्या पदार्थ इति व्यपदेशः । एवञ्च नास्त्येव तद्वस्तु यत्पदार्थ इति नोच्यते । सर्वेऽपि अर्थाः सर्वथा सर्वदा सर्वत्र नामधेयान्विताः । यदुक्तं—

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥

(**वा० प०** १।१२३) इति ।

एवमेव सर्वेषामपि प्रत्ययानां शब्दानुविद्धत्वात् शब्दमात्रप्रकाशयोग्यत्वात् सर्वेषामपि प्रत्ययानामर्थविशेषविषयकत्वाच्च शब्दार्थयोरभेद इति वैयाकरणसमयः । किञ्च यदस्ति योगिभिर्ध्यानगम्यं ब्रह्मतत्त्वं तदपि ब्रह्मेति पदस्यैव अर्थः । किन्तु रसस्य यथा अभिधेयत्वं नास्ति, केवलं व्यञ्जना-व्यापारेणैव स उपलभ्यते, तथैव ब्रह्मतत्त्वमपि । वाच्यार्थेन च विभावादिस्थानीयेन ब्रह्मतत्त्वस्य वर्णनं सम्भवति । तस्मिंश्च वर्णने समासादिते तत एव व्यंग्यार्थन्यायेन प्रकाशते ब्रह्मतत्त्वं सचेतसः प्रणिधानवतः चेतसि । यथा च रसे समनुभूते ईदृगेतदिति वर्णयितुं न शक्यते तथैव ब्रह्मतत्त्वमपि । रसे समनुभूते विभावादिवाच्यार्थाः विभक्ततया असाधारणरूपेण नोपलभ्यन्ते ।

भाव्यो नाम परांशो यः सा भूतिरिति गीयते ।
संकर्षणादिभूम्यन्ता शुद्धेतरविभागिनी ॥ ६८ ॥ × × ×
(अहिर्बुध्न्यसंहिता. आदियार् लाइब्रेरी संस्करणम्. १९१६. पृ. ७०-७२)

येन च वाचकशब्देनैतद्ब्रह्मतत्त्वमन्ततो गत्वा समासाद्यते सोऽपि ब्रह्मतत्त्व-समासादनदशायां विभक्ततया न परिचीयते । यदुक्तं—

'सत्यस्य बोधार्थं प्रकाशनार्थञ्चासमर्था भाषा । किन्तु इयमन्यथापि समुपपादनीया भवेत् । न तु अभिधानार्थम् । किन्तु श्रोतारं तस्मिन् स्थाने आनेतुं यस्मात् स्थानात् स स्वयमेव भाषानैरपेक्ष्येणैवानिर्वचनीयामन्तर्दृष्टिं समुपलभेत । भाषा च वस्तुतत्त्वोपलम्भार्थं निःश्रेणिरूपा यामारूढ्य परमार्थं साक्षात्कर्तुं समर्थो भवति जनः । समुपलब्धे च परमार्थे भाषारूपेयं निःश्रेणिर्दूरत एव परित्यज्यते ।' इति ।[1]

तदेव ब्रह्मतत्त्वं परमार्थतो व्यंग्योऽर्थः यस्मिन्नुपलब्धे घटपटादयो वाच्यार्थस्थानीया विभक्ततया न परिचीयन्ते। स च परमव्यंग्योऽर्थः वाच्यार्थ-विमुखात्मनां वास्तविकजगन्निरासक्तानामेव चेतसि आविर्भवतीति हृदयं यथा—

स्वसामर्थ्यवशेनैव वाक्यार्थं प्रतिपादयन् ।
यथा व्यापारनिष्पत्तौ पदार्थो न विभाव्यते ।।

यथा स्वसामर्थ्यवशेनैव वाक्यार्थं प्रकाशयन्नपि पदार्थो व्यापारनिष्पत्तौ न भाव्यते विभक्ततया ।

तद्वत् सचेतसां सोऽर्थो वाच्यार्थविमुखात्मनाम् ।
बुद्धौ तत्त्वार्थदर्शिन्यां झटित्येवावभासते ।।
(**ध्वन्यालोकः** १।११-१२) इति ।

अत्र प्रसंगतः पुनरपि नागोजीभट्टवचनं किञ्चित् परामृश्यते—

"यत्तु तार्किकाः शब्दार्थयोस्तादात्म्यस्वीकारे मधुशब्दोच्चारणे मुखे माधुर्यरसास्वादापत्तिः, वह्निशब्दोच्चारणे मुखे दाहापत्तिरित्याहुः । तन्न । भेदाभेदस्योपपादितत्त्वात् ।[2]

---

1. "Language is incapable of apprehending and expressing reality. But language may be used in another way, not to represent, but to bring the hearer to a point where he himself may transcend language and pass to incommunicable insight. It is a dialectical ladder which, when we have ascended, may be kicked away." (Bergson, **Introduction to Metaphysics,** quoted by W. M. Urban in **Language and Reality,** p. 12. George Allen and Unwin, London, 1939).

२. यदुक्तं तत्रैव 'तादात्म्यं च तद्भिन्नत्वे सति तदभेदेन प्रतीयमानत्वमिति भेदाभेदसमनियतम् । अभेदस्याध्यस्तत्वाच्च न तयोर्विरोधः ।' इति ।

वस्तुतो बौद्ध एवार्थः शक्यः,[1] पदमपि स्फोटात्मकं प्रसिद्धम्। तयोस्तादात्म्यम्। तत्र बौद्धे वह्न्यादावर्थे दाहादिशक्तिमत्त्वाभावात्। अत एव 'शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः' इति विकल्पसूत्रं संगच्छते। शब्दज्ञानमात्रेणानुपाती बुद्धावनुपतनशीलो वस्तुशून्यः बाह्यार्थरहितः विशेषेण कल्प्यते इति विकल्पः, बुद्धिपरिकल्पित इति तदर्थः। अत एव—

एष बन्ध्यासुतो याति खपुष्पकृतशेखरः।
कुर्मक्षीरचये स्नातः शशशृंगधनुर्धरः॥

इत्यत्र बन्ध्यासुतादीनां बाह्यार्थशून्यत्वेऽपि बुद्धिपरिकल्पितं बन्ध्यासुतशब्दवाच्यार्थमादायार्थवत्त्वात् प्रातिपदिकत्वम्। अन्यथार्थवत्त्वाभावे[2] प्रातिपदिकत्वाभावात् स्वाद्युत्पत्तिर्न स्यात्।" इति (**परमलघुमञ्जूषा**, शक्तिविचारः, पृ. ११-१२)

एवञ्च बन्ध्यासुतादिर्यथा वस्तुतो नास्ति तथैव घटपटादिरपि परमार्थतो नास्तीति सर्वं सुसमञ्जसम्।

व्याकरणशास्त्रे व्यञ्जनाव्यापारस्वीकारः

एवं यद्यपि ध्वनितत्त्वप्रतिपादने ध्वनिवादिनां वैयाकरणमताश्रयणं निर्विवादमस्ति तथापि शब्दस्य व्यञ्जनाव्यापारस्वीकारो वैयाकरणनये विस्पष्टं नोपलभ्यते इति प्रतिमाति। आनन्दवर्धनपूर्वभाविनां वैयाकरणानां ग्रन्थेषु को वा शब्दव्यापारः, शब्दव्यापारस्य वा कति भेदाः, तेषु अभिधालक्षणादि-

---

१. बौद्धे वह्न्याद्यर्थे न दाहादिकम्। किन्तु बौद्धेनापि घटाद्यर्थेन वास्तविकघटादेर्यथा न भेदस्तथा पूर्वमेव प्रतिपादितम्। बौद्धार्थबाह्यार्थयोरुल्लेखः परमलघुमञ्जूषायामन्यत्रापि यथा—

'नन्वेवं घटसत्तारूपोऽर्थः प्रथमं बुद्धौ नञा निवर्तयितुमशक्यः, सतो निषेधायोगात्, असतस्त्वसत्त्वादेव निवृत्तिसिद्धया निषेधो व्यर्थः। तदुक्तम्—

सतां च न निषेधोऽस्ति सोऽसत्सु च न विद्यते।
जगत्यनेन न्यायेन नञर्थः प्रलयं गतः॥ इति चेत्, न।

बौद्धो हि शब्दो वाचकः बौद्ध एवार्थो वाच्य इत्युक्तत्वात् बुद्धिसतोऽप्यर्थस्य नञा बाह्यसत्तानिषेधात्। बुद्धौ सन्नपि घटो बहिर्नास्तीत्यर्थात्। न च घटास्तिपदाभ्यां या घटविषयाऽस्तित्वबुद्धिर्जाता सा नञा निवर्त्यते किं बौद्धार्थस्वीकारेणेति वाच्यम्। बुद्धेश्शब्दावाच्यत्वेन नञा तन्निषेधायोगात्। एतेन बौद्धार्थमस्वीकुर्वन्तो नञर्थबोधाय कष्टकल्पनां कुर्वन्तस्तार्किकाः परास्ताः।' इति (पृ. ६८)

२. 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' (पा० १-४-४५) इति पाणिनिः।

विलक्षणतया व्यञ्जनाव्यापारः स्वीकर्तुं युज्यते न वा इत्येते विचाराः स्पष्टतया नोपलभ्यन्ते। वैयाकरणेषु केवलं नागेशादिभिरर्वाचीनैरेव पश्चाद्भाविनीं विचारसरणिमनुसृत्य स्वकीयग्रन्थेषु ते विचारास्समवतारिताः। अपि च व्याडिकृतसंग्रहग्रन्थस्य विलुप्तत्वात् प्राचीनविचारशैली नितरां दुरधिगम्या एव सञ्जाता। अत एवानन्दवर्धनेन व्यञ्जनाव्यापारस्य विद्वदुपज्ञत्वप्रकटने तस्याभिधादिवैलक्षण्योपस्थापने च महान् आयास उररीकृतः। तत्परवर्तिभिस्तु वैयाकरणैरपि व्यञ्जनाव्यापारः शब्दगतः निर्विवादं स्वीकृतः। यथाह नागेशः—

"ननु व्यञ्जना कः पदार्थः? उच्यते। मुख्यार्थबाधनिरपेक्षबोधजनको मुख्यार्थसम्बन्धासम्बन्धसाधारणः प्रसिद्धाप्रसिद्धार्थविषयको वक्त्रादिवैशिष्ट्यज्ञानप्रतिभाद्युद्बुद्धः संस्कारविशेषो व्यञ्जना। अत एव निपातानां द्योतकत्वं स्फोटस्य व्यंग्यता च हर्यादिभिरुक्ता। द्योतकत्वं च स्वसमभिव्याहृतपदनिष्ठशक्तिव्यञ्जकत्वमिति। वैयाकरणानामप्येतत्स्वीकार आवश्यकः।" इति (**परमलघुमञ्जुषा०** व्यञ्जनाविचारः० पृ० २२-२३)

हर्यादिभिरुक्ता स्फोटस्य व्यञ्जकता इतः प्रागेव वैशद्येन विचारिता। साम्प्रतमत्र निपातानां द्योतकत्वं प्रतन्यते। द्योतकत्वं नाम व्यञ्जकत्वम्। निपातस्तु वाक्ये प्रयुज्यमानः अभिधाव्यापारेणार्थं न बोधयति किन्तु स्वनिष्ठव्यञ्जनाव्यापारेणैव इत्याशयः। तदेवोच्यते द्योतकत्वं च स्वसमभिव्याहृतपदनिष्ठशक्तिव्यञ्जकत्वमिति। निपातसमभिव्याहृतपदस्यैव स्वकीयमर्थान्तरं बोधयितुं शक्तिरस्ति। सा च सति निपाते प्रादुर्भवति। एवंक्रमेणायं निपातः स्वं स्वरूपं प्रकाशयन्नेवान्यार्थावभासको भवतीति तत्र व्यञ्जकत्वं संगच्छते। ननु वाचकोऽपि शब्दः स्वरूपं प्रकाशयन्नेव स्वाभिधेयरूपपरावभासक इति तत्रापि द्योतकत्वमस्तु इति चेत् परमार्थतो वाचकस्यापि द्योतकत्वमेवेति पूर्वमेव प्रतिपादितम्। किन्तु व्यावहारिकभावेन वाचकस्य यथा वाचकत्वमस्ति न तथा निपातस्य, स्वसमभिव्याहृतवाचकपदान्तरनैरपेक्ष्येणप्रयोगादर्शनादिविशेषादित्युभयोर्भेद इत्यनुपदमेव प्रतनिष्यते।

निपातार्थविचारः—निरुक्ते निपातप्रसङ्गः

निपातानां द्योतकत्वविषये निरुक्तकार एव सर्वप्रथमं हस्तावलम्बनं वितरति। तथा चोच्यते—

न निर्बद्धा उपसर्गा अर्थान्निराहुरिति शाकटायनो नामाख्यातयोस्तु कर्मोपसंयोगद्योतका भवन्त्युच्चावचाः पदार्था भवन्तीति गार्ग्यस्तद्य एषु

पदार्थः प्राहुरिमे तं नामाख्यातयोरर्थविकरणम् । इति (**निरुक्तम्** १-३)

अयमाशयः—निर्बद्धाः निष्कृष्य नामाख्यातमध्यात् पदवाक्यरूपेण विरचिताः सन्तः अर्थं न बोधयन्ति उपसर्गाः इति शाकटायनस्य मतम् । कथं तेषामर्थवत्त्वमिति प्रश्ने शाकटायन एव आह—नामाख्यातयस्तु इति । नामाख्यातयोरेव योऽर्थः तत्रैव विशेषं कंचिदुपसंयोज्य द्योतयन्ति । उपसर्गसंयोगे सति नामाख्यातयोरेवार्थविशेषः व्यज्यते । 'यथा प्रदीपसंयोगे द्रव्यस्य गुणविशेषोऽभिव्यज्यमानो द्रव्याश्रय एव भवति न प्रदीपाश्रयः ।' तथा । (**दुर्गाचार्यस्य टीका०** पृ० ५८-५९) । अत्र 'कर्मोपसंयोगद्योतका' इत्यंशे कर्मपदमर्थपर्यायमित्यग्रे विस्पष्टं दर्शयिष्यते । गार्ग्यस्तु अन्यथा ब्रूते ।[1] तन्मते हि उच्चावचाः बहुप्रकारा एषामुपसर्गपदानामर्था भवन्ति वियुक्तानामपि नामाख्याताभ्याम् । ननु नामाख्यातनैरपेक्ष्येणार्थबोधनार्थं न कोऽपि उपसर्ग एकाकी प्रयुज्यत इति कथमुच्यते—उपसर्गाणामप्यर्था भवन्तीति । तत्रोच्यते । 'अस्योपसर्गस्यायमर्थ' इति कथनादेवोपसर्गस्य स्वातन्त्र्येणार्थवत्त्वं सिद्धम् । स तु अर्थः नामाख्यातयोरेवार्थविशेषरूपः । प्रयोगस्तु यथा 'आ इत्यर्वागर्थे' इति । आ पर्वतात् । 'अर्वाग् इति गम्यते' इति दुर्गाचार्यः । अर्वाग् इत्यनेन सम्बन्धविशेषो लभ्यते । स च सम्बन्धोऽन्तत एकतरं सम्बन्धिनमपेक्षते । तस्माद् आ इत्यनेन पर्वताद् इत्यस्य प्रयोग आवश्यकः । एवञ्च स्वयमर्थवानपि उपसर्गः स्वसमभिव्याहृतपदान्तरस्यार्थमपेक्षते, तस्यैव च विशेषं द्योतयति इति शाकटायनमतमपि श्रद्धेयम् । किन्तु गार्ग्येण यदुक्तमर्थवान् उपसर्ग इति तस्यापि किञ्चिदनपह्नवनीयं तथ्यमस्ति । तथा हि अर्थवानुपसर्गः । तस्मादेव 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' (**पा०** १-२-४५) इति सूत्रेण प्रातिपदिकसंज्ञा उपसर्गे संगच्छते । तदनु 'ङ्याप्प्रातिपदिकात्' (**पा०** ४-१-१) इत्यस्याधिकारे 'स्वौजसमौड्०' (**पा०** ३-१-२) इत्यादिसूत्रेण सुबादिलाभः 'अव्ययादाप्सुपः' (**पा०** २-४-८२) इत्यनेन तल्लोपश्च सम्भवति । प्रत्यये लुप्तेऽपि 'प्रत्ययलोपे प्रत्ययलक्षणम्' इति सूत्रेण (**पा०** १-१-६२) न पदत्वहानिः ।

---

१. उपसर्गाणां क्रियया सह कीदृशस्सम्बन्ध इति तस्मिन् विषये साकल्येन त्रिणि मतानि सन्ति । तथा हि (१) उपसर्गा अर्थवाचका इत्येकं मतम् । (२) उपसर्गास्त्वर्थद्योतका इति द्वितीयं मतम् । (३) उपसर्गास्त्वर्थबोधने सहकारिण इति तृतीयम् । अस्मिन् त्रैविध्यविषये वाक्यपदीयस्य १९० कारिकायां पुण्यराजस्य टीका अवलोकनीया ।
(Betty Heimann, **The Significance of Prefixes in Sanskrit Philosophical Terminology**, London 1921, p. 2)

अत्रेयं शङ्का समुदेति । ननु निपातानां द्योतकत्वं विचारयितुमुपक्रम्य कथमत्र उपसर्गप्रसंग एवावतार्यते । न खलु एकतरेणान्यतरस्य सिद्धिः । उपसर्गो निपातश्चेति उभावपि भिन्नौ स्तः । स्वीकृत एव चैतद्भेदे 'तद्यान्येतानि चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्च तानीमानि भवन्ति ।' (**निरुक्तम्** १-१) इति निरुक्तकारवचनं संगच्छते । **महाभाष्यस्य पस्पशायामपि** ।

चत्वारि शृंगा त्रयो अस्य पादाः
द्वे शीर्षे सप्त हस्तासो अस्य ।
त्रिधा बद्धो वृषभो रोरवीति
महो देवो मर्त्यां आ विवेश ॥ (**ऋ० सं०**, ४-५८-३)

इत्यस्य व्याख्याने "'चत्वारि शृंगाणि' चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्च" इति महाभाष्यकारवचनमेतद्भेदमेव परामृशति । तथैव 'चत्वारि वाक्परिमिता पदानि' (**ऋ० सं०** १-१६४-४५) इत्यस्य व्याख्यानेऽपि महाभाष्यकारः तद्भेदं स्वीकरोति । किञ्च सत्यपि उपसर्गनिपातयोर्भेदे नागोजीभट्टः **परमलघुमञ्जूषायां** निपातार्थनिर्णयप्रसंगे उपसर्गार्थमपि निर्णयति । तथैव भट्टोजिदीक्षितस्य **कारिकासु** तद्व्याख्यानात्मके कौण्डभट्टस्य **वैयाकरणभूषणसारेऽपि** निपातार्थनिर्णयप्रसंग एव उपसर्गार्थस्यापि निर्णयः कृत इति कथमुभयोर्भेदः को वा उभयोः सम्बन्ध इत्ययं प्रश्नः । अत्रास्माभिरेवं समाधीयते—

'प्राग्रीश्वरान्निपाताः' (**पा०** १-४-५८) इत्यधिकृत्य 'चादयोऽसत्त्वे' (**पा०** १-४-५७) तथा 'प्रादयः' (**पा०** १-४-५८) इति सूत्राभ्यां निपातसंज्ञा विधीयते । अद्रव्यार्थाः चादयः प्रादयश्च निपाता इत्यर्थः । 'उपसर्गाः क्रियायोगे' (**पा०** १-४-५९) इति सूत्रेण उपसर्गसंज्ञा च विधीयते । तस्मात् चादयो निपाता एव । प्रादयस्तु निपातास्सन्त एव क्रियायोगे उपसर्ग इति व्यपदेशं लभन्ते । एवञ्च संगच्छत एव निपातार्थनिर्णयप्रसंगे उपसर्गार्थस्यापि निर्णयः नागोजीभट्टप्रभृतीनां ग्रन्थेषु । सति चैवं प्रादिषु पठितत्वेऽपि आ इत्यस्य क्रियायोगाभावाद् आ पर्वतादित्यत्र नोपसर्गत्वं किन्तु निपातत्वमेव । एवन्तर्हि नामाख्याते निपातश्चेति त्रीणि एव पदजातानि सन्तु इति चेन्नैव दोषः । क्रियायोगवत्त्वे सति असत्त्वं प्रादीनाम् उपसर्गत्वम् । क्रियायोगरहितत्वे सति चादिप्रादिसाधारण्येन असत्त्वमर्थाद् अद्रव्यार्थत्वं निपातत्वमित्युभयोर्भेदस्य सुवचत्वात् ।

पुनरप्यत्रेयं शङ्का समुदेति । ननु उपसर्गा नामाख्यातयोः कर्मोपसंयोगद्योतका भवन्तीति शाकटायनेनोक्तं **निरुक्ते** अभ्युपगम्यते । किन्तु 'उपसर्गाः

क्रियायोगे' इत्यस्य प्रसिद्धत्वे कथमत्र नाम्नः कर्मोपसंयोगद्योतकत्वमुक्तं संगच्छत इति। तत्र पुनरस्माभिरेवं समाधीयते—

ये च प्रादयस्त एव साधारण्येन उपसर्गा इत्युक्ताः। त एव आख्यातस्य कर्मोपसंयोगद्योतकास्सन्तः पाणिनिमुनेरभिप्रेता उपसर्गा भवन्ति। नाम्नः कर्मोपसंयोगद्योतकत्वे तु चादिसाधारण्येन केवलं निपातत्वमेव। अस्मन्मते पाणिनिरेव सर्वप्राथम्येन निपातोपसर्गयोः भेदं विस्पष्टं प्रकटयति। **निरुक्ते** तु स भेदः म्लिष्टतया एवोपलभ्यते। यथा तथा वा भवतु, उपसर्गलक्षणं साधारण्येन प्रतिपाद्य पुनरपि चादिप्रादिसाधारण्येन कर्मोपसंयोगद्योतकत्व-वैलक्षण्येन निपातलक्षणमुपस्थापयन्नाह निरुक्तकारः—

'अथ निपाता उच्चावचेस्वर्थेषु निपतन्त्युपमार्थेऽपि कर्मोपसंग्रहार्थेऽपि पदपूरणाः' इति (**निरुक्तम्** १-४)। 'उच्चावचेष्वनेकप्रकारेष्वर्थेषु निपतन्तीति निपाताः' (**निरुक्तवृत्तिः**० पृ० ६३)। के वा ते अर्था इत्यत्र उच्यते—'अप्युपमार्थेऽपि कर्मोपसंग्रहार्थेऽपि पादपूरणाः।' इति। उपमार्थे उदाहरण-मग्निरिवेन्द्र इति। उपमा नाम कस्मिंश्चिदेवार्थे प्रसिद्धो यो गुणस्तस्यान्य-स्मिन्नप्रसिद्धतद्गुणेऽर्थे प्रकाशनम्। एतच्च प्रकाशनं वस्तुतस्तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वमिति लक्षणेन लक्षितस्य सादृश्यस्यैवाभिव्यञ्जनमित्य-ग्रेऽपि दर्शयिष्यते। कर्मोपसंग्रहार्थेऽपीत्यंशं व्याख्यातुमाह दुर्गाचार्यः—

"कर्मोपसंग्रह एवार्थः कर्मोपसंग्रहार्थः। तस्मिन् कर्मोपसंग्रहार्थे। अर्थोपसंग्रहार्थे इत्यर्थः। कर्म शब्दो हि प्रायेणार्थपर्यायवचन एतस्मि-ञ्छास्त्रे[1]। 'गतिकर्माण उत्तरे धातवः' गत्यर्था इति गम्यते।" इति (**निरुक्तवृत्तिः**, पृ० ६३)

को नाम कर्मोपसंग्रह इत्यत्र निरुक्तकारः स्वयमेव ब्रूते—'अथ यस्या-गमादर्थपृथक्त्वमह विज्ञायते न त्वौद्देशिकमिव विग्रहेण पृथक्त्वात् स कर्मोपसग्रहः।' इति (**निरुक्तम्** १-४)

एतद्व्याख्यातुमाह दुर्गाचार्यः—'यस्यागमादध्याहारादश्रूयमाणस्यैव निपातस्य सरूपविरूपैकशेषादर्थतो वा पृथक्त्वम् अह पृथग्भाव एव विज्ञायते।[2] तद्यथा देवदत्तयज्ञदत्तौ देवदत्तश्च यज्ञदत्तश्चेति। द्वावप्यत्र देवदत्तयज्ञदत्तौ श्रूयेते न तु तयोरौद्देशिकमिव[3] पृथक्त्वमिति यथा गाः अश्वान्

---

१. तदेवं कर्मपदस्यार्थपरकत्वमत्र पूर्वप्रतिज्ञानुसारं निभालितम्।

२. एतदेव निपातानां पृथग्भावजनकत्वं निपातातिरिक्तनामार्थयोर्भेदेनान्वय-बोधस्याव्युत्पन्नत्वनियमस्य बीजमिति सम्भावयामः। (अत्र भा० प० शब्द-खण्डम्. पृ० ३७२ अवलोक्यताम्)

३. उद्देशः = उल्लेखः

पुरुषान् पशून्[1] इति प्रत्येकमुद्दिश्यमानानाम्। इह तु विग्रहेण चशब्दागमादेतत् पृथक्त्वमुपजायते।.....स एष[2] पृथक्त्वाद्धेतोः पृथक्त्वेन निमित्तेनोपलक्ष्यमाणो यस्माद् द्वावर्थौ बहून् वा गृहीत्वैकस्मिन् कर्मण्युपसमावेष्टयति तद्यथा देवदत्तयज्ञदत्तौ पचेते इत्येवम्। कर्मोपसंग्रह इत्येतन्नामैव तद् भवति। अथवा बृहस्पतिश्चेत्युक्ते प्रजापतिरनुक्तोऽपि द्वितीयो गम्यते प्रजापतिश्चेति।' **निरुक्तवृत्तिः**, पृ० ७०)

अत्र तावद् दुर्गाचार्यस्य व्याख्याने विकल्पद्वयमुपलभ्यते। तथा हि यत्र नामपदानामुल्लेखमात्रेणैव भेदो नोपलभ्यते तत्र निपातेन भेद उपलभ्यते। भिन्नानपि नामपदान् एकेन कर्मणा संयोजयतीति हेतोः स निपात एव कर्मोपसंग्रह इत्युच्यते। अयं प्रथमो विकल्पः। अस्मिन् विकल्पेऽपि नामपदार्थयोर्भेदः अनुपलभ्यमानोऽनुत्कटः धर्मविशेषो निपातेन द्योत्यत इत्युन्नेतुं शक्यते। निपातेनानुक्तोऽपि समुच्चीयते। चकारस्तु प्रायश एवानुक्तसमुच्चयार्थः।[3] एवं यो निपातः अनुक्तमपि अर्थम् उपसंगृह्णाति स कर्मोपसंग्रहः। अयं द्वितीयो विकल्पः। अस्मिन् विकल्पे 'गम्यते' इति पदस्य प्रयोगाद् विस्पष्टमेव निपातस्य द्योतकत्वम्। अस्मिन् दुर्गाचार्यस्य व्याख्याने प्रथमतरविकल्पे अस्वरसस्तु द्वितीयविकल्पस्योपस्थापनेन स्वयमेव सूचितः।[4] परन्तु द्वितीयोऽपि विकल्पो नास्मभ्यं रोचते। मूले अनुक्तसमुच्चयार्थकस्य निपातस्योदाहरणादर्शनात्। अस्मन्मते प्रथमतरविकल्पस्य कर्मोपसंग्रहपदस्य व्युत्पत्तिः चिन्तनीया। मूले तादृशार्थस्याविवक्षितत्वस्य सुप्रतीयमानत्वात्। तस्मादस्माकं मते **निरुक्त**कारस्याशयस्तु एवंरूप एव यथा—

यस्य (निपातस्य) दर्शनात् पृथक्त्वं ज्ञायते स कर्मोपसंग्रहः। गामश्वमित्येवमादिषु औद्देशिकमेव पृथक्त्वम्। उल्लेखमात्रेणैव निपातनैरपेक्ष्येणैव

---

१. तुलनीयम्—'गामश्वं पुरुषं पशुमितिवत् समुच्चयोऽत्र चकारेण विनापि।' इति (लोचनम्। पृ० १३५)। गामश्वमित्यादेर्मूलम् महाभाष्य उपलभ्यमानः अहरहर्नयमानो गामश्वं पुरुषं पशुम्। वैवस्वतो न तृप्यति सुरया इव दुर्मदी॥ इति श्लोकः। (महाभाष्यम् निर्णय सागर सं० पृ० ४६३)

२. स एषः = कर्मोपसंग्रहः।

३. तद्यथा 'रूपरसगन्धस्पर्शाः संख्याः परिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे बुद्धयः सुखदुःख इच्छाद्वेषौ प्रयत्नाश्च गुणाः' इति कणादस्य षष्ठसूत्रे चकारोऽनुक्तसमुच्चयार्थकः।

४. व्याख्यान्तरविकल्पस्य द्वयमिष्टं निबन्धनम्।
पूर्वत्रापरितोषो वा व्याप्तिर्वा विषयान्तरे॥ इति कुमारिलभट्टोक्तेः।

तत्र पृथक्त्वस्य बोध इत्यर्थः। तद्व्यतिरिक्तस्थलेषु यस्य (निपातस्य) प्रयोगे सति नामार्थयोर्भेद एव ज्ञायते, भेदेन एवान्वयः भवति[1] स कर्मोपसंग्रहः। अयञ्च भेदो नामार्थयोरेव धर्मविशेषः। संयोगो नाम गुणो यथा संयुक्तयोरुभयोरपि वर्तते तथैव पृथक्त्वमपि भिन्नयोर्नामार्थयोरुभयत्र वर्तते। एवमसति पृथक्त्वे अविशिष्ट एव नामार्थः। सति पृथक्त्वे विशिष्टौ एव नामार्थौ ययोरयं विशेषो निपातेन द्योत्यते। स एव निपातः कर्मोपसंग्रहः। कर्म अर्थम् उप समीपे संगृह्णाति समाक्षिपति द्योतयतीति यावत्। एवंक्रमेणापि निपातस्य द्योतकत्वं निर्विवादमित्यास्तां तावत्।

पदपूरणास्तु ये निपातास्ते निरर्थका एवेति किं तेषामर्थस्वरूपविचारेणेति न वक्तव्यम्। पदपूरणानामप्यर्थास्सन्त्येव। अर्थाभावे सति प्रातिपदिकसंज्ञाऽलाभेन सुबाद्यलाभात्[2] पदत्वविरहः। पदत्वविरहे सति 'नापदं प्रयुञ्जीत' इति न्यायानुरोधेन तेषां प्रयोगासम्भवात् सुष्ठूक्तं दुर्गाचार्येण—'पदमेव पूरयितव्यं येषामर्थस्ते पदपूरणाः। तदेतत् त्रिधात्वमर्थभेदकृतं निपातानां समासेन।' इति (**निरुक्तवृत्तिः** पृ० ६३)। अस्मन्मते अत्रायमाशयः—

पदपूरणार्थके कस्मिंश्चन निपाते प्रयुक्ते सति वक्ता पदपूरणार्थमेवात्रैतन्निपातं प्रयुंक्ते इत्यर्थः समुन्नीयते। सर्वथा सार्थकपदैर्वक्ता स्वकीयमभिप्रायमेव प्रकाशयति। एवमयमपि वक्तुरेवाभिप्रायः पदपूरणार्थकेन निपातेन समासाद्यते। स चायं वक्तुरभिप्रायो न वाच्यः किन्तु प्रतीयमान एवेति सर्वथा निपातानां द्योतकत्वे भूषणमेवैतदित्यलं बहुना।

---

१. ननु घट एव कलश इत्यत्र एवेति निपातस्य प्रयोगे सति घटकलशयोरभेदे विवक्षिते कथं भेदेनान्वय इति चिन्त्यम्। नागोजीभट्टेन तु विस्पष्टमेवाभ्यधायि 'नामार्थयोरभेदान्वयव्युत्पत्तिस्तु निपातातिरिक्तविषया' इति। (प० ल० म० पृ० ५८)। सति चैवं घट एव कलश इत्यत्र घटकलशयोर्भेदे सत्यभेदः संसाध्यते एवेति निपातेन। राजा पुरुष इति निपातातिरिक्तस्थले यादृशोऽभेदसम्बन्ध उपलभ्यते न तादृशः घट एव कलश इत्यत्रापीति सर्वैरपि समर्थनीयमेतत्। वस्तुतस्तु राजा पुरुष इत्यत्रापि राजत्वेन पुरुषत्वेन च भेदः कश्चन अस्त्येव। अभेदस्तु व्यावहारिक एव। एवं घट एव कलश इत्यत्र एवपदेनोपस्थाप्यमानोप्यभेद एवपदस्य निपातत्वपरामर्शेनैवान्यथा क्रियते। तत्र तावद् भेदस्तु व्यावहारिकोऽभेदस्तु पारमार्थिकः। अथवा घटस्य यद्घटपदाभिधेयत्वं यच्च कलशपदाभिधेयत्वं तदुभयोर्भेद एव। अभेदस्तु एवकारप्रत्याय्योऽभिधेयघटविषयकः। इत्यलं बहुना।

२. 'सुप्तिङन्तं पदम्' (पा० १-४-१४) इति सूत्रानुसारम्।

निपातानां द्योतकत्वस्य स्वरूपनिर्वचम्

निपातस्य द्योतकत्वे सिद्धे निपातः कमर्थं कथंकारं द्योतयतीति जिज्ञासा जायते। तत्र तावन्नागेशभट्टस्य **परमलघुमञ्जूषायामुपलभ्यते** यथा—

(१) 'द्योतकत्वञ्च स्वसमभिव्याहृतपदनिष्ठवृत्त्युद्बोधकत्वम्' इति। (**प० ल० म०** पृ० ५५) अस्यायमाशयः—अनुरित्युपसर्गो निपातः। अनुभवतीति पदे प्रयुज्यमानो भूधातुगतानुभवबोधकशक्तेरुद्बोधकः। भूधातुगतानुभवबोधकवृत्तेरुद्बोधक इति यावत्। सा चानुभवबोधनक्षमापि शक्तिः भूधातौ पूर्वत एव वर्तमानापि तावन्न प्रगल्भते, तावन्न श्रोत्रा परिचीयते यावच्छ्रोतुः प्रतीतिपथं नानीयते। एवञ्चान्धकारे वर्तमानो घटो यथा प्रदीपेन समुद्भाव्यते अर्थाद् द्रष्टुः समक्षमभिव्यज्यते तथैव भूधातुगता शक्तिर्निपातेनाभिव्यज्यते इत्याशयः।

(२) 'क्वचित्तु क्रियाविशेषाक्षेपकत्वं द्योतकत्वम्। यथा प्रादेशं विलिखतीत्यादौ वर्तमानक्रियाक्षेपकः। प्रादेशं विमाय लिखतीत्यर्थावगमात्। अत एव 'अथ शब्दानुशासनम्' इत्यत्राथशब्दस्य प्रारम्भक्रियाक्षेपकत्वं कैयटाद्युक्तं संगच्छते।' इति (**प० ल० म०** पृ० ५५)। अयमाशयः—विरिति निपातस्य विमायपदार्थबोधकत्वं वाचकत्वेन न संगच्छते इति हेतोर्नियमेनैव तत्र वाचकत्वातिरिक्तं द्योतकत्वं स्वीकरणीयम्। मुख्यार्थबाधाद्यनुसन्धानाभावाच्च न लक्षणा। एवमथशब्दानुशासनमित्यत्राप्यवदातमाकूतम्।

(३) 'क्वचित्तु सम्बन्धपरिच्छेदकत्वं द्योतकत्वम्। यथा कर्मप्रवचनीयानाम्।' (**प० ल० म०** पृ. ५६) अस्याशयस्तु अग्रे कर्मप्रवचनीयस्वरूपविचारे विशदीकरिष्यते।

(४) कदाचिच्च निपातः धात्वर्थस्यावस्थाविशेषं द्योतयति। तथा चोच्यते—'प्रतिष्ठते इत्यत्र तिष्ठतिरेव गतिवाची,[1] धातूनामनेकार्थत्वात्। प्रशब्दस्तु तदर्थगत्यादित्वस्य द्योतकः।' इति (**प० ल० म०** पृ. ५६)। तदर्थगतेरर्थात् स्थाधात्वर्थगतेरादित्वस्य द्योतक इत्यर्थः। तेन प्रतिष्ठते इत्यस्य गन्तुं प्रवर्तते इत्यर्थो बोध्यः।

(५) 'चन्द्र इव मुखमित्यादौ चन्द्रपदस्य स्वसदृशेऽप्रसिद्धा शक्तिरेव लक्षणा। नञिवयुक्तमन्यसदृशाधिकरणे'[2] इति न्यायात्। इव पदं तात्पर्य-

---

१. एतदनुरूपा स्थितिः स्त्रीप्रत्ययेऽप्युपलभ्यते। तथा हि अजादीनामेव वाच्यं स्त्रीत्वं टावादिभिर्द्योत्यते इति 'अजाद्यतष्टाप्' (पा० ४–१–४) इति सूत्रस्य व्याख्याने बालमनोरमादौ स्पष्टम्।

२. महाभाष्ये 'नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः' इति न्यायाकारो

ग्राहकम्। तात्पर्यग्राहकत्वञ्च स्वसमभिव्याहृतपदस्यार्थान्तरशक्तिद्योतकत्वमित्यागतम् इवनिपातस्य द्योतकत्वम्।' (**प० ल० म०** पृ. ६१) एवञ्च 'घटो न पट इत्यत्र घटपदस्य घटप्रतियोगिक भेदाश्रये अप्रसिद्धा शक्तिरेव लक्षणा, नञ्पदं तात्पर्यग्राहकम्। तात्पर्यग्राहकत्वं द्योतकत्वमेवेत्युक्तम्।' (**प० ल० म०** पृ. ६८)। अत्रायमाशयः—

'चन्द्र इव मुखम्' इत्यत्र चन्द्र इति पदस्य चन्द्रसदृशम् इति लक्ष्यार्थः। तदनन्तरं चन्द्रपदार्थयोरभेदेनान्वयः। चन्द्रसदृशं मुखमित्यर्थो लभ्यते। तत्र च तादृशं लक्ष्यार्थमेव बोधयितुं वक्तामिप्रैतीति वक्तुराशयस्तात्पर्यम्। चन्द्रपदसमभिव्याहृतेन इवपदेनैव तत्तात्पर्यं द्योतितमस्तीति हेतोरिवपदं तात्पर्यग्राहकम् इत्युक्तम्। तथैव घटो न पट इत्यत्रापि निपातस्य वक्त्रभिप्रायग्राहकत्वेनैव द्योतकत्वम्। यद्यपि नागोजीभट्टेनोक्तम्—तात्पर्यग्राहकत्वं स्वसमभिव्याहृतपदस्यार्थान्तरशक्तिद्योतकत्वमिति—यद्यपि च प्रकृते चन्द्रपदस्य चन्द्रसदृशरूपलक्ष्यार्थबोधनशक्तिद्योतकत्वमेव तात्पर्यग्राहकत्वं तथापि लक्ष्यार्थबोधनशक्तेर्द्योतनं श्रोतुरेव मनसि समुदियात्। स च श्रोतुर्बोधः वक्ता एवमत्रामुमर्थमभिप्रैतीति बोधपूर्वकतयैव जायत इत्यास्तां तावत्।

एवन्तर्हि चन्द्र इव मुखमित्यत्र चन्द्रपदं लाक्षणिकं, घटो न पट इत्यत्र घट इति पदञ्च लाक्षणिकम्। स्वसमभिव्याहृतलाक्षणिकपदार्थविषयकमेवंरूपं तात्पर्यग्राहकत्वं तावन्न्यायवैशेषिकनयेऽपि प्रसिद्धम्। तथा हि न्यायवैशेषिकैर्वाक्ये शक्तेरभावात् शक्यसम्बन्धरूपा लक्षणाऽपि न स्वीक्रियते। तस्माद् "यत्र तु गभीरायां नद्यां घोष इत्युक्तं तत्र नदीपदस्य नदीतीरे लक्षणा गभीरपदार्थस्य नद्या सहाभेदान्वयः, क्वचिदेकदेशान्वयस्यापि स्वीकृतत्वात्। यदि तत्रैकदेशान्वयो न स्वीक्रियते, तदा नदीपदस्य गभीरनदीतीरे लक्षणा, गभीरापदं तात्पर्यग्राहकम्। बहुव्रीहावप्येवम्। तत्र हि चित्रगुपदादौ यद्येकदेशान्वयः स्वीक्रियते, तदा गोपदस्य गोमति लक्षणा, गवि चित्राभेदान्वयः। यदि त्वेकदेशान्वयो न स्वीक्रियते, तदा गोपदस्य चित्रगोस्वामिनि लक्षणा। चित्रपदं तात्पर्यग्राहकम्।" (**भाषापरिच्छेदः**, शब्दखण्डम्, वंगीयसंस्करणे पृ. ३७०–३७१)। "लक्षणा शक्यसम्बन्धस्तात्पर्यानुपपत्तित" इति लक्षणानुसारं[1] लक्ष्यार्थबोधे तात्पर्यज्ञानस्य हेतुतया नदीपदं गभीरनदीतीरप्रतीतीच्छयोच्छरितमिति तात्पर्यज्ञानं गभीरादिपद-

---

बोध्यः। नञ्समभिव्याहृतमिवसमभिव्याहृतञ्च पदं स्वबोध्यार्थसदृशस्य च बोधकमिति तदर्थः। नञ्पदम् इवपदञ्च तात्पर्यग्राहकम्, तथा ह्यर्थगतिः।

१. भाषापरिच्छेदः, शब्दखण्डम्

समभिव्याहारादेव भवति। एवञ्च यदि वैयाकरणनये तात्पर्यग्राहकत्वमेव द्योतकत्वं तर्हि न्यायवैशेषिकनयेऽपि द्योतकत्वस्वीकार आवश्यकः, अनायत्यापि तल्लक्षणस्य तत्रानुगतत्वात्। कदाचिदस्य द्योतकत्वस्य न्यायनये न्यायवैशेषिकनये वानुमानेन गतार्थतायां सत्यामपि तात्पर्यज्ञानस्य शाब्दबोधविषयत्वमेवाभिमततममिति तत्र व्यञ्जनाव्यापार एव प्रगल्भतेतरामिति व्यञ्जनावादिन आशय इत्यस्माकं प्रतिभाति।

'आख्यातमुपगृह्यार्थविशेषमिमे तस्यैव सृजन्तीत्युपसर्गाः' (**निरुक्तवृत्तिः**, पृ. ५८) इति दुर्गाचार्यव्याख्यानं दूरतोऽनुसृत्य बेटीहेइमान्-महोदया एवमभिधत्ते यदुपसर्गाणामेव स्वातन्त्र्येणार्थविशेषोपजननप्रवणता वर्तते यया च वस्तुतोऽर्थवन्त एव भवन्त्युपसर्गाः। **ऋग्वेदप्रातिशाख्यं** (११.५), यत्र खलु निपाता अर्थवाचका इत्युक्तं, तदपि प्रमाणत्वेन परामृष्टम्। या च तेषामर्थविशेषोपजननप्रवणता तयैव तेषाम् 'उपसर्गाः क्रियायोगे' (**पा०** १-४-५९) 'गतिश्च' (**पा०** १-४-६०) इति सूत्राभ्यां गतिरिति संज्ञा संगच्छते। उपसर्गस्तु क्रियार्थस्य प्रकारविशेषनियमनेन क्रियार्थस्यैवातिशयरूपां गतिमुपजनयतीति तत एव गतेर्गतित्वम्।[1] तदेवमुपसर्गाणामर्थविशेषोपजननसामर्थ्यादेव षड्दर्शनादिषु व्यावहृताश्शब्दाः प्रायश एवोपसर्गसमन्विताः। तेषु च भिन्नभिन्नदर्शनेषु स्वकीयमतवादविशेषानुसारमेवोपसर्गविशेषा उपयुज्यन्ते। तदेतत् सर्वमपि बहुभिरुदाहरणैर्महता युक्तिजालेन च प्रदर्शितम्। तथा हि परमार्थतत्त्वेन परिदृश्यमानस्य जगतो यादृशस्सम्बन्धस्तदनुसारमेव वेदान्तेषु उपसर्गविशेषास्समुच्चीयन्ते। तेषु च अधिरित्युपसर्गः वेदान्तेषु

1. "As will appear below, I am inclined to emphasize that explanation of **upa-sarga** which attributes to the prefixes a definite independent tendency, i. e. a meaning of their own. In favour also of this view **Ṛgveda Prātiśākhyas**, 1, 5, may be quoted, where the prepositions (and prefixes) are plainly called **artha-vācakas**, bearers of independent meanings. Their full functional tendency is furthermore enhanced by the teachings of **Pāṇini**, 1, 4, 59 ff. This pastmaster of Indian grammar attributes to "adnominal" prepositions, prefixes, and all other adverbial expressions like particles, etc., the significant term **gati**, motion, whatever limits the activity of the varbal function to any particular direction serves to increase the intensity, as it were, of the sentence." (**Significance of Prefixes**, pp. 2-3)

बाहुल्येन व्यवहृतः। अधिरित्युपसर्गेण उच्चतरस्थानत इत्यर्थ उपजन्यते। वेदान्तेषु च सर्वेषामपि जागतिकवस्तुजातानां स्वरूपमुच्चतरस्थानस्थपरमार्थ-तत्त्वापेक्षया एव विनिर्णीयते। तस्मादधिरित्युपसर्गो वेदान्तेषु प्राज्यभावेन प्रयुज्यते। तद्यथा—अधिस्थानम्—अध्यारोपः—अध्यास इत्येवमादिषु पारिभाषिकेषु शब्देषु।[1] एवञ्च क्रमेण हेइमान्महोदयाया मते प्राबल्येन एव सार्थका उपसर्गाः। सति चैवमर्थविशेषसमन्वितत्वेन वाचका एवोपसर्गा-स्स्युरिति चेदुच्यते। स्वसमभिव्याहृतक्रियापदार्थविशेषोपजनकत्वेन सत्यपि सार्थक्ये पदान्तरनैरपेक्ष्येण प्रयोगासम्भवाद् उपसर्गाणामर्थवत्त्वेऽपि वाचकत्वं नास्ति किन्तु द्योतकत्वेनैवार्थबोधकत्वमंगीक्रियत इत्यास्तां तावत्।

कर्मप्रवचनीयस्य द्योतकत्वम्

निपातेष्वेव केचन कर्मप्रवचनीया इत्युच्यन्ते। ते च 'कर्मप्रवचनीयाः' (पा० १-४-८३) इत्यधिकारसूत्रेण पाणिनिना परामृष्टाः। कर्मप्रवचनीय इति गुरुसंज्ञाकरणमन्वर्थत्वाय। तस्मादन्यत्र कर्मप्रवचनीयलक्षणं पुनरपि न प्रदत्तम्। कर्म क्रियां प्रोक्तवन्त इति कर्मप्रवचनीया इति व्युत्पत्त्या एव कर्म-प्रवचनीयस्वरूपं व्याख्यातमस्ति। निर्वचने बाहुलकाद् भूते कर्तर्यनीयर्। तेन सम्प्रति क्रियां न द्योतयन्तीति लभ्यते। यदुक्तं भर्तृहरिणा—

क्रियाया द्योतको नायं संबन्धस्य न वाचकः।
नापि क्रियापदाक्षेपी संबन्धस्य तु भेदकः॥ इति।

तथा हि जपमनुप्रावर्षदित्यत्र अनुना न क्रियाविशेषो द्योत्यते, अनुभवति सुखमित्यादौ यथा। नापि षष्टीविभक्त्या इव सम्बन्ध उच्यते, द्वितीययैव तस्योक्तत्वात्। एतच्चानुपदमेव स्फुटीभविष्यति। नाप्यत्रानुना प्रादेशं

---

1. "From this postulate arises the fundamental **Vedāntic** problem: what kind of relation is to be supposed to exist between this assumed transcendental unity and the observable empirical plurality ?

The choice of prefixes to be used for **Vedāntic** terms is made with respect to this basic **Vedāntic** problem. The prefix **adhi,** from above, is accordingly favoured. All actual facts are valued from the transcendental angle, from above. Terms like **adhi-sthāna** are accepted as a proper expression of the dependency of all worldly things on **a** superimposed order which is, at the same time, the basis and the ruling law from above." (Betty Heimann, **Significance of Prefixes O, p. 11**)

विपरिलिखति विमाय परिलिखतीत्यत्र विशब्देन मानक्रियेव क्रियान्तर-माक्षिप्यते, कारकविभक्तिप्रसंगात् । 'कर्मप्रवचनीययुक्ते द्वितीया' (**पा०** २-३-८) इति सूत्रेणोपपदविभक्तेरेव विधानात् । किन्तु जपसंबन्धि वर्षणमिति द्वितीययावगतः संबन्धो लक्ष्यलक्षणभाव एवेत्यवगमात् संबन्ध एवानुना विशेषेऽवस्थाप्यते । यदुक्तं 'संबन्धस्य तु भेदक' इति । नागोजीभट्टे-नापि निपातस्य 'संबन्धपरिच्छेदकत्वेन द्योतकत्वम्' इति । अत्रायं भावः । अनुर्लक्षणे (**पा०** १-४-८४) इति सूत्रेण लक्षणे द्योत्ये अनुः कर्मप्रवचनीयः स्यात् । जपमनु प्रावर्षदिति उदाहरणम् । कदा पर्जन्योऽवर्षदिति प्रश्ने उत्तरमिदम् । स च वृष्टिकालः दुर्ज्ञानत्वात् हेतुभूतजपेन लक्ष्यते । यथा 'शाखाग्रं प्रति द्विकलश्चन्द्र' इति वचनेन क्षीणत्वाद् दुर्लक्ष्यो द्विकलश्चन्द्रः विस्पष्टशाखाग्रसामीप्यरूपलक्षणेन लक्ष्यते तथैव सुपरिज्ञातेन जपकालेन वर्षणकालोऽप्यपरिज्ञातो लक्ष्यते इति भावः । न खलु हेतुभूतत्वेनायं जपः केवलं नियतपूर्वभावी किन्तु वर्षणकालमपि लक्षयितुं समर्थः । एवमेव द्वितीयया एवावगतो जपवर्षणयोः कार्यकारणभावसम्बन्धो लक्ष्यलक्षणभाव-रूपं विशेषमपि समश्नुते इति अनुना द्योत्यते ।

एवमेव कर्मप्रवचनीयस्यार्थविशेषद्योतकत्वम् 'अपिः पदार्थसम्भावनान्ववसर्गगर्हासमुच्चयेषु' (**पा०** १-४-९६) प्रभृतीनां सूत्राणां भट्टोजिदीक्षित-कृतव्याख्यानेष्ववलोकनीयम् । परन्त्विदमत्र चिन्त्यम् । 'अधिपरी अनर्थकौ' (**पा०** १-४-९३) इति सूत्रेणानर्थकावपि अधिश्च परिश्चेति निपातौ कर्म-प्रवचनीयौ भवतः । कुतोऽध्यागच्छति । कुतः पर्यागच्छति इत्युदाहरणे स्तः । तदेवमधिपर्योरनर्थकतया द्योत्यार्थस्य प्रसंग दूर एव आस्ताम् इति चेन्न । अत्र प्रभवति पराभवति अनुभवतीत्यादौ प्रादेरिवार्थान्तरद्योतकत्वाभावेऽपि धात्वर्थद्योतकत्वमस्त्येव ।[1] अर्थान्तरद्योतकत्वाभावेन अनर्थकत्वव्यवहारः । उक्तं च **भाष्ये**—'अनर्थान्तरवाचिनौ धातुनोक्तक्रियामेवाहतुः' इति ।

---

१. यथा अजादिषु सदेव स्त्रीत्वं टाबादिभिर्द्योत्यते । धातोर्वाच्य एवार्थ पुनरपि कर्मप्रवचनीयेन द्योत्यते, यथा अल्पतरेणालोकेन प्रकाश्यमानस्यापि घटस्य पुनरपि महत्तरेणालोकेनाभिव्यञ्जनं सम्भवति । बेटीहेइमान्-महोदयाया मते उभयत्रापि आ इत्यस्योपसर्गस्य यावानर्थस्तावानेव अधि-परीत्यनयोरपि । वस्तुतस्तु न सर्वथा निरर्थकावेव तौ । समभिव्याहृतस्य आ-इत्यस्य उपसर्गस्य अर्थेनैवार्थवत्त्वमुभयोरपि । न स्वकीयभावेनार्थविशेषमाकारद्योत्यातिरिक्तमर्थयत इत्यनर्थकौ भवत इति भावः । तयोरर्थविशेषबोधनप्रवणता नास्तीति हृदयम् । (एतदुत्तरपृष्ठ अंगलग्नमवलोक्यताम् ।)

सम्बन्धस्य भेदकत्वे सत्यपि कर्मप्रवचनीयस्य स्वसमभिव्याहृतपदान्तरार्थद्योतकत्वं नाम निपातलक्षणं न व्याहन्यते। तथा हि 'प्रतिनिधिप्रतिदाने च यस्मात्' (**पा०** २-३-११) इति सूत्रमेव परामृश्यताम्। अस्यायमाशयः। सदृशः प्रतिनिधिः।[1] दत्तस्य प्रतिनिर्यातनं प्रतिदानम्। तदेवं यत्सम्बन्धिनी प्रतिनिधिप्रतिदाने तस्मात् कर्मप्रवचनीययुक्तात् पञ्चमीत्यर्थः। उदाहरणं यथा—प्रद्युम्नः कृष्णात् प्रति। युद्धादौ प्रद्युम्नः कृष्णनिरूपितसादृश्यवानित्यर्थः। 'पञ्चम्यर्थः सादृश्यम्। प्रतिस्तु तद्द्योतक' इति **बालमनोरमा**कारः। एवंक्रमेण स्वसमभिव्याहृतविभक्तेरेवार्थं द्योतयन् प्रतिर्निपातः नागोजीभट्टप्रदत्तं प्रथमलक्षणं समालिङ्गति।

व्याकरणशास्त्रे व्यञ्जनास्वरूपम्

यद्यपि नागोजीभट्टप्रभृतिभिरर्वाचीनैर्व्यञ्जनांगीकार आवश्यक इत्युच्यते तथापि मूलग्रन्थेषु व्याच्यार्थतो व्यंग्यार्थस्य भेदो विस्पष्टं नोपलभ्यते। अर्वाचीनेभ्यष्टीकाव्याख्यानादिभ्य एव मूलग्रन्थेष्वपि द्योत्यस्यार्थस्य परामर्शोऽस्तीति ज्ञायते। किञ्च द्योत्यार्थविशेषस्वीकरणं विना मूलग्रन्थानामाशय एव विस्पष्टं नोपलभ्यते। किन्तु तथापि व्याकरणशास्त्रे गड्डरिकाप्रवाहेणैव वाच्यार्थलक्ष्यार्थयोस्तथा वाच्यार्थव्यंग्यार्थयोर्भेदः समुपस्थापितः। व्याकरणशास्त्रे चार्थप्रत्यायनार्थमपेक्ष्यमाणा व्यञ्जना नाम या वृत्तिस्तस्याः स्वरूपं लक्षणाया एव वा स्वरूपं न कुत्रापि तथा निर्णीयते यथाऽलंकारशास्त्रादिषु तत्प्रतिपक्षभूतन्यायमीमांसादिशास्त्रेषु वा। व्याकरणशास्त्र उपलभ्यमानो विधिरपि प्रायशो वाच्यार्थलक्ष्यार्थव्यंग्यार्थनिर्विशेषमेव प्रवर्तते। अथच व्यंग्योऽप्यर्थः प्रकामं वैयाकरणैरभ्युपगम्यते। सति चैवमेषु विषयेषु अनुपदमुपन्यस्तान्युदाहरणान्यपि प्रथमतो विमृश्यन्तां नाम।

"**Pāṇini,** 1, 4, 93, gives a strange explanation of this corroborating process of combining similar prefixes. In the compounds **adhy-ā-gacchati** and **pary-ā-gacchati** the prefixes **adhi** and **pari** are called **an-arthakau.** This should not be translated as 'meaning less', but as 'without a (special) tendency'. This interpretation, suggested by the context, is in accord with the original meaning of the root **arth,** to strive after". (Betty Heimann, **Significance of Prefixes in Sanskrit Philosophical Terminology,** p, 65)

१. मुख्यस्याभावे सति तत् सदृश उपादीयते स प्रतिनिधिः। (तत्त्वबोधिनी)। प्रतिनिधिस्वरूपमग्रे प्रतीकतत्त्वस्वरूपविचारप्रसंगेऽपि विचारयिष्यते।

(१) **काव्यप्रकाश**टीकायां **बालबोधिन्यां** प्रसंगक्रमेण झलकीकरमहोदयोऽप्याह—"...न च पाणिनिसूत्रे शब्दानां व्याच्यातिरिक्तार्थकत्वमदृष्टचरमिति शंकनीयम् बहुषु सूत्रेषु लक्ष्यार्थकानां व्यंग्यार्थकानां प्रयोगोपाध्यर्थकानां च ग्रहणस्य दर्शनात्। अत एव 'इदुदुपधस्य चाप्रत्ययस्य' (८।३।४।) इति सूत्रे धातुपदस्य धात्वंशे लाक्षणिकत्वमुक्तम् तथा 'न धातुलोपे आर्धधातुके' (१।१।४) इति सूत्रे धातुपदस्य धात्वंशे लाक्षणिकत्वमुक्तम् 'उपोऽधिके च' (१।४।८१) इति सूत्रे उपेतिपदस्याधिकार्थद्योतकत्वं हीनार्थद्योतकत्वं चोक्तम् द्योतकत्वं च क्वचित् समभिव्याहृतपदोपशक्तिव्यञ्जकत्वमिति प्राक् प्रतिपादितम् 'संमाननोत्संजनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः' (१।३।३६) इति सूत्रे नयतेः प्रयोगोपाध्यर्थकत्वमिति दिक्।" (**काव्यप्रकाशः**, पृ. ५५१)

(२) व्याकरणशास्त्रे न केवलं निपाता एव द्योतकाः किन्तु केचन प्रत्यया अपि द्योतकाः। उदाहरणं यथा 'अजाद्यतष्टाप्' (**पा०** ४-१-४) इति सूत्रम्। तद् व्याख्यानयन्नाह भट्टोजिदीक्षितः—'अजादीनामकारान्तस्य च वाच्यं यत् स्त्रीत्वं तत्र द्योत्ये टाप् स्यात्' इति। अस्यायमाशः—पुंस्त्वन्तथा स्त्रीत्वन्तथा नपुंसकत्वमिति त्रिविधमपि लिंगं जातिव्यक्तिवत् प्रातिपदिकार्थ एव। तथा हि

स्वार्थो द्रव्यञ्च लिंगञ्च संख्या कारकमेव च।
अमी पञ्चैव लिंगार्थास्त्रयः केषाञ्चिदग्रिमा॥

इति त्रिकपक्षे पञ्चकपक्षेऽपि वा लिंगस्य प्रातिपदिकार्थत्वमेवोररीकृतम्। प्रत्ययार्थत्वे प्राधान्यापत्तौ अजा खट्वा इत्यादौ स्त्रीत्वविशिष्टतादात्म्यावच्छिन्नाजादिबोधोऽनुभवसिद्धो विरुध्येत। किं च मातृदुहितृस्वसृगवादिशब्देषु विनापि टावादिप्रत्ययं स्त्रीत्वविशिष्टार्थस्य बोधात् प्रातिपदिकस्य तत्र शक्त्यावश्यकत्वे टाबादीनामपि शक्तिकल्पने गौरवम्। तदेवं स्त्रीत्वमिह प्रातिपदिकस्यैव वाच्यम्, टाबादयस्तु तद्द्योतकाः। परन्तु टाबादिषु सत्सु अवश्यं स्त्रीत्वबोध इति **नियमः** न तु टाबादिषु सत्स्वेवेति नियमः।

परन्तु इयमत्र शंका समुदेति। यत्तु अजादीनां वाच्यमेव स्त्रीत्वं तत् किमर्थं पुनरपि द्योत्यं स्यात्। किमर्थमेक एव अर्थो वाच्यः सन्नपि द्योत्यः स्यादिति। उच्यते। अत्रापि निपातविषये नागोजीभट्टेन यदुक्तं 'द्योतकत्वञ्च स्वसमभिव्याहृतपदनिष्ठवृत्त्युद्बोधकत्वम्' इति तदेव व्याख्यानम्। तस्मात् प्रातिपदिकार्थभूतस्यैव लिंगस्याजशब्देनाभिधातव्ये टाप्प्रत्ययस्तात्पर्यग्राहकः। तात्पर्यग्राहकत्वन्तु द्योतकत्वमिति पूर्वमेवोक्तम्। तथा हि अयमजशब्द एव स्त्रीव्यक्तिं बोधयति इति ज्ञानम्, अस्याजशब्दस्य स्त्रीव्यक्तिबोधने शक्तिरिति ज्ञानं तथानेनाजशब्देन स्त्रीव्यक्तिं बोधयितुमभिलषतीति ज्ञानं श्रोतु-

र्मनसि समुद्भावयति अजशब्दसमभिव्याहृतष्टाप्। अत एव टाप् द्योतक इत्युक्तम्। तदेवं वृत्तिर्नाम तत्तदर्थबोधने वक्तुः प्रवृत्तिः। वक्तुर्हृदगता प्रवृत्तिरेव शब्द उपचरिता सती शब्दवृत्तिरित्युच्यते इति च सम्भावयामः। एतदनुरूपा स्थितिराकांक्षायोग्यतयोरपि। तथा हि 'वाक्यं स्याद्योग्यताकांक्षासत्तियुक्तः पदोच्चयः।' (**साहित्यदर्पणम्** २।१) इति कारिकार्धस्य वृत्तौ विश्वनाथकविराजेनोच्यते—'आकांक्षा प्रतीतिपर्यवसानविरहः। सा च श्रोतुर्जिज्ञासारूपः।.....आसत्तिर्बुद्ध्यविच्छेदः। अत्राकांक्षायोग्यतयोरात्मधर्मत्वेऽपि पदोच्चयधर्मत्वमुपचारात्' इति।

अत्र पुनरिदं पृच्छ्यते। ननु यदि त्रिविधमपि लिंगं जातिव्यक्तिवत् प्रातिपदिकार्थ एव यदि तावत् टाबादिभिः प्रातिपदिकार्थरूपमेव स्त्रीत्वं द्योत्यते कथं तर्हि पुंस्त्वमपि केनचित् प्रत्ययेन द्योत्यं न स्यात्। अत्रोच्यते। यथा हि टाबादिषु सत्सु अवश्यं स्त्रीत्वबोध इति नियमः, न तु टाबादिषु सत्स्वेवेति नियमस्तथैव इहापि प्रत्यये सत्येव पुंस्त्वबोध इति नियमो नास्ति। एवञ्च कदाचिल्लिंगं द्योत्यमिति कृत्वा वाच्यद्योत्ययोर्गड्डरिकाप्रवाहेणैव भेदः।

(३) कदाचित्तु स्त्रीप्रत्ययादिभिः स्त्रीत्वाद्यधिकतया अर्थान्तरमपि प्रत्याय्यते। तथा हि 'क्तादल्पाख्यायाम् (**पा०** ४-१-५१) इत्यत्र 'करणादेः क्तान्तादददन्तात् स्त्रियां ङीप् स्यादल्पत्वे द्योत्ये। अभ्रलिप्ती द्यौः। अल्पाख्यायां किम्—चन्दनलिप्ता अंगना।' इति व्याख्यानमेवात्र मानम्। एतच्च स्त्रीप्रत्ययद्योत्यमल्पत्वं करणगतं भवति अथवा क्रियागतमेव भवति। अल्पत्वस्य करणगतत्वे अभ्रैरल्पैराच्छन्ना इत्यर्थः। अल्पत्वस्य क्रियागतत्वे अभ्रैरीषदाच्छन्नेति बोधः। एवमत्र प्रत्ययस्य लिंगाद्यतिरिक्तार्थविशेषाभिव्यञ्जकत्वं निर्विवादम्।

(४) द्विर्वचनेनाप्यर्थजातं द्योत्यत इति वैयाकरणैः प्रदर्शितम्। तथा हि 'प्रकारे गुणवचनस्य' (**पा०** ८-१-१२) इति सूत्रानुसारं द्विर्वचनेन सादृश्यं द्योत्यते। तथैव क्वचिदानुपूर्व्यं द्योत्यते। कदाचिच्च सम्भ्रममभिव्यज्यते। किञ्च क्रियासमभिहारस्यापि द्योत्यत्वे द्विर्वचनं भवति। क्रियासमभिहारो नाम पौनःपुन्यं भृशत्वं च। अत्र तावद् भट्टोजिदीक्षितवचनमेव किञ्चित् प्रमाणरूपेण परामृश्यताम्। यदुक्तं—"सादृश्ये द्योत्ये गुणवचनस्य द्वे स्तस्तच्च कर्मधारयवत्। 'कर्मधारयवदुत्तरेषु' इत्यधिकारात्। तेन पूर्वभागस्य पुंवद्भावः, 'समासस्य' इत्यन्तोदात्तत्वं च। पटुपट्वी। पटुपटुः। पटुसदृशः, ईषत्पटुरिति यावत्। गुणोपसर्जनद्रव्यवाचिनः केवलगुणवाचिनश्चेह गृह्यन्ते। शुक्लशुक्लः पटः। 'आनुपूर्व्ये द्वे वाच्ये' (**वार्तिकम्** ४६९२) मूले मूले स्थलः। 'सम्भ्रमेण प्रवृत्तौ यथेष्टमनेकधा प्रयोगो न्यायसिद्धः'

(**वा०** ५०५६ । सर्प सर्प । बुध्यस्व बुध्यस्व । सर्प सर्प सर्प । बुध्यस्व बुध्यस्व बुध्यस्व । 'क्रियासमभिहारे च' (**वा०** ४६६५) । लुनीहि लुनीहीत्येवायं लुनाति । 'नित्यवीप्सयोः' (**सू०** २१४०) इति सिद्धे भृशार्थं द्वित्वार्थमिदम् । पौनःपुन्येऽपि लोटा सह समुच्चित्य द्योतकतां लब्धुं वा ।..."इति ।

इत्थं द्योतनीयेऽर्थे काव्ये द्विर्वचनप्रयोगस्योदाहरणं दिङ्मात्रेण यथा—

वयं तु न वितृप्याम उत्तमश्लोकविक्रमे ।
यच्छृण्वतां रसज्ञानां स्वादु स्वादु पदे पदे ॥

(**भागवतम्** १-१-१७) इति । अत्र क्रिया समभिहारन्यायेन स्वादुत्वस्य भृशत्वं द्योतितमस्ति ।

(५) समासप्रकरणे 'अव्ययं विभक्तिसमीपे'ति (**पा०** २-१-६) सूत्रं व्याख्यानयन्नाह भट्टोजिदीक्षितः—"विभक्ति—इत्यादेरयमर्थः । विभक्त्यर्थादिषु वर्तमानमव्ययं सुबन्तेन सह समस्यते, सोऽव्ययीभावः । विभक्तौ तावत् । हरौ इत्यधिहरि । सप्तम्यर्थस्यैवात्र द्योतकोऽधिः । हरि ङि अधि इत्यलौकिकं विग्रहवाक्यम् । अत्र निपातेनाभिहितेऽप्यधिकरणे वचनसामर्थ्यात्सप्तमी" इति । अस्यायं भावः—हरौ इत्रि लौकिकविग्रहः । तेन यावदवगम्यते तावदेवाधिहरीति समासेनाप्युच्यते । अधि शब्दस्य हरौ इत्यनेन अव्ययीभावसमासे सुब्लुकि समासविधौ[1] अव्ययमिति प्रथमानिर्दिष्टत्वात्[2] अधेः पूर्वनिपाते[3] समासादुत्पन्नस्य सुपः 'अव्ययादाप्सुपः' इति सूत्रेण (**पा०** २-४-८२) लुक् । अधिहरि इति रूपम् । ननु हरौ इति लौकिकविग्रहे समस्यमानः अधिशब्दः कुतो नोपात्त इत्यत आह—सप्तम्यर्थस्यैवात्र द्योतकोऽधिरिति । तथाचाधिद्योत्यार्थस्य अधिकरणत्वस्य सप्तम्यैव उक्तत्वात् अधिशब्दो न पृथगुपात्तः । यत्र तु अलौकिकविग्रहवाक्ये हरि ङि अधि इत्यत्र उभावपि श्रूयेते तत्रायं प्रश्नः—ननु अधिना निपातेनाधिकरणस्योक्तत्वात् कथं हराविति सप्तमी । तत्रोच्यते—'सहसुपा' (**पा०** २-१-४) इत्यतः सुपेत्यनुवर्त्य 'अव्ययं विभक्ति' (**पा०** २-१-६) इति सूत्रेणात्र सुबन्तेनैव समासविधानात् सप्तमी स्यादेव इति ।

अत्र तावदस्माकं व्यञ्जनाप्रपञ्चसमीक्षकाणामियं शंका समुदेति—ननु सप्तम्यर्थस्यैव द्योतकोऽधिरिति वचनेन वैयाकरणेन निपातस्य द्योतकत्वमुर-

---

१ 'अव्ययं विभक्तिसमीप ०' (पा० २-१-६) इति सूत्रे ।

२. अव्ययमिति प्रथमान्तपदेन निर्दिष्टत्वात् ।

३. 'प्रथमानिर्दिष्टं समास उपसर्जनम्' (पा० १-२-४३०) 'उपसर्जनं पूर्वम्' (पा० २ १-६) इति सूत्राभ्याम् ।

रीकृतम्। किन्तु तत्रैव तेनैव निपातेन सप्तम्यर्थस्याधिकरणत्वस्याभिहितत्वमप्युक्तमिति कथमेतत्। आलंकारिकाणां मते यदभिधायकं तत्तु द्योतकाद्भिन्नम्। अत्र तु एकमेवाधिकरणत्वरूपमर्थं प्रति एक एव निपातो द्योतकोऽभिधायकश्चेत्युच्यते। तदेवमत्रापि गड्डरिकाप्रवाहेणैव द्योतकत्वाभिधायकत्वयोर्भेदोऽस्तु।

वस्तुतस्तु अत्र निपातस्य सप्तम्यर्थद्योतकत्वे स्वसमभिव्याहृतपदनिष्ठशक्त्युद्बोधकत्वमिति यद्द्योतकलक्षणं तन्नास्ति। तत्र अधिहरीति समासे सप्तमीविभक्तेस्समभिव्याहृतत्वादर्शनात्। एवञ्चाधेः स्वस्यैवाधिकरणत्वरूपोऽर्थः द्योत्यः। तमर्थं प्रति द्योतकोऽधिः। अधेः स्वान्त्येन प्रयोगासम्भवान्न वाचकत्वम्। एवन्तर्हि—'निपातेनाभिहिते कर्मणि न कर्मविभक्तिः। परिगणनस्य प्रायिकत्वादि'ति वामनेन यदुक्तं[1] तत्कथं संगच्छते। उक्तञ्च भट्टोजिदीक्षितेनापि 'कर्मणि द्वितीया' (**पा०** २-३-२) इति सूत्रस्य व्याख्याने 'क्वचिन्निपातेनाभिधानम्, यथा विषवृक्षोऽपि संबर्ध्य स्वयं छेत्तुमसाम्प्रतम्।' इति। एवंक्रमेण निपातस्य यदभिधायकत्वमुक्तं तस्य कोऽभिप्राय इति प्रश्नः।

अत्रोच्यते। अभिधानं नाम कथनं, वचनं, शक्त्या प्रत्यायनं वा। अभिधानं च प्रायेण तिङ्कृत्तद्धितसमासैर्भवति। एवञ्च कदाचित् तिङा कर्ताऽभिधीयते कदाचिच्च कर्माभिधीयते। तिङा कर्तुरभिधानस्योदाहरणं यथा—चैत्रः पचति। अत्र चैत्रपदस्य यावानर्थोऽभिधेयरूपेण लभ्यते तावानेवार्थः पचतीत्याख्यातादपि। वैयाकरणैराख्यातस्य कर्तरि शक्तिः स्वीक्रियते, नैयायिकैस्तु कृतावित्यन्यदेतत्।[2] तदेवं चैत्रः पचतीत्यत्र चैत्रपदात् चैत्रस्योपस्थितिः पचिधातोः पाकस्य आख्याताच्च कर्तुः। एवञ्च चैत्रपदेनाभिहितस्यार्थस्य तिङाभिहितेनार्थेनान्वये चैत्राभिन्नः पाककर्ता इत्यन्वयो लभ्यते। य एव चैत्रः स एव पाककर्ता इति बोधो जायते। एतत् तिङा कर्तुरभिधानस्योदाहरणम्। एतदेव तिङा वचनमिति चोच्यते। अत्र तिङा कर्ता वाच्यः। एवं तिङा कर्तरि वाच्ये सति कर्तरि प्रथमा विभक्तिस्स्यात्। तत्रैव कर्तरि प्रथमा (प्रातिपदिकार्थे प्रथमा) भवतीत्युच्यते। तिङा कर्मणोऽभिधानस्योदाहरणं यथा—'तण्डुलं पच्यते' इति। पचतीत्याख्याताद् यथा पाककर्तुर्बोधस्तथैवात्रापि पच्यत इत्याख्यातात् पाककर्मणो बोधः। तण्डुलाभिन्नं पाक-

---

१. काव्यालंकारसूत्रवृत्तौ। तथा च शिशुपालवधम् १-३ (मल्लिनाथस्य सर्वंकषा), सिद्धान्तकौमुदी (कारकप्रकरणे, कर्मणि द्वितीयेति सूत्रस्य भट्टोजिदीक्षितकृतं व्याख्यानम्), समासप्रकरणे प्रकृतसूत्रव्याख्याने बालमनोरमा चेत्यादिकमप्यत्रावलोकनीयम्।

२. भाषापरिच्छेदे शब्दखण्डोऽवलोकनीयः।

कर्म इति बोधश्च जायते। अत्र च कर्म एव तिङा अभिधेयं वाच्यं वा। अत्रैव कर्मणि वाच्ये 'कर्मणि प्रथमा' भवतीत्युच्यते। एवञ्च कदाचिन्निपातेनापि कर्मणोऽभिधानं सम्भवति। तथा हि 'विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतम्।' इत्यत्र विषवृक्षः कर्म। विषवृक्षपदस्य योऽर्थः साम्प्रतमिति निपातेन स एवार्थः प्रत्याय्यते। साम्प्रतमित्यस्य हि युज्यत इत्यर्थः। एवं क्रमेण कर्मणि वाच्ये वर्तमानेन युज्यत इत्याख्यातेन युजिधातोः कर्म प्रत्याय्यते। य एव विषवृक्षः स एव युजिधातोः कर्म इत्यभेदेनान्वयः स्यात्। वस्तुतस्तु समग्रवाक्यस्यायमर्थः समुदेति—संवर्धनकर्माभिन्नो विषवृक्षोऽपि स्वयंछेदनविषये युजिधातुकर्माभिन्नो न इति।

इदमत्रावधेयम्। यद्यपि चैत्रः पचतीत्यत्र पचतीत्याख्यातस्य पाकर्तृ इति शक्यार्थ एव, तस्माच्च साक्षादेव पाकर्तृ चैत्रः पचतीत्याख्यातेनाभिधीयत इति वक्तुं युज्यते तथापि निपातेन यत्राभिधानं तत्र किञ्चिद्वैलक्षण्यमस्ति। तथा हि साम्प्रतमिति निपातस्य प्रथमतो युज्यत इत्यर्थः समाक्षिप्यते। तदनन्तरमेव युज्यत इत्याख्यातमुखेन परम्पराक्रमेण निपातार्थस्य कर्मपदार्थेनाभेदेनान्वयः। तस्मात्तिङ्नादिसाधारण्येन यद्यपि निपातस्याभिधायकत्वमुक्तन्तथापि वस्तुतो निपातस्य द्योतकत्वमेव निर्विवादम्। किन्तु व्यवहारदशायां द्योतकत्वव्यञ्जकत्वयोः क्षोदीयानेव भेदो वैयाकरणैः परिचीयत इत्यवदाततरमेतत्।[1]

(६) **सिद्धान्तकौमुद्यां** भ्वादिप्रकरणे 'विधिनिमन्त्रणाऽमन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्' (**पा०** ३-३-१६१) इति सूत्रमस्ति। तद्व्याख्यानयन् भट्टोजिदीक्षितः प्राह—

"एष्वर्थेषु द्योत्येषु वाच्येषु वा लिङ् स्यात्। विधिः प्रेरणम्, भृत्यादेर्निकृष्टस्य प्रवर्तनम्। निमन्त्रणं नियोगकरणम्, आवश्यके श्राद्धभोजनादौ दौहित्रादेः प्रवर्तनम्। आमन्त्रणं कामचारानुज्ञा। अधीष्टः सत्कारपूर्वको व्यापारः। 'प्रवर्तनायां लिङ्' इत्येव सुवचम्। चतुर्णां पृथगुपादानं प्रपञ्चार्थम्।" इति।

अत्रायं प्रश्नः समुदेति। ननु द्योत्येषु वाच्येषु वेति कथमुच्यते। तेऽर्था द्योत्या एव वा सन्तु वाच्या एव वा। इति। तत्र द्योत्यत्ववाच्यत्वयोरुभयोरुल्लेखे तावदयमाशयः—

---

१. "नागेशेन निपातस्याभिधायकत्वं नाङ्गीकृतं भाष्यानारूढत्वात्।" इत्यस्मिन् प्रसङ्गेऽस्मद्गुरुवर्यैः डॉ० सातकडिमुखोपाध्यायमहोदयैः स्वहस्तेन लिखितं मन्तव्यमप्यवधानमर्हति।

विधिर्नाम प्रवर्तना। विध्यादिषु सर्वत्रैव प्रवर्तना एव लिङ्लोऽर्थः। सा च प्रवर्तना अन्येनान्यस्य प्रेरणम्। सति चैवं लिङि कर्तुः कर्मणि प्रवृत्तस्य स्वातन्त्र्यं न स्यादन्यप्रेरितत्वेन तेन कर्मकरणात्। किन्तु 'लः कर्मणि च भावे चाऽकर्मकेभ्यः' (पा० ३-४-६९) इति सूत्रेण लिङ्लोऽपि लकारस्य कर्तृ-कर्मभावबोधकत्वमस्त्येव। किन्तु स्वातन्त्र्यरहितं किमेतत् कर्तृत्वमिति विरोधस्समुदेति। तस्माद् विध्यादयो हि न लिङ्लो वाच्याः। न च लः कर्मणि चेति शास्त्रं लिङ्व्यतिरिक्तलकारविषयकमेवास्त्विति वाच्यम्। तथा सति यजेतेत्यादौ कर्तृवाचकत्वाऽभावेन शबाद्यनापत्तिः स्यात्। तदेतद्-विरोधसमाधानव्याजेनोक्तं द्योत्येषु इति। अर्थात् साधारण्येन लकारस्य कर्तृभाववाचकत्वाद् यत्र कर्तृभावः लिङो वाच्यार्थस्तत्र प्रवर्तना लिङ एव द्योत्यार्थः। एवं प्रवर्तना न लिङो वाच्यार्थ इत्यविरोधः। तत्र पुनरपि पृच्छ्यते, ननु किं कर्तृभावोऽत्र सर्वथैव नास्ति। तत्रोच्यते—'लः कर्मणि चेति सूत्रं सामान्यविषयं सदपि विधिनिमन्त्रणेति विशेषशास्त्रेण न बाध्यते, अविरोधात्। तथा च विध्यादिविशिष्टकर्तृत्वमेव लिङोऽर्थः। गच्छेदित्यत्र अन्यप्रवर्तितत्वे सत्यपि कर्तुर्वास्तविकगमनक्रियां प्रति स्वातन्त्र्यमपि न व्याहन्यते। तस्माद् विध्यादिविशिष्टकर्तृभावरूपः लकारस्य साधारण एव अर्थः लिङो विशेषरूपेण रूषित इति विशिष्टोऽयमर्थः लिङो लकारस्य वाच्य एवोच्यताम् इति भावेनोक्तं वाच्येषु वेति। तदेवमत्रापि वाचकत्वद्योतकत्वयोः स्वल्पीयान् एव भेद इत्यनपह्नवनीयमेतत्।[1]

एवञ्च व्याकरणशास्त्रे लक्ष्योऽप्यर्थो वाच्यार्थसाधारण्येनैवोररीकृतः। तथा हि कारकप्रकरणे (**सिद्धान्तकौमुद्यां**) 'साधकतमं करणम्' (**पा०** १-४-४२) इति सूत्रस्य व्याख्याने भट्टोजिदीक्षितेनोक्तम्—'तमब्ग्रहणं किम्। गंगायां घोषः' इति। अयमाशयः—ननु 'साधकं करणम्' इत्येवास्तु, कारकाधिकारादिह कारकमिति वर्तते, साधकं कारकं हि पर्यायः, तथा चोभयोपादानेन प्रकर्षो[2] लभ्यते। अत एव पृच्छति—तमब्ग्रहणं किमिति। तत्रोच्यते। कारकप्रकरणे गौणमुख्यन्याय एतत्सूत्रादन्यत्र न प्रवर्तत इति ज्ञापनाय एव तमब्ग्रहणम्। तदेव ज्ञापनफलेनोदाह्रियते—गंगायां घोष इति। तथा

---

१. "हेतुमति णिच् इत्यनेन देवदत्तोऽन्नं पाचयतीत्यत्र यथा प्रयोज्यकर्तुः स्वव्यापारे स्वातन्त्र्यम् एवं लिङ्गादिष्वपीति बोध्यम्। द्योत्यत्वे धातोरेवार्थाः स्युर्विध्यादय" इत्यप्यस्मद्गुरुवर्याणां डॉ० मुखोपाध्यायमहोदयानामत्र प्रासङ्गिकं मन्तव्यमस्ति।

२. स चायं प्रकर्षो व्यंग्यार्थरूप एवेति सर्वथा व्यञ्जनाप्रपञ्चस्यैव व्यापकत्वम्।

ह्युक्तज्ञापनानंगीकारे इहाधिकरणसंज्ञा न स्यात्। 'आधारोऽधिकरणम्' इत्यत्रान्वर्थमहासंज्ञाबलादेवाधारलाभे पुनस्तद्ग्रहणसामर्थ्यात् सर्वावयव-व्याप्त्या य आधारः सोऽधिकरणमित्यर्थः स्यात्। एवं च तिलेषु तैलं दध्नि सर्पिरित्यादावेव स्यात, गंगायां घोषः, कूपे गर्गकुलमित्यादौ न स्यात् अतस्त-मब्ग्रहणमिति **भाष्येऽपि** स्पष्टम्।

इदन्त्वत्रावधेयम्। यदा तीरधर्म आधारत्वं सामीप्यात् प्रवाहे उपचर्यते अर्थात् गंगापदस्य प्रवाहरूपं वाच्यार्थमेव स्वीकृत्य प्रवाहस्य घोषं प्रति गौण-माधारत्वमुररीक्रियते तदेदं प्रयोजनम्। तीरस्य मुख्याधारत्वात्। आद्यपक्षे विभक्तिर्लाक्षणिकी द्वितीये तु प्रकृतिर्लाक्षणिकी। एवं क्रमेण वैयाकरणविधि-विधानदशायां वाच्यार्थलक्ष्यार्थयोरपि प्रश्लिष्टतयैव भेद आविष्कर्तुं शक्यते इत्यास्तां तावत्।

अत्राऽयं प्रश्नः समुदेति। ननु शब्दशास्त्र एव शब्दार्थप्रकाराणां वैलक्षण्य-विषये किमर्थमेतदौदासीन्यम् इति। तत्रास्माभिरेवं समाधीयते। परमार्थतः सर्वेऽप्यर्थास्स्फोटमुखेनोपलभ्यमाना व्यंग्यार्था एव। किञ्च वैयाकरणैः परमार्थतः शब्दार्थयोरपि (पदपदार्थयोरपि) भेदो न गण्यते। सति चैवं व्यावहारिकदशायां वाच्यलक्ष्ययोर्वा यत्र यावान् भेदस्स्वीकरणीयस्तावानेवा-गत्यांगीक्रियते। इतरथा तु स्वाभाविकमेव औदासीन्यमित्यलं बहुना।

नैयायिकदृष्ट्या व्यञ्जनाव्यापारसमीक्षा

ध्वन्यालोकस्य तृतीयोद्द्योते वैयाकरणमतं विचार्यं तदनन्तरं नैयायिक-मतं विचारयितुं प्रवर्तत आनन्दवर्धनः। तन्मते हि अलौकिक एवार्थे तार्किकानां विमतयो निखिलाः प्रवर्तन्ते न तु लौकिके। तस्माद् वाचकानां शब्दानामवाचकानां च गीतध्वनीनामशब्दरूपाणां च चेष्टादीनां यत्सर्वेषामनु-भवसिद्धमेव व्यञ्जकत्वं तन्नैयायिकैरपि नापह्नुयते। तथाप्यस्त्येकोऽति-सन्धानावसर इत्यानन्दवर्धनः शंकते। तथा हि व्यञ्जकत्वमनुभवसिद्धमभ्यु-पगम्यापि कदाचित् कश्चिन्नैयायिको ब्रूयात्—'व्यञ्जकत्वं शब्दानां गमकत्वं तच्च लिंगत्वमतश्च व्यंग्यप्रतीतिर्लिंगिप्रतीतिरेवेति लिंगिलिंगभाव एव तेषां व्यंग्यव्यञ्जकभावो नापरः कश्चित्' इति। (**ध्वन्यालोकः**–३. पृ. ४४८)। किञ्च मीमांसकमतोपक्षेपावसरे आनन्दवर्धनेन वक्त्रभिप्रायापेक्षया व्यञ्जकत्वं स्वयमेवाभ्युपगतम्। वक्त्रभिप्रायश्चानुमेयरूप एव इति च ब्रूयात्। (**ध्वन्या-लोकः**–३. पृ ४४८)।

अस्यां शंकायामानन्दवर्धन एवं ब्रूते—व्यञ्जकत्वस्य लिंगत्वेऽपि ध्वनि-वादिनो न काचित् क्षतिः। व्यञ्जकत्वं नाम अभिधादिप्रसिद्धशब्दव्यापार-

विलक्षणव्यापारत्वं यस्य लिंगत्वेऽपि प्रसिद्धव्यापारविलक्षणत्वं न व्याहन्यते। (**ध्वन्यालोकः**—३. पृ. ४४८)। एवञ्चापाततो नास्त्येव नैयायिकैरपि कोऽपि विरोधः। परन्तु 'न पुनरयं परमार्थो यद्व्यञ्जकत्वं लिंगत्वमेव सर्वत्र व्यंग्यप्रतीतिश्च लिंगिप्रतीतिरेवेति।' (**ध्वन्यालोकः**—३. पृ. ४४९)। तदेवं-क्रमेण यद्यपि व्यञ्जकत्वस्य लिंगत्वेन तादात्म्यं निरस्तं तथापि आनन्दवर्धन-वचनेषु काचिदेवंविधापि स्थितिरुपलभ्यते यस्यां व्यञ्जकस्य कादाचित्कं लिंगत्वमपि स्वीकृतमस्तीति प्रतिभाति। तद्यथा—

(क) 'तस्माद् वक्त्रभिप्रायरूप एव व्यंग्ये लिंगतया शब्दानां व्यापारः' (**ध्व.** पृ. ४५२-४५३) इत्युच्यत आनन्दवर्धनेन। अत्र वक्त्रभिप्रायो व्यंग्य इत्युक्तम्। तमेव प्रति शब्दो लिंगम् इति च। सति चैवं कदाचिद् व्यञ्जक-मपि लिंगं भवतीति आनन्दवर्धनसम्मतमेतत्।

(ख) 'तस्माल्लिंगिप्रतीतिरेव सर्वत्र व्यंग्यप्रतीतिरिति न शक्यते वक्तुम्।' (**ध्व.** पृ. ४५५) इत्यस्माच्चैवं प्रतिभाति यत् कुत्रचित् लिंगि-प्रतीतिरेव व्यंग्यप्रतीतिर्भवेदपीति।

(ग) 'यत्त्वनुमेयरूपव्यंग्यविषयं शब्दानां व्यञ्जकत्वं तद् ध्वनिव्यव-हारस्याप्रयोजकम्।' (**ध्व.** पृ. ४५५-४५६)। अस्माच्चैतत् स्पष्टं यदनुमेयं यद् भवति तत् कदाचिद्व्यंग्यमपि भवेदिति।

तदेवंविधासु भणितिषु सतीषु तदीयभणितिविशेषानेवानूद्यानुमानाभि-व्यञ्जनयोर्भेदविषय आनन्दवर्धनस्याशयमिहानुपदमेव समुन्नयामः।

आनन्दवर्धनमते अनुमानाभिव्यञ्जनयोर्भेदः

(१) 'तद्धि व्यञ्जकत्वं लिंगत्वमस्तु अन्यद् वा। सर्वथा प्रसिद्धशाब्द-प्रकारविलक्षणत्वं शब्दव्यापारविषयत्वं च तस्यास्तीति नास्त्येवावयो-र्विवादः।' (**ध्व.** पृ. ४४९) इति वचनसामर्थ्यात् व्यञ्जकत्वस्य लिंगरूपत्वे सति प्रसिद्धशब्दव्यापारविलक्षणत्वमनायाससिद्धमितीष्टमेव। व्यञ्जकत्वञ्च कदाचिल्लिंगरूपेणापि परिचीयते।

(२) किन्तु सर्वत्र व्यञ्जकत्वमेव लिंगत्वं न भवति। यदाह 'न पुनरयं परमार्थो यद्व्यञ्जकत्वं लिंगत्वमेव सर्वत्र व्यंग्यप्रतीतिश्च लिंगिप्रतीति-रेवेति।' (**ध्व.** पृ. ४४९)

(३) वक्त्रभिप्रायरूपो व्यंग्यः अनुमेयोऽपि भवतीति सत्यमेतत्। किन्तु नानेन शब्दार्थस्याथवा वाक्यार्थस्यानुमेयत्वं विवक्षितम्। वाक्ये प्रयुक्ते सति वक्तुर्वाक्यप्रयोगेच्छा वाक्येनार्थप्रत्यायनेच्छा च अनुमानविषयत्वमियाताम्। तद्वाक्यस्यार्थस्तु वाच्यत्वेनाथवा व्यंग्यत्वेन सर्वदा प्रतिपाद्य एव न त्वनुमान-

विषयतामेति कदाचिदपि। यदाह—'स तु द्विविधोऽपि प्रतिपाद्यो विषयः शब्दानां न लिंगितया स्वरूपेण प्रकाशते, अपि तु कृत्रिमेणाकृत्रिमेण वा सम्बन्धान्तरेण।' (**ध्व**. पृ. ४५१) इति। तदेवं वाक्यार्थः सति सम्भवे व्यंग्य एव भवति न त्वनुमेयः। किन्तु शब्दव्यापारव्यतिरिक्तस्थलेषु लिंगत्वं व्यञ्जकत्वमपि भवेत्।

(४) ननु 'भम धम्मिअ वीसद्धो सो सुणओ अज्ज मारिओ तेण।
गोलाणईकच्छकुडंगवासिणा दरिअसीहेण॥ (**का**. प्र. ५)

इत्येवमादिषु वक्तृबोद्धव्यादिवैशिष्ट्यपर्यालोचनपूर्वकतयैव[1] वाच्यार्थव्यतिरिक्ततया अभ्रमणादिरूपाणामर्थानां बोधसम्भवात् कथं न तेषामनुमेयत्वमिति चेदुच्यते—'यदि हि लिंगितया तत्र शब्दानां व्यापारः स्यात्तच्छब्दार्थे सम्यङ्मिथ्यात्वादिविवादा एव न प्रवर्तेरन् धूमादिलिंगानुमितानुमेयान्तरवत्।' (**ध्व**. ३ पृ. ४५१-४५२) इति। किञ्च 'प्रतिपाद्यस्य च विषयस्य लिंगित्वे तद्विषयाणां विप्रतिपत्तीनां लौकिकैरेव क्रियमाणानामभावः प्रसज्येत।' (**ध्व**. ३. पृ. ४५३)। अस्यायमाशयः—व्यंग्यार्थावाप्तये काव्येऽपि कदाचिदनुमानानुरूपतया कियन्मानसिकपर्यालोचनमानन्दवर्धनादिभिरप्यभ्युगम्यते। यथाह आनन्दवर्धनः—"...एषूदाहरणेषु शब्दशक्त्या प्रकाशमाने सत्यप्राकरणिकेऽर्थान्तरे वाक्यस्यासंम्बद्धार्थाभिधायित्वं मा प्रसाङ्क्षीदित्यप्राकरणिकप्राकरणिकार्थयोरुपमानोपमेयभावः **कल्पयितव्यः** सामर्थ्यात्..." (**ध्व**. २. पृ. २४४) इति। अर्थशक्त्युद्भवानुरणनरूपव्यंग्यध्वनिमभिलक्ष्याभिनवगुप्तपादेनाप्यभ्यधायि—'...अपि तु प्राग्वृत्ततपश्चर्यादिवृत्तान्तानुस्मरणेन तत्र प्रतिपत्तिं करोतीति क्रमव्यंग्यतैव। रसस्त्वत्रापि दूरत एव व्यभिचारिस्वरूपे **पर्यालोच्यमाने** भातीति तदपेक्षया लक्ष्यक्रमतेव।' (**लोचनम्**. पृ. २४९-२५०) इति। तदेवं व्यंग्यार्थस्य कदाचित् पर्यालोच्यमानत्वेऽपि व्यंग्यार्थस्याव्यभिचारिसत्यत्वाभावाद् व्यञ्जनाया अपि प्रमाणत्वासम्भवाद् व्यंग्यार्थस्य नानुमेयत्वम्।

(५) किन्तु आनन्दवर्धनमते अनुमेयोऽपि व्यंग्यो भवति। यदाह—'तस्माद् वक्त्रभिप्रायरूप एव व्यंग्ये लिंगतया शब्दानां व्यापारः।' इति। (**ध्व**. ३, पृ. ४५२)। न तु इतरथा व्यंग्य एव अनुमेयः। अनुमेयस्सन्नपि

---

१. वक्तृबोद्धव्यकाकूनां वाक्यवाच्यान्यसंनिधेः।
प्रस्तावदेशकालादेर्वैशिष्ट्यात् प्रतिभाजुषाम्।
योऽर्थस्यान्यार्थधीहेतुर्व्यापारो व्यक्तिरेव सा॥ (**का**. प्र. ३)

व्यंग्यो भवति । किन्तु व्यंग्यत्ववशादेव नियमेनैवानुमेयत्वं नायाति । काव्यार्थादिरूपस्य व्यंग्यस्य सम्यङ्मिथ्यात्वादिविचारविषयत्वाभावात् । अनुमितेर्व्यञ्जनाया महाविषयत्वाच्च । यदाह—'न च व्यञ्जकत्वं लिंगत्वरूपमेव आलोकादिष्वन्यथा दृष्टत्वात् ।' (ध्व. ३, पृ. ४५३) इति ।

(६) पुनरपि व्यञ्जनाया महाविषयत्वं स्थापयन्नाह—'तस्माल्लिंगिप्रतीतिरेव सर्वत्र व्यंग्यप्रतीतिरिति न शक्यते वक्तुम् ।' (ध्व. ३. पृ. ४५५) इति ।

(७) 'नन्वेवं तर्हि मा भूद्यत्र यत्र व्यञ्जकता तत्र तत्रानुमानत्वम्, यत्र यत्रानुमानत्वं तत्र तत्र व्यञ्जकत्वमिति कथमपह्नूयत इत्याशंकायामाह[1]—'यत्त्वनुमेयरूपव्यंग्यविषयं शब्दानां व्यञ्जकत्वं तद् ध्वनिव्यवहारस्याप्रयोजकम् ।.....तद्धि व्यञ्जकत्वं कदाचिल्लिंगत्वेन कदाचिद्रूपान्तरेण शब्दानां वाचकानामवाचकानां च सर्ववादिभिरप्रतिक्षेप्यमित्यस्माभिर्यत्न आरब्धः ।' इति (ध्व. ३. पृ. ४५५-४५६) । अत्रायमाशयः । साम्प्रतं ध्वनिरेव विवेच्यो विषयः । तत्रापि च प्रकृते शब्दव्यापार एव । व्यञ्जकत्वमपीह शब्दव्यापारत्वेनैव विचार्यं नः । यत्र च शब्दस्यैव लिंगतया व्यवहारस्तत्र कियद् व्यञ्जकत्वमिति तदेव प्रष्टव्यम् । अभिप्रायादिविषयकं शब्दस्य यल्लिंगत्वं तद् व्यञ्जकत्वमेवेत्यभ्युपगतम् । किन्तु वह्न्यादिविषयकं धूमादिगतं यल्लिंगत्वं तदपि व्यञ्जकत्वं भवति नवेति नैवात्र विचार्यम् । तथापि प्रसंगत उच्यते । अलंकारशास्त्रे व्यञ्जना नाम वाचकत्वादिविलक्षणः शब्दव्यापारविशेषः । धूमादिभ्यः वह्न्याद्यनुमाने शब्दव्यापार एव न प्रगल्भत इति कुतो धूमस्य व्यञ्जकत्वचर्चा । ननु आलोकेऽपि घटाभिव्यञ्जके शब्दव्यापारो नास्तीति कथं तत्र व्यञ्जकत्वमिति चेत् तत्तु साधारणरूपमेव व्यञ्जकत्वं न तु शब्दव्यापाररूपम् । न तद् ध्वनिव्यवहारस्य प्रयोजकम् । तदेवमालोकादिसाधारण्येन यदि धूमादिषु स्वज्ञानेनान्यधीहेतुत्वदर्शनाद् व्यञ्जकत्वं स्वीक्रियते, स्वीक्रियतां नाम । न तेन व्यञ्जनानामकस्य शब्दव्यापारस्य स्वरूपहानिस्स्यात् । किन्तु अनुमानस्य प्रमाणत्वे सति धूमे व्यञ्जकत्वाभ्युपगमाद्व्यञ्जनाया अपि प्रमाणत्वं न शङ्कनीयम् । न चाप्यनेन क्रमेण व्यञ्जनाया अनुमानान्तर्भावप्रसंग इत्यास्तां तावत् ।

(८) तदेवमभिप्रायादिषु व्यञ्जकत्वस्य लिंगत्वरूपदर्शनेऽपि उभयोर्न तादात्म्यं शंकनीयम् । व्यञ्जकत्वस्य महाविषयत्वात् । प्रमाणत्वेनास्वीकृतत्वाच्च । तत एवाभिप्रायादिष्वपि स्वे महिम्नि प्रतिष्ठितस्य व्यञ्जकत्वस्य

---

१. लोचनम्, ३. पृ. ४५५.

यदि परमनुमानेनानुगृह्यमाणत्वमेव न तु तत्त्वमिति तदेव विस्पष्टयन्नभिनवगुप्तपाद आह—'यत एव हि क्वचिदनुमानेनाभिप्रायादौ क्वचित् प्रत्यक्षेण दीपालोकादौ क्वचित् कारणत्वेन गीतध्वन्यादौ क्वचिदभिधया विवक्षितान्यपरे क्वचिद् गुणवृत्त्या अविवक्षितवाच्येऽनुगृह्यमाणं व्यञ्जकत्वं दृष्टं तत एव तेभ्यः सर्वेभ्यो विलक्षणमस्य रूपं नस्सिध्यति ।' इति (**लोचनम्** . ३. पृ. ४५६) ।

(९) अनुमेयस्यापि व्यंग्यरूपेण ग्रहणसम्भवादेव—

हरत्यघं संप्रति हेतुरेष्यतः शुभस्य पूर्वाचरितैः कृतं शुभैः ।
शरीरमाजां भवदीयदर्शनं **व्यनक्ति** कालत्रितयेऽपि योग्यताम् ॥

(**शिशुपालवधम्** . १–२६)

इत्यादि लोकप्रयोगोऽपि संगच्छत इति वयं सम्भावयामः ! अत्रानुमानस्यैव व्यञ्जनारूपत्वमुपोद्बलयन् मल्लिनाथ आह—'व्यनक्ति गमयति' इति । किन्तु एवं सर्वेष्वप्यनुमानोदाहरणेषु व्यञ्जनाव्यवहारापत्तिर्नैव शंकनीया । अनुमाने प्रमाणत्वमादाय अनुमानत्वमेव स्वीक्रियते न तु अभिव्यक्तित्वम् । यत्र त्वनुमानविषयेऽपि प्रमाणत्वनैरपेक्ष्येण स्वज्ञानेनान्यधीहेतुत्वमात्रं लिंगस्य परिचीयते तत्रैव व्यञ्जकत्वमंगीक्रियत इति दिक् ।

(१०) अत्रायं शंका समुदेति । ननु प्रदीपादिगतव्यञ्जकत्वविलक्षणत्वेन काव्यगतं व्यञ्जकत्वमुरीकर्तुं तस्य शब्दव्यापारत्वमुपन्यस्तम् । तर्हि तद् व्यञ्जकत्वं वाचकेष्ववाचकेष्वेव वा शब्देष्वेव भवतु । कथं तर्हि अर्थव्यञ्जकतास्वीकारः संगच्छते इति । तत्रोच्यते । अर्थव्यञ्जकतायामपि शब्दप्रमाणवेद्य एव मुख्योऽर्थः अर्थान्तरमभिव्यनक्तीति हेतोर्मूलतो व्यंग्यार्थस्यापि शब्दसमाश्रितत्वमेव । तदेवं शब्दव्यापार एव अर्थसामर्थ्येनानुगृह्यमाणस्सन् प्रसरतीति भावः । यदाह मम्मटः—

'शब्दप्रमाणवेद्योऽर्थो व्यनक्त्यर्थान्तरं यतः ।
अर्थस्य व्यञ्जकत्वे तत् शब्दस्य सहकारिता ॥

न हि प्रमाणान्तरवेद्योऽर्थो व्यञ्जकः ।' इति (**का. प्र.** ३) । तदेवमर्थव्यञ्जकतायामपि परम्पराक्रमेणापि शब्दव्यापारत्वमव्याहतम् ।

(११) एवन्तर्हि आलोकादिषु व्यञ्जकत्वस्वीकारेऽपि शब्दसाम्राज्यगतस्य ध्वनिव्यवहारभित्तिभूतस्य व्यञ्जनाव्यापारस्य किञ्चिद् विलक्षणमेव रूपमस्तीत्यनपह्नवनीयम् । शब्दालोकादिसाधारण्येन यद्व्यञ्जकत्वं तत्तु स्वरूपप्रकाशकत्वे सति परावभासकत्वमिति साधारणलक्षणालिंगितत्वेनैव । तस्यैव साधारणव्यञ्जकत्वस्य शब्दगतं व्यञ्जकत्वमप्यवान्तरभेदविशेष

एव । लिंगत्वमप्यपर एवाऽवान्तरभेद इति कृत्वा लिंगत्वशब्दार्थगतव्यञ्जकत्वयोरत्यन्तविशकलितत्वमनपह्नवनीयमेवेत्यास्तां तावत् ।

(१२) अत्रानुमानव्यञ्जनयोर्भेदस्थापने या रीतिरनुसृता तत्कल्पा एव रीतिरग्रेऽपि अर्थापत्तिव्यञ्जनयोर्भेदस्थापने समाश्रयिष्यते ।

व्यक्तिविवेककारवचोविवेचनम्

(१) वस्तुमात्रालंकाररसादिभेदेन त्रिरूपो व्यंग्यार्थो ध्वनिवादिना स्वीकृतः । महिमभट्टमते स तु स्वरूपतः व्यंग्यार्थ इति वक्तुं न युज्यते । व्यक्तिलक्षणानालिंगितत्वात् । स तु त्रिरूपोऽप्यर्थो वाच्यार्थात् क्रमभावेन समासाद्यते । क्रमभावेन समासादनीयत्वात् वाच्यव्यंग्ययोस्साध्यसाधनभाव एवोररीकर्तव्यः । एवञ्च साध्यसाधनभावे समभ्युपगते अनुमितेरेव व्यंग्यप्रतीतिर्न तु व्यक्तेरित्यपि स्वीकार्यम् । ननु तर्हि महिमभट्टमते किं नाम व्यक्तिलक्षणमिति चेदनुपदमेव तत् स्फुटीभविष्यति । तस्यैव भूमिकारूपेण साम्प्रतं महिमभट्टप्रवर्तितः काव्यानुमितिवादस्समासेन परामृश्यते ।

(२) वस्तुमात्रादित्रिरूपोऽपि व्यंग्यार्थः वस्तुतोऽनुमित एव । तदेवमनुमितेनार्थेन यत्र काव्यविरचनं भवति तत्रैव काव्यानुमितिर्नामानुमितिविशेष उपलभ्यते । यदुक्तम्—

वाच्यस्तदनुमितो वा यत्रार्थोऽर्थान्तरं प्रकाशयति ।
सम्बन्धतः कुतश्चित् सा काव्यानुमितिरित्युक्ता ॥

इति (**व्यक्तिविवेकः**, १-२५. हिन्दी-संस्करणे पृ. १११) ।

(३) वाच्यव्यंग्ययोः प्रतीतौ क्रमस्त्वनस्वीकार्यः । किञ्च वक्तृबोद्धव्यादिवैशिष्ट्यपर्यालोचनक्रमेणैव वाच्यादर्थाद् व्यंग्यार्थोऽवसीयत इति निर्विवादमनुमानस्यैवायं विषयो न तु व्यक्तेः । वस्त्वलंकाररूपोऽप्यर्थो वाच्यदशायां न तथा चमत्करोति यथा खल्वनुमेयदशायाम् । यदुक्तं—'वाच्यो ह्यर्थो न तथा चमत्कारमातनोति यथा स एव विधिनिषेधादिः काक्वभिधेयतामनुमेयतां वावतीर्ण इति स्वभाव एवायमर्थानाम् ।' इति (**व्य. वि.** १, पृ. ५६) । अस्मिन् विषय आनन्दवर्धनस्यैव वचनं प्रमाणरूपेणोपस्थापयति महिमभट्टो यथा—

'साररूपो ह्यर्थः स्वशब्दानभिधेयत्वेन प्रकाशितः सुतरां शोभामावहति । प्रसिद्धिश्चेयमस्त्येव विदग्धपरिषत्सु यदभिमततरं वस्तु व्यंग्यत्वेन प्रकाश्यते न वाच्यत्वेन' इति (**व्य. वि.** पृ. ६०) ।

(४) वस्तुमात्रालंकाररूपयोर्व्यंग्यार्थयोरनुमेयत्वे निर्विवादमवधारिते अयं प्रश्नः समुदेति—ननु क्रमभावावसेयः गम्यगमकभावस्तु रसरूपे व्यंग्ये

कथं संगच्छते इति। पूर्वपक्षत्वेन तेनैतदप्युपस्थापितं—'ननु विभावादिवाक्यार्थसमकालमेव रत्यादीनां भावानां प्रतीतिरुपजायमाना सर्वैरेवावधार्यते। न तु तत्रान्तरा संबन्धस्मरणादिविघ्नव्यवधानसंवित्तिः क्वाचिदि'ति। (**व्य. वि. १**, पृ. ६२)। किञ्च महिमभट्टमते घटप्रदीपन्यायेन व्यंग्यव्यञ्जकभावः केवलं तत्रैव सम्भवति यत्र क्रमराहित्येन व्यंग्यव्यञ्जकयोरुभयोरेव समकालमेव प्रतीतिः स्यात्। व्यंग्ये प्रतीते च व्यञ्जकबुद्धिर्न दूरीभवेत्। तदेवंरूपं व्यंग्यव्यञ्जकभावमुररीकृत्यैवं पूर्वपक्षमुपस्थापयन्नाह—

"रत्यादिप्रतीतिरिति मुख्यवृत्त्यैव व्यंग्यव्यञ्जकभावाभ्युपगमः। तत्र प्रदीपघटादिवदुपपन्नो गम्यगमकभावः। यत् स एवाह—"व्यञ्जकत्वमार्गे तु यदार्थोऽर्थान्तरं द्योतयति तदा स्वरूपं प्रकाशयन्नेवासावन्यस्य प्रकाशकः प्रतीयते प्रदीपवद् यथा 'लीलाकमलपत्राणि गणयामास पार्वती' इत्यादौ इति। पुनः स एवाह—"न हि व्यंग्ये प्रतीयमाने वाच्यबुद्धिर्दूरीभवति। वाच्याविनाभावेन तस्य प्रकाशनात्। तस्माद् घटप्रदीपन्यायस्तयोः। यथैव हि प्रदीपद्वारेण घटप्रतीतावुत्पन्नायां न प्रदीपप्रकाशो निवर्तते तद्वद्व्यंग्यप्रतीतौ वाच्यावभास' इति।" (पूर्वपक्षः)। (**व्यक्तिविवेकः १. हिन्दी-संस्करणे**, पृ. ६६)

(५) एवमस्मिन् पूर्वपक्षे महिमभट्टस्य समाधानं रसरूपस्याप्यर्थस्यानुमेयत्वस्थापनञ्च तद्वचनेनैवास्माभिरत्रोपस्थाप्येते—

"उच्यते। वाच्यप्रतीयमानयोरर्थयोर्यथा क्रमेणैव प्रतीतिर्न समकालं यथा चानयोर्गम्यगमकभावः तथा तेनैव व्यक्तिवादिना तयोः स्वरूपं निरूपयितुकामेनाप्युक्तं, तदेवास्माभिः समाधित्सुभिरिह लिख्यते परम्।

तद्यथा—'न हि विभावानुभावव्यभिचारिण एव रसा इति कस्यचिदवगमः। अत एव विभावादिप्रतीत्यविनाभाविनी रसादीनां प्रतीतिरिति तत्प्रतीत्योः कार्यकारणभावेनावस्थानात् क्रमोऽवश्यम्भावी। स तु लाघवान्न लक्ष्यत इत्यलक्ष्यक्रमा एव सन्तो व्यंग्या रसादय इत्युक्तम्' इति।

पुनश्च 'तस्मादभिधानाभिधेयप्रतीत्योरिव वाच्यव्यंग्यप्रतीत्योर्निमित्तनिमित्तिभावाद् नियमभावी क्रमः। स तूक्तयुक्तेः क्वचिल्लक्ष्यते क्वचित्तु न लक्ष्यते।' इति (**व्यक्तिविवेकः १. पृ. ६७**)

(६) एवंक्रमेण व्यंग्यस्य सर्वेषु प्रकारेषु वाच्यव्यंग्ययोस्साध्यसाधनभावं संसाध्य सर्वस्यैव ध्वनेरनुमानेऽन्तर्भावं दर्शयन्नाह महिमभट्टः—

'तदेवं वाच्यप्रतीयमानयोर्वक्ष्यमाणक्रमेण[1] लिंगलिंगिभावस्य समर्थनात्

---

१. व्यक्तिविवेकस्य तृतीयविमर्शे ध्वनिकारोदाहृतेषु ध्वनिकाव्येषु अनुमानसिद्धिप्रदर्शनक्रमेण।

सर्वस्यैव ध्वनेरनुमानान्तर्भावः समन्वितो भवति तस्य च तदपेक्षया महाविषयत्वात्। महाविषयत्वं चास्य ध्वनिव्यतिरिक्तेऽपि विषये पर्यायोक्तादौ गुणीभूतव्यंग्यादौ च सर्वत्र सम्भवात्।' इति (**व्य. वि.** १. पृ. ६७)

(७) यत्र घटप्रदीपन्यायेन प्रकाश्यप्रकाशकयोः साहित्येन क्रमराहित्येन प्रकाशनं भवति केवलं तत्रैव व्यंग्यव्यञ्जकभावः स्वीक्रियते महिमभट्टेन। शब्दार्थविषयकव्यंग्यव्यञ्जकयोर्मध्ये तु अनुमानप्रक्रियायाः साकल्येन सद्भावादनुमानमेवोररीकरणीयम्। यदुक्तम्—

वाच्यप्रत्येययोर्नास्ति व्यंग्यव्यंञ्जकतार्थयोः।
तयोः प्रदीपघटवत् साहित्येनाप्रकाशनात्॥
पक्षधर्मत्वसम्बन्धव्याप्तिसिद्धिव्यपेक्षणात्।
वृक्षत्वाग्रत्वयोर्यद्वद् यद्वच्चानलधूमयोः॥
अनुमानत्वमेवात्र युक्तं तल्लक्षणान्वयात्।
(**व्यक्तिविवेकः** १. ३३-३५ वाराणसीसंस्करणे पृ. ११२)

(८) महिमभट्टमते कार्यकारणभावमुखेन गम्यगमकभावस्य सुलक्ष्यत्वात् स्फोटश्रूयमाणवर्णयोरपि व्यंग्यव्यञ्जकभावो नास्ति। तदेवं ध्वनिव्यपदेशस्य श्रूयमाणवर्णस्य व्यञ्जकत्वाभावात् तत्सादृश्यानुरोधेन व्यंग्यार्थसमन्विते काव्ये यो ध्वनिव्यवहारः सोऽप्यनुपपन्नः। यदुक्तम्—

"अतएव श्रूयमाणानां शब्दानां ध्वनिव्यपदेश्यानामन्तःसन्निवेशिनश्च स्फोटाभिमतस्यार्थस्य व्यंग्यव्यञ्जकभावो न सम्भवतीति व्यञ्जकत्वसाम्याद् यः शब्दार्थात्मनि काव्ये ध्वनिव्यपदेशः सोऽप्यनुपपन्नः, तत्रापि कार्यकारणमूलस्य गम्यगमकभावस्योपगमात्।" इति (**व्य. वि.** १; हि. सं. पृ. ६१)

(९) यस्त्वालंकारिकाणां मते लक्षणाव्यापारलभ्यो लक्ष्यार्थस्सोऽपि महिमभट्टस्य मते अनुमेयार्थ एव। यदुक्तम्—

गोत्वारोपेण बाह्लीके तत्साम्यमनुमीयते।
को ह्यतस्मिन्नतत्तुल्ये तत्त्वं व्यपदिशेद् बुधः॥
इति (**व्य. वि.** १, वाराणसी सं. पृ. ११८)।

अस्मिन् विषये अधिकन्तु मूल एवानुसन्धेयमित्यलमप्रस्तुतवस्तुविस्तरेण।

(१०) नन्वस्तु गोत्वसाम्याद्यनुमानानुरोधेन लक्ष्यार्थस्याप्यनुमेयत्वम्। तदेवमस्त्वंशतोऽपास्तः व्यञ्जनाविषयः। निपातानां द्योतकत्वं तु भवताप्यभ्युपगन्तव्यमिति चेन्महिमभट्टेन निपातानामपि द्योतकत्वं न स्वीक्रियते किन्तु वाचकत्वमेव महता युक्तिजालेनोपपाद्यते। यस्तु तथाविधेऽपि वाचके निपाते पूर्वाचार्याणां द्योतकव्यपदेशः स तु भाक्त एव। यदुक्तं—

प्रादीनां द्योतकत्वं यत् कैश्चिदभ्युपगम्यते।

तद् भाक्तमेव तत्रेष्टं न मुख्यं तदसम्भवात् ॥ (**व्य०वि०** १-७५) इति। तदेवं ध्वनिकाव्यस्य व्यवहारप्रथितं यदस्ति व्यञ्जकत्वं तदपि भाक्तं कृतकं वा। यदुक्तं—

स्वाभाविकं ध्वनेर्युक्तं व्यञ्जकत्वं न दीपवत्।
धूमवत् किन्तु कृतकं सम्बन्धादेरपेक्षणात् ॥ (**व्य० वि०** १-७४) इति।

एवंक्रमेण वह्न्यनुमानलिंगे धूमेऽपि कैश्चित्कृतकं व्यञ्जकत्वमभ्युपगतमस्तीत्यग्रे दर्शयिष्यते।

(११) महिमभट्टस्यानुमितिवादमभ्युपगम्याप्येवं शंक्यते—ननु वाच्यव्यंग्ययोर्यः साध्यसाधनभावस्तस्मिन् काचन त्रुटिरुपलभ्यते। तथा हि 'यदि सर्व एव वाक्यार्थः साध्यसाधनभावगर्भ इत्युच्यते, तद्, यथा साध्यसाधनयोस्तत्र नियमेनोपादानं तथा दृष्टान्तस्यापि स्यात्, तस्यापि व्याप्तिसाधनप्रमाणविषयतयावश्यापेक्षणीयत्वात्।'[1] तथा हि पर्वतो वह्निमान् धूमादित्यनुमानस्थले वह्निव्याप्यधूमवान् पर्वत इति परामर्शदशायां यत्र यत्र धूमस्तत्र तत्र वह्निरिति व्याप्तिस्मरणदशायां यथा महानसादाविति दृष्टान्तस्योपोद्वलनमस्ति। किन्तु काव्ये कदाचिदपि दृष्टान्तस्य प्रयोगो न दृश्यते। तथा हि अनुमितानुमेयार्थविषयस्योदाहरणमुपन्यस्याह महिमभट्टः—

'अनुमितानुमेयार्थविषयो यथा—

पत्युः शिरचन्द्रकलामनेन स्पृशेति सख्या परिहासपूर्वम्।
सा रञ्जयित्वा चरणौ कृताशीर्माल्येन तां निर्वचनं जघान ॥

इत्यत्र हि नखरञ्जनानन्तरं परिहासपूर्वं सख्या कृताशिषो देव्या यदेतदवचनं माल्येन हननं तत् तदनुभावभूतं तस्याः कौतुकौत्सुक्यप्रहर्षलज्जादिव्यभिचारिसम्पदमनुमापयति। सा चानुमीयमाना सती भगवति भवे भर्तरि रतिमनुमापयति।' इति (**व्य. वि.** १, वाराणसी, सं. पृ. ५७-५४.)। तदेवं काव्ये दृष्टान्तोपन्यासाभावात् कथमनुमानसमर्थनं संगच्छत इति प्रश्नः। तत्रोच्यते समाधानमुखेन महिमभट्टेन—

"न। प्रसिद्धसामर्थ्यस्य साधनस्योपादानादेव तदपेक्षायाः प्रतिक्षेपात्। तदुक्तम्—

'तद्भावहेतुभावौ हि दृष्टान्ते तदवेदिनः।
ख्याप्येते विदुषां वाच्यो हेतुरेव च केवलः ॥'

इति (**व्य. वि.** १. पृ. ६९)। अस्यायमाशयः। यत्तु काव्ये साधनत्वेनोपन्यस्तं तत्साध्यं प्रति सुप्रद्धिम्। सुप्रसिद्धत्वादेव दृष्टान्तस्मरणनैरपेक्ष्येणैव

---

१. व्यक्तिविवेकः।, उक्तसंस्करणे पृ. ६९.

तत्रानुमितिरनुमातुर्मानसमवतरति । तदेवं यस्सहृदयस्स एवानुमेयार्थमासाद्य काव्यसौन्दर्यं स्वदते । अन्यत्रापि च विद्वदविद्वद्भेदेन व्याप्तिसाधनप्रमाणविषयस्य दृष्टान्तस्याप्रयोगं प्रयोगञ्चोपपादयन् शास्त्रसम्मतिमुपन्यस्यति—तद्भावहेतुभावाविति ।

आयातं तर्ह्येवंक्रमेण काव्यानुमानतर्कानुमानयोः किञ्चिद्वैलक्षण्यम् । यदाह व्यक्तिविवेकविमर्शकारो राजानकरुय्यकः—"काव्यानुमानं तर्कानुमानविलक्षणं काव्यस्य चमत्कारसारत्वात् । न्यायमुखेनापि चमत्कार एव विश्रान्तेः । तर्कानुमानं तु कर्कशन्यायरूपतया प्रवृत्तं तर्कस्य कर्कशतामुद्बहति । काव्ये त्वेतद्वैपरीत्यात् सहृदयानामधिकारान् न व्याप्त्यादिमुखेनानुमानप्रदर्शनसमर्थनमिति ।" (**व्य. वि.** वाराणसी संस्करणे, पृ. ६६)

(१२) एवंक्रमेण दृष्टान्तस्मरणनैरपेक्ष्यादिसमर्थनात् पूर्वोक्तोदाहरणे पत्युः शिरश्चन्द्रकलेति पद्ये यत्र यत्र माल्येन हननं तत्र तत्रैव कौतुकौत्सुक्यप्रहर्षलज्जादिव्यभिचारिसम्पद् इति व्याप्तिग्रहणं न समुपन्यस्तं तदुपयोगी दृष्टान्तोऽपि कश्चिन्न समुद्दिष्टः । काव्ये समुद्देशं विनैवान्येषां मा भूत् सहृदयानान्तु दृष्टान्तस्मरणपूर्वकं माल्यहननव्यभिचारिसम्पदो व्याप्तिग्रहणं भवत्येव । लोके चेष्टाविशेषभावविशेषयोर्व्याप्तिग्रहणे सहृदयानां योऽभिनिवेशः स तु मम्मटभट्टेनापि स्वीकृतः । तथा हि अभिनवगुप्तपादानां रसप्रक्रियां व्याख्यानयन्नाह मम्मटभट्टः—'लोके प्रमदादिभिः स्थाय्यनुमानेऽभ्यासपाटववतां····· सामाजिकानां वासनात्मतया स्थितः स्थायी रत्यादिको····· शृंगारादिको रसः ।' इति (**का. प्र.** ४) ।

(१३) मम्मटभट्टादिभिः 'मम धम्मिअ' प्रभृतिषु पद्येषु व्यंग्यव्यञ्जकयोरप्यर्थयोः कियाञ्चन साध्यसाधनभाव उररीक्रियते । किन्तु तेषु स्थलेषु उपलभ्यमानोऽयं साध्यसाधनभावो दुष्टहेतुसापेक्ष इति हेत्वाभासत्वेनैव तत्रानुमाननिरासः ।

व्यक्तिविवेकस्य तृतीयविमर्शे सर्वप्राथम्येन—

भम धम्मिअ वीसद्धो सो सुणओ अज्ज मारिओ देण ।
गोलाणइकच्छकुडंगवासिणा दरिअसीहेण ॥

इति पद्ये वैशद्येनानुमानसंगतिं दर्शयति । (**व्य. वि.** वाराणसी संस्करण, पृ. ४६३) । मम्मटभट्टस्तु समासेन तदेवानूद्य आह—'अत्र गृहे श्वनिवृत्त्या भ्रमणं विहितं गोदावरीतीरे सिंहोपलब्धेरभ्रमणमनुमापयति यत् यत् भीरुभ्रमणं तत्तद्भयकारणनिवृत्त्युपलब्धिपूर्वकं गोदावरीतीरे च सिंहोपलब्धिरिति व्यापकविरुद्धोपलब्धिः ।' इति (**का. प्र.** ५, पृ. २५३-२५४) । गोदावरीतीरं भीरुभ्रमणाभाववत् सिंहोपलब्धेरित्यनुमानशरीरम् ।

ध्वनिवादसमर्थकेन मम्मटभट्टेन किन्त्वत्रानुमानं न स्वीक्रियते। तेनात्र वाच्यव्यंग्ययोः सहभावो न प्रदर्शितः क्रमभावोऽपि न निराकृतः साध्यसाधनभावश्च न साकल्येन निरस्तः। तथापि अनुमानमपि न समर्थितं हेतोराभासत्वात्। यदुक्तमनुमाननिराकरणार्थं तत्रैव—

"भीरुरपि गुरोः प्रभोर्वा निर्देशेन प्रियानुरागेणान्येन चैवंभूतेन हेतुना सत्यपि भयकारणे भ्रमतीत्यनैकान्तिको हेतुः, शुनो बिभ्यदपि वीरत्वेन सिंहान्न बिभेतीति विरुद्धोऽपि, गोदावरीतीरे सिंहसद्भावः प्रत्यक्षादनुमानाद्वा न निश्चितः अपि तु वचनात् न च वचनस्य प्रामाण्यमस्ति अर्थेनाप्रतिबन्धादित्यसिद्धश्च, तत्कथमेवंविधाद्धेतोः साध्यसिद्धिः।" (**का. प्र.** ५)

(१४) पूर्वोक्तक्रमेण केवलं हैतोराभासत्वेनैव वाच्यादर्थाद् व्यंग्यस्यार्थस्य वक्तृबोद्धव्यप्रकरणादिपर्यालोचनक्रमेण मानसतर्कविशेषेण समासादनमनुमानं न भवति। अनुमानस्य प्रमाणविशेषत्वेनानुमेयो व्यंग्योऽप्यर्थोऽविसंवादी प्रामाणिकरूपश्च स्यात्। दुष्टहेतुभिस्तु यत् साध्यं भवति तदविसंवादि न भवति इत्यस्मादेव कारणादत्रानुमानं न स्वीकृतमानन्दवर्धनपरवर्तिभिरालंकारिकैः। महिमभट्टमते तु दुष्टहेतुनापि साध्यो विषयोऽनुमेय एव। काव्ये च व्यंग्यार्थस्य प्रामाण्याप्रामाण्यविचारे न कोऽपि सहृदयः कदापि प्रवर्तते। तस्मात् काव्येऽनुमितस्य विषयस्य प्रामाण्यनैरपेक्ष्येणास्वादात्मिका प्रतीतिरेव पार्यन्तिकं फलम्। प्रतीतस्यार्थस्य प्रामाण्यविचारस्तु नितान्तं दूर एव परिहृतः। तथा चाह महिमभट्टः—"प्रतीतमात्रपरमार्थं च काव्यादि तावतैव विनेयेषु विधिनिषेधव्युत्पत्तिसिद्धेः। तदुक्तम्—'भ्रान्तिरपि सम्बन्धतः प्रमा' इति।

'मणिप्रदीपप्रभयोर्मणिबुद्ध्याभिधावतोः ।
मिथ्याज्ञानाविशेषेऽपि विशेषोऽर्थक्रियां प्रति ॥
इति च।" (**व्य. वि.** १, वाराणसीसंस्करणे, पृ. ७६)।

अस्याशयस्तु राजानकरुय्यकेणैवं निभालितः—

'अत्र प्रतीतिसारत्वात् काव्यस्यानुमेयगतं वास्तवावास्तवत्वमप्रयोजकम्। उभयथा चमत्कारप्रतीतिलक्षणार्थक्रियासिद्धेः। प्रत्युतावास्तवत्वे यथा सिध्यति न तथा वास्तवत्व इति काव्यानुमितिरेवानुमानान्तरविलक्षणेत्यनुमानवादिनोऽयमभिप्रायः।' इति (**व्य. वि. वि.** वाराणसी संस्करण, पृ. ७६)

अस्मिन्नभिप्राये प्रमाणोपन्यासायानुमानवादिना धर्मकीर्तेः **प्रमाणवार्तिक**मवतारितं यथा 'मणिप्रदीपे'ति। अस्यायमाशयः—

कस्मिंश्चिन् मन्दिरे अपवरकस्यान्तःदीपो वर्तते। तस्य प्रभा बहिर्द्वार प्रदेशे रत्नमिव वर्तुला उपलक्ष्यते। तथा अन्यस्मिन् मन्दिरे अपवरकस्यान्तः

रत्नं तिष्ठति। तस्य रत्नस्य प्रभा बहिर्द्वारप्रदेशे प्रदीपप्रभेव रत्नसमानोपलभ्यते। तदेवमुभयत्रापि मणिर्न केनापि दृष्टः। किन्तु कयोश्चन पुरुषयोरुभयोरपि यथाक्रमं मणिप्रभादर्शनेन प्रदीपप्रभादर्शनेन च केवलं मणिभ्रान्तिरेव सञ्जाता। प्रभाद्वयमेव दूरतो दृष्ट्वा अयं मणिरयं मणिरिति बुद्धया द्वावपि पुरुषौ अभिधावनं कुरुतः। द्वयोरपि प्रभाविषये जायमानं मणिज्ञानं भ्रान्तमेव। तथापि मणिप्रभायां मणिबुद्धिं कृत्वा धावता पुरुषेण मणिर्लभ्यते। प्रदीपप्रभायां मणिबुद्धिं कृत्वा तु यो धावति तेन न लभ्यते। तदेवं या दीपप्रभायां मणिभ्रान्तिरस्ति सा विसंवादिभ्रम इति स्मृतो विद्वद्भिः, मणिलाभलक्षणार्थक्रियारहितत्वात्। मणिप्रभायां मणिबुद्धिस्तु मणिलाभलक्षणार्थक्रियाप्रयोजकत्वात् संवादिभ्रम इत्युच्यते।[1] एवञ्च मणिप्रभादिस्थलेषु प्रदीपप्रभादिवैलक्षण्येन कदाचिद् भ्रान्तिरपि प्रमा भवत्येव। तदेवं दुष्टत्वेन प्रतीयमानैरपि हेतुभिः काव्येऽविसंवादिनोऽर्थस्यानुमितिरस्तु। तत्कथमत्र हेत्वाभासत्वमात्रसमुद्भावनवृथाश्रमेण काव्यानुमितिर्निरस्यत इत्याशयोऽनुमानवादिनः।

यद्यत्र व्यक्तिवादिनानुमानमभ्युपगन्तुं नेष्यते तर्हि तस्यैकमेव शोभनं प्रत्युत्तरं स्यात्। यदुक्तं राजानकरुय्यकेण—

---

१. पञ्चदशी-९ इत्यत्र मणिप्रदीपप्रभयोरित्युद्धृतमस्ति। तदनन्तरञ्च प्रदत्तमस्ति श्लोकचतुष्टयं यथा—

दीपोऽपवरकस्यान्तर्वर्तते तत्प्रभा बहिः।
दृश्यते द्वार्य्यथान्यत्र तद्वद्दृष्टा मणेः प्रभा॥
दूरे प्रभाद्वयं दृष्ट्वा मणिबुद्ध्याभिधावतोः।
प्रभायां मणिबुद्धिस्तु मिथ्याज्ञानं द्वयोरपि॥
न लभ्यते मणिर्दीपप्रभां प्रत्यभिधावता।
प्रभायां धावतावश्यं लभ्यतैव मणिर्मणेः॥
दीपप्रभामणिभ्रान्तिर्विसंवादिभ्रमः स्मृतः।
मणिप्रभामणिभ्रान्तिः संवादिभ्रम उच्यते॥ इति।

चित्सुखमुनेः तत्त्वप्रदीपिकायामपि (उदासीनसंस्कृतविद्यालयः, काशी, १९५६) द्वितीयाध्याये (पृ ३५९) मणिप्रदीपप्रभयोरिति श्लोक उपलभ्यते। तत्र च प्रमाणवार्तिकादुद्धृतमिति भणितम्। (प्र. वा. ३-५७)। न्यायकन्दली, आत्मतत्त्वविवेकः, तथा तार्किकरक्षा—इत्येवमादिष्वपि ग्रन्थेष्वयं न्याय उपलभ्यते।

(G. A. Jacob, A Second Handful of Popular Maxims, N.S.P', 1909, pp. 55-56)

'व्यक्तिवादिनः पुनरवस्तुमुखेन प्रतिबद्धाद् वस्तुनः प्रतीतावर्थक्रियाऽविसंवादादस्त्वनुमानत्वम्। अवस्तुन एव तु प्रतीतौ कथमनुमानत्वं स्यात्।'[1] इति (**व्य. वि. वि.** वाराणसी संस्करण, पृ. ७६)। अस्याऽयमाशयः। दुष्टेनापि हेतुना यदि मणिप्रभाया मणिवद् यथार्थवस्तुनोपलब्धिः स्यात् तर्हि व्यक्तिवादिनाप्यनुमानं स्वीकृतं स्यात्। किन्तु काव्ये अनुमितस्य विषयस्य याथार्थ्यं नास्ति, प्रमात्वं नास्तीति कृत्वा साध्याप्रामाण्यमुखेनैव व्यक्तिवादिनानुमानं निराकृतम्।

इदमत्रावधेयम्। साध्यस्य प्रामाण्याप्रामाण्यविचारनैरपेक्ष्यात् काव्ये प्रयुज्यमानानुमितिर्विशिष्य काव्यानुमितिरित्युच्यते महिमभट्टेन। सोऽयं विशेषव्यपदेश एवानुमितिवादस्थापने महिमभट्टस्य परमं बलम्। सेयं काव्यानुमितिः काव्यार्थानुसन्धानेऽभ्यासपाटववतां सहृदयानां मनसि अतीवद्रुतभावेनावतरतीत्यवश्यमवधेयम्। तथापि काव्यानुमितिर्नामानुमितेरेव नवीनतरभेदविशेषस्वीकारे गौरवं स्यात् सम्प्रदायसमर्थनाभावश्चेति वैयाकरणादिपूर्वसूरिसम्मताया व्यक्तेरेव स्वीकरणं ज्यायः।

व्यक्तिवादसरणिव्यवस्थापकेनानन्दवर्धनेन तु व्यंग्यार्थस्य प्रामाण्याप्रामाण्यविचारप्रसंगो मनागपि नावतारितः।[1] अस्मन्मते तु आनन्दवर्धनदर्शने अभिव्यक्तेरेवावान्तरभेदविशेषोऽनुमानमिति कृत्वा कुतो ध्वनेरनुमानेऽन्तर्भावप्रसंगः। प्रत्युतानुमानस्यैव व्यञ्जनायामन्तर्भावः समर्थित इति प्रतिभाति। दुष्टहेतुनानुमेयमपि वस्तु वस्तुतोऽनुमेयं भवतीत्यानन्दवर्धनेन नोच्यते। किन्तु सद्धेतुभिरनुमेयन्तु व्यंग्यमेवेति स्पष्टम्। यदुक्तम्—'यत्त्वनुमेयरूपव्यंग्यविषयं शब्दानां व्यञ्जकत्वं तद्ध्वनिव्यवहारस्याप्रयोजकम्।' इति (ध्व. ३, पृ. ४५५-४५६)। तदेवं व्यक्तेर्महाविषयत्वस्थापने आनन्दवर्धनेन बहुला एव दृष्टिरुपयुज्यते। महिमभट्टेन तु काव्येऽभिव्यञ्जनानिराकरणपरेणानुमानस्य महत्तरविषयं स्वीकुर्वता दुष्टहेतूनामप्यनुमाने उपयोगित्वमुररीकृतमथच व्यञ्जनाया अल्पतर एव विषयस्तथा घटप्रदीपन्यायेन व्यंग्यव्यञ्जकयोः क्रमराहित्येन यत्र समकालं प्रतीतिस्त्रैव व्यञ्जना सम्भवतीति प्रदर्शयितुकामेन व्यञ्जनालक्षणं यथा विचारितं तथा साम्प्रतमुपस्थाप्यते।

महिमभट्टानुमतव्यक्तिलक्षणविमर्शः

महिमभट्टस्य मते वाच्यप्रतीयमानयोरर्थयोर्मुख्यया वृत्त्या व्यंग्यव्यञ्जकभाव एव न सम्भवति। यस्तु व्यंग्यव्यञ्जकभावो ध्वनिवादिभिस्तत्रोररी-

१. किञ्च तेन 'काव्यविषये च व्यंग्यप्रतीतीनां सत्यासत्यनिरूपणस्याप्रयोजकत्वमेवेति तत्र प्रमाणान्तरव्यापारपरीक्षोपहासायैव सम्पद्यते।' (ध्व. ३. पृ. ४५५) इत्येतदेव निगदितम्।

कृतः स तु भाक्त एव। कस्मादिति चेत्तत्र वाच्यप्रतीयमानयोर्विषये अभिव्यक्तेर्लक्षणमेव नोपपद्यते। एवन्तर्हि वाच्यप्रतीयमानयोर्विषये व्यंग्यव्यञ्जकभावमंगीकर्तुमुत्साहवतां मते कीदृग् ध्वनिलक्षणं भवतां मते वा कीदृग् ध्वनिलक्षणमादरणीयमिति विस्पष्टमुच्यतामिति पृच्छायामाह—

'तथा हि सतोऽसत एव वार्थस्य प्रकाशमानस्य सम्बन्धस्मरणानवेक्षिणा प्रकाशकेन सहैव प्रकाशविषयतापत्तिरभिव्यक्तिरिति तल्लक्षणमाचक्षते।' इति। अभिव्यक्तिं स्वीकुर्वन्तो मीमांसकालंकारिकादय आचक्षत इत्यभिप्रायः।

एतच्चाभिव्यक्तिलक्षणमापाततः सर्वेषामपि अभिमतं स्यात् साधारण्येन। किन्तु सम्बन्धस्मरणानवेक्षिणा प्रकाशकेनेति यदुक्तं तत्तु चिन्त्यम्। ध्वनावेव कदाचिद् वक्तृबोद्धव्यादिविशेषपर्यालोचनव्याजेन कस्यचन सम्बन्धस्य स्मरणस्याप्यपेक्षितत्वादिति दिक्।

एवं साधारण्येनाभिव्यक्तिलक्षणं प्रतिपादयन् तद्भेदानप्युपपादयति लक्ष्ये लक्षणसंगतिञ्च दर्शयति काल्पनिकमेवाभिव्यक्तिवादिनोऽभिप्रायमनुसृत्य यथा—

'तत्र सतोऽभिव्यक्तिस्त्रिविधा, तस्य त्रैविध्यात्।

(१) तत्र कारणात्मनि कार्यस्य शक्त्यात्मनावस्थानात् तिरोभूतस्येन्द्रियगोचरत्वापत्तिलक्षण आविर्भाव एका, यथा क्षीराद्यवस्थायां दध्यादेः। तथावस्थानानुपगमे तु सैवोत्पत्तिरित्युच्यते कैश्चित्।

(२) तस्यैवाविर्भूतस्य कुतश्चित् प्रतिबन्धादप्रकाशमानस्य प्रकाशकेनोपसर्जनीकृतात्मना सहैव प्रकाशो द्वितीया, यथा प्रदीपादिना घटादेः। तदुक्तम्—

स्वज्ञानेनान्यधीहेतुः सिद्धेऽर्थे व्यञ्जको मतः।
यथा दीपोऽन्यथाभावे को विशेषोऽस्य कारकात्॥ इति।

ध्वनिकारेणाप्युक्तम्—'स्वरूपं प्रकाशयन्नेव परार्थावभासनो व्यञ्जक इत्युच्यते यथा प्रदीपो घटादेः' इति।

(३) तस्यैवानुभूतपूर्वस्य संस्कारात्मनान्तर्विपरिवर्तिनः कुतश्चिदव्यभिचारिणोऽर्थान्तरात् तत्प्रतिपादकाद् वा संस्कारप्रबोधमात्रं तृतीया, यथा धूमादग्नेः, यथा चालेख्यपुस्तकप्रतिबिम्बानुकरणादिभ्यः, शब्दाच्च गवादेः।

(४) असतस्त्वेकप्रकारैव, तस्य प्रकारान्तरासम्भवाद्, यथार्कालोकादिनेन्द्रचापादेः। इति। (**व्यक्तिविवेकः**, वाराणसीसंस्करणे पृ. ८०)।

नैतत्सर्वोऽपि व्यक्तिलक्षणविषये महिमभट्टस्य स्वकीयो राद्धान्तः। आचक्षत इति पदमेवात्र मानमिति पूर्वमेव सूचितम्। तदेतदन्येषामेवाभिव्यक्तिसमर्थकानां मतं दोषोद्घाटनायात्रोपस्थापितम्। कथं वा वाच्यप्रतीय-

मानयोर्व्यंग्यव्यञ्जकभावो नास्ति कथं च तत्रानुमानलक्षणमेव संगच्छते इति तदपि दर्शयितुमाह—

'न चैतल्लक्षणं[1] वाच्ये संगच्छते। तथा हि—सतोऽभिव्यक्तिराद्ययोरर्थयोर्लक्षणं, न तत् प्रतीयमानेष्वेकमपि संस्प्रष्टुं क्षमते तस्य दध्यादेरिवेन्द्रियविषयभावापत्तिप्रसंगाद् घटादेरिव वाच्यार्थसहभावेनेदन्ताप्रतीतेरसम्भवात्। न च स्वरूपासंस्पर्शि लक्षणं भवति।' इति। (व्य. वि. वाराणसी पृ. ८१) अस्यायमाशयः। यदि क्षीरदधिन्यायेनाभिव्यक्तेः प्रथमं लक्षणं गृह्यते तर्हि व्यंग्यार्थस्यापि दधिवद्बहिरिन्द्रियग्राह्यत्वं स्यात्। न च तथा सम्भवतीति प्रथमलक्षणमनुपपन्नम्। यदि घटप्रदीपन्यायेनाभिव्यक्तेर्द्वितीयं लक्षणं गृह्यते तदा घटप्रदीपयोर्यथा सहभावेन प्रतीतिस्तथैव वाच्यव्यंग्ययोरपि सहभावेन प्रतीतिस्स्यात्। किन्तु तदपि न सम्भवति। यदुक्तम्—'नापि सहभावेन, धूमाग्निप्रतीत्योरिव तत्प्रतीत्योरपि क्रमभावस्यैव संवेदनाद् इत्यसम्भवो लक्षणदोषः।' इति। (व्य. वि. वाराणसी पृ. ८३)। तृतीयलक्षणस्य दोषं संसूचयन्नाह—

'तृतीयस्यास्तु यल्लक्षणं तदनुमानस्यैव संगच्छते न व्यक्तेः।' इति। अयमाशयः। यदि धूमाग्निन्यायेन तृतीयं लक्षणं गृह्यते तर्हि तदनुमानमेव स्यान्न व्यक्तिरिति महिमभट्टस्यैवेष्टसिद्धिः। उक्ताभिव्यक्तिलक्षणे दोषोद्घाटने महिमभट्टस्येयमपि वाचोयुक्तिः परिलक्ष्यताम्—त्रिविधेष्वपि व्यंग्येष्वर्थेषु वाच्यव्यंग्ययोः क्रमभावेनोपस्थितिरस्त्येव। तस्मात्तेषां सहभावेन प्रकाशाभावात् साधारणलक्षणोक्ता प्रकाशकेन सहैव प्रकाशविषयतापत्तिर्न सम्भवति। 'अथैतद्दोषभयात् सहभावानपेक्षमेतल्लक्षणमुच्यते। तथाऽप्यनुमानेऽतिव्याप्तिः।' यद्युच्यते धूमाग्निन्यायेन सत एव प्रकाशो भवत्यनुमाने, व्यक्तौ तु असत एव तर्हि घटप्रदीपस्थले व्यक्तिलक्षणस्यासंगतिः घटस्य सत्त्वात्। 'अथासद्ग्रहणं न करिष्यत इति तर्हि अर्कालोकेन्द्रचापादावव्याप्तिः।' अथ उभयोरपि ग्रहणं न करिष्यते अर्थाद् यदि साधारणलक्षणे केवलं 'प्रकाशमानस्य प्रकाशकेन सहैव प्रकाशविषयतापत्ति'रित्येतावदेवोच्यते तर्हि तदनुमानस्यैव लक्षणं पर्यवस्यति, न व्यक्तेः। तच्चेष्टमेव महिमभट्टस्य, वाच्यप्रतीयमानयोः सतोरेव च क्रमेणैव तेन प्रकाशाभ्युपगमात्। तदेवंक्रमेण प्रथमतो महता यत्नेन स्वपरिकल्पितं व्यक्तिवादिनो व्यक्तिलक्षणमाक्षिप्य काव्ये वाच्यप्रतीयमानयोर्विषये अनुमितिरेव सम्भवति न व्यक्तिरिति सिद्धान्तितम्। इदन्त्वत्रावधेयम्। महिमभट्टेन सर्वथा अभिव्यक्तिर्नैव स्वीक्रियत इति तु न।

---

१. अर्थाद व्यञ्जकलक्षम।

किन्तु केवलं यत्र घटप्रदीपन्यायेन प्रकाशकेन सहभावेनैव समकालमेव प्रकाश्यस्य प्रतीतिस्तत्रैव स्वीक्रियते। ननु तर्हि व्यक्तिविवेके अन्येषामभिव्यक्तिप्रकाराणां समुद्भावने किं बीजमिति तदेव साम्प्रतं यथासम्भवमनुसंधीयते।

महिमभट्टप्रदर्शिताभिव्यक्तिप्रकाराणां बीजम्

(१) 'कारणात्मनि कार्यस्य शक्त्यात्मकावस्थानात् तिरोभूतस्येन्द्रियगोचरत्वापत्तिलक्षण आविर्भाव एका, यथा क्षीराद्यवस्थायां दध्यादेः।'—एतद्वचनं **सांख्यदर्शनस्य** सत्कार्यवादमनुसरति। एतन्मूलश्च सांख्यदर्शनस्य सत्कार्यसिद्धावाशंकापरिहारात्मके 'न, अभिव्यक्तनिबन्धनौ व्यवहाराव्यवहारौ' (सू. १२०) इति सूत्रे (पृ. ७४) अनुसन्धेयम्। 'शक्तस्य शक्यकरणात्' (सू. ११७) 'पारम्पर्यतोऽन्वेषणा, बीजांकुरवत्' (सू. १२२) इत्यादिन्यपि सूत्राण्यत्र सव्याख्यानान्यनुसन्धेयानि। सांख्यमते शक्त्यात्मनावस्थितस्याविर्भाव एवाभिव्यक्तिरित्युच्यते। न्यायनये च शक्त्यात्मना कारणेऽवस्थानास्वीकरणादाविर्भावस्तूत्पत्तिरित्युच्यते। यदुक्तं महिमभट्टेन—'तथावस्थानानुपगमे तु सैवोत्पत्तिरित्युच्यते कैश्चित्।' मेयमुत्पत्तिरसत्कार्यवादाभिमता। सत्कार्यासत्कार्यविषये च सांख्यतत्त्वकौमुद्याम् ईश्वरकृष्णस्य—

असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात्।
शक्तस्य शक्यकरणात् कारणभावाच्च सत् कार्यम्॥ (का. ९)

इति कारिकाया वाचस्पतिमिश्रकृतं व्याख्यानमवलोकनीयम्। तत्रैवाभिव्यक्तिवादस्य संगतिरपि विस्पष्टं समुन्नेतुं शक्यते। तस्मिन् व्याख्याने—

'कारणाच्चाऽस्य सतोऽभिव्यक्तिरेवाऽवशिष्यते। सतश्चाऽभिव्यक्तिरुपपन्ना। यथा पीडनेन तिलेषु तैलस्य, अवघातेन धान्येषु तण्डुलानाम्, दोहनेन सौरभेयीषु पयसः। असतः करणे तु न निदर्शनं किञ्चिदस्ति। न खल्वभिव्यज्यमानं चोत्पद्यमानं वा क्वचिदसत् दृष्टम्। (पृ. ७३) × × × यथा हि कूर्मस्यांगानि कूर्मशरीरे निविशमानानि तिरोभवन्ति, निःसरन्ति चाविर्भवन्ति, न तु कूर्मस्तदंगान्युत्पद्यन्ते प्रध्वंसन्ते वा। एवमेकस्या मृदः सुवर्णस्य वा घटमुकुटादयो विशेषा निःसरन्त आविर्भवन्त उत्पद्यन्त इत्युच्यन्ते, निविशमानास्तिरोभवन्ति विनश्यन्तीत्युच्यन्ते। न पुनरसतामुत्पादः सतां वा निरोधः। यथाह भगवान् कृष्णद्वैपायनः—

नासतो विद्यते भावो नाऽभावो विद्यते सतः—(**गीता** २-१६) इति।'

(**सांख्यतत्त्वकौमुदी**० पृ० ७८) इत्ययमंशो विशेषतोऽवलोकनीयः।

उत्पत्तिवादात्मकाऽसत्कार्यवादविषये च वात्स्यायनभाष्यसहिते न्यायसूत्रे ग्रन्थोऽयमवलोक्यतां यथा—'कथमुत्पत्तिरिति चेत्—

व्यक्ताद्व्यक्तानां प्रत्यक्षप्रामाण्यात् । (सू० ४-१-११)

केन प्रकारेण किन्धर्मकात् कारणाद्व्यक्तं शरीरादयुत्पद्यत इति ।

व्यक्ताद् भूतसमाख्यातात्पृथिव्यादितः परमसूक्ष्मान्नित्याद्व्यक्तं शरीरेन्द्रियविषयोपकरणाधारं प्रज्ञातं द्रव्यमुत्पद्यते । व्यक्तं च खल्विन्द्रियग्राह्यम् । तत्सामान्यात्कारणमपि व्यक्तम् ।

किं सामान्यम् ।

रूपादिगुणयोगः । रूपादिगुणयुक्तेभ्यः पृथिव्यादिभ्यो नित्येभ्यो रूपादिगुणयुक्तं शरीराद्युत्पद्यते ।

प्रत्यक्षप्रामाण्यात् । दृष्टो हि रूपादिगुणयुक्तेभ्यो मृत्प्रभृतिभ्यस्तथाभूतस्य द्रव्यस्योत्पादः, तेन चादृष्टस्यानुमानमिति । रूपादीनामन्वयदर्शनात् प्रकृतिविकारयोः पृथिव्यादीनां नित्यानामतीन्द्रियाणां कारणभावोऽनुमीयत इति ।' इति (**न्यायसूत्रम्**. पृ. २४५-२४६)[1]

दधिक्षीरन्यायेन वृक्षबीजन्यायेन वा य आविर्भावस्तस्याभिव्यक्तित्वमालंकारिकोपजीव्यभूतैर्वैयाकरणैरपि स्वीकृतम् । तत्र च दिङ्मात्रेण—

यथानुपूर्वीनियमो विकारे क्षीरबीजयोः ।

तथैव प्रतिपत्तॄणां नियतो बुद्धिषु क्रमः ॥ (**वाक्यपदीयम्**. १-९१) इति कारिका एव परामर्शनीया । अत्रायं भावः । यथा क्षीरस्य विकारे दध्नि जननीये प्रथमं क्षीरं किञ्चित् कठिनं ततोऽधिकं कठिनं ततश्च दधि भवतीति आनुपूर्वीनियमः, यथा वा बीजस्य विकारे वृक्षे जननीये पूर्वं बीजं द्वैधीभवति ततोऽङ्कुरः ततो द्विपत्रितः ततः पल्लवितः वृक्षो भवतीति आनुपूर्वीनियमः, तथैव प्रतिपत्तॄणां स्फोटप्रतिपतौ व्यञ्जकबुद्धिक्रममन्तरेण अशक्त्या बुद्धिषु नियतः क्रमः । एवञ्चात्र क्षीरबीजाभ्यां स्फोटाभिव्यक्तिक्रमे दृष्टान्तोपस्थापनाद् दधिक्षीरयोस्तथा वृक्षबीजयोरपि व्यंग्यव्यञ्जकभाव एवोररीकृत इति समुन्नेतुं शक्यते ।

---

१. पृथिव्यादिषु चैतेषां सतामेव स्वभावतः ।
परिणामादभिव्यक्तिर्यथादृष्ट्यवधार्यते ॥
न हि शक्त्यात्मना किञ्चिदसज्जन्म प्रपद्यते ।
धर्माणां न च नानात्वमस्ति चावान्तरस्थितिः ॥ (**तात्पर्यटीकासहिते श्लोकवार्तिके** उपमानप्रकरणे ३२-३३) इत्यप्यत्र तुलनीयम् ।

(२) घटप्रदीपन्यायेनाभिव्यक्तेर्द्वितीयो यः प्रकारस्तस्य बीजन्तु **ध्वन्यालोक** एव बहुश उपलभ्यते । महिमभट्टेनापि च स्वयं प्रमाणत्वेनात्र **ध्वन्यालोक**वचनं समुदाहृतम् । किञ्च मीमांसकैरपि घटप्रदीपन्यायेन या अभिव्यक्तिस्तस्या अनेकश उल्लेखः कृतः । तथाप्यधोलिखितान्यप्यत्र दिङ्मात्रेण परामर्शमर्हन्ति—

(क) हेतुबुद्ध्यनुसारित्वात् कार्यतास्य घटादिवत् ।
न हि दीपसहस्रेऽपि व्यञ्जके वर्धते घटः ॥
(**श्लोकवार्तिकम्**. १८. **शास्त्रदीपिकायाः** टीकायां **युक्तिस्नेहप्रपूरण्यां** ३८६ पृष्ठे समुधृतोऽयं श्लोकः ।)

(ख) यथा घटादेर्दीपादिरभिव्यञ्जक इष्यते ।
चक्षुषोनुग्रहादेवं ध्वनिः स्याच्छोत्रसंस्कृतेः ॥
(**श्लो. वा.** ४२. **युक्तिस्नेहप्रपूरण्यां** ३९७ पृष्ठे समुद्धृतः ।)

(ग) वर्णा वा ध्वनयो वापि स्फोटं न पदवाक्ययोः ।
व्यञ्जन्ति व्यञ्जकत्वेन यथा दीपप्रभादयः ॥
(**श्लो. वा. स्फोटवादे** १३१)

(घ) 'दृष्टा च समानेन्द्रियग्राह्याणामप्यभिव्यञ्जकव्यवस्था—सावित्रं हि तेजो घटादीनामेवाभिव्यञ्जकं न नक्षत्राणां, निम्बत्वक् चन्दनगन्धस्यैवाभिव्यञ्जिका न गन्धान्तराणाम्, तस्माददोषः ।' (**शास्त्रदीपिका**, शब्दनित्यत्ववादः. पृ. २९२–३९३)

(ङ) अयश्च घटप्रदीपन्यायः सांख्यदर्शनेऽप्युपलभ्यते । दिङ्मात्रेणोदाहरणं यथा सांख्यदर्शने शब्दानित्यतायां शंकोत्थापनाय 'पूर्वसिद्धसत्त्वस्याभिव्यक्तिर्दीपेनेव घटस्य ।' इति सूत्रम् । (**सांख्यसूत्रम्**. ५–५९)

(३) अनुभूतस्य च संस्कारात्मना स्थितस्य कुतश्चित् प्रबोधकप्रत्ययात् प्रबोधमात्रमित्यभिव्यक्तेस्तृतीयः प्रकारः । सोऽपि प्रबोधत्रैविध्यात् त्रिविधः । तथा हि—

(क) नान्तरीयकं धूमादि प्रथमं प्रबोधकम् । धूमादग्निज्ञानं यत्तत्तु निर्विवादमेवानुमानम् । अनुमानस्याभिव्यक्तिपदेन व्यवहारो **ध्वन्यालोक** एव उपलभ्यते यथा 'यत्त्वनुमेयरूपव्यंग्यविषयं शब्दानां व्यञ्जकत्वं तद्ध्वनिव्यवहारस्याप्रयोजकम् ।' इति ।

नैयायिकादिभिरपि धूमादिज्ञानाद्वह्न्यादिज्ञानविषये अभिव्यक्तिपर्यायभूतं प्रकाशपदं प्रयुज्यते। एवंक्रमेणापि दूरतोऽनुमानस्याभिव्यक्तिरूपत्वमवसाययोग्यं भवति । किञ्च लोकव्यवहारे 'व्यनक्ति कालत्रितयेऽपि योग्यताम्' इत्यादि

पूर्वोदाहृतस्थले (पृ. ९६) अनुमानस्यैव व्यक्तिपदेन निर्देशस्समस्ति । एवंविधव्यवहारदर्शनादेवानुमितेरपि व्यक्तिलक्षणालिंगितत्वं व्यक्तिवादिसमर्थितमिति वक्तुं समुत्सहते महिमभट्ट इत्यस्माकं प्रतिभाति ।

(ख) सदृशवस्त्वन्तरं द्वितीयं प्रबोधकम् । सदृशवस्तुविशेषः सदृशवस्त्वन्तरविषयकं ज्ञानमुत्पादयति । सदृशवस्तुविशेषमभिव्यनक्तीत्याशयः । यदुक्तमुदाहरणव्याजेन—'यथा चालेख्यपुस्तकप्रतिबिम्बानुकरणादिभ्यः····· गवादे'रिति । (**व्य. वि.** १) । अनुकरणादिग्रहणेन गोसदृशस्य गवयस्यापि ग्रहणम् । तदेवं गवये प्रबोधके सति तत्सदृशस्य गोपदार्थस्य ज्ञानमप्यभिव्यक्तेरेव विषय इति हृदयम् । तदेवमुपमानस्याप्यभिव्यक्तिरूपत्वमत्राभिहितम् । उपमानञ्च दार्शनिकैर्बहुधा लक्षितम् । तथापि 'उपमानमपि सादृश्यमसन्निकृष्टेऽर्थे बुद्धिमुत्पादयति यथा गवयदर्शनं गोस्मरणस्य ।' (**शाबरभाष्यम्**. १-१-५) इति शबरस्वामिनो वचनमेव प्रकृते संगच्छतेतराम् । यद्यपि मूले उपमानादिकमनुमानतो विभज्य प्रदर्शितं तथापि उपमानादिकस्यानुमान एवान्तर्भाव इष्यते महिमभट्टेन । यदुक्तम्—'उपमानादीनां च तत्रैवान्तर्भावात्' इति (**व्य. वि.** १. पृ. ८१ वाराणसी संस्करणे·)

(ग) वाचकः शब्द इति तृतीयं प्रबोधकम् । यदुक्तम्—'तस्यैवानुभूतपूर्वस्य·····संस्कारप्रबोधमात्रं तृतीया, यथा धूमादग्नेः·····शब्दाच्च गवादेः ।' इति (**व्य. वि.** १, उक्तसंस्करणे पृ. ८०) । इदमत्रावधेयम् । महिमभट्टेन केवलं शब्द इत्येव उक्तं न तु वाचकः शब्द इति । शब्दपदेन वाचकशब्दस्य बोधस्तु अस्माकं रुय्यककृतव्याख्यानानुसरणक्रमेणैव । किन्तु वाचकशब्दाद् वाच्यस्यार्थस्य बोधोऽनुमानकक्षामेव विगाहत इति महिमभट्टेनापि कुत्राणि विस्पष्टं नोक्तम् । प्रत्युत तेनानुमेयार्थवाच्यार्थयोर्भेद एव प्रदर्शितः । यदुक्तम्—

'अर्थोऽपि द्विविधो वाच्योऽनुमेयश्च । तत्र शब्दव्यापारविषयो वाच्यः स एव मुख्य उच्यते । यदाहुः—

'श्रुतिमात्रेण यत्रास्य तादर्थ्यमवसीयते ।
तं मुख्यमर्थं मन्यन्ते गौणं यत्नोपपादितम् ।।' इति ।

तत एव तदनुमिताद्वा लिंगभूताद् यदर्थान्तरमनुमीयते सोऽनुमेयः ।' (**व्य० वि०** १, वाराणसी संस्करणे पृ० ५७)

ननु वाचकाद् गोशब्दाद् गोव्यक्तेर्यो बोधः सोऽपि समयस्मृत्यादिकमपेक्षत इति तत्राप्यस्ति क्रमः । तत्क्रमानुरोधेन तत्राप्यस्तु अनुमेयत्वमर्थस्य इति चेत् 'श्रुतिमात्रेण यत्रास्य तादर्थ्यमवसीयत' इति वचनेनैव महिमभट्टेनानुमेय-

त्वशंका निरस्ता। प्रकृते तु 'शब्दाच्च गो' व्यक्तेर्या बोधस्तमनुमान एवान्तर्भावयतीति कथमेतत्। उच्यते। अत्र शब्दपदेन गोपिण्डवर्णनापरको वाचकशब्दसन्दोहो ग्रहणीयः। आलेख्यादिषु यथा रञ्जकवर्णैर्गोव्यक्तेः चित्रणं भवति तथैव यत्र वाचकशब्दैः सास्नालांगूलककुदखुरविषाणिरूपस्य वस्तुविशेषस्य वर्णनमस्ति तत्रैव स शब्दस्समुन्नेयो यः प्रतिपत्तुरन्तर्विपरिवर्तमानं गोपदार्थस्य संस्कारं प्रबोधयति। एवञ्चात्र शब्दपदेन वर्णनात्मकं काव्यादिकम् एवावगन्तव्यम्[1]। एवञ्च वर्णनाविशेषपठनेन वर्णनीयवस्तुविशेषस्य यद्भानं तदनुमानरूपमेवेति स्थितमेतत्।

(४) असद्विषयाऽभिव्यक्तिरेकैव, प्रकारान्तरासम्भवात्, यथार्कालोकादिनेन्द्रचापादेः। इदन्त्वत्रावधेयम्। इन्द्रचापस्याभिव्यक्तिरर्कालोकेनेत्युक्तम्। तदेवमर्कालोको व्यञ्जकः, इन्द्रचापस्तु व्यंग्यः। इन्द्रचापस्तु तोयबिन्दुषु सूर्यस्य प्रतिबिम्बप्रख्यः। वस्तुतस्तत्रासन्नेव। तस्माद् वेदान्तदर्शनस्याभासवाददृष्टान्तरूपेणैवार्कालोकेनेन्द्रचापस्याभिव्यक्तिरुदाहर्तुं शक्यते। मध्याह्नमरुसिकतासु सूर्यरश्मिप्रतिफलनेन यथा जलस्य तत्र वस्तुतोऽसतोऽप्याविर्भावस्तथैव जलदकाले सायं तोयबिन्दुषु अर्कालोकस्य प्रतिफलनेनैवेन्द्रचापस्याविर्भावः। स चाविर्भावोऽभिव्यक्तिरिति व्यवह्रियते। तदेवंविधेषु स्थलेषु बिम्बेन प्रतिबिम्बस्याभिव्यक्तिर्भवेति। सैव आभासः। यदुक्तं **वाचस्पत्ये** "उपाधितुल्यतया भासमाने प्रतिबिम्बे 'आभासो रूपसूर्यकादिवत्'" इति। तस्याभासवादस्य मूलं खलु 'आभास एव च' (**ब्र० सू०** ३।३।५०) तथा 'अत एव चोपमा सूर्यकादिवत्' (**ब्र० सू०** ३।२।१८) इति ब्रह्मसूत्रद्वयम्। आभासवाद एव प्रतिबिम्बवाद इत्यप्युच्यते। यद्यप्यर्कालोकेन्द्रचापदृष्टान्तोऽस्माभिर्यावदध्ययनं कृतं तावन्नोपलब्धस्तथापि मरुमरीचिकादृष्टान्तस्तु प्रायश एवोपलभ्यते। तथा हि वेदान्तदर्शनप्रतिपादनपरके श्रीकृष्णमिश्रस्य **प्रबोधचन्द्रोदये**—

मध्याह्नार्कमरीचिकास्विव पयः पूरो यदज्ञानतः
खं वायुर्ज्वलनो जलं क्षितिरिति त्रैलोक्यमुन्मीलति।

---

१. अस्मद्गुरुवर्यैः डॉ० पाण्डेयमहोदयैरप्यत्र शब्दपदेन काव्यमेव गृहीतम्। तथा ह्ययं मूलस्यांगलानुवादः—
Thus, for instance, fire is said to become manifest (Abhivyakta) at the sight of smoke, which is invariably concomitant with it, or the cow and the like are said to become manifest from reflective, imitative presentation thereof in the works of pictorial, plastic or **Poetic Art.** (K. C. Pandey, **Indian Aesthetics**, p. 309).

यत्तत्त्वं विदुषां निमीलति पुनः स्रग्भोगिभोगोपमम्
सान्द्रानन्दमुपास्महे तदमलं स्वात्मावबोधं महः ॥ (१।१)

इत्यत्र मरुमरीचिकादृष्टान्तस्तथा स्रग्भोगिभोगदृष्टान्तश्चोपलब्धौ स्तः। किञ्च **प्रबोधचन्द्रोदय** एव—

अम्भः शीतकरान्तरीक्षनगरस्वप्नेन्द्रजालादिवत्
कार्यं मेयमसत्यमेतदुदयध्वंसादियुक्तं जगत्।
शुक्तौ रूप्यमिव स्रजीव भुजगः स्वात्मावबोधे हरा-
वज्ञाते प्रभवत्यथास्तमयते तत्त्वावबोधोदयात् ॥ (६।२२)

इत्यत्र जलचन्द्रदृष्टान्तः, रंगरजतदृष्टान्तः, अन्तरीक्षनगरदृष्टान्तः, स्वप्नदृष्टान्तः, इन्द्रजालदृष्टान्तस्तथा स्रग्भोगिभोगदृष्टान्तश्च समुदाहृताः। जलचन्द्रदृष्टान्तस्तु।

एक एव हि भूतात्मा भूते भूते व्यवस्थितः।
एकधा बहुधा चैव दृश्यते जलचन्द्रवत् ॥[1]

(**ब्रह्मबिन्दु**-१२, **सांख्यदर्शनस्य** विज्ञानभिक्षुकृत**प्रवचनभाष्ये** समुद्धृतः। पृ. ९३) इत्येवमादिषु प्रायश एव समुदाहृत इत्यलं बहुना।

आनन्दवर्धनाभिमतव्यक्तिस्वरूपपरिष्करणम्

दधिक्षीरन्यायेन या अभिव्यक्तिस्तस्यामरुचिं सूचयन्नपि तामभ्युपगच्छति महिमभट्ट इति प्रतिभाति। घटप्रदीपन्यायेनाभिव्यक्तिस्तु तस्य सर्वथैवाभिमता। धूमवह्न्यादिन्यायेन तृतीयस्तु प्रकारस्तन्मते अनुमानमेव नाभिव्यक्तिः। अर्कालोकेन्द्रचापन्यायेन चतुर्थो यः प्रकारस्स तु कृतिरेव नानुमानम्। यदाह—'असतश्चेन्द्रचापादेः का व्यक्तिः कृतिरेव सा।' (**व्य. वि.** १-३५) इति। अस्मन्मते तु महिमभट्टप्रदर्शिताः चत्वारोऽपि भेदा आनन्दवर्धनस्याभिमताः। अभिव्यक्तेर्महाविषयत्वात्तथा सर्वत्रैवानन्दवर्धनाभिमतस्य व्यक्तिलक्षणस्य संगतत्वात्। राजानकरुय्यकेण महिमभट्टमतदूषणमुखेन यदुक्तं—"न हीन्द्रियगोचरतापत्तिः केनचिद्व्यक्तिलक्षणं कृतं स्वज्ञानेनान्यधीहेतुः सिद्धेऽर्थे व्यञ्जको मतः। यथा दीपो घटस्येति' सामान्येन धीगोचरतापत्तिलक्षणत्वाद् व्यक्तेः। ततश्च रसादौ व्यंग्यत्वमनवद्यमेव।" (**व्य. वि. वि.** १, पृ. ६३) इति तदभिव्यक्तेर्महाविषयत्व-

---

१. अयं श्लोको **याज्ञवल्क्यस्मृतौ** (३-१४३-४) वर्तते। पुनः स एव दृष्टान्तस्तत्रैव यथा—

आकाशमेकं हि यथा घटादिषु पृथग् भवेत्।
तथात्मैको ह्यनेकस्थो जलाधारेष्विवांशुमान्॥ (३-१४४) इति।

स्थापने नितरां संगच्छते। अस्मन्मते 'स्वरूपप्रकाशकत्वे सति परावभासकत्वं व्यञ्जकत्वम्' इति व्यञ्जकस्य साधारणं लक्षणमानन्दवर्धनाभिमतम्। वाच्याद् व्यंग्यस्य क्रमभावेन प्रतीतावपि 'न हि व्यंग्ये प्रतीयमाने वाच्यबुद्धिर्दूरीभवती'ति न्यायेन स्वरूपं प्रकाशयन्नेव वाच्यः व्यञ्जको भवति। तस्मिन् व्यञ्जकत्वे, सति प्रयोजने, क्रमभावोऽप्यभ्युपगम्यते। न हि खलु कुत्रचित् व्यंग्यव्यञ्जकयोः क्रमभावेन प्रतीतिस्तदुभयोः सहभावेन प्रतीतेः सम्भावनां निरस्यति। यदुक्तं राजानकरुय्यकेण—

'यत् पुनर्वस्त्वलंकारयोर्नियमेन वाच्यानन्तरकालभावित्वेन प्रतीतेर्व्यंग्यत्वमसमञ्जसं भवततीत्युक्तं, तत्र प्रतीविधीयते। इह शब्दस्याभिधालक्षणाभेदेन द्विविधो व्यापारश्चिरन्तनैरभ्युपगतः। न स तृतीयकक्षानिक्षिप्तेऽर्थे प्रगल्भत इति तत्र व्यापारान्तरमभ्युपेयम्। रसादौ च तत्तुल्यकक्ष्ये व्यञ्जनमुपपादितमितीहापि तदेव संश्रयितुं युक्तम्। यत् तत्र वाच्यव्यंग्ययोः सहप्रतीतिर्नास्तीत्युक्तं तदपि न युक्तं रसादिन्यायेन व्यंग्यप्रतीतिकाले वाच्यस्यापि प्रकाशकस्य प्रतीतेः। वाच्यकाले तु यद्व्यंग्यस्य न प्रतीतिस्तन्न दूषणमित्युक्तमेव।' इति। (व्य. वि. वि. पृ. ६३)

इन्द्रचापाभिव्यक्तेर्वैशिष्ट्यम्

अर्कालोकेनेन्द्रचापस्य या अभिव्यक्तिः सा खलु प्रदीपेन घटस्य या अभिव्यक्तिस्तया समकक्षतां न विगाहते। अत्र हि घटोऽन्यथालब्धसत्ताकः प्रदीपस्तु तत्प्रकाशकः प्रकाश्यतः सर्वथा भिन्नः। इन्द्रचापस्तु अर्कालोकेन प्रकाश्यमानोऽर्कालोक एव तोयबिन्दुषु प्रतिफलितः। न ह्ययमिन्द्रचापोऽन्यथालब्धसत्ताकः। तस्मादत्र व्यंग्यव्यञ्जकयोः प्रकृतिविकृतिभावोऽनुसन्धेयः। स एव प्रकृतिविकृतिभावो मरुमरीचिकायां तथा जलचन्द्रे तथा रंगरजतादिषु चोपलभ्यते। यतो हि प्रकृत एव अर्कालोकः इन्द्रचापरूपत्वेन विकृतस्सन्नाविर्भवति। मरुमरीचिकायां प्रकृतमेवार्कालोकं विकृतरूपत्वेन जलमित्यवधारयति जनः। तत्रापि अर्कालोक एवासज्जलमभिव्यनक्ति। जलचन्द्रेऽपि चन्द्रालोकः प्रकृतिः। चन्द्रप्रतिबिम्बन्तु तद्विकृतिः। तत्र प्रकृत एव चन्द्रालोको विकृतप्रतिबिम्बरूपेणाविर्भवति। एवंक्रमेणैवास्माभिरर्कालोकेनेन्द्रचापस्याभिव्यक्तौ जलचन्द्रादिसादृश्यमुररीकृतम्। सांख्यमते तु अर्कालोकेन्द्रचापादिष्वपि असतोऽभिव्यक्तिरिति नाभ्युपगम्यते। सांख्यमते हि तत्रापि प्रकृतिविकृतिभावेन सत एवाभिव्यक्तिस्स्यात् शुक्तिरजतस्थानीयत्वात्। यदुक्तमसतः ख्यातिनिराकरणपरकस्य 'नासतः ख्यानं नृश्रृंगवत्' (**सा० सू०** ५-५२) इति सूत्रस्य भाष्ये विज्ञानभिक्षुणा—"शुक्तिरजतस्वप्नमनोरथादौ

च मनःपरिणामरूप एवार्थः प्रतीयते, 'नात्यन्तासन्' इति वक्ष्यति ।" इति (पृ० १७३)। महिमभट्टेन तु नैयायिकमतानुसारिणा शुक्तिरजतादिस्थलेषु अर्कालोकेन्द्रचापादिषु च असत एव प्रकाशाभ्युपगमादभिव्यक्तिर्न स्वीक्रियते किन्तूत्पत्तिरेव। तेन खलु इन्द्रचापस्यार्कालोक एव शक्त्यात्मनावस्थानं नाभ्युपगम्यते। सांख्येन तु दधिक्षीरन्यायसाधारण्येन तत्रापि व्यक्तिरेव स्वीकार्या। परन्तु दधिक्षीरविषये या अभिव्यक्तिस्तस्यामप्यरुचिं सूचयन् महिमभट्ट आह—'तत्र कारणात्मनि कार्यस्य शक्त्यात्मनावस्थानात् तिरोभूतस्येन्द्रियगोचरत्वापत्तिलक्षण आविर्भाव एका, यथा क्षीराद्यवस्थायां दध्यादेः। तथावस्थानानुपगमे तु सैवोत्पत्तिरित्युच्यते कैश्चित्।' इति।[1] (**व्य० वि०**।, वाराणसी पृ० ८०)। किञ्च धनिकेनापि दधिक्षीरादिविषये व्यक्तिलक्षणसंगतिर्नाभ्युपगम्यत इति तदप्यनुपदमेवास्माभिः प्रदर्श्यते।

धनिकस्य मतेऽभिव्यक्तिस्वरूपम्

दशरूपकावलोककारस्य धनिकस्य मते वस्तुमात्रालंकारयोस्तु कथा दूर एव आस्तां विभावादिभिः रसनिष्पत्तावपि अभिव्यक्तिर्नाभ्युपगन्तव्या। तन्मते हि केवलं घटप्रदीपन्यायेनैवाभिव्यक्तिर्भवति। ईषण्मात्रेणापि घटप्रदीपदृष्टान्ततो भेदवतो न भवेदियमभिव्यक्तिः। तन्न्यायानुसरणक्रमेण हि अन्यतो लब्धसत्ताकं वस्तु अन्येन व्यज्यते न तु दधिक्षीरन्यायेनाभिव्यञ्जकाल्लब्धसत्ताकं वस्तु कारणभूतेनाभिव्यञ्जक इति नाम्ना व्यवहृतेन वस्तुना। यदुक्तम्—

'अन्यतो लब्धसत्ताकं वस्तु अन्येनापि व्यज्यते प्रदीपेनेव घटादि, न तु तदानीमेवाभिव्यञ्जकत्वाभिमतैरापाद्यस्वभावम्। भाव्यन्ते च विभावादिभिः प्रेक्षकेषु रसा इत्यावेदितमेव।' (**दशरूपकम्**. ४.३९. हिन्दी सं० पृ० २४५)।[2] किन्तु एतदव्याप्तिदोषग्रस्तं व्यक्तिलक्षणमानन्दवर्धनेन नांगीकृतम्। सामान्येन धीगोचरतापत्तिलक्षणत्वादेव व्यक्तेरित्यास्तां तावत्।

अर्थापत्त्यभिव्यञ्जनयोस्सम्बन्धः

व्यञ्जनाया अनुमानत्वप्रसंग आनन्दवर्धन आह—'यत्त्वनुमेयरूपव्यंग्य-

---

१. कैश्चिदित्यनेन व्यक्तिवादिनोऽत्रारुचिः सूच्यते। परन्तु समग्रस्यापि वचनस्य परमतत्वेनोपस्थापितत्वात् स्वस्योत्पत्तिवादे सन्मतिरेव संसूच्यत इत्यस्माकमभिप्रायः।

2. V. Raghavan, **Bhoja's Śṛṅgāraprakāśa. p. 151.**
इत्यत्राप्ययं विषयोऽवलोकनीयः।

विषयं शब्दानां व्यञ्जकत्वं तद्ध्वनिव्यवहारस्याप्रयोजकम्' (**ध्व०** ३. पृ० ४५५) इति। अयमाशयः। लोके यदनुमेयं तद् व्यंग्यं सदपि नियमेन ध्वनिव्यवहारप्रयोजकं न भवति। तथैव लोके यदर्थापत्तिलभ्यं तदपि व्यंग्यं सदपि नियमेनैव ध्वनिव्यवहारप्रयोजकं न भवतीत्याशयेनाभिनवगुप्तपाद आह—'काव्यग्रहणाद् गुणालंकारोपस्कृतशब्दार्थपृष्ठपाती ध्वनिलक्षण आत्मेत्युक्तम्। तेनैतन्निरवकाशं श्रुतार्थापत्तावपि ध्वनिव्यवहारः स्यादिति।' इति (**लोचनम्**।, पृ० १०४-१०५)। तदेवं 'पीनो देवदत्तो दिवा न भुंक्ते' इत्यत्र रात्रिभोजनरूपस्यार्थस्य व्यंग्यत्वेऽपि गुणालंकारादिरहितत्वादेव चमत्कृतिप्रयोजकत्वाभावाद् वाक्यस्य न काव्यत्वं, न चापि ध्वनित्वं व्यंग्यार्थस्यापि गुणालंकाराद्युपस्कृतत्वाभावात्। पुनरपि अर्थापत्तिलभ्यस्यार्थस्य व्यंग्यत्वमभ्युपगम्यैव तस्य ध्वनिप्रयोजकत्वाभावं दर्शयन्नाह—

"× ×अत एव समाप्तायामेवाभिधायां सहृदयैरेव स द्वितीयोऽर्थोऽपृथक्प्रयत्नेनैवावगम्यः। यथोक्तं प्राक् 'शब्दार्थशासनज्ञानमात्रेणैव' इत्यादि। एतच्च सर्वोदाहरणेष्वनुसर्तव्यम्। 'पीनश्चैत्रो दिवा नात्ति' इत्यत्राभिधैवापर्यवसितेति सैव स्वार्थनिर्वाहायार्थान्तरं शब्दान्तरं वाकर्षतीत्यनुमानस्य श्रुतार्थापत्तेर्वा तार्किकमीमांसकयोर्न ध्वनिप्रसंग इत्यलं बहुना।" (**लोचनम्**. २. पृ० २७३)। अयमाशयः। पीनश्चैत्रो दिवा नात्तीत्यत्र रात्रिभोजनरूपोऽर्थो मीमांसकानां मते श्रुतार्थापत्तिप्रमाणलभ्यः। नैयायिकानां मते अनुमानप्रमाणलभ्यः। न्यायनये श्रुतार्थापत्तेरनुमान एवान्तर्भावात्। यदुक्तं जयन्तभट्टेन—'श्रुतार्थापत्तिरपि वराकी नानुमानाद् भिद्यते।' इति (**न्यायमञ्जरी**. प्रमाणप्रकरणम्. पृ० ४२)। स च रात्रिभोजनरूपोऽर्थः आलंकारिकमते व्यंग्योऽपि भवति। किन्तु तस्यार्थस्य व्यंग्यत्वेऽपि सहृदयत्वनैरपेक्ष्येणैव सर्वैरपि श्रोतृभिरुपलभ्यत्वादगूढव्यंग्यसाधारण्येन वाच्यायमानत्वमेवेति कृत्वा न ध्वनिप्रयोजकत्वम्। यदाह मम्मटभट्टः—'कामिनीकुचकलशवत् गूढं चमत्करोति अगूढं तु स्फुटतया वाच्यायमानमिति गुणीभूतमेव।' इति[1] (**का० प्र०** ५)। यथा तथा वा भवतु, मीमांसकादिभिरर्थापत्त्या उपलब्धस्यार्थस्य अभिनवगुप्तपादेन व्यंग्यत्वमर्थाद् व्यञ्जनाव्यापारलभ्यत्वमप्यभ्युपगतम्। एवन्तर्हि समायातोऽर्थापत्तिव्यञ्जनयोस्संकरप्रसंग इति शंकायामुभयोर्भेदप्रदर्शनार्थं प्रथममर्थापत्तिस्वरूपमेव विशदतरं निभाल्यते।

---

१. अस्य मम्मटवचनस्य मूलन्तु **लोचन** एवानुसन्धेयम्। तथा चाहाभिनवगुप्तपादः प्रसंगक्रमेण—तल्लक्षणाप्रयोजनं शूरकृतविद्यसेवकानां प्राशस्त्यमशब्दवाच्यत्वेन गोप्यमानं सन्नायिकाकुचकलशयुगलमिव महार्घतामुपयद्ध्वन्यत इति। (**लोचनम्** १, पृ० १३८)।

श्रुतार्थापत्तिस्वरूपविवेचनम्

'अर्थापत्तिरपि दृष्टः श्रुतो वाऽर्थोऽन्यथा नोपपद्यत इत्यर्थकल्पना, यथा जीवतो देवदत्तस्य गृहाभावदर्शनेन बहिर्भावस्यादृष्टस्य परिकल्पना।' इति **शाबरभाष्यम्**। 'प्रमितस्यार्थस्यार्थान्तरेण विनानुपपत्तिमालोच्य तदुपपत्तये याऽर्थान्तरकल्पना साऽर्थापत्तिः।' इति च **शास्त्रदीपिकायाम्** (अर्थापत्तिनिरूपणम् पृ० २१४)। दृष्टार्थापत्तिः श्रुतार्थापत्तिश्चेति सा द्विविधा। प्रकृते च श्रुतार्थापत्तिरेवास्माकं विवेचनीया। वाक्यार्थोपपत्तये यदर्थस्य कल्पनं तदपि शब्दाध्याहारेणेति केचित् अर्थाध्याहारेणेत्यपरे प्राभाकराः। तथा हि 'नाध्याहारादिभिः सूत्राणां व्याख्यानं कर्तव्यं सति गत्यन्तरसम्भवे' इति महर्षिशबरप्रवर्तितो मीमांसासमयः। तत एव शब्दैः रूपस्थितैरेवार्थो प्रत्याय्यते। यत्र शब्दो न श्रूयते अर्थस्तु वाक्यार्थसम्पूर्तये अपेक्षितस्तत्र शब्दस्य कल्पनमावश्यकम् इति भाट्टाः। तथा हि अधिकारेणानुवृत्त्या वानुषंगन्यायेन वा शब्दस्यैव परामर्शेन व्याख्यानं कर्तव्यं न तु अश्रुतस्य कल्पनया। अधिकारस्तु प्रकरणारम्भे आदित उक्तस्य शब्दस्य प्रतिसूत्रमवस्थितिः। अयञ्च पाणिनिव्याकरणे प्रसिद्धः। अनुवृत्तिस्तु दूरतः श्रुतस्य शब्दस्य। अनुषंगस्तु नेदीयस्थानस्थितस्य शब्दस्य। सर्वथा अश्रुतस्य शब्दस्य कल्पनमध्याहारः। स च जघन्यः पक्षः। विशेषतस्तु श्रुतिवाक्ये। स एव शब्दाध्याहारो भाट्टानां मते श्रुतार्थापत्तावुपलभ्यते। यदाह—

शब्दस्यैवान्वयार्हत्वाद् द्वारमाश्रियतामिति।
शब्दाध्याहार एव स्याद् इत्येवं माट्टशं मतम्॥
(**मानमेयोदयः** पृ० १०१) इति।

प्राभाकरैस्तु द्वारं द्वारमित्येवमादिषु स्थलेषु अर्थ एवाध्याह्रियते। यदाह—

संनिधिश्शब्दजन्मेव व्युत्पत्तौ नोपलक्षणम्।
अध्याहृतेनाप्यर्थेन लोके संबन्धदर्शनात्॥ इति।

(शालिकनाथस्य प्रकरणपञ्चिकायाम् **वाक्यार्थमातृकावृत्तिः**, पृ० ६)। स चार्थाध्याहारपक्षो नान्येषां भाट्टादीनामभिमतः। तथा हि पुष्पेभ्य इत्युक्ते स्पृहयतीति शब्दस्यैवाध्याहारः। न तु अर्थस्य। चतुर्थीविभक्त्यनुरोधेन। 'स्पृहेरीप्सितः' (**पा०** १-४-३६) इति सूत्रानुसारं स्पृहिधातोरुपात्तत्व एव चतुर्थीविभक्तिलाभो नेतरथा। किञ्च अर्थापत्तिप्रमाणेन शब्द एवाध्याहार्यः। अर्थस्तु शब्दादेवाध्याहृतादुपलब्धव्यः। सर्वथा वाक्यस्याध्याहारोपपन्नस्यापि शब्दप्रमाणविषयत्वेनेष्टत्वात्। यस्त्वर्थः प्राभाकरादिभिः साक्षादध्याहृतः स तु शब्दप्रमाणेतरार्थापत्तिप्रमाणलभ्य एवेति कृत्वा शब्दप्रमाणविषयतां

नायाति । अत एवायं मीमांसकसमयः प्रवर्तते—'शाब्दी हि आकांक्षा शब्देनैव प्रपूर्यते । प्रमाणान्तरलभ्यस्यार्थस्य शाब्देऽन्वये प्रवेशासम्भवादि'ति । तदेवं 'पीनो देवदत्तो दिवा न भुंक्ते' इति श्रुतेन वाक्येन दिवाऽभुञ्जाने देवदत्ते पीनत्वरूपो योऽर्थः प्रमितः तदन्यथानुपपत्तिमालोच्य तदुपपत्तये 'रात्रौ भुंक्ते' इति रात्रिभोजनरूपार्थप्रतिपादकवाक्यान्तरस्य शब्दसंघातरूपस्य कल्पनाच्छ्रुतार्थापत्तिरियमिति बोध्यम् । परन्तु अत्र काचन शंका समुदेति ।

यत्र त्वपरिपूर्णस्य वाक्यस्यान्वयसिद्धये ।

शब्दोऽध्याह्रियते तत्र श्रुतार्थापत्तिरिष्यते ॥ इति **मानमेयोदय**कारनिर्दिष्टदिशा (पृ० १२६) भाट्टमते यत्र वाक्येऽन्वयासिद्धिस्तत्रैवार्थापत्त्या शब्दाध्याहारो भवति । तद् यथा 'पुष्पेभ्य' इत्यत्र । यत्र तु 'पीनो देवदत्तो दिवा न भुंक्ते' इत्येवमादिषु सिद्ध एवान्वयस्तत्र शब्दाध्याहाररूपाया अर्थापत्तेः प्रसंग एव न समुदियात् । अत एव च **न्यायकोश**कारश् श्रुतार्थापत्तेर्द्वैविध्यं प्रदर्शयन्नाह—'श्रुतार्थापत्तिश्च द्विविधा, अभिधानानुपपत्तिरभिहितानुपपत्तिश्चेति । (पृ० ७६) । तदेतच्छंकासमाधानव्याजेनैव भोजराजोऽपि द्विविधमपि श्रुतार्थापत्तिं विभज्य दर्शयतीति प्रतिभाति । अत एव क्रमप्राप्ततया भोजराजाशयोऽप्यत्र परीक्ष्यते ।

भोजराजमते श्रुतार्थापत्तेः स्वरूपम्

भोजराजमते अध्याहारो नाम अर्थापत्तेरेवावान्तरभेदविशेषः । तत्र वाक्यस्यान्वयपूर्तये शब्दोऽध्याह्रियते । यदाह—" 'द्वारं द्वारम्' इत्युक्ते 'संव्रियतां' 'अपाव्रियतां' वेत्यध्याह्रियते । तथा 'वर्षत्युदेति' इत्युक्ते 'देवः, सूर्यः' इति[1] ।" यत्र तु अन्वयवतोऽपि वाक्यस्यार्थः अपरिपूर्णः तत्रार्थस्य विधिनिषेधादियुक्ततया संगतिविधानार्थमर्थान्तरस्य कल्पनं वाक्यशेषः । यदाह 'कः पुनरध्याहारवाक्यशेषयोर्विशेषः ? शब्दाकांक्षानिवर्तकोऽध्याहारः, अर्थाकांक्षानिवर्तकः वाक्यशेष इति[2] ।' पुनरन्यत्र वाक्यशेषस्वरूपं निरूपयन् तदुदाहरणान्याह—"सर्ववाक्यानां विधिनिषेधपर्यवसायित्वात्, साक्षात् तदश्रुतावपि तदुपकल्पनं वाक्यशेषः । तद्यथा—'आर्यनिवासोऽयं देशः' इत्युक्ते इहैव स्थातव्यम्, 'मध्याह्नो वर्तते' इत्युक्ते इहैव भोक्तव्यम्, 'सचोरः पन्थाः' इत्युक्ते न गन्तव्यम्, 'ग्राहास्सरित्यस्यां' इत्युक्ते त स्नातव्यमिति वाक्यशेषो भवति ।" इति[3] । स

1. V. Raghavan, **Bhoja's Śṛṅgāraprakāśa, p. 169.**
2. **Ibid, p. 169**
3. **Ibid, p. 170**

च वाक्यशेषोऽपि अर्थापत्तेरेवावान्तरभेदविशेष इत्युपदादयन्नाह—"अथैष प्रत्यक्षानुमानोपमानशब्दैः अनुपलभ्यमानः किंप्रमाणविषयस्स्यात्, अध्याहारवत् श्रुतार्थापत्तिप्रमेय इति।" इति[1]। यस्तु काव्यप्रबन्धेषूपलभ्यमानः कृत्याकृत्यप्रवृत्तिनिवृत्त्युपदेशात्मकः आलंकारिकैर्व्यंग्यत्वेनाभिमतोऽर्थः सोऽपि भोजराजमते वाक्यशेषभूतोऽर्थापत्तिप्रमाणलभ्य एव। यदाह—

"·····सर्वं हि वाक्यं विधिनिषेधयोरेव पर्यवस्यति। यत्रापि च लिङादयो न श्रूयन्ते, तत्रापि विधिनिषेधपरतया सर्ववाक्यानां वाक्यशेषभूताः ते अवगम्यन्ते। तद् यथा इह देशे सुभिक्षमित्युक्ते अत्रैव स्थातव्यम्, मध्याह्नो वर्तते इत्युक्ते इहैव भोक्तव्यम्, सचोरः पन्थाः इत्युक्ते न गन्तव्यम्, ग्राहाः सरित्यस्यामित्युक्ते न स्नातव्यमिति प्रतीयते।

किञ्च महाकाव्यैरपि रामायणादिभिः इदमेव व्युत्पाद्यते—रामस्य पितुराज्ञां पालयतः वनवासिनोऽपि तथाविधः अभ्युदयस्संवृत्तः, रावणस्य परदारान् अभिलष्यतः त्रैलोक्यविजयिनोऽपि तथाविधः उच्छेदः। तस्मात् पितुराज्ञां पालयेत्, परदारान् नाभिलष्येत्, रामवद् वर्तेत, न रावणवद् इति।"[2] इति।

किञ्च एकैकस्मिन्नपि पद्ये व्यंग्यत्वेनोपलभ्यमानो वस्तुमात्ररूपोप्यर्थस्तेन वाक्यशेषरूपेणैव परिगण्यते। यथाह—

"—वाक्यशेषो भवति। यथा च—

त्वं जीवितं त्वमयि मे हृदयं द्वितीयं त्वं कौमुदी नयनयोरमृतं त्वमंगे।
इत्यादिभिः प्रियशतैरनुरुध्य मुग्धां तामेव—शान्तमथवा किमतः परेण॥

यथा वा—

पत्युः पितेव स भवान नलकूबरस्य रम्भा स्नुषा धनपतेरिव सा तवापि।
यत्त्वन्यदत्र हृदयान्न तदेति कण्ठं दोषस्तथापि यदि तत् स्मृत एष रुद्रः॥

× × × तथा हि—तामेव त्वं तथाग्नौ विशुद्धामाहितगर्भामनागसं विस्रब्धां च धर्मपत्नीमत्याक्षीरिति प्रथमश्लोके,

कामयमानायामपि स्नुषायां कामतोऽपि यत्प्रधर्षणं तन्महापातकेषु प्रकृष्यते, किमंग पुनः अकामयमानायाः शपन्त्याः क्रोशन्त्याश्च हठेनेति द्वितीयश्लोके × × ×"[3] इति।

---

1. Ibid, p. 170
2. Ibid, P. 171
3. Ibid, pp. 171–172

अर्थापत्तिव्यञ्जनयोर्विशेषः

भोजराजेन वाक्यार्थस्य परिपूर्तये विधिनिषेधादिसमाक्षेपमुखेन प्रवर्तमानो वाक्यशेषो नाम अर्थापत्तेरेव योऽयं प्रकारविशेषः स्वीक्रियते सः स्वीक्रियतां नाम। यत्त्वत्रासहनीयं तत् काव्यवाक्यस्यापि व्यंग्यत्वेनाभिमतस्यापि अर्थस्य वाक्यशेषत्वकथनेनार्थापत्तिप्रमाणलभ्यत्वप्रदर्शनं नाम। व्यञ्जनाव्यापार-लभ्यस्यार्थापत्तिलभ्यत्वे व्यञ्जनाव्यापारस्यैव मूलोच्छेदप्रसंगः। स च कथञ्चिदपि नादरणीयः। 'द्वारं द्वारम्' इत्येवमादिषु लोकव्यवहारेष्वपि शब्दाध्याहाराद् व्यञ्जनाव्यापारस्वीकार एव ज्यायान्, किमुत काव्यवाक्येषु। काव्यवाक्येषु व्यंग्यस्यार्थस्य शब्दाध्याहारेण अर्थापत्तिप्रमाणलभ्यत्वे प्रमात्वं स्यात्। तत्तु न सम्यक्। तत्र अप्रमाभूतस्यापि चारुतरस्यार्थस्याभिप्रेतत्वात्। अथ श्रुतार्थापत्त्या शब्दस्य कल्पनं कल्पितस्य च शब्दस्य अभिधया तत्तदर्थ-प्रतिपादनं भवति, किं व्यञ्जनांगीकारेण, वलृप्तेनैवोपपत्तौ कल्पनान्तरेण गौरवप्रसंगादिति चेदुच्यते। श्रुतार्थापत्त्या शब्दकल्पनं, शब्देन चार्थाभिधान-मिति द्वयं कल्पनीयम्। व्यञ्जनांगीकारे तु साक्षादर्थस्य प्रतिपादनमिति कल्पनालाघवम्। तथा च—

कल्पनागौरवं यत्र तं पक्षं न सहामहे।
कल्पनालाघवं यत्र तं पक्षं रोचयामहे॥

इति **तार्किकरक्षा**कृत उक्तिमनुरोध्य कल्पनागौरवभयात् काव्यसाम्राज्ये भोजराजकृता शब्दाध्याहारप्रचेष्टा दूरत एव वर्जनीया।

तत्र पुनरपीयं शंका समुदेति। ननु कल्पनागौरवभयात् नैव भवतु नाम शब्दाध्याहारेण व्यञ्जनायाः गतार्थत्वम्। वाक्यशेषेण तु स्यादेव व्यञ्जनायाः गतार्थत्वमन्तरा शब्दविशेषकल्पनाभावात् साक्षादर्थविशेषस्यैव विधिनिषे-धादिरूपस्य परिकल्पितत्वात् गौरवभयाभावात्। तथा हि भोजराजेन यथा 'आर्यनिवासोऽयं देशः' इत्यत 'इहैव स्थातव्यम्' इत्यर्थ उपलभ्यते तथैव व्यञ्जनावादिना मम्मटभट्टेनापि 'गतोऽस्तमर्कः' इत्येवमादितः 'अभिसरण-मुपक्रम्यताम्' इत्येवमादयोऽर्था उपलभ्यन्त एव। तादृशानामर्थानां वाक्य-शेषविषयत्वेन कथं न अर्थापत्तिलभ्यत्वम् इति चेदुच्यते।

यस्त्वर्थः लोके अर्थापत्तिप्रमाणलभ्यः स एव काव्ये उपलभ्यमानस्सन् व्यंग्यार्थं इत्युच्यते। व्यंग्यस्त्वर्थः व्यञ्जनाव्यापारेणैवोपलब्धव्यः न तु अर्थापत्तिप्रमाणेन। व्यंयग्त्वेनाभिमतस्यार्थापत्तिप्रमाणलभ्यत्वे प्रमात्वं समुदि-यात्। तस्यार्थस्य प्रमात्वेन नियतरूपत्वं स्यात्। तत्तु ध्वनिवादिनां नाभिप्रेतम्। तथा हि 'गतोस्तमर्कः' इत्यस्मादेवानियतरूपा विविक्ता एव व्यंग्यार्थाः समुपलभ्यन्ते। अर्थापत्तिलभ्यत्वे तु व्यंग्यत्वेनाभिमतस्यार्थस्य

नियतमेकमेव रूपं स्यात् । किञ्च वाग्व्यवहारेषु वाच्यार्थ एव शब्दप्रमाणविषयत्वेन स्वीक्रियते । तस्य नियतरूपत्वात् । व्यंग्यार्थस्तु न कदापि शब्दप्रमाणविषयत्वेनाभिप्रेतः । तदेवं वाच्यार्थाद् व्यंग्यार्थस्य भेदं दर्शयितुं मम्मटभट्टो यदाह तत एवार्थापत्तेर्व्यञ्जनायाः भेदः स्फुटीभवेत् । तथा चोक्तम्—

"अपि च वाच्योऽर्थः सर्वान् प्रतिपतॄन् प्रति एकरूप एवेति नियतोऽसौ । न हि 'गतोऽस्तमर्कः' इत्यादौ वाच्योऽर्थः क्वचिदन्यथा भवति । प्रतीयमानस्तु तत्तत्प्रकरणवक्तृप्रतिपत्त्रादिविशेषसहायतया नानात्वं भजते । तथा च 'गतोऽस्तमर्कः' इत्यतः सपत्नं प्रत्यवस्कन्दनावसर इति अभिसरणमुपक्रम्यतामिति प्राप्तप्रायस्ते प्रेयानिति कर्मकरणान्निवर्तामहे इति सांध्यो विधिरुपक्रम्यतामिति दूरं मा गा इति सुरभयो गृहं प्रवेश्यन्तामिति संतापोऽधुना न भवतीति विक्रेयवस्तूनि संह्रियन्तामिति नागतोऽद्यापि प्रेयानित्यादिरनवधिर्व्यंग्योऽर्थः तत्र तत्र प्रतिमाति ।" इति (**का. प्र. ५**)

यस्तु 'पीनो देवदत्तो दिवा न भुंक्ते' इत्येवमादिषु रात्रिभोजनादिरूपोऽर्थस्तस्य प्रमात्वे स्वीकृते अर्थापत्तिलभ्यत्वमेव । अनपेक्षिते तु प्रमात्वे व्यञ्जनाव्यापारलभ्यत्वमप्युरीकर्तुं शक्यत इत्ययमपि अर्थापत्तिव्यञ्जनयोर्विशेषः ।

किञ्च अर्थापत्तिलभ्यस्यार्थस्य सहृदयत्वनैरपेक्ष्येण सर्वैरप्युपलभ्यत्वाद् वाच्यायमानत्वमेवेति न तस्य ध्वनिव्यवहारप्रयोजकत्वमिति पूर्वमेवोक्तम् । व्यञ्जनाव्यापारस्य महाविषयत्वान्न कथञ्चिदप्यर्थापत्त्या तस्य गतार्थत्वं स्यात् । प्रत्युत अर्थापत्तिन्यायेन कल्पितस्याप्यर्थस्य प्रमात्वे अपरामृष्टे व्यंग्यत्वं स्वीकर्तुं युज्यत इति सर्वथा सुस्फुट एवार्थापत्तिव्यञ्जनयोर्विशेषः । अतएव '.....एषूदाहरणेषु शब्दशक्त्या प्रकाशमाने सत्यप्राकरणिकेऽर्थान्तरे वाक्यस्यासम्बद्धाभिधायित्वं मा प्रसाङ्क्षीदित्यप्राकरणिकप्राकरणिकार्थयोरुपमानोपमेयभावः कल्पयितव्यः सामर्थ्यात् ।' (**ध्वन्यालोकः** २. पृ. २४४) इत्येवमादिषु स्थलेषु अर्थविशेषकल्पनस्य व्यञ्जनया करम्बितत्वेऽपि महाविषयायाः प्रमाणत्वेनानालिंगितायाः सहृदयमात्रवल्लभायाः व्यञ्जनाया अर्थापत्त्यादिप्रमाणैर्न गतार्थता न चापि स्वरूपहानिरिति सर्वथा वृथैव धनिकधनञ्जयभोजराजादीनां तात्पर्यार्थापत्त्यादिभिर्व्यञ्जनानिरासप्रयास इति शिवम् ।

तृतीयं दर्शनम्

वाग्व्यवहारे व्यञ्जनायाः प्रयोगः

व्यंग्यार्थप्रशंसा

आनन्दवर्धनेन व्यंग्यार्थप्राधान्यात्मकं यद्ध्वनिकाव्यं निभालितं तदेव उत्तमं काव्यम्। उक्तञ्च मम्मटभट्टेन—'इदमुत्तममतिशायिनि व्यंग्ये वाच्याद् ध्वनिर्बुधैः कथितः।' इति (**काव्यप्रकाशः** १।४)। ध्वनावपि कदाचिद् वस्तुमात्रं कदाचिदलंकारविशेषः कदाचिद्वा रसादिरेवाभिव्यज्यते। तेष्वपि त्रिविधेषु ध्वनिषु रसादिध्वनिरेव श्रेष्ठः। यदुक्तं—'प्रतीयमानस्य चान्यभेददर्शनेऽपि रसभावमुखेनैवोपलक्षणं प्राधान्यात्।' इति (**ध्वन्यालोकः** १. पृ. ८९–९०)। 'कविना काव्यमुपनिबध्नता सर्वात्मना रसपरतन्त्रेण भवितव्यम्। तत्रेतिवृत्ते यदि रसानुगुणां स्थितिं पश्येत्तदेमां भङ्क्त्वापि स्वतन्त्रतया रसानुगुणं कथान्तरमुत्पादयेत्। न हि कवेरितिवृत्तमात्रनिर्वहणेन किञ्चित्प्रयोजनम्, इतिहासादेव तत्सिद्धेः।' (**ध्व.** ३. पृ. ३३६) इति च। अथवा 'अयमेव हि महाकवेर्मुख्यो व्यापारो यद्रसादीनेव मुख्यतया काव्यार्थीकृत्य तद्व्यक्त्यनुगुणत्वेन शब्दानामर्थानां चोपनिबन्धनम्।' (**ध्व.** ३. पृ. ४०१) इत्येवं बहुधा रसादिध्वनेरेव मुख्यत्वं प्रतिपादितम्। किन्तु एतावता वस्तुमात्रालंकारयोरपि प्राधान्यं नापह्नूयते। सति सम्भवे रसादिरेव प्राधान्येनाभिव्यञ्जनीयः। यत्र तु तन्न सम्भवति तत्र वस्तुमात्रालंकारयोरपि प्राधान्येनाभिव्यञ्जना सहृदयश्लाघ्या भवति। यदुक्तम्—

यस्मिन् रसो वा भावो वा तात्पर्येण प्रकाशते।
संवृत्त्याभिहितौ वस्तु यत्रालंकार एव वा॥
काव्याध्वनि ध्वनिर्व्यंग्यप्राधान्यैकनिबन्धनः।
सर्वत्र तत्र विषयी ज्ञेयः सहृदयैर्जनैः॥
(**ध्व.** ३. पृ. ५००–५०१) इति।

संग्रहश्लोकाभ्याञ्चैतदवदातं भवेद् यन्न केवलं रस एव सहृदयहृदयहारी किन्तु संवृत्याभिहितावर्थात् गोप्यमानतयाभिहितौ वस्तुमात्रालंकारावपि लब्धसौन्दर्यौ सन्तौ सहृदयहृदयान्यनुरञ्जयत इति।

गुणीभूतव्यंग्यं नामकाव्यस्य यः प्रकारः सोऽपि व्यंग्यार्थविभववत्तयैव सौभाग्यमासादयति। तत्र कदाचिद्रसविशेषस्य रसान्तरापेक्षया गुणीभावः। तद् यथा मम्मटभट्टप्रदर्शितदिशा—

अयं स रशनोत्कर्षी पीनस्तनविमर्दनः।
नाभ्यूरुजघनस्पर्शी नीविविस्रंसनः करः॥

इत्यत्र शृंगारः करुणस्य गुणीभूतः। (**काव्यप्रकाशः** ५–११६)। **महाभारते** स्त्रीपर्वणि चतुर्विंशेऽध्याये रणभूमिपतितं भूरिश्रवसश्छिन्नं हस्तमादाय तद्बधोः प्रलापोक्तिरियम्। तदेवं करुण एवात्र प्रधानः प्रबन्धरसः। सति चैवं शृंगारापेक्षया गुणीभूतव्यंग्यत्वेऽपि काव्यस्य करुणापेक्षया ध्वनित्वमेव। तस्माद्रसादेर्गुणीभूतत्वेऽपि अन्ततो गत्वा नास्त्येव रसध्वनेर्निष्कृतिरित्यास्तां तावत्।

कदाचिद् व्यंग्यालंकारस्य गुणीभावेनापि गुणीभूतव्यंग्यता स्यात्। तथा हि—

अलंकारान्तरस्यापि प्रतीतौ यत्र भासते।
तत्परत्वं न वाच्यस्य नासौ मार्गो ध्वनेर्मतः॥ (**ध्व.** २–२७)

यथा— चन्दमऊए हि णिसा णलिनी कमले हि कुसुमगुच्छेहि लआ।
हंसेहि सरअसोहा कव्वकहा सज्जनेहि करइ गरुई॥

(चन्द्रमयूखैर्निशा नलिनी कमलैः कुसुमगुच्छैर्लता।
हंसैश्शारदशोभा काव्यकथा सज्जनैः क्रियते गुर्वी॥ इति छाया)

इत्यत्र व्यंग्योपमागर्भत्वेऽपि सति वाच्यदीपकालंकारमुखेनैव चारुत्वं न व्यंग्यालंकारतात्पर्येण। 'तस्मात्तत्र वाच्यालंकारमुखेनैव काव्यव्यपदेशो न्याय्यः। यत्र तु व्यंग्यपरत्वेनैव वाच्यस्य व्यवस्थानं तत्र व्यंग्यमुखेनैव व्यपदेशोयुक्तः।' (**ध्व.** २. पृ. २६०)। किन्तु तथाप्यत्रोदाहृतदीपकप्रभृतीनामलंकाराणां व्यंग्योपमाद्यलंकारसंस्पर्शेनैव आत्मलाभः स्यात्। शोभा च सम्पद्येत। एवं प्रायशः सर्वेष्वप्यलंकारेषु व्यंग्यार्थविशेषसंस्पर्शोऽस्त्येव। तदुक्तमानन्दवर्धनेन—

"दीपकसमासोक्त्यादिवदन्येप्यलंकाराः प्रायेण व्यंग्यालंकारान्तरवस्त्वन्तरसंस्पर्शिनो दृश्यन्ते। यतः प्रथमं तावदतिशयोक्तिगर्भता सर्वालंकारेषु शक्यक्रिया।.....भामहेनाप्यतिशयोक्तिलक्षणे यदुक्तम्—

सैषा सर्वैव वक्रोक्तिरनयार्थो विभाव्यते।
यत्नोऽस्यां कविना कार्यः कोऽलंकारोऽनया विना॥[1] इति"

इति (**ध्व.** ३. पृ. ४६५–४६७)

---

१. भामहस्य काव्यालंकारः २–८५.

अत्र भामहेनातिशयोक्तिरेव वक्रोक्तिरित्युच्यते । दण्डिनाप्युक्तम्—

अलंकारान्तराणामप्येकमाहुः परायणम् ।
वागीशमहितामुक्तिमिमामतिशयाह्वयाम् ॥
(**काव्यादर्शः** २-२२०) इति ।

व्यंग्यार्थसहभावेनालंकारविशेषाणां शोभाशालित्वविषय आनन्दवर्धनेनापि विस्पष्टमुक्तम्—

'येषु चालंकारेषु सादृश्यमुखेन तत्त्वप्रतिलम्भः यथा रूपकोपमातुल्ययोगितानिदर्शनादिषु तेषु गम्यमानधर्ममुखेनैव यत् सादृश्यं तदेव शोभातिशयशालि भवतीति ते सर्वेऽपि चारुत्वातिशययोगिनः सन्तो गुणीभूतव्यंग्यस्यैव विषयाः ।' इति (**ध्व.** ३. पृ. ४७०-४७१)

अन्येषु च केषुचिदलंकारेषु व्यंग्यवस्तुमात्रविशेषस्य सद्भावे सत्येवालंकाराणामात्मलाभः स्यात् । यदुक्तम्—'समासोक्त्याक्षेपपर्यायोक्तादिषु तु गम्यमानांशाऽविनाभावेनैव तत्त्वव्यवस्थानाद्गुणीभूतव्यंगता निर्विवादैव ।' (**ध्व.** ३. पृ. ४७१) इति । अलंकारेषु व्यंग्यांशसंस्पर्शप्रक्रियाविषये किञ्चिदधिकमप्यानन्दवर्धनभणितमनुधावनमर्हति । यदुक्तम्—

'तत्र च गुणीभूतव्यंग्यतायामलंकाराणां केषाञ्चिदलंकारविशेषगर्भतायां नियमः । यथा व्याजस्तुतेः प्रेयोऽलंकारगर्भत्वे । केषाञ्चिदलंकारमात्रगर्भतायां नियमः । यथा सन्देहादीनामुपमागर्भत्वे । केषाञ्चिदलंकाराणां परस्परगर्भतापि सम्भवति । यथा दीपकोपमयोः । तत्र दीपकमुपमागर्वत्वेन प्रसिद्धम् । उपमापि कदाचिद्दीपकच्छायानुयायिनी । यथा मालोपमा ।' (**ध्व.** ३. पृ. ४७१) इति ।

अगूढमपरस्यांगं वाच्यसिद्ध्यङ्गमस्फुटम् ।
सन्दिग्धतुल्यप्राधान्ये काक्वाक्षिप्तमसुन्दरम् ।
व्यंग्यमेवं गुणीभूतव्यंग्यस्याष्टौ भिदाः स्मृताः ॥

(**का. प्र.** ५. सू. ६६) इति वदता मम्मटभट्टेन गुणीभूतव्यंग्यस्य येऽष्टप्रकाराः प्रदर्शितास्तेषु यत्र यत्र वस्तुमात्रस्य गुणीभूतत्वं तत्र तत्रापि व्यंग्यांशसंस्पर्शेनैव काव्यस्य शोभा सम्पद्यत इति निर्विवादम् । यदुक्तम्—'तदयं ध्वनिनिष्यन्दरूपो द्वितीयोऽपि महाकविविषयोऽतिरमणीयो लक्षणीयः सहृदयैः । सर्वथा नास्त्येव सहृदयहृदयहारिणः काव्यस्य स प्रकारो यत्र न प्रतीयमानार्थसंस्पर्शेन सौभाग्यम् ।' (**ध्व.** ३. पृ. ४७४-४७५) इति । यत्र तु दूरतोऽपि प्रतीयमानार्थसंस्पर्शो नास्ति तत् सहृदयहृदयहारि एव न भवतीति व्यञ्जनाया एवैतदनपह्नवनीयं माहात्म्यम् । तस्मात् सुशोभनं भणितमानन्दवर्धनेन—

मुख्या महाकविगिरामलंकृतिभृतामपि ।
प्रतीयमानच्छायैषा भूषा लज्जेव योषिताम् ॥
(ध्व. ३।३७) इति ।[1]

वैदग्ध्यप्रशंसा

ननु व्यंग्यार्थसंस्पर्शेन काव्यशोभासम्भवे किं बीजमिति चेदुच्यते—'सारभूतो ह्यर्थः स्वशब्दानभिधेयत्वेन प्रकाशितः सुतरामेव शोभामावहति । प्रसिद्धिश्चेयमस्त्येव विदग्धविद्वत्परिषत्सु यदभिमततरं वस्तु व्यंग्यत्वेन प्रकाश्यते न साक्षाच्छब्दवाच्यत्वेन ।' इति (ध्व. ४. पृ. ५३३) । काव्यस्य व्यंग्यार्थवैभवसम्पादने आविष्करणे च तस्यानवद्यशोभायाः कवेः सहृदयस्य च वैदग्ध्यं प्राकाममपेक्ष्यते । कुन्तकेन **वक्रोक्तिजीवित**ाख्यायां स्वकीयकृतौ व्याख्यातायां वक्रोक्तेरप्येतदेव बीजम् । यदुक्तम्—वक्रोक्तिरेव 'वैदग्ध्यभंगभणितिरुच्यते' इति ।

श्रीहर्षेणाप्येतदनुरोधेनैवोक्तम्—

निषेधवेशो विधिरेष तेऽथवा तवैव युक्ता खलु वाचि वक्रता ।
विजृम्भितं यस्य किल ध्वनेरिदं विदग्धनारीवदनं तदाकरः ॥
(**नैषधचरितम्**. ९–५०) इति ।

परन्त्वत्र प्रयोक्तृगतं वैदग्ध्यं प्रायशो नारीष्वेवाविष्करणीयमित्युक्तं भवति । तत्र च हेतुर्गाथानां प्रायशो महिलाजनभणितत्वमेव । किं बहुना—

भम धम्मिअ वीसत्थो सो सुणओ अज्ज मारिओ देण ।
गोलाणइकच्छकुडंगवासिणा दरिअसीहेण ॥
(**गाथासप्तशती**. २–७६)

अत्ता एत्थ णिमज्जइ एत्थ अहं दिअसअं पलोएहि ।
मा पहिअ रत्तिअन्धअ सेज्जाए मह निमज्जहिसि ॥
(**गा. स.** ७–२७)

वच्च मह व्विअ एक्केइ होन्तु णीसासरोइअव्वाइं ।
मा तुज्ज वि तीअ विणा दक्खिण्यहअस्स जाअन्तु ॥
(**सप्तशती**. ९४४)[2] इति

---

१. 'प्रतीयमानाच्छाया अन्तर्मदनोद्भेदजहृदयसौन्दर्यरूपा यया, लज्जा ह्यन्तरुद्भिन्नमान्मथविकारजुगोपयिषारूपा मदनविजृम्भैव ।' (**लोचनम्**. पृ. ४७५) इत्यादिकमप्यत्रावलोकनीयम् ।

2. **Hāla's Sattasai, No. 944 (Supplement 7) in Weber's edition.**

आनन्दवर्धनेन एकादिक्रमेणोदाहृतास्तिस्र एव गाथाः महिलाभिरेव मणिताः। (ध्व. १. पृ. ५२-७३)

एवंविधानां गाथानां व्यंग्यार्थसौन्दर्यसमाहरणार्थं श्रोतृभिरपि विदग्धजनैर्भवितव्यम्। यदुक्तं **वज्जालग्गे**—

सव्वो गाहाउ जणो वीसत्थो भणइ सव्वगोट्ठीसु।
परमत्थो जो ताणं सो नाओ महच्छइल्लेहिं॥
(**गाहावज्जा.** १४) इति।

(सर्वः गाथाः जनः विश्वस्तः भणति सर्वगोष्ठीषु।
परमार्थः यः तासां सः ज्ञातः महाविदग्धैः॥ इति छाया)

एतच्च व्यंग्यार्थावधारणे आवश्यकं वैदग्ध्यं व्यंग्यार्थसमन्वितानां काव्यानां निरन्तरानुशीलनेनैवोपजायते। यदुक्तं **वज्जालग्ग** एव—

अद्धक्खरभणियाइं नूणं सविलासमुद्धहसियाइं।
अद्धच्छिपेच्छियाइं गाहाहि विणा न नज्जंति॥
(**गाहावज्जा.** ६) इति।

(अर्धाक्षरभणितानि नूनं सविलाससमुग्धहसितानि।
अर्धाक्षिप्रेक्षितानि गाथाभिः विना न ज्ञायन्ते॥ इति छाया।)

व्यंग्यार्थसमृद्धेष्वपि काव्येषु इतरजनानामलंकारादिशोभामात्रदर्शनेनैव चमत्कृतिलाभः। परन्तु यस्यास्ति वैदग्ध्यं तेनैव व्यंग्यार्थवैभवमाविष्कर्तुं शक्यते। येन यावदभिनवतरं व्यंग्यं वस्तु समुन्नेतुं शक्यते तस्य तावदेव महत्तरं वैदग्ध्यम्। तदेतदेव तत्त्वमत्रोदाहरणैः प्रकटीकर्तुमभिलष्यते। यदुक्तमानन्दवर्धनेन—

शब्दार्थशासनज्ञानमात्रेणैव न वेद्यते।
वेद्यते स तु काव्यार्थतत्त्वज्ञैरेव केवलम्॥ (**ध्व.** १।७) इति।

किञ्च—सोऽर्थस्तद्व्यक्तिसामर्थ्ययोगी शब्दश्च कश्चन।
यत्नतः प्रत्यभिज्ञेयौ तौ शब्दार्थौ महाकवेः॥ (ध्व० १।८)

इत्यानन्दवर्धनप्रदर्शितदिशा कथं सर्वत्रैव व्यंग्यार्थसंस्पर्शेनैव महाकवीनां वाग्व्यवहारः प्रवर्तते, अन्येऽपि च जनाः व्यंग्यार्थसंस्पर्शेनैव स्वकीयवाग्व्यवहारं सार्थकं मन्यन्ते इत्येतदप्यत्र निभालयिष्यते।

वैदिकवाङ्मये अभिव्यञ्जना

वैदिकवाङ्मयस्यापि बाहुल्येन व्यञ्जनामार्गावगाहित्वं दृश्यते। तथा हि ऋग्वेदस्य प्रथमसूक्तस्यान्तिमा ऋक्—

स नः पितेव सुणवेऽग्ने सूपायनो भव।
सचस्व नः स्वस्तये॥ (ऋ० सं० १।१।९) इति।

तत्र पिता पुत्रं प्रति यथा सहजलभ्यो भवति तथैव भवितुमग्निं प्रति यजमानस्य स्तुतिरस्ति। तदेवं यत्र यत्रैवोपमायाः प्रयोगस्तत्र तत्रैव सहजलभ्यत्वादिकानां विषये किञ्चिद् वैशिष्ट्यं व्यञ्जनया उपलभ्यते। एतच्च उपमायाः व्यंग्यार्थवैभवसमन्वितत्वं पाश्चात्त्यविदुषा गोण्डामहोदयेन अतीव शोभनभावेन निभालितम्। अभिव्यक्तिरेव पाश्चात्त्यैः साधारण्येन प्रतीकप्रक्रिया (Symbolism = सिम्बलिजिम्) इत्युच्यते। तेषां मते यत्र यत्रैवाभिव्यञ्जना तत्र तत्रैव प्रतीकप्रक्रिया प्रवर्तते। तथापि प्रतीकप्रक्रियायाः प्रकृष्टमुदाहरणमप्रस्तुतप्रशंसादिष्वेव भवति। तथा हि शालग्रामशिला यथा श्रीविष्णोः प्रतीकभूता स्वभिन्नं श्रीविष्णुं सूचयति तथैवाप्रस्तुतप्रशंसायां वर्ण्यमानोऽप्रस्तुतः प्रस्तुतस्य प्रतीकभूतः प्रस्तुतमभिव्यनक्ति। तद्यथा—

परार्थे यः पीडामनुभवति भंगेऽपि मधुरो
यदीयः सर्वेषामिह खलु विकारोऽप्यभिमतः।
न सम्प्राप्तो वृद्धिं यदि स भृशमक्षेत्रपतितः
किमिक्षोर्दोषोऽसौ न पुनरगुणाया मरुभुवः॥ (भल्लटशतकम्-५६)

इत्यत्र अप्रस्तुत इक्षुः प्रस्तुतस्य कस्यचन पृष्ठपोषकविहीनस्य गुणिजनस्य प्रतीकभूतः। किन्तु अप्रस्तुतप्रशंसादिसाधारण्येनोपमारूपकादिषु अन्येष्वप्यलङ्कारप्रकारेषु बहुषु व्यंग्यार्थसंस्पर्शवशात् प्रतीकभूतं किञ्चित् तत्त्वमाविष्कर्तुं शक्यते। एवंक्रमेणोपमारूपकादिष्वपि प्रतीकप्रक्रिया परिचीयते पाश्चात्त्यैरिति पाश्चात्त्यप्रतीकवादे गड्डरिकाप्रवाहेणैवोपमारूपप्रतीकप्रभृतीनां परस्परं भेद इत्यग्रे पञ्चमदर्शने प्रतनिष्यते।

प्रसंगतस्त्वत्रैतद् वक्तव्यमस्ति। अस्मन्मते उपमाया एव रूपकोत्पत्तिः, रूपकादेव चाप्रस्तुतप्रशंसान्यायेन शुद्धप्रतीकप्रक्रियायाः। उपमाप्रयोगसमन्विततयैव जनानां वाग्व्यवहारे आवाल्यादेव प्रबलतरा प्रवृत्तिरुपलभ्यते। किञ्च विद्वज्जनेभ्योऽप्यधिकतया विद्याविहीनेष्वेवेतरजनेषु उपमायाः सहजभावेन प्रयोगो दृश्यते। गोण्डामहोदयेन चैतत्प्रदर्शितं यद् यत्र एवानिर्वचनीयो वस्तुविशेषो वर्णनामपेक्षते तत्रैव प्रत्यक्षयोग्येन वस्त्वन्तरेण तस्योपमा समुपादीयते। सा चेयमुपमाप्रयोगप्रवृत्तिरादिमजनानामेव स्वाभाविकी प्रवृत्तिः। तथाहि प्रसिद्धवस्तुविशेषपरामर्शमुखेनैवाप्रसिद्धभावविशेषस्तैः प्रकाश्यते। तद्यथा मलयदेशवासिभिः प्राचीनैर्जनैः कालस्य साक्षात्प्रत्यक्षायोग्यस्यांशविशेषस्य इयत्ताबोधनार्थमुच्यते 'यावदोदनस्य पाको भवति तावान् काल' इति। एवं साक्षादवधारणायोग्याया दिशोऽपि विषये दूरत्वविशेषबोधनार्थं संस्कृतभाषायामेव श्रवणेन्द्रियग्रहणयोग्यरवविशेषबोधकः क्रोशशब्दः प्रयुज्यते। यावत् क्रोशः, आह्वानध्वनिविशेषः, गच्छति तावदेव

दूरत्वं क्रोशशब्देन सूच्यत इति भावः। एवंविधेषु वाग्व्यवहारेषु सर्वत्रैव काचनोपमा समनुषक्ता वर्तत इत्यवदातम्। साक्षादवधारणायोग्यत्वानुरोधेनैवोपनिषद्वाक्येऽपि अचिर्वचनीयपरिमाणस्य आत्मनः परिमाणस्य प्रसिद्धव्रीहियवादिपरिमाणवैलक्षण्यमुखेन बोधनं यथा—'एष म आत्मान्तर हृदये अनीयान् व्रीहेर्वा यवाद् वा·····' (**छान्दोग्योपनिषद्, ३-१४-३**) इति।[1] तदेवमुपमायाः प्रयोगेण न केवलमर्थावगतिरेव साधीयसी भवति अपितु वाच्यादतिरिक्तस्यापि प्रतीयमानस्यार्थस्य नियमेनैव समुल्लासो भवतीति तत्त्वम्। तथा हि—

अधरः किशलयरागः कोमलविटपानुकारिणी बाहू।

कुसुममिव लोभनीयं यौवनमंगेषु संनद्धम्॥ (**शकुन्तला, १।२१**)

इत्यत्र पूर्णोपमामुखेनैव शकुन्तलायौवनस्य महार्घत्वमभिव्यज्यते। 'कोमलविटपानुकारिणी बाहू' इत्येवंरूपासु लुप्तोपमासु साधारणधर्माद्यध्याहारमुखेनैवार्थावगतिरिति लुप्तोपमाविषये निर्विवादं व्यञ्जनायाः सद्भावः। साधारणधर्माद्यध्याहारातिरिक्ततया तत्रापि चोपमेयप्राशस्त्याद्यर्थो नियमेनैवाभिव्यज्यते। वामनेनापि काव्यालङ्कारसूत्रवृत्तौ 'स्तुतिनिन्दातत्त्वाख्यानेषु' (४-२-७) इति सूत्रेण एतदेव तत्त्वमवतारितम्। किञ्च उपमायामुपमानवैशिष्ट्यानुसारमपि ज्यायानर्थोऽभिव्यज्यते। एवमतिरिक्तार्थाभिव्यञ्जकोपमाया उदाहरणत्वेन गोण्डामहोदयेनाधोलिखितं कालिदासीयं पद्यमुदाहृतम्—

---

1. "..... That similes are not late phenomena in the history of human language, we learn from the fact that we are accustomed to look upon abstract ideas as similar to things we perceive with our sense organs, and that it is in the first place people who have no trained way of thinking that are accustomed to do so. Naive and 'primitive' men who are scarcely able to abstract, are inclined to name new things after the familiar and to compare things unknown to well-known. By means of a 'simile' they bring the unknown within the sphere of the known. A primitive measure of time is e. g. Malay, sepertanak nasi lamanja, "as long as it takes rice to boil"; .....also in Sanskrit, krośa—"shout, yell" is a measure of distance; Ch. Up. 3,14,3 eṣa ma ātmāntar hṛdaye anīyān vrīher vā yavād vā....." (J. Gonda, **Remarks on Similes in Sanskrit Literature**, Introduction, p. 11)

विनाशात् तस्य वृक्षस्य रक्षस्तस्मै महोपलम् ।
प्रजिघाय कृतान्तस्य मुष्टिं पृथगिव स्थितम् ॥ (**रघुवंशम्**, १५।२१)

अत्र हि निक्षिप्तस्य महोपलस्य लक्ष्यनिघनविषये अमोघत्वमभिव्यज्यते ।[1]

'वटुः सिंह इव पराक्रमी' इत्यत्र पूर्णोपमा । तस्या एव 'वटुः सिंह इव' इति लुप्तोपमायाः प्रसूतिः । तस्याश्च 'सिंहो वटु'रिति रूपकस्य । अत्र हि वटौ सिंहत्वमारोप्यते । सिंहा-भिन्नो वटुरित्यर्थ उपस्थाप्यते । यदाह—'तद्रूपकमभेदो य उपमानोपमेययोः ।' इति, 'उपमैव तिरोभूतभेदा रूपकमुच्यते ।' इति च । एतद्द्वयमपि **रसगङ्गाधरे** रूपकप्रकरणे समुद्धृतम् । तत्र प्रथमतरं मम्मटीयमपरन्तु अन्यदीयमिति नागेशः । उपमानोपमेययोस्तादात्म्यख्यापनमुपचारः । तस्य च मूलं सादृश्यावधारणमेव । यदुक्तं साहित्यदर्पणकारेण—'उपचारो हि नामात्यन्तं विशकलितयोः साहश्यातिशयमहिम्ना भेदप्रतीतिस्थगनम् ।' इति (**सा० द० २**) । रूपके उपमालभ्येषु उपमानोपमेयसाधारणधर्मादिषु केवलमुपमानोपमेयावेवावशिष्येते । यदा तु रूपकस्योपमेयांशस्यापि परित्यागो भवति, केवलमुपमानमेवावशिष्यते तदा अप्रस्तुतप्रशंसादिन्यायेन शुद्धप्रतीकप्रक्रियायाः प्रादुर्भावो भवति । तत्र च केवलं सिंहस्यैव वर्णना स्यात् न तु वटोरपि । अत एवोक्तं रूपकादेव शुद्धप्रतीकप्रक्रियायाः प्रसूतिरिति । एवमेवान्येषामुपमागर्भाणामलङ्काराणां प्रतीकप्रक्रियाभिमुखिनी गतिरुपलभ्यते[2] । प्रतीकव्यवहारादेव

1. "……By the side of this type which is used unconsciously in every day speech, people that speak or write consciously may express much in few words : Thus Kāl. Ragh. 15, 21 calls a hard and huge rock the fist of Yama : it has destroying power. This is a suggesting simile." (J. Gonda, **Remarks on Similes in Sanskrit Literature**, P. 15.)

२. अत्र तावतेतदपि तुलनीयमस्ति यथा—
"……Of course, an associative relationship may de established having resemblance as its basis when a metaphor or simile is repeated so often, either in the work of a single author or in literary tradition, that the analogue can be used alone to summon up the subject with which it was once connected. Similarly, many interpreters have pointed out that poets tend to use the metaphors and similes of their earlier work as Symbols in their later work because of the associative relations thus established." (**Ency. of Poetry and Poetics**, P. 833)

कालक्रमेण पौराणिककथानामुद्भवोऽभवदित्यग्रे दर्शयिष्यते। अत एव अस्या एव प्रतीकप्रक्रियाभिमुखिगतेः प्रायशः सर्वासामपि वैदिककथानां प्रादुर्भावोऽभवदित्यस्माकीनं मतम्। एतदेव परिलक्ष्य ह्विन्तारनिट्जमहोदयेनाप्यभिहितम्—'तेषु पौराणिककथाजालस्य निर्मीयमाणत्वमेवास्माकं प्रति वैदिकमन्त्राणां महार्घत्वमर्पयति।' इति[1]। तदत्रैकमुदाहरणं परीक्ष्यताम्। सूर्य एव वेदेषु विष्णुरित्युच्यते। (विश + क्नु) सूर्यस्य मण्डलादेव विष्णुचक्रस्य कल्पनमित्यग्रे दर्शयिष्यते। अयञ्च विष्णुसूर्यः आह्निकगतौ उदयाचलादस्ताचलं प्रचलति। सैव सूर्यस्याह्निकगतिः पद्भ्यां भ्रमणेनोपमीयते। सूर्यस्य गतौ उदयावस्था मध्याह्नावस्था अस्तगमनावस्था चेति दशात्रयं प्रथमं पदत्रयस्थापनसदृशतया परिकल्प्यते। दशात्रयं पदत्रयस्थापनसदृशमित्युपमा। तदनुरोधेन चायं मन्त्रः—

इदं विष्णुर्विचक्रमे त्रेधा नि दधे पदम्।
समूल्हमस्य पांसुरे॥ (ऋ० सं० १-२२-१७) इति। अत्र तावदुपमा नोपलभ्यते किन्तु तद्गर्भा अतिशयोक्तिरेव। सा चातिशयोक्तिरप्रस्तुतप्रशसान्यायेन पदस्थापनरूपमप्रस्तुतं प्रस्तुतस्यावस्थात्रयस्य प्रतीकरूपेणोपस्थापयति। अस्या एव प्रतीकप्रक्रियायाः परवर्तिकाले वलिच्छलनार्थं श्रीविष्णोः पदत्रययाचनमिति पौराणिककथायाः प्रसूतिरभवदित्यलं बाहुल्येन।

इदन्त्वत्रावधेयम्। वैदिकमन्त्राणां प्रतीकात्मकतात्पर्यविषये प्राचीनानामपि व्याख्याकर्तृणामवधानमासीत्। तथा हि वेदेषु ब्राह्मणेषु च वृत्रो नाम असुरः वर्ण्यते। वृत्र एवाहिरित्युच्यते। इन्द्रो बहुधा वृत्रेण युद्धमकरोत्। स च वृत्र इन्द्रेण वज्रेण निहतः। स हि स्वकीयदेहस्य वृद्धिसाधनपूर्वकं सप्तसिन्धुजलानामवरोधमकरोत्। इन्द्रश्च तं निहत्य तज्जलस्यावाधगतिमवतारयामास।

यो हत्वाहिमरिणात् सप्त सिन्धून्
यो गा उदाजदपधा वलस्य।
यो अश्मनोरन्तरग्निं जजान
संवृक् समत्सु स जनास इन्द्रः॥ (ऋ० सं० २-१२-३)।

तत्रायं प्रश्नः समुदेति। ननु को वा इन्द्रः, को वाऽयं वृत्रासुर इति। तत्रोच्यते। इन्द्रस्तु सूर्य एव। अनुक्रमणिकाकारस्य कात्यायनस्य तु मते

1. "What renders these hymns so valuable for us is that we see before us in them a mythology in the making:" (M. Winternitz, **Indian Literature**, Vol. I, P. 75.)

एका एव देवता वेदेषु स्तूयते। सा च आदित्यः। तत्र को वा वृत्रासुर इति प्रश्ने **अनुक्रमणिका**कारवचनसंगत्या एव निरुक्तकारस्य वचनं परामृश्यताम्—

'तत् को वृत्रः ? मेघ इति नैरुक्ताः। अपां च ज्योतिषश्च मिश्रीभावकर्मणः वर्षकर्म जायते। तत्र उपमार्थेन युद्धवर्णा भवन्ति। अहिवत् तु खलु मन्त्रवर्णाः ब्राह्मणवादाश्च। विवृद्धया शरीरस्य स्रोतांसि निवारयांश्चकार। तस्मिन् हते प्रसस्यन्दिरे आपः।' (**निरुक्तम्**, २-५)

अत्र तावदुपमार्थेन युद्धवर्णा भवन्तीत्युच्यते। प्रकृते च उपमापदेनैव साधारण्येन सर्वप्रकाराणां प्रतीकव्यवहाराणामुपलक्षणेन परामर्शोऽस्तीति वक्तुं शक्यते।[1] यत्र यत्रैव प्रतीकप्रयोगस्तत्र तत्रैव नियमेनैव व्यञ्जनासद्भाव इति पूर्वमेवोक्तमित्यास्तां तावत्। तस्य एव वेदेषूपलब्धस्य प्रतीकप्रयोगस्य परां काष्ठां निर्दिशन् **निरुक्तकार** आह—

'आत्मा एव एषां रथः भवति, आत्मा अश्वः, आत्मा आयुधम्, आत्मा इषवः, आत्मा सर्वं देवस्य देवस्य।' (**निरुक्तम्**. ७-१) इति। अत्रायमाशयः। यत्र सूर्यो वर्ण्यमाना देवता तत्र सूर्यस्य मण्डलमेव रथः, सूर्यालोके पिण्डीभूय वर्तमानाः सप्तवर्णा एव सप्त अश्वाः, सूर्यमण्डलमेव सुदर्शनचक्रं, सूर्यस्य तीक्ष्णरश्मय एव शरा इति भावः। तदेतदायुधादिप्रतीकतत्त्वमग्रेऽपि चतुर्थदर्शने वैशद्येन प्रतनिष्यत इत्यलमत्रैवातिपल्लवितेन। तथापि अत्रैव प्रसंगसंगत्या उपमादीनां प्रतीकाभिमुखिगतेरभ्युपगमस्योपयोगित्वं दिङ्मात्रेण विचार्यते। तथा हि—

नगेन्द्रनाथवसुमहाशयेन **दि सोसियेल हिस्त्रि अव कामरूप** (खण्डम्-१) इति ग्रन्थस्य ३६ पृष्ठे **वायुपुराण**नाम्ना प्रकाशितात् प्राचीन**ब्रह्माण्डपुराणात्** श्लोकान् उद्धृत्य भारतवर्षस्य पूर्वसीमान्तेऽवस्थितस्य देवकूटपर्वतस्यैका वर्णनोपस्थाप्यते। तस्यैव मर्यादापर्वतस्य मध्यभागे भूतवटो नाम सुविशालः वटवृक्षः वर्तते। तयोरेव पर्वतवटयोर्वर्णनं मूले यथा—

---

१. कैश्चन पण्डितप्रवरैरिन्द्रवृत्तवृत्तान्तस्यैतिहासिकमपि किञ्चिद् याथातथ्यमस्तीति मन्यते। तद्यथा ज्वालाप्रसादसिंहल (Jwala Prasad Singhal) महोदयस्य **दि स्फिंक्स् स्पिक्स्** (**The Sphinx Speaks**) ग्रन्थे (पृ. 67-76) वृत्रासुरादिवृत्तान्तमार्याणां काश्मीरदेशागमनाद्यैतिहासिकवृत्तान्तेन संयोजितम्। किन्तु ऐतिहासिकवृत्तान्तानुधावनमपि मन्त्राणां प्रतीकात्मकत्वस्वीकरणेनैव सम्भवतीति तत्रैव स्पष्टमेतत्।

मध्यमे तु महाकूटे देवकूटस्य वै गिरेः ।
सुवर्णमणिपाषाणैश्चित्रैः श्लक्ष्णतरैः शुभैः ।।
शाखाशतसहस्राढ्यैर्नैराकारोऽसमाकुलम् ।
स्निग्धपर्णं महामूलमनेकस्कन्धवाहनम् ।।
रम्यं ह्यविरलच्छायं दशयोजनमण्डलम् ।
तत्र भूतवटं नाम नानाभूतगणालयम् ।।
महादेवस्य प्रथितं त्र्यम्बकस्य महात्मनः ।
दीप्तमायतनं तत्र सर्वलोकेषु विश्रुतम् ।। इति ।

अत्र तावत् प्रश्नद्वयं समुदेति । (१) वटवृक्षविशेषो दशयोजनान्यभिव्याप्य स्थातुं कथं शक्नोति । वटवृक्षविशेष एव भूतगणानां त्र्यम्बकस्य च वासस्थानं भवितुं कथमर्हति इति । (२) नगेन्द्रनाथवसुमहोदयेन च भूतवट (स्थाना) देव भूटान इति देशविशेषनाम्न उत्पत्तिरनुमीयते ।[1] तदनुमानस्य वा कियत् सामीचीन्यमिति च ।

अत्रोच्यते । मन्मते तु अयं भूतवटवृक्ष एव पर्वतस्य प्रतीकम् । वटवृक्षस्य यद्वर्णनं श्लोकेषु प्रदत्तं तत् पर्वतविशेषेऽपि अनायासं संगच्छते । वटवृक्षशाखावत् पर्वतस्यापि शाखाप्रशाखाः सुविस्तीर्णा भवन्ति । किञ्च 'सुवर्णमणिपाषाणैश्चित्रै श्लक्ष्णतरैः शुभै' रित्यंशः पर्वतपक्ष एव संगच्छतेतराम् । सति चैवमस्माभिरेवमनुमीयते—

बृहत्तरमर्यादापर्वतस्यैवावयवभूतो विशालपर्वतविशेष आसीत् । तत्र शिवपूजका भूतगणा अर्थादाधुनिकभूटानदेशीयाः भोटा अवसन् । तस्मिन्नेव पर्वते (न तु वृक्षे) महादेवस्यापि मन्दिरमासीत् । तत्रत्यवृक्षाणां बहुलपर्णत्वेनैव स्निग्धपर्णमिति अविरलच्छायमिति च पर्वतपक्षेऽपि संगच्छेते । स चायं भोटपर्वत एव शाखाप्रशाखासमन्वितस्सन् वटवृक्ष इव चकास्ते । तत्र प्रथमं 'भूतानां वट इव पर्वत' इत्युपमा । क्रमशस्तत्र 'भूतानां वटपर्वत' इति

1. "From the above description of Devakuta and the Bhutavata flourishing on it, it seems that it was the mountain-range extending, from the Bhutan hills to the hills of Assam and Kachar..... that was called the 'frontier-mountain Devakuta.' The derivation of Bhutan from Bhutavatasthāna (The place of the Bhutavata) seems to be quite probable. Owing to its situation on the Devakuta mountain, Bhutan is even now called Devarājya (country of Deoraj)." (N. N. Basu, **The Social History of Kamarupa**, Vol. I. p. 37.)

रूपकम्। तस्मादेव च 'भूतवट-पर्वत' इति समुदपद्यत। एतदेव पर्वतनाम। कालक्रमेण नामैकदेशग्रहणन्यायेन[1] 'भूतवट' इति पर्वतस्य नाम सञ्जातम्। यत्रायं भूतवटो वर्तते तदेव भूतवटस्थानम्, यस्माच्च भूटान इति नाम समासेन समायातम्। पर्वतस्यैव 'भूतवट' इति व्यपदेशेन वटपर्वतयोरभेदावभासः। एवमेव वटवृक्षविशेष एव पर्वतविशेषस्य प्रतीकमभूदिति सूरिभिर्विभावनीयम्। किञ्चैवंक्रमेणैव पूर्वोक्तप्रश्नद्वयसमाधानमेव सन्दर्भेऽस्मिन् प्रतीकात्मकत्वस्वीकरणस्योपयोगित्वं साधयतीत्यास्तां तावत्।

वेदेषु समाधिभाषा

वेदेषु प्रतीकात्मकवाग्व्यवहारस्य शोभनतममुदाहरणं द्वासुपर्णेति मन्त्रः। स च मन्त्रः **अस्य वामस्य सूक्ते, ऋग्वेदस्य** १-१६४-२० इत्यत्र, **श्वेताश्वतरोपनिषदि** (४-६), **मुण्डकोपनिषदि** (३-१-१), **प्रबोधचन्द्रोदये** चोपलभ्यते। अस्मिन् मन्त्रे चाप्रस्तुतप्रशंसामुखेन यद्व्यंग्यार्थवैभवमाविर्भवति तदनुरोधेनैवोक्तं राजशेखरेण—

"शिक्षा, कल्पो, व्याकरणं, निरुक्तं, छन्दोविचितिः, ज्योतिषं च षडंगानि' इत्याचार्याः। 'उपकारकत्वादलंकारः सप्तममंगम्' इति यायावरीयः। ऋते च तत्स्वरूपपरिज्ञानाद्वेदर्थानवगतेः। यथा—

'द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।
तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचाकशीति॥' इति।"

(**काव्यमीमांसा**, कविरहस्ये द्वितीयोऽध्यायः, पृ. २-३)। अयं मन्त्रः शंकराचार्येणैवं व्याख्यायते—

द्वा=द्वौ। विज्ञानपरमात्मानौ। सुपर्णा=सुवर्णौ शोभनपतनौ शोभनगमनौ सुपर्णौ पक्षिसामान्याद्वा सुपर्णौ। सयुजा=सयुजौ सर्वदा संयुक्तौ। सखाया=सखायौ समानाख्यानौ समानाभिव्यक्तिकारिणौ। एवं भूतौ सन्तौ समानं वृक्षं=वृक्षमिवोच्छेदसामान्याद् वृक्षं शरीरं परिषस्वजाते परिष्वक्तवन्तौ। तयोरन्यः = अविद्याकामवासनाश्रयलिंगोपाधिः विज्ञानात्मा पिप्पलं = कर्मफलं। स्वादु = अनेकचित्रवेदनास्वरूपम्। अत्त्युपभुंक्ते विवेकतः। अनश्नन्नन्योऽभिचाकशीति। नित्यशुद्धबुद्धमुक्तस्वभावः परमेश्वरः सर्वमपि पश्यन्नास्ते इति। (**श्वेताश्वतरोपनिषद्.** ४-६)।

काव्यमीमांसासम्पादकाभ्यामत्र रूपकव्यतिरेकावलंकारौ भवत इत्युच्यते। तन्न समीचीनम्। अत्र प्रस्तुतानां जीवात्मपरमात्मशरीरादीनां निःशेषेण वाच्यत्वाभावात् विस्पष्टमप्रस्तुतप्रशंसालंकार एवात्र भवतीति

---

१. नामैकदेशग्रहणेन नाममात्रग्रहणम् इति न्यायेन।

प्रतिभाति ।[1] तथात्वे स्वीकृते सति प्रतीकव्यवहारोऽनायाससमुन्नेयः स्यात् । राजशेखरमते अत्रालंकारज्ञानं विनार्थावबोध एव न सम्भवति । अलंकारावगतिश्च व्यंग्यार्थपरिचयेनैवेति सर्वथा व्यंग्यार्थकृतमेवात्र वैभवम् । काव्यार्थस्यैतद् व्यंग्यार्थसापेक्षत्वमेवाधुनिकैः प्रतीकव्यवहार इत्युच्यते । विदग्धजनमात्रसंवेद्या चेयं व्यंग्यार्थप्रधानभाषा समाधिभाषा इत्युच्यते । न खलु वाच्यार्थमात्रकृतश्रमाणामेतद्भाषार्थपरिज्ञानं सम्भवति । किन्तु केवलं योगमार्गाभ्यस्तैरेव समाधिद्वारेणाध्यात्मिकानुभवद्वारेणायमर्थोऽवसाययितुं शक्यते । यदुक्तं कुन्हन्राजमहोदयसम्पादितस्य **अस्यवामस्य सूक्तस्य** भूमिकायां डा. सम्पूर्णानन्दमहोदयेन—"The greater part of the statements made by Dirghatamas have been couched in समाधिभाषा, that is, symbolic language. The key to such language cannot be supplied merely by a careful study of texts and adherence to the rules of exegesis. Spiritual experience transcends reason and it is only a person who has at least some knowledge of yoga who can bring light into this dark corner." (Foreword to **Asyavamasya Hymn** by C. Kunhan Raja, Madras, 1956.)

प्रायश एतदनुरूप एव भावः पाश्चात्यविदुषा वार्गसन्महोदयेनापि प्रकाशितः । यदुक्तम्—

"Language is incapable of apprehending and expressing reality. But language may be used in another way, not to represent, but to bring the hearer to a point where he himself may transcend language and pass to incommunicable insight." (Bergson, **Introduction to Metaphysics, Indian Theories of Meaning** ग्रन्थे समुद्धृतम्. पृ. २९३)

अस्यायमाशयः । परमार्थविगमने भाषा नैव प्रभवति । किन्तु तथापि भाषायास्तदर्थमन्यथापि प्रयोगो भवति । भाषा च तथाविधेन केनचिदर्थेन बोद्धव्यजनस्य परिचयं घटयति यस्मात् स स्वयमेव परमार्थविषये कामप्यनिर्वचनीयामन्तर्दृष्टिमासादयतीति ।

---

१. पण्डितराजस्त्वाह—'इयं चातिशयोक्तिर्वेदेऽपि दृश्यते । यथा—द्वा सुपर्णा''' अभिचाकशीति ।' इति । (रसगंगाधरे अतिशयोक्तिप्रकरणम्) । किन्तु अतिशयोक्तावपि उपात्तेन विषयिणा निगीर्णस्य विषयस्याभिव्यंजनं भवतीति शुद्धप्रतीकव्यवहाराविष्करणे इष्टसिद्धिरेव नः ।

किं बहुना। एतदेव वचनमत्र पर्याप्तं स्याद् यद् दार्शनिकतत्त्वानां प्रतिपादनविषये भाषाया अवगमनशक्तिरेव केवलं शरणमिति।[1]

उपनिषदि व्यंग्यार्थप्राधान्यम्

एवं तर्हि परमार्थतत्त्वप्रतिपादनं प्रतीकात्मकभाषयैव सम्भवति। उपनिषत्सु च तत्त्वज्ञानमेव प्रतिपाद्यविषयः। तस्मादुपनिषत्सु व्यञ्जनाप्रधानायाः प्रतीकात्मकभाषाया नियमेनैव बाहुल्यमिति स्थालीपुलाकन्यायेनात्र कठोपनिषद एव श्लोककतिपयेन प्रदर्श्यते। तथा हि—

ऋतं पिवन्तौ सुकृतस्य लोके
गुहां प्रविष्टौ परमे परार्धे।
छायातपौ ब्रह्मविदो वदन्ति
पञ्चाग्नयो ये च त्रिणाचिकेताः॥ (**कठ.** १-३-१)

तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम्।
अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति॥
(**कठ.** १-२-१२)

या प्राणेन सम्भवति अदितिर्देवतामयी।
गुहां प्रविश्य तिष्ठन्ती या भूतेभिर्व्यजायत॥ (**कठ.** २-४-७)

इत्येवमादिषु श्लोकेषु गुहा बुद्धेर्हृदयस्य वा प्रतीकम्। छायातपौ च प्रथमश्लोकलब्धौ जीवब्रह्मणोः प्रतीकभूतौ स्तः। एषूपमेयभूतस्य पदार्थस्योल्लेखो नास्ति। एवमेव **ईशोपनिषदः**—

हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्।
तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये॥

इत्यत्र च रामानुजव्याख्यानानुसारं 'हिरण्मयपात्रं' भोग्यवस्तुजातस्य प्रतीकम्। एवमन्यत्रापि यत्र यत्रोपमेयभूतस्योल्लेखो नास्ति तत्र तत्रैव शुद्धप्रतीकस्य सद्भावस्समुन्नेयः। किन्तु—

आत्मानं रथिनं विद्धि शरीरं रथमेव तु।
बुद्धिस्तु सारथिं विद्धि मनः प्रग्रहमेव च॥ (**कठ०** १-३-३)
इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान्।
आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः॥ (**कठ०** १-३-४)

---

1. "It is only through the power of language to suggest things which cannot be expressed directly, that it can convey philosophical truth." (K. Kunjunni Raja, **Indian Theories of Meanng.** p. 293.)

उतिष्ठत जाग्रत प्राप्य वरान् निबोधत
क्षुरस्य धारा निशिता दुरत्यया
दुर्गं पथस्तत् कवयो वदन्ति ॥ (कठ० १-३-१४)
ऊर्द्ध्वमूलोऽवाक्शाख एषोऽश्वत्थः सनातनः
तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते
तस्मिल्लोका श्रिताः सर्वे
तदु नात्येति कश्चन एतद् वै तत् ॥ (कठ० २-३-१)

एषु प्रथमतरयोरात्मादीनामुपमेयभूतानामप्युल्लेखसत्त्वाद्रथ्यादिकानां न शुद्धप्रतीकत्वं किन्तूपमारूपकादिमुखेनैव परमार्थप्रतिपादनम् । न खल्वेतावता व्यंग्यार्थस्यापलापः।उपमारूपकादिमुखेनापि व्यंग्यार्थरूपत्वेन विशेषावगतिर्जायत इति पूर्वमेव प्रतिपादितम् । वस्तुतस्त्वेष्वपि आत्मादीनामनिर्वचनीयत्वेनोपमानमुखेनैव तेषामवगतेः रथ्यादीनामपि प्रतीकत्वं स्वीकर्तुं शक्यते । तथैव तृतीयश्लोके दुर्गमत्वस्यानिर्वचनीयत्वेन क्षुरधारायास्तथा संसारस्यापि अनायासावधारणायोग्यत्वादश्वत्थवृक्षस्य प्रतीकत्वमेव ज्यायः । केषांश्चन पाश्चात्यविदुषां मते खलु सर्वेषामेवाभिव्यञ्जकत्वमूलकत्वात् रूपकप्रतीकपौराणिककथादीनां गड्डरिकाप्रवाहेनैव परस्परं भेदः । तथा हि फ्रांसदेशीयस्य लोरो (Leroux) महोदयस्य मते (तथा अन्येषामपि बोड्लेयारप्रभृतीनां मते) रूपकात्मककथा 'तथाविधः संलापविशेषः चिह्नविशेषो वा येन वाच्यादप्यर्थादतिरिक्तं किञ्चित् प्रत्याय्यते । एवंक्रमेण हि रूपक-प्रतीक-पौराणिककथादयः रूपकात्मककथाया एव प्रकारभेदाः[1] ।'

रूपककथायाः स्वरूपम्

रूपककथा एवांगलभाषायाम् एलिगोरि (Allegory) इत्युच्यते । प्रायः सर्वभाषास्वेव रूपककथाया विशेषस्थानमस्तीति परिलक्ष्यते । विशेषतस्तु पौराणिककथानां प्रायशः रूपकात्मकत्वमेव । तस्मादत्र तत्स्वरूपं विचार्यते समासेन ।

---

1. "It should be noted too that Leroux, like many other writers (including Baudelaire), does not really make a sharp distinction between the symbol and other forms or poetic imagery. He defines allegery as a discourse, or in general a sign expressing something other than what it states directly.....In this sense, **metaphor, symbol, myth,** are but different degrees of allegory". (**Idea of Poetry in France,** p. 222)

यत्र आपाततोऽसम्भाव्यमानेनाख्यानविशेषेण यथार्थतत्त्वविशेषस्य प्रतिपादनं भवति सैव रूपककथा। आंगलभाषायां रूपककथायाः प्रकृष्टमुदाहरणं यथा सुइफ्ट् (Swift) महोदयकृतो **गालिभारस्य भ्रमणं** (Gulliver's Travel) नाम ग्रन्थविशेषः। गालिभारनामा पुरुषः कश्चित् कदाचित् पर्यटन् लिलिपुटनामकानां पुरुषाणां जनपदं प्राप। लिलिपुटास्तु अतीव खर्वाः क्षीणाः गालिभारस्य प्रादेशप्रमाणा आसन्। तदा गालिभारस्य मनसि सुविशालोऽहमस्मीति गर्वभावः समजनि। तस्माच्च जनपदाद् बहिर्गच्छन् चंक्रम्यमाणः कदाचिद् ब्रडिंगेड्नामकानां जनानां जनपदं समाससाद। ते च ब्रडिंगेड्नामकाः सुविशालकाया आसन् यदपेक्षया गालिभारः स्वयमेव प्रादेशप्रमाणः चकास्ते। तदियमेका रूपककथा। अत्र विवक्षितो व्यंग्यतात्पर्यविशेषस्तु 'न कोऽपि स्वकीयगौरवेण गर्वितः स्यात् स्थानान्तरे कदाचित् तथाविधस्यापि गौरवसमन्वितस्य तुलनामूलकभावेन लाघवदर्शनस्यापि सम्भवात्।' इति। अस्यां कथायामुपलभ्यमानस्त्वयमुपदेशो व्यंग्य एव। गालिभारनामकपुरुषः सकलानामपि गर्वितजानानां प्रतीकभूतः।

पुराणेषु प्रायश एवेदृशी रूपककथा समुपलभ्यते। तथा हि **विष्णुपुराणे** इयं कथा समुपलभ्यते यद्रेवती सत्ययुगसम्भवा कन्या आसीत्। तस्याः पिता केन जनेन तस्या विवाहः स्यादिति ब्रह्माणं जिज्ञासमानः तयैव सार्धं ब्रह्मलोकमगात्। तत्र ब्रह्मणा प्रोक्तं—'यावद् ब्रह्मलोके भवति भवान् तावदेव मुहूर्तमात्रेणैव पृथिव्यां सत्ययुगः त्रेतायुगश्च व्यतीतौ, द्वापरयुगोऽप्यवसितप्रायः। तद्भवान् तत्र गत्वेमां कन्यां बलरामाय कृष्णाग्रजाय एव प्रयच्छतु।' इति। सोऽपि तथैव कृतवान्। रेवती तु युगत्रयेणापि अक्षुण्णयौवना तरुण्येवासीत्। इयञ्च पौराणिकीकथा आपाततोऽसम्भाव्यमानाऽपि वैज्ञानिकतत्त्वविशेषमभिव्यनक्ति। तच्च दिक्कालतत्त्वम्।[1] एतत्तत्त्वमते हि स्थितिशीलः प्राणिविशेषो यथा द्रुतभावेन वृद्धिमेति गतिशीलस्तु न तथा वृद्धिमेति। जीवलोकाद् ब्रह्मलोकगमनवेगादेव रेवत्या यौवनमक्षुण्णमासीत्। आधुनिकवैज्ञानिकैरपि आपेक्षिकत्वतत्त्वान्तर्गततया एतदेव तत्त्वं स्वीकृतम्। तेषां मते हि विश्वब्रह्माण्डे भ्रमणरतः कोऽपि जनो यदा एकवर्षपरिमितकालयोग्यतयैव वृद्धिं गच्छति तदा पृथिव्यां वर्तमानस्तु जनः सप्ततिवर्षपरिमितकालयोग्यतया बार्धकमवगाहते।

यदुक्तम् एडिटन्महोदयेन—

"Although we cannot try the experiment of sending a man to

1. Radhanath Phukan, **The Sāṁkhyakārikā of Īśvarakṛṣṇa**, (Calcutta, 1960) Introduction, p. 13.

another part of the universe, we have enough scientific knowledge to compute the rates of atomic and other physical processes in a body at rest and a body travelling rapidly..... If. the speed of travel is very great, we may find that, whilst the stay–at–home individual has aged 70 years, the traveller has aged 1 year. He has only found appetite for 365 breakfasts, lunches, etc.; his intellect, clogged by a slow–moving brain, has only traversed the amount of thought appropriate to one year of terrestrial life." (Eddington, **The Nature of the Physical World**, pp. 48–49.)[1]

तदेवं **भागवतपुराणोक्ता** रासलीलाकथाऽपि रूपकात्मिकेति निपुणैरुन्नेयम् । तत्र च गोपीनां श्रीकृष्णं प्रति श्रीकृष्णस्य गोपीः प्रत्यनुरागो वर्ण्यते । गा पृथिवीं पाति रक्षति इति गोपः, धार्मिक इत्यर्थः । धारणाद् धर्म इत्याहुरिति न्यायेन य एव धर्मानुष्ठानेन पृथिवीं धारयति स धार्मिको गोप इत्युच्यते । स च धार्मिको भगवद्भक्तिपरायणः प्रकृते गोपीत्युच्यते । गोप्येवात्र भगवद्भक्तस्य प्रतीकरूपा । 'यो मद्भक्तः स मे प्रिय' इति **श्रीमद्भगवद्गीता**द्वादशाध्यायभणितन्यायेन च भक्ते भगवतो निरतिशयोऽनुरागः । तस्मादेव च भक्तभगवतोः परस्परं मिलनेच्छा भवति । यदुक्तं—'वीक्ष्य रन्तुं मनश्चक्रे' (**भागवतम्**. १०–२९१) इति । रमणात्मिका च रासलीला भक्तभगवतोर्मिलनमित्यलं बहुपल्लवितेन ।

जयदेवस्य **गीतगोविन्देऽ**पि सैव वार्ता । तत्रापि श्रीराधा भक्तजनानामेव प्रतीकभूता । किञ्च कालिदासीय**मेघदूत**काव्यस्याप्येवंविधमाध्यात्मिकं व्याख्यानं सम्भवति । तत्र च कैलासाचल एव भगवत्स्थानम् । मेघश्च भक्तसाधकस्य प्रतीकम् । स च उदङ्मुखः सन् साधनमार्गे अग्रेसरः साधनोत्तरं भगवत्पदं समासादयति । तत्र तावत्

तां कस्याञ्चिद्भवनवलभौ सुप्तपारावतायां
नीत्वा रात्रिं चिरविलसनात् खिन्नविद्युत्कलत्रः ।
दृष्टे सूर्ये पुनरपि भवान् वाहयेदध्वशेषं
मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः ॥ (**पूर्वमेघः**. ३९)

---

१. राधानाथफुकनसम्पादितस्य **सांख्यकारिकाख्यस्य** पूर्वोक्तग्रन्थस्य भूमिकायाम् (पृ० ११–१२) उद्धृतम् । दिक्कालतत्त्वञ्च सांख्यानुगमिति तत्रैव ३३ **संख्यककारिकाया** व्याख्याने वैशद्येन निभालितम् ।

इत्येवमादिषु स्थलेषु विद्युत्कलत्रस्याप्युल्लेखदर्शनात् 'सस्त्रीको धर्ममाचरेदि'ति न्यायः संसूच्यत इति समुन्नेयम्। सर्वेष्वपि भक्तिभावसंवलितेषु मिष्टिकाभिधेषु रहस्यवादात्मकेषु काव्येषु रूपकात्मकानां कथानामथवा प्रतीकानां बाहुल्येनैव प्रयोगो भवतीत्यग्रे दर्शयिष्यते। किन्तु इदमत्रावधेयम्। पृथिव्यां प्रायशः सर्वे एव प्रसिद्धकाव्यग्रन्थाः रूपकात्मकतया परमार्थविशेषप्रत्यायनेनैव प्रसिद्धिमायान्ति। तथा हि **रामायणेन** रूपकात्मकतयैतत् प्रत्याय्यते यत् 'सत्यमेव जयते **नानृतम्**।' धर्म एव विजयते न त्वधर्म इति। तत्र हि श्रीरामः धर्मस्य सत्यस्य वा प्रतीकं रावणस्त्वधर्मस्यासत्यस्य वा। **मार्कण्डेयपुराणे** महिषासुरवधवृत्तान्तस्यापि प्रतीकात्मकत्वं समस्ति। तत्र तावदसुरोऽधर्मस्य प्रतीकं दुर्गादेवी च धर्मस्य प्रतीकम्। तदेवं प्रतीकात्मकत्वेन धर्मस्य जयोऽधर्मस्य पराजय इत्यर्थोऽभिव्यज्यते। भारतीयचिन्ताधारानुसारमधर्मस्यावश्यंभावी पराजयः धर्मस्य चावश्यंभावी जयः स्यात्। तदेव च सर्वेषु श्रेष्ठग्रन्थेषु प्रतीपादनीयम्। तस्मादेव विनेयजनानां धर्मे प्रवृत्तिरधर्माच्च निवृत्तिस्स्यात्। अत एव च संस्कृतनाटकेषु निर्बहणसन्धावादर्शभूतस्य प्रधाननायकस्याभ्युदय एव प्रदर्श्यते न कदाचिदपि पराजयः। ततश्च संस्कृतरूपकेषु वियोगान्तकत्वस्य नितान्तमभावः। किञ्च संस्कृतनाटकमेव भारतीयदर्शनस्यापि प्रतीकभूतमस्तीति प्रतिभाति। भारतीयदर्शनेषु सांख्यवेदान्तादिप्रमुखेषु चादौ नैराश्यं प्रतन्यते, समग्रस्यापि जीवनस्य फल्गुत्वं प्रतिपाद्यते। किन्तु अन्ततो गत्वा अवश्यमेव श्रेयोलाभो भवतीति उद्घोष्यते। नैराश्यपूर्णे संसारे व्यतीते सति आत्मनो भूमानन्दलाभः स्यात्। यद्धि ब्रह्मतत्त्वं यदमृतं तदेवानन्दः। यदुक्तं **तैत्तिरीयोपनिषदि**—'आनन्दो ब्रह्मेति व्यजानात्। आनन्दाद्धयेव खल्विमानि भूतानि जायन्ते। आनन्देन जातानि जीवन्ति। आनन्दं प्रयन्त्यभिसंविशन्ती'ति। (३-६-१)

महाभारतेऽपि धर्मस्य जयोऽधर्मस्य पराजय इति प्रबन्धार्थः। अनित्योऽयं संसार इति, भगवान् एव नित्य इति, मोक्ष एव परमपुरुषार्थ इति च रूपकात्मकतया प्रकाश्यन्ते। यदुक्तम्—

'तदेवमनुक्रमणीनिर्दिष्टेन वाक्येन भगवद्व्यतिरेकिणः सर्वस्यान्यस्यानित्यतां प्रकाशयता मोक्षलक्षण एवैकः परः पुरुषार्थः शास्त्रनये, काव्यनये च तृष्णाक्षयसुखपरिपोषलक्षणः शान्तो रसो महाभारतस्यांगित्वेन विवक्षित इति सुप्रतिपादितम्। अत्यन्तसारभूतत्वाच्चायमर्थो व्यंग्यत्वेनैव दर्शितो न तु वाच्यत्वेन।' इति (**ध्वन्यालोकः**-४· पृ. ५३३)।

मन्त्रब्राह्मणयोर्व्यंग्यार्थविमर्शः

मन्त्रब्राह्मणयोरपि प्रायशः व्यंग्यार्थसमन्वितत्वेनैवात्मलाभः। मीमांसाशास्त्रेऽपि विभिन्नशंकासमाधानावसरे तादृशः प्रतीयमानार्थः परामृष्टः। विशेषस्तु इयानेव यत्तेषामर्थानां वाच्यार्थातिरिक्तत्वे स्वीकृतेऽपि व्यंग्यरूपत्वं नाभ्युपगम्यते मीमांसकैः। स च व्यंग्यार्थपरामर्शस्स्थालीपुलाकन्यायेन सायणाचार्यस्य **ऋग्वेदभाष्यभूमिकाया** एव वचनान्युद्धृत्य प्रदर्श्यते। तथा हि—

(१) 'अधः स्विदासीद् उपरि स्विदासीद्' इति (**ऋ.सं. १०-१२९-५**) मन्त्रस्यार्थबोधकत्वेऽपि स्थाणुर्वा पुरुषो वा इत्यादिवाक्यवत् सन्दिग्धार्थबोधकत्वान्नास्ति प्रामाण्यमिति पूर्वपक्षः। (पृ. ८)। तत्रेदं समाधानम्।

'अधः स्विदिति मन्त्रश्च न सन्देहबोधनाय प्रवृत्तः। किं तर्हि ? जगत्कारणस्य परवस्तुनोऽतिगम्भीरत्वं निश्चेतुमेव प्रवृत्तः। तदर्थमेव हि गुरुशास्त्रसम्प्रदायरहितैर्दुर्बोधत्वम् अधःस्विदित्यनया वचोभंग्या उपन्यस्यते। स एवाभिप्राय उपरितनेषु को अद्धा वेद (**अ० सं०** ३-५४-५) इत्यादिमन्त्रेषु स्पष्टीकृतः।' इति।

इदमत्रावधेयम्। परवस्तुनोऽतिगम्भीरत्वरूपस्त्वर्थो व्यंग्यतयैव प्रत्याय्यते। वाक्यस्यार्थविशेषाभिव्यञ्जकत्वञ्च 'वचोभंग्या' इति पदेन सूचितम्। अर्थविशेषाभिव्यञ्जकवाक्ये वचोभंगीतिव्यवहार आलंकारिकाणामप्यभिमतः। तदत्र व्यंग्यार्थगर्भस्य पर्यायोक्तालंकारस्यैव लक्षणं परामृश्यताम। 'पर्यायोक्तं यदा भंग्या गम्यमेवाभिधीयते।' (**सा०द० १०-६०**) इति हि तल्लक्षणं **साहित्यदर्पणकार**प्रदत्तमित्यास्तां तावत्।

(२) 'चत्वारि शृंगा त्रयोऽस्य पादा' (**ऋ० सं०** ४-५८-३) इति मन्त्रः चतुः शृंगादियुक्तप्राणिविशेषस्याप्रसिद्धत्वादसन्तमेवार्थमभिधत्ते इति हेतोर्मन्त्रभागस्य न प्रामाण्यमिति शंकाया समाधानार्थं जैमिनिसूत्रमवतारयति—'अभिधानेऽर्थवादः' (सू० १-२-४६) इति। (**भाष्योपक्रमणिका. पृ० १७**) जैमिनिसूत्रस्यायमाशयः—

'असतोऽर्थस्य अभिधाने वाक्ये गौणस्य अर्थस्य उक्तिर्द्रष्टव्या। तद्यथा—चत्वारो होत्रध्वर्यूद्गातृब्रह्माणोऽस्य कर्मणः (यज्ञस्य) शृंगाणि प्रातःसवनादयस्त्रयः पादाः, पत्नीयजमानौ द्वे शीर्षे, गायत्र्यादीनि सप्त छन्दांसि हस्ताः, ऋग्वेदादिभिस्त्रिभिर्वेदैस्त्रेधा बन्धनम्, कामान् वर्षति इति वृषभः, रोरवीति स्तोत्रशस्त्रादिशब्दान् पुनः पुनः करोति, महो देवः सोऽयं प्रौढो यज्ञरूपो देवः

मर्त्यान् आविवेश इति मनुष्या एव अत्राधिकारिणः। लोकेऽपि एवं गौण-प्रयोगा दृश्यन्ते,—चक्रवाकस्तनी, हंसदन्तावली, काशवस्त्रा, शैवलकेशिनी इत्येवं नद्याः स्तूयमानत्वात्।' (**भाष्योपक्रमणिका**. पृ० १८)

इदमत्र परिलक्ष्यताम्। लोके तावदायुर्घृतम् इत्येवमादिषु स्थलेषु रूढिव्यतिरिक्तविषयेषु प्रयोजनानुरोधेनैव गौणी वृत्तिस्समाश्रीयते। प्रकृते च अन्यवैलक्षण्येनाव्यभिचारेणायुष्करत्वं प्रयोजनम्। तच्च प्रयोजनं नियमेनैव व्यंग्यं न कदाचिद्वाच्यत्वं वा लक्ष्यत्वं वा सहते। एवं चत्वारि शृंगा इत्यत्रापि च गौणवृत्तिस्वीकारादवश्यमेव प्रयोजनेन केनचिद्भवितव्यं यत्तु व्यंग्यमिति हेतोरत्रापि व्यंग्यार्थसद्भावस्वीकार आवश्यकः। लौकिकगौण-प्रयोगस्य दृष्टान्तत्वेन यदुक्तं चक्रवाकस्तनीत्यादि तस्य हि 'चक्रवाकस्तनी हंसदन्तावली काशवस्त्रा शैवलकेशिनी नदी' इति पूर्णं रूपम्। अत्र च एक-देशविवर्तिन्युपमा सुखावसेया। तस्यां चोपमायां नियमेनैव व्यंग्यांशसद्भावः स्यात्। तथा हि अत्र चक्रवाकादिभिस्तनादीनां सादृश्यस्य समासगतत्वेऽपि वाच्यत्वं, चक्रवाकाविव स्तनौ यस्यास्सा इत्यर्थस्यैव समासात्। नद्यास्त्वंग-नासाम्यं गम्यमेव। तदत्र तुलनार्हं किञ्चित् **साहित्यदर्पणोक्तं** यथा—

'एकदेशविवर्तिन्युपमा वाच्यत्वगम्यत्वे।
भवेतां यत्र साम्यस्य—
यथा—'नेत्रैरिवोत्पलैः पद्मैर्मुखैरिव सरः श्रियः।
पदे पदे विभान्ति स्म चक्रवाकैः स्तनैरिव॥'

अत्रोत्पलादीनां नेत्रादीनां च सादृश्यं वाच्यं सरः श्रीणां चांगनासाम्यं गम्यम्।" इति (**सा. द.** १०-२४)

तदेवं 'चत्वारि शृंगा' इत्येवमादिषु श्रुतिवाक्येषु गौणप्रयोगे अंगीकृते 'चक्रवाकस्तनी'त्यादिदृष्टान्तानुरोधेनापि व्यंग्यांशसद्भावोऽप्यनपह्नवनीय एव।

(३) तस्मिन्नेव गौणप्रयोगसन्दर्भे एतदप्युक्तमस्ति यथा—

'एवमोषधे त्रायस्व, शृणोत ग्रावाण इत्याद्यचेतनसम्बोधनानि स्तुति-परत्वेन योजनीयानि, यस्मिन् वपने ओषधिरपि त्रायते तत्र वपनकर्ता त्रायत इति किमु वक्तव्यम्, तथा ग्रावाणोऽपि प्रातरनुवाकं शृण्वन्ति किमुत विद्वांसो ब्राह्मणा इत्यादि मन्त्राणामभिप्रायः।' इति (**ऋग्वेदभाष्योपक्रमणिका**, पृ. १८)। अत्र च यो गौणप्रयोगस्तस्य निर्विवादं प्रयोजनमूलकत्वम्। प्रयोज-नञ्च स्तुतिरेवेति मूल एवाभिहितम्। प्रयोजनस्यावश्यव्यंग्यत्वात् 'ओषधे त्रायस्वैनं','शृणोत ग्रावाण' इत्यादिश्रुतिवाक्यानां नियमेनैव व्यञ्जनासंस्पर्शः।

(४) वेदस्य विधिभागस्याप्रामाण्यख्यापनार्थमेवमभिधत्ते पूर्वपक्षी—

"ननु, अस्तु मन्त्रभागस्य प्रामाण्यम्। ब्राह्मणभागस्य तु न तद् युज्यते। × × × तत्र कर्मकाण्डगतानां, 'जर्तिलयवाग्वा वा जुहुयाद् गवीधुकयवाग्वा वा' (तैत्तिरीयसंहिता, ५-४-३-२) इत्यादिविधीनां नास्ति प्रामाण्यम्, प्रवृत्तयोग्यद्रव्यविधानेन सम्यगनुभवसाधनत्वाभावात्। अयोग्यत्वं च वाक्यशेषे समाम्नातम्—'अनाहुतिर्वै जर्तिलाश्च गवीधुकाश्च' इति। अत्र हि आरण्यतिलानाम् आरण्यगोधुमानां च आहुतिद्रव्यत्वं निषिद्धम्। तस्माद् बाधितो जर्तिलादिविधिरप्रमाणम्।" इति (**भाष्योपक्रमणिका**. पृ. २२-२३) तत्रास्या शंकायाः समाधानव्याजेनोच्यते—

"अस्तु एवं जर्तिलादिविधेरप्रामाण्यं, तदर्थस्य अननुष्ठेयत्वात्। अनुष्ठेयस्तु अर्थ उपरितनेन 'अजाक्षीरेण जुहोति' (**तै. सं**. ५-४-३-२) इति वाक्ये विधीयते। तत्प्रशंसार्थमत्र जर्तिलादिकमनूद्य निन्द्यते। यथा गवामश्वानां च प्रशंसार्थम्, 'अपशवो वा अन्ये गोअश्वेभ्य' (तै. ब्रा. ३-९-१०-२) इति वाक्येन अर्थवादरूपेण अजादीनां पशुत्वं निन्द्यते, तद्वत्।" इति (**भाष्योपक्रमणिका**. पृ. २४)

अत्र च यः प्रशंसारूपोऽर्थः परिच्छीयते तस्यापि निर्विवादं व्यंग्यत्वं स्यात्। तथा हि 'अपशवो वा अन्ये गोअश्वेभ्य' इत्यत्र अजादीनामपशुत्वं बाधितं सत् निकृष्टपशुरूपत्वेनावसीयते लक्षणया। लक्षणायाश्च प्रयोजनं गवामश्वानां च प्राशस्त्यबोधनम्। प्रयोजनत्वेन तस्य प्राशस्त्यरूपस्यार्थस्य पूर्वप्रदर्शितक्रमेणाभिव्यंग्यत्वमित्यास्तां तावत्।

(५) ब्राह्मणस्य अर्थवादभागस्य प्रामाण्यस्थापनार्थं प्रथमं पूर्वपक्षं सूत्रयति—'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते।' (**जै. सू**. १-२-१) इति। अयमाशयः। आम्नायस्य सर्वस्यापि क्रियाप्रतिपादनाय प्रवृत्तत्वादक्रियाप्रतिपादकानामर्थवादानां नास्ति कश्चिद् विवक्षितः स्वार्थः। तद् यथा 'वायुर्वै क्षेपिष्ठा देवता' इत्येवंरूपस्य वाक्यस्य विवक्षितोऽर्थः कश्चिदपि नास्ति। तस्मादिदं वाक्यमनित्यमुच्यते। यद्यपि अनादित्वात् स्वरूपेण अनित्यत्वं नास्ति तथापि धर्मावबोधनलक्षणस्य नित्यकार्यस्य अभावाद् अनित्यैः काव्यालापैः समानत्वादप्रमाणम् इत्यर्थः। (**भाष्योपक्रमणिका**. पृ. २६)। तदेवं नास्त्येव अर्थवादानां प्रामाण्यमिति पूर्वपक्षे स्थिते सिद्धान्तं सूत्रयति–'विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युः।'(**जै. सू**. १-२-७) इति। अस्यायमाशयः। "तु शब्दोऽर्थवादानाम् अप्रामाण्यं वारयति। 'वायुर्वै क्षेपिष्ठा' इत्येवमादीनामर्थवादानां 'वायव्यं

श्वेतमालभेत' (**तै. सं.** २-१-१-१) इत्यादिना विधिना सह एकवाक्यत्वादस्ति धर्मे प्रामाण्यम् । न च विधिवाक्यस्य (वायव्यं श्वेतमालभेत इत्यस्य) अर्थवादनैरपेक्ष्येण पदान्वयसम्पूर्त्तेस्तत्र अर्थवादानां नास्ति उपयोग इति शंकनीयम् । ते हि अर्थवादाः पुरुषप्रवृत्तिमाकांक्षतां विधीनां स्तुत्यर्थत्वेन उपयुक्ताः स्युः । स्तुत्या च प्रलोभितः पुरुषस्तत्र प्रवर्तते ।" इति (**भाष्योपक्रमणिका**. पृ. २६)

अत्रापि चोभयोर्वाक्ययोरेकवाक्यतयोपलभ्यमानः स्तुतिरूपार्थः स्वशब्दानभिधेयत्वेनाविर्भवन्नितरामेव व्यंग्यत्वकक्षां विगाहत इत्यलं बहुपल्लवितेन ।

इदन्त्वत्रावधेयम् । वेदान्तिना चित्सुखाचार्येण त्वेवंविधस्थलेषु तथा शुद्धध्वनावपि लक्षणयैव व्यंग्यस्याप्यर्थस्य निर्वाहो भवतीति प्रतिपाद्यते। यदुक्तम् ।

"·····तथा हि लोके—

'सुवर्णपुष्पां पृथिवीं चिन्वन्ति पुरुषास्त्रयः ।

शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम् ।।" इत्यादौ पदार्थानामन्वयसम्भवेऽपि निष्प्रयोजने तात्पर्यासम्भवेन वाक्यप्रामाण्यानुपपत्तेः प्रतीयमानवाक्यार्थं हित्वा शूरादित्वं संपदो हेतुरिति ध्वनिना सूच्यते । तथा च वेदे । 'वायुर्वै क्षेपिष्ठा' इत्यादौ संभवत्येव वाच्यार्थान्वये कैमर्थक्यवशेन देवताप्राशस्त्यलक्षणया कर्मणः प्राशस्त्यं लक्ष्यते ।" इति (**तत्त्वप्रदीपिका**. १. पृ. २६४) । किन्तु आनन्दवर्धनादिभिरालंकारिकैरेव महता युक्तिजालेन लक्ष्यार्थतोऽपि व्यंग्यार्थस्य दूरतो वैलक्षण्येनावस्थानं प्रदर्शितं मूलग्रन्थेषु इत्यलमत्र तदनुवादेनेति आस्तां तावत् ।[1]

लौकिकवाक्येषु निन्दाप्रशंसे

'अपशवो वा सर्वे गोअश्वेभ्यः' 'वायुर्वै क्षेपिष्ठा देवता' इत्यादिभिर्वैदिक-

---

१. सुवर्णपुष्पामिति पद्यं ध्वन्यालोकस्य प्रथमोद्द्योते अविवक्षितवाच्यध्वनेरुदाहरणरूपेण प्रदत्तमस्ति । एवंविधेषु स्थलेषु लक्षणासद्भावांगीकारेऽपि लक्षणाया रूढिव्यतिरिक्तायाः प्रयोजनं वक्तव्यम् । तच्च प्रयोजनं व्यञ्जनैकलभ्यम् । प्रयोजनाभावेऽपि लक्षणांगीकारे वक्तुरेव दोषः स्यात् । अपौरुषेये च श्रुतिवाक्ये कर्तुरभावेऽपि वाक्यार्थस्यानुपपत्त्या यो दोषप्रसंगः स यद्यपि लक्षणया शक्यपरिहारस्तथापि प्रयोजनसाचिव्यमन्तरेण लक्षणाया एवानुत्पत्तिकत्वादन्ततो गत्वा अरोचयमानेनापि व्यञ्जना कक्षीकर्तव्या ।

वाक्यैर्यथा निन्दाप्रशंसे अभिव्यज्येते तथैव लौकिकवाक्येषु निन्दाप्रशंसे व्यञ्जनामार्गेणैव भवतः प्रायेण। तद्यथा—

उपकृतं बहु तत्र किमुच्यते सुजनता प्रथिता भवता परम्।
विदधदीदृशमेव सदा सखे सुखितमास्व ततः शरदां शतम्॥ (**सा.द.** २)

इत्यत्र निन्दा गम्यते। 'आयुर्घृतम्' इत्यादिषु च प्रशंसा गम्यते। किन्तु प्रायशः सर्वासु भाषासु सर्वेषु वाङ्मयेषु निन्दाभिव्यक्तेस्तथा बाहुल्यं येन निन्दाप्रधानः काव्यप्रकारविशेषः असमीय-वंगीय-हिन्दीप्रभृतिषु वाङ्मयेषु व्यंग्यकाव्यमित्युच्यते। तदेवांगलभाषायां 'सेटायार्' इत्युच्यते यस्य तावदांगलादिवाङ्मयेष्वपि विशेषप्राधान्यं समस्ति। किञ्च येन चित्रविशेषेण कस्यापि पुरुषस्य निन्दाभिव्यज्यते सोऽपि व्यंग्यचित्रमित्युच्यते।

निन्दाप्रशंसादिकञ्च प्रायशोऽन्यापदेशेनैव भवति। तद्यथा—

रे रे चातक सावधानमनसा मित्र क्षणं श्रूयता-
मम्भोदा बहवो हि सन्ति गगने सर्वे तु नैतादृशः।
केचिद्वृष्टिभिरार्द्रयन्ति वसुधां गर्जन्ति केचिद्वृथा
यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः॥
(**भर्तृहरेः नीतिशतकम्**)

इत्यत्र मेघापदेशेन दातॄणां निन्दाप्रशंसे गम्येते चातकापदेशेन च याचकोऽभिव्यज्यते। खृस्तीयनवमशतिकायाः भल्लटकविना **भल्लटशतकेन** अन्यापदेशप्रधानानां काव्यानां बहुप्रचलनं प्रारब्धमिति संस्कृतवाङ्मयेतिहासकारिणः।[1] तन्मार्गानुसरणक्रमेण विरचितानि, शम्भुविरचिता **अन्योक्तिमुक्तालता**, वीरेश्वररचितम् **अन्योक्तिशतकम्**, नीलकण्ठदीक्षितविरचितम् **अन्यापदेशशतकम्**, इत्येवंप्रभृतिनि काव्यान्यत्रोल्लेखमर्हन्ति।

---

१. **संस्कृतसाहित्येर परिचय** इति ग्रन्थे (वंगीये) प्रदत्तोऽयमन्यापदेशकाव्यनामसंग्रह एवास्य काव्यप्रकारस्य सुविशालां जनप्रियतां सूचयति। सोऽयं नामसंग्रहो यथा :—

अच्चादीक्षितस्य—**अन्योक्तिमाला**	शम्भोः—**अन्योक्तिमुक्तालता**
लक्ष्मीनरसिंहस्य—**अन्योक्तिमाला**	चन्द्रचूडस्य—**अन्योक्तिकण्ठाभरणम्**
सोमनाथस्य—**अन्योक्तिशतकम्**	हरिकृष्णस्य—**अन्योक्तिसंग्रहाध्यायः**
भट्टवीरस्य—**अन्योक्तिशतकम्**	नीलकण्ठस्य—**अन्यापदेशशतकम्**
दर्शनविजयगनेः—**अन्योक्तिशतकम्**	जगन्नाथस्य— तथा

(एतदुत्तरपृष्ठे नामसंग्रहशेषोऽवलोकनीयः।)

किञ्चान्यत्र यथार्थवर्णनार्थं विनिर्मितं किञ्चित् काव्यमन्यत्रोदाहृतं सत् कदाचिदन्यापदेशकाव्यतां विगाहते। तद्यथा पूर्वं पराधीनताकाले भारतवर्षे संस्कृतस्य यावती दुरवस्था आसीदधुनापि स्वातन्त्र्ये समासादितेऽपि सैव दुरवस्था तावत्येव वर्तत इति बोधयितुं संस्कृतायोगस्य (१९५६-१९५७) समक्षं बहुभिरपि संस्कृतपण्डितैरयं प्राचीनश्लोकः समुदाहृतः—

रात्रिर्गमिष्यति भविष्यति सुप्रभातं
भास्वानुदेष्यति हसिष्यति पंकजश्रीः।
इत्थं विचिन्तयति कोशगते द्विरेफे
हा हन्त हन्त नलिनीं गज उज्जहार ॥ इति।[1]

अत्र तावद्व्यंग्यार्थस्य यः सविलाससमुल्लासः स तु वाचकैः स्वयमेव समुन्नेय इत्यास्तां तावत्।

लौकिकवाग्व्यवहारे अर्धाक्षरभणितानि

अर्धाक्षरभणितानि नूनं सविलाससमुग्धहसितानि।
अर्धाक्षिप्रेक्षितानि गाथाभिः विना न ज्ञायन्ते ॥ इति।

गाथा अस्माभिर्वज्जालग्गतस्समुपलब्धा। तत्रार्धाक्षरभणितानीति यदुक्तं तस्य मन्मते अयमर्थः—यत्र किञ्चित् साकल्येनाभिधेयमपि यस्तु अंशत एवाभिधीयते तत्रैवार्धाक्षरभणितं भवति। अर्धाक्षरभणितं च व्यंग्यार्थ-विशेषप्रत्यायनार्थमेवेत्यग्रे दर्शयिष्यते। इयमेवार्धाक्षरभणितिरानन्दवर्धनेन संवृत्याभिधानमित्युच्यते। यदुक्तम्—

घनश्यामस्य अन्यापदेशशतकम्, मधुसूदनस्य तथा, एकनाथकाश्यपस्य तथा, गीर्वाणेन्द्रस्य तथा, न्यायवाचस्पतिरुद्रकवेः भावविलासश्च (संस्कृतसाहित्येर परिचय. पृ. ७३)

1. "This Commission, in the course of its tours, could see a feeling of regret and disappointment among the people that, while no positive steps had been taken for helping Sanskrit, the measures uadertaken in respect of other languages have had adverse repercussions on it. The ultimate result of this has been that Sanskrit has not been allowed to enjoy even the status and facilities it had under the British Raj. In this connection, the Sanskrit Commission would like to quote, an old verse, which many Sanskritists referred to and which graphically pictured their real feeling."
(Report of the Sanskrit Commission, 1956–1957, p. 7)

यस्मिन् रसो वा भावो वा तात्पर्येण प्रकाशते ।
संवृत्याभिहितौ वस्तु यत्रालंकार एव वा ।।
काव्याध्वनि ध्वनिर्व्यंग्यप्राधान्यैकनिबन्धनः ।
सर्वत्र तत्र विषयो ज्ञेयः सहृदयैर्जनैः ।। इति ।
(ध्व. ३. पृ. ५००-५०१)

काव्येषु तावदर्धाक्षरमणितस्य शोभनतममुदाहरणम् आक्षेपालंकार उपलभ्यते । भामहस्य **काव्यालंकारे** तस्य लक्षणोदाहरणे क्रमशः यथा—

प्रतिषेध इवेष्टस्य यो विशेषाभिधित्सया ।
वक्ष्यमाणोक्तविषयः स आक्षेपो द्विधा मतः ।।
(२. ६८) इति लक्षणम् ।

अहं त्वां यदि नेक्षेये क्षणमप्युत्सुका ततः ।
इयदेवास्त्वतोऽन्येन किमुक्तेनाप्रियेण ते ।। (२. ६९)

इत्युदाहरणम् । अत्र तावदहं मरिष्याम्येवेति अनिष्टविशेषाभिधानेच्छया 'किमुक्तेनाप्रियेण ते' इत्यभिधेयोऽप्यर्थः प्रतिषिध्यते । स्ववक्तव्यमेव संवृत्याभिधीयते इत्यर्थः ।

भोजराजेनापि वाक्यशेषस्योदाहरणप्रदानव्याजेनार्धाक्षरमणितस्य काव्ये व्यवहारः प्रदर्श्यते । यदुक्तम्—'वाक्यशेषो भवति । यथा च—

त्वं जीवितं त्वमसि मे हृदयं द्वितीयं त्वं कौमुदी नयनयोरमृतं त्वमंगे ।
इत्यादिभिः प्रियशतैरनुरुध्य मुग्धां तामेव—शान्तमथवा किमतः परेण ।।

यथा वा—

पत्युः पितेव स भवान् नलकूबरस्य
रम्भा स्नुषा धनपतेरिव सा तवापि ।
यत्त्वन्यदत्र हृदयान्न तदेति कण्ठं
दोषस्तथापि यदि तन् स्मृत एष रुद्रः ।। × × ×

तथा हि—तामेव त्वं तथाग्नौ विशुद्धामाहितगर्भामनागसं विलब्धां च धर्मपत्नीमत्याक्षीरिति प्रथमश्लोके ।

कामयमानायामपि स्नुषायां कामतोऽपि यत्प्रधर्षणं तन्महापातकेषु प्रकृष्यते, किमंग पुनः अकामयमानायाः शपन्त्याः क्रोशन्त्याश्च हठेनेति द्वितीयश्लोके ।' × × × (पृ. १७९-१८०) । अत्र राघवन्महोदयेनोच्यते यद् 'उभयमपि व्यंग्यार्थस्यैवोदाहरणम् । न तु प्राधान्येनाभिव्यञ्जितस्य किन्तु अलङ्काररूपत्वेन वाच्यानतिसायिनः । विशेषतस्तु प्रथमतरः श्लोकः भामह-

रुय्यकादिप्रदर्शितदिशा आक्षेपालंकारस्यैवोदाहरणं भवति ।' इति[1]

एवंविधेषु स्थलेषु आनन्दवर्धनेन या 'संवृत्या अभिधानम्' इति समाख्या प्रयुक्ता सा एव भोजराजेनापि प्रकारान्तरेण प्रयुज्यते । यतो हि आक्षेपालंकारानुरूप एव संवृत्तिमुद्रा नाम अलंकारविशेषस्तेन स्वीक्रियते । यदुक्तं तदुदाहरणप्रदानव्याजेन—

"संवृत्तिमुद्रा यथा—

मणिरत्नं प्रसेनस्य तच्चानार्येण विष्णुना ।
लब्धं येनाद्ययोगेन तेन किं कीर्तितेन वः ।।

अत्र 'कथापि खलु पापानामलमश्रेयसे यतः', ततः 'किं तेन वः कीर्तितेन' इति साभिप्रायसंवृत्तिकरणात् इयं संवृत्तिमुद्रा ।" इति (**सरस्वतीकण्ठाभरणम्**. पृ. १४६) । अत्रोच्यते राघवन्-महोदयेन—" 'शान्तमथवा किमतः परेण' तथा 'न तदेति कण्ठम्' इत्येतद्द्वयसाधारण्येन 'तेन किं कीर्तितेन वः' इत्यत्रापि भोजराजमते वाक्यशेष एव ।"[2] वाक्यशेषस्तु कथं व्यञ्जनासाम्राज्य एवान्तर्भुक्त इति प्रागेवास्माभिः प्रदर्शितम् ।

अर्धाक्षरभणितिरेवांगलभाषायाम् इलिप्टिक् एक्स्प्रेशन् (Elliptic expression) इत्युच्यते । यत्र त्वभिधेयवस्तुनः संवृतिस्ततोऽप्याधिक्येन भवति तत्रात्यन्तसंवृताभिधानं क्रिप्टिक् एक्स्प्रेशन् (Cryptic expression) इत्युच्यते । विशेषाभिधानेच्छया लोककुतूहलजननार्थं वा वार्तापत्रादिषु क्रियता बाहुल्येन अर्धाक्षराभिधानस्य अत्यन्तसंवृताभिधानस्य च प्रयोगो भवतीति जि० के० चेष्टार्टन्महोदयेन 'अन् दि क्रिप्टिक् एण्ड दि इलिप्टिक्' (On the Cryptic and the Elliptic) नामके निबन्धे[3] सुनिपुणं

1. "These are clearly cases of Dhvani, not of Dhvani dominant, but dominated by alaṁkāra, Vācya-anatisāyī. That is, the former verse specially is ākṣepa alaṁkāra of the first variety in Bhāmaha and Ruyyaka. (V. Raghavan, **Bhoja's Śṛṅgāra Prakāśa**, p, 172)
2. "This is a case of purposeful suppression of a part of an expression and this 'तेन किं कीर्तितेन वः' is of the same nature as the expression 'शान्तमथवा किमतः परेण' and 'न तदेति कण्ठम्' in the two verses given by Bhoja as illustrations for Vākyaśeṣa."
(V. Raghavan, **Bhoja's Śṛṅgāra Prakāśa, p. 172**)
3. A. S. Cairncross, edited, **Eight Essayists,** Macmilan and Co. Ltd. 1957, p. 217.

प्रदर्शितम्। सर्वभाषास्वेवाधुनिकवार्तापत्राणां शीर्षवाक्यानि प्रायशोऽर्धाक्षरभणितिरूपाण्येव। शीर्षवाक्यादेव क्रमात्क्रमशो याथातथ्येन स्वरूपाभिधानं भवति। किञ्च विज्ञापनपत्रेष्वपि विक्रेयवस्तुनो गुणबाहुल्यरूपविशेषाभिधानेच्छया स्तुतिपरकत्वेनार्धाक्षरभणितान्युपयुज्यन्ते। विगत १९६७ वर्षे दिल्लीनगर्यां एकं विज्ञापनफलकं मया दृष्टं यत्र केवलमेतावदेवोक्तमासीत्—'अस्याब्दस्य सर्वश्रेष्ठच्छायाचित्रस्य नामोद्घोषणार्थमेतत्स्थानं संरक्षितम्।' इति (This space is reserved for declaring the name of the best picture of the year.) एतदेव वक्ष्यमाणच्छायाचित्रनामविषये अर्धाक्षरभणितम्। दिनकतिपयेन च तत्रैव 'वायुर्वै क्षेपिष्ठा देवता' इत्यनन्तरं 'वायव्यं श्वेतमालभेत' इति न्यायेन चित्रविशेषस्य नाममात्रं समुद्घोषितमिति किमु वक्तव्यम्। किञ्च सेयं लोकानामर्धाक्षरभणितिस्पृहा मनुष्यादीनां नामकरणदशायामपि दरीदृश्यते। स्थालीपुलाकन्यायेन केवलं कानिचन ग्रन्थनामान्येवात्रोदाह्रियन्ते।

ग्रन्थनामानां व्यञ्जकत्वम्

आस्तां वस्तुषु वैदग्ध्यं काव्ये कामपि वक्रताम्।
प्रधानसंविधानाङ्गनाम्नापि कुरुते कविः॥
(**वक्रोक्तिजीवितम्**, ४-२४)

ध्वन्यालोक इति ग्रन्थस्य नाम वर्तते। ध्वनितत्त्वं प्रत्यालोकपातनं करोत्ययं ग्रन्थ इत्यर्थः। यथा हि अन्धकारे स्थितो घटः आलोकसंयोगे सत्येव प्रकाशते तथैव ध्वनेः स्वरूपं सहृदयजनैः **रामायणा**दिष्वनुभूयमानमपि अव्याख्यातरूपमनेनैव ग्रन्थेन विस्पष्टव्याख्यानेन निभाल्यते। यदुक्तं ग्रन्थकारेण—

'तस्य हि ध्वनेः स्वरूपं सकलसत्कविकाव्योपनिषद्भूतमतिरमणीयमणीयसीभिरपि चिरन्तनकाव्यलक्षणविधायिनां बुद्धिभिरनुन्मीलितपूर्वम् अथच रामायणमहाभारतप्रभृतिनि लक्ष्ये सर्वत्र प्रसिद्धव्यवहारं लक्ष्ययतां सहृदयानामानन्दो मनसि लभतां प्रतिष्ठामिति प्रकाश्यते।' (**ध्व**. १)। तदेवं सहृदयानां कृते अदभ्रमुपयोगित्वमस्य ग्रन्थस्येति द्योत्यते।

लोचनम् इति **ध्वन्यालोक**टीकाया नामधेयम्। अन्धकारस्थितस्य घटस्यालोके सत्येव प्रकाशस्सम्भवति। किन्तु आलोकसहकृतस्यापि घटस्य लोचने सत्येव ज्ञानं सम्भवति। यदुक्तं भाषापरिच्छेदे प्रत्यक्षखण्डे—'गृह्णाति चक्षुः सम्बन्धादालोकोद्भूतरूपयोः।' इति। तस्मादानन्दवर्धनेन व्याख्यातमपि ध्वनेः स्वरूपं लोचने सत्येव लोचनस्थानीयायां तत्त्वार्थप्रकाशक्षमायां

बुद्धा सत्यामेवावबोद्धुं शक्यते । तथा हि **लोचन**टीकापठनानुगृहीता सुविशदा एव बुद्धिः ध्वनिस्वरूपावधारणे प्रगल्भते इति भावः । उक्तञ्च स्वयमेव **लोचन**कारेण—

भट्टेन्दुराजचरणाब्जकृताधिवास-
हृद्यश्रुतोऽभिनवगुप्तपदाभिधोऽहम् ।
यत्किञ्चिदप्यनुरणन् स्फुटयामि काव्या-
लोकं स्वलोचननियोजनया जनस्य ।। इति (**लोचनम्**. पृ. २) ।

तदेवं लोचनस्थानीयत्वेन टीकायाः सुमहदुपयोगित्वं ध्वन्यते ।

मीमांसाधुरन्धरश्रीपार्थसारथिमिश्रस्य ग्रन्थरत्नविशेषस्य **शास्त्रदीपिका** इति नाम वर्तते । **ध्वन्यालोक**साधारण्येनायमपि ग्रन्थः दुर्बोध्यशास्त्रतत्त्वे आलोकपातं करोतीति ग्रन्थस्य महद्वैभवं समस्तीति दीपिकापदेन द्योत्यते ।

तस्यापि ग्रन्थस्य पण्डितरामकृष्णमिश्रविरचिता टीका **युक्तिस्नेहप्रपूरणी** इति । प्रदीपिका च स्नेहे परिपूर्णभावेन सत्येव प्रज्ज्वलति आलोकपातने च प्रभवतीति हेतोर्नाम्ना एव टीकायाः महती आवश्यकताऽभिव्यज्यते ।[1]

कदाचिच्च ग्रन्थनाम एव सुनिपुणं स्वप्रतिपाद्यवस्तुवैशिष्ट्यमभिव्यनक्ति । तथा हि एम्.एइस्. आब्रामस्-विरचितः '**दि मिरर् एण्ड् दि लैम्प् : रोमान्तिक् थियोरि एण्ड् दि क्रितिकेल् ट्रेदिशन्**' (The Mirror and the Lamp: Romatic Theory and the Critical Tradition) इत्याख्यः[2] ग्रन्थः वर्तते । 'दर्पणं तथा प्रदीपः—रोमान्तिक्तत्त्वं तथा समालोचनपरम्परा' इति हि तन्नाम्नो यथायथमनुवादः । ग्रन्थस्य प्रतिपाद्यविषयस्त्वेवंरूपः—

समालोचनायाः प्राचीनपरम्परानुसारं काव्यादिकलाकर्मसु बहिः स्थितस्यैव वस्तुनो यथायथमनुकारो भवति । एतदेव मतमनुकारतत्त्वमित्युच्यते । आंगलभाषायां 'थियोरि अब् इमितेशन्' (Theory of Imitation) इति । रोमान्तिक्तत्त्वानुसारन्तु काव्यादिकलाकर्मसु कविप्रभृतिभिः कलाकारैरेव स्वयं नूतनतया किञ्चित् समुद्भाव्यते । एतदेव मतं निर्माणतत्त्वमथवा प्रतिभातत्त्वमित्युच्यते । आंगलभाषायां 'क्रियेशन् थियोरि अथवा इमाजिनेशन् थियोरि' (The Creation Theory or The Imgination Theory) इत्युच्यते । प्रतिभातत्त्वविषये पञ्चमे दर्शने वैशद्येनालोचनं

---

१. तुलनीयम्—'आश्चर्यम् । ताः खल्वस्माकं प्रदीपिका अपमानितनिर्धनकामुका इव गणिका निःस्नेहा इदानीं संवृत्ताः ।' इति विदूषकवचनं **मृच्छकटिकायाः** प्रथमांके ।

2. M. H. Abrams, New York, Oxford University Press, 1953.

भविष्यति। रोमान्तिक्तत्त्वे प्रवर्तिते सति अनुकारतत्त्वं कथंकारं क्रमशः परित्यक्तमासीदिति च तस्य ग्रन्थस्य प्रतिपाद्यविषयः। ग्रन्थनाम्नो मिरर् (दर्पणम्) इति पदमनुकारतत्त्वमभिव्यनक्ति। दर्पणे यथा बहिः-स्थितं वस्तु यथायथं प्रतिफलितं भवति तथैव कलास्वपीत्याशयः। लेम्प् (प्रदीपः) इति पदं प्रतिभातत्त्वमभिव्यनक्ति। प्रदीपो यथान्धकारदशायामसदिव वस्तुजातं प्रतिभाबलेन समुद्भासयति तथैव कलायामपि यथादृष्टवस्तूनामपि अधिकतरं किञ्चित्वैशिष्ट्यं समुद्भाव्यते इत्याशयः।[1]

काव्यषु सस्कृतग्रन्थस्य नाम्नः तात्पर्यस्य दृष्टान्तो यथा शूद्रककृतस्य प्रकरणस्य **मृच्छकटिका** इति नामधेयम्। मृत्तिकाविनिर्मितां क्षुद्रां शकटिकां कामपि आश्रित्यैव प्रकरणस्य समग्रापि कथा प्रगल्भते। अतीवनगण्यां मृच्छकटिकामाश्रित्य ग्रन्थनामकरणमेव द्योतयति यदत्र न तु समृद्धजनानां किन्तु चारुदत्तप्रभृतीनां नगण्यानां दरिद्रजनानामेव कथा वर्तते। किञ्चास्मिन् प्रकरणे

---

1. (1) "A recent study entitled **The Mirror and the Lamp** sees one of the main trends of romantic poetics to have been a turning from Renaissance concepts of art as mechanically effected mimesis toward a new concept of art as organic creation. The mirror gave back the literal image of reality external to itself. The lamp threw out its own discovering and organizing rays into the void of darkness" (**Literary Criticism : A Short History**, p. 498.)

(2) "Professor M. H. Abrams entitles his excellent work on 'Romantic theory and the Criticalcal Tradition' in European (mainly English) literature as 'The Mirror and the Lamp'. He shows with a great mass of material for support the romantic theory of poetry is an outcome of the recognition of the creative ability of human mind.....Now we may use these two images or metaphor—the mirror mind..... Now we may use these two images or metaphor—the Mirror and the Lamp—to characterise theories of truth and beauty which we considered in the earlier Chapters : truth and beauty as (1) Imitation, (2) Instrument and (3) Harmony. The first two theories (with much emphasis on the first) can be characterised with the image of the mirror; and the third with that of the lamp". (S. L. Bhyrappa, **Truth and Beauty**, Baroda, 1965. p. 93)

शूद्रकेण सर्वप्रकराणां निष्पेषणानां प्रतिवादः कृतः। प्राचीनसमाजव्यवस्थायाः सर्वात्मकं परिवर्तनमादरणीयमिति प्रचारितम्। तथा हि गणिकावृत्तिर्बन्धनरूपा। तस्या बसन्तसेनाया विनिर्मुक्तिरत्र समाद्रियते। तदर्थं वसन्तसेनाया अभिलाषः प्रकामं प्रकाश्यते। दासीवृत्तिरपि नितरां बन्धनरूपा। तस्या अपि मदनिकाया मुक्तिः प्रदर्श्यते। पालकस्य दुष्टशासनात् प्रजानां मुक्तिः संघटिता। अस्मिन् प्रकरणे सर्वथा मुक्तेरेव गुणगानम्। तस्मादत्र समधिगतकर्तृत्वस्यापि चारुदत्तस्य हस्ते शकारस्य निग्रहो न सम्भवति। चण्डालद्वयस्य तथा चेटस्य निर्मोक्षस्सर्वथा कवेर्मुक्तावस्थापक्षपातित्वमेव सूचयति। तदेवं बन्धनान्मुक्तिरेव ग्रन्थस्य विशेषतः प्रतिपादनीयो विषयः। किञ्च सर्वावस्थागतान् मानवान् प्रति प्रेमभावश्च प्रकरणेन विशेषतः प्रदर्शितः। तस्मादेव विट-चेट-चण्डालप्रभृतीनामपि चारित्र्यमाहात्म्यमत्र निर्विशेषं प्रदर्शितम्। संस्कृतरूपकेषु चैवंविधोऽर्थो नितरामभिनव इति प्रतिभाति। तदेवाभिनवत्वं ग्रन्थनाम्नाप्यभिव्यञ्जितम्। यतो हि साधारणतः प्रकरणनाम नायिकानायकयोर्नामानुसारमेव भवेत्। यदुक्तम्—

नाम कार्यं नाटकस्य गर्भितार्थप्रकाशकम्।
नायिकानायकाख्यानात् संज्ञा प्रकरणादिषु॥ इति।

तस्मान्मृच्छकटिकेत्यनेन गर्भितार्थस्य प्रकाशनात् प्रकरणनाम्नोऽभिनवत्वमनपह्नवनीयमेव। तदेवाभिनवत्वं कथावस्तुनोऽभिनवत्वं व्यनक्तीत्यास्तां तावत्।

कदाचिच्च व्यञ्जनामार्गनिपुणः कविः स्वग्रन्थनाम्ना एव स्वाश्रयप्रदातुर्नाम परामृश्य तस्याऽश्रयदातुर्गौरवमभिव्यनक्ति। यद्यपि प्रतापरुद्रयशोभूषणप्रभृतिषु ग्रन्थेषु वाच्यतयैव भर्तृनामग्रहणं भवति तथापि बहुषु स्थलेषु व्यञ्जनामार्गणैव भर्तुर्नाम संसूच्यते। तद्यथा आंगलभाषायां स्पेन्सार्महोदयेन विरचिते **'फेयारी क्वीन्'** नामके ग्रन्थे ग्रन्थनाम्ना ग्रन्थकर्तुराश्रयदात्री सम्राज्ञी एलिजावेथ-प्रथमापि परामृष्टा आसीदिति विद्वांसः। यदि कालिदासः द्वितीयचन्द्रगुप्तस्य राजसभायां प्रावर्तत तर्हि **कुमारसम्भव**काव्यस्य नाम्ना एव भर्तृपुत्रस्य कुमारगुप्तस्य नाम परामृष्टमिति वक्तुं युज्यते। **विक्रमोर्वशीयस्य** नाम्ना तु स्वभर्तुर्विक्रमादित्यविरुद्धाजो द्वितीयचन्द्रगुप्तस्यैवाभिव्यञ्जनम्। यदाह—

".....and we must remember that Candragupta II had the style of Vikramāditya, with whose name tradition constantly conncets Kālidāsa. Nor is it absurd to see in the title **Kumārasambhava** a hint at the young Kumāragupta, the heir

apparent, or even in **Vikramorvaśī** an allusion to the title Vikramāditya." (Keith, **History of Sanskrit Literature**, p. 80)

किञ्च अपरे तु विक्रमोर्वशीयमिति नाम्नो व्यञ्जनासामर्थ्येन एव कालिदास उज्जयिनीराजस्य खृ. पू. ५७ वर्षे विक्रमाब्दस्य प्रारम्भकस्य सभायां प्रावर्तत इति निश्चिन्वन्ति । यदाह—

"Tradition associates Kālidāsa with king Vikramāditya of Ujjayinī who founded the Vikrama era of 57 B. C. The change in the name of the hero of **Vikramorvaśīya** from Pururavā to Vikrama lends support to the view that Kālidāsa belonged to the court of King Vikramāditya of Ujjayinī....." (S. Radhakrishnan, **Meghadūta** Sahitya Akademy edition, General Introduction, p. 6.)

नान्दीश्लोकस्याभिव्यञ्जकत्वम्

ग्रन्थनाम्नोऽभिव्यञ्जकत्वं विचार्य साम्प्रतं नामतो नान्दीश्लोकंप्रत्यागच्छामि । 'आशीर्नमस्क्रियारूपैः श्लोकैः काव्यार्थसूचकैः । नान्दीति कथ्यते ।' इति वचनानुसारं नान्दीश्लोकश्च बाहुल्येन काव्यार्थसूचको भवति । तद्यथा **मृच्छकटिका**याम्—

पातु वो नीलकण्ठस्य कण्ठः श्यामाम्बुदोपमः ।
गौरीभुजलता यत्र विद्युल्लेखेव राजते ॥ इति द्वितीयो नान्दीश्लोकः । अत्राप्यम्बुदवदर्थिसन्तापहरश्चारुदत्तो विद्युद्रूपया वसन्तसेनयाऽभिगत इति काव्यार्थसूचनमवधेयम् ।' नान्दीश्लोकेषु च महत्तमेन परिमाणेन व्यंग्यार्थसद्भाव आविष्कृतोऽस्ति राघवभट्टेन । तथा हि—

या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री
ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता वाप्य विश्वम् ।
यामाहुः सर्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः
प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः ॥ इति

अभिज्ञानशाकुन्तले नान्दीश्लोकः । तत्र तावद्राघवभट्टेन व्यंग्यार्थपूग एवं प्रकटीकृतः—

(१) 'या सृष्टिः स्रष्टुराद्येत्यनेन शकुन्तला सूचिता । एतावत्कालपर्यन्तं तादृशसृष्टेरजातत्वादाद्यत्वम् ।' (**अर्थद्योतनिका**. पृ. १३) । उत्तमसौन्दर्यवती नारी अन्यत्रापि कालिदासेन स्रष्टुराद्या सृष्टिरित्युच्यते । तद्यथा 'या तत्र स्ताद्युवतिविषये सृष्टिराद्येव धातुः ।' इति **मेघदूते** (उत्तरमेघः ३१) । मन्मते या सृष्टिरिति वाक्येन विशेषतः प्रथमांकगता एव

शकुन्तला सूच्यते। तत्रात्युत्तमसौन्दर्याधारभूतत्वेनैव तस्याः सामाजिकानां पुरत उपस्थापनात्।

(२) 'या विधिना सुरतविधिना हुतं निषिक्तं हवी रेतो वहतीति तस्या गर्भः।' (**अर्थद्योतनिका**. पृ. १३)

(३) 'होत्रीत्यनेन कण्वः' सूच्यते।

(४) 'ये द्वे इत्यनेनानसूयाप्रियंवदे सख्यौ कालं शापान्तसमयं विधत्तो बोधयतः।' अर्थादनसूयाप्रियंवदे सूच्येते।

(५) 'श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम्' इत्यंशस्य व्यंग्यार्थ एवं निभालितो राघवभट्टेन—

'पातिव्रत्यादिभिर्गूणैर्विश्वं व्याप्य श्रुत्या वार्तया विषये देशे गुणैस्त्रिभिः शार्ङ्गरवशारद्वतगौतमीभिरयत एतादृशी स्थिता। (श्रुतिविषयगुणाया इत्येकं पदम्।) एतेन सगर्भायास्तस्या दुष्यन्तद्वारदेशगमनम्।' इति। अत्र तावद्व्यंग्यार्थविषये राघवभट्टस्य कियतीचित्कष्टकल्पना वर्तत इति प्रतिभाति।[1] तस्मादुपजीव्यानां दोषाविष्करणं विहाय स्वयमेव सरलेन मार्गेण कियाञ्चन व्यंग्यार्थः समुद्भाव्यते। गजेन्द्रगडकारमहोदयस्य मते श्रुतिविषयगुणा इत्यनेन तादृशी शकुन्तला सूचिता यस्याः कीर्तिर्विश्वमभिव्याप्य वर्तते।[2] मन्मते तु 'या सृष्टि' रित्यनेन साधारण्येन शकुन्तलापरिचयः। सा एव पुनरपि साधारण्येन परामर्शं नार्हति। नान्दीश्लोकस्थैरवान्तरवाक्यैः धारावाहिकभावेन कथावस्तुनो निर्देशो भवतीति यदि दर्शयितुं शक्यते तर्हि तदेव ज्यायः। तस्मात् पूर्वोक्तक्रमेण या सृष्टिरित्यनेन प्रथमांकगतं वृत्तं संसूचितम्। तथैव वहतीत्यादिना गान्धर्वविधिना परिणयः गर्भधारणञ्चेति द्वितीयतृतीयांकगतं वृत्तम्। 'होत्री' इत्यनेन कण्वस्य परामर्शेन तथा ये द्वे कालमित्यनेन शापवृत्तान्तस्य परामर्शेन चतुर्थांकगतं वृत्तं सूचितमस्ति। तदनन्तरं यदायाति तत् सति सम्भवे पञ्चमांकगतं वृत्तं सूचयेत्। तस्मादस्माभिरत्रायमर्थः परिकल्प्यते। पञ्चमांके शकुन्तलाया विसर्जने सम्भूते यदा सा मारीचाश्रमं गता तदा सा दृष्टिगोचरा न भवति किन्तु सानुमत्यास्तथा राज्ञः शकुन्तलापरामर्शकैर्वचनैस्तस्या गुणराजिरेव केवलं

---

१. सागरिकायां (षष्ठवर्षे द्वितीयदले) 'या सृष्टिः स्रष्टुराद्ये'ति अस्मदीयो निबन्धोऽवलोक्यताम्।

२. "श्रुतिविषय, etc. stands for Śakuntalā as a woman whose virtues had spread throughout the Universe." (A. B. Gajendragadkar. edited, Abhijñāna-Śakuntalā of Kālidāsa, p.205,)

श्रूयते। तस्या गुणः श्रुतिगोचरः, लोचनगोचरस्तु न भवति साम्प्रतमिति भावः। या स्थिता व्याप्य विश्वमित्यनेन तस्याः स्वर्गपथे मारीचाश्रमे वसतिरभिव्यज्यते। एवंक्रमेण श्रुतिविषयेति ग्रन्थेन पञ्चमषष्ठांकयोर्वृत्तं सूचितमस्ति।

(५) सर्वबीजप्रकृतिरित्यत्र 'सर्वेषां बीजं मूलभूतश्चक्रवर्तित्वाद् भरतः। प्रकृतिरुत्पत्तिरिति भरतोत्पत्तिरिति राघवभट्टः। मन्मते तु या सृष्टिरित्यादिषु यथा शकुन्तलापरामर्शमुखेन कथावस्तुसूचनं तथैवात्रापि स्यात्। तदेवं सर्वपदेन नामैकदेशग्रहणन्यायेन सर्वदमनः। सर्वदमन एव बीजं पुत्रः। तस्य प्रकृतिर्माता शकुन्तला। मातृरूपेण च शकुन्तला सप्तमांक एव परिचीयत इति कृत्वा प्रकृते सप्तमांकगतं वृत्तं संसूचितम्।

(६) 'अथ च येत्यादि सर्वत्र तनुभिः कृशाभिरिति समासोक्त्याष्टनायिकायुक्तनायकव्यवहारसमारोपाच्छृंगारसोऽपि व्यज्यते। तत्प्रधानत्वादस्य रूपकस्य।' इति राघवभट्टः। मन्मते तु नाटकेऽस्मिन् शृंगाररस एव प्राधान्येन वर्तत इति वस्तुमात्रस्यैव व्यञ्जना न तु असलक्ष्यक्रमव्यंग्यतया शृंगाररसस्य। अस्मिन् पद्य देवविषयकरतेरेवानुभूतिर्जायते न तु शृंगारस्यापीत्यस्मत्पर्यनुयोगे सहृदयेष्वेव वयमातिष्ठामहे।

(७) 'यया प्राणिनः प्राणवन्त इत्यनेन भरतशकुन्तलाभ्यां सह स्वपुरागमनम्' इति राघवभट्टः। मन्मते अत्रापि यया इत्यनेन प्रथमतः दुष्यन्तेन पुनर्मिलिता शकुन्तला एव सूच्यते। तत एव निर्वहणसन्धिगतं समग्रमपि वृत्तं द्योतितमित्यलं बहुना।

(८) "स्रग्धराच्छन्दः-'म्रभ्नैर्याणां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम्।' इति। अनेनास्य सप्तमांकत्वमपि सूचितम्।" इति राघवभट्टः। मुनिपदेन सप्तसंख्यायास्तस्माच्च सप्तांकत्वस्य सूचनम्। मन्मते त्रिमुनि इत्यनेन शकुन्तलाजीवनस्यैव अवस्थात्रयं मुनित्रयेण संश्लिष्टं सूच्यते। मुनित्रयश्च कण्वः दुर्वासा मारीचश्चेति। कण्वमारीचयोस्तु साक्षात्प्रवेशः। दुर्वाससः केवलं भाषणमेव श्रूयते। दर्शनन्तु न भवति। कौशिकस्य तु नाममात्रमुल्लिख्यते। तस्मान्मुनित्रयेणाद्यानामेव त्रयाणां ग्रहणम्।

अत्रायं प्रश्नः समुदेति। ननु कालिदासात् पूर्वतरेषु स्रग्धरालक्षणेषु मुनिपदस्योल्लेखो नास्ति। **नाट्यशास्त्रे** पञ्चदशाध्याये यत्र स्रग्धरालक्षणमस्ति तत्र सप्तमपदमेव लभ्यते न तु मुनिपदं तत्पर्यायो वा कश्चित्। **छन्दोमञ्जर्यास्तु** अर्वाचीनत्वात्तस्या मुनिपदलाभो न सम्भवति। तत्कथं कालिदासेन स्रग्धरालक्षणे मुनिपदमुपलब्धम् इति। तत्रोच्यते। कालिदासविरचिते **श्रुतबोध** एव स्रग्धरालक्षणं मुनिपदसमन्वितमित्यलं शंकया। यदुक्तम्—

चत्वारो यत्र वर्णाः प्रथममलघवः षष्ठकः सप्तमोऽपि
द्वौ तद्वत् षोडशाद्यौ मृगमदतिलके षोडशान्त्यौ तथान्त्यौ ।
रम्भास्तम्भोरुकान्ते मुनिमुनिमुनिभिर्दृश्यते चेद्विरामो
बाले वन्द्यैः सुतनु निगदिता स्रग्धरा सा प्रसिद्धा ॥
(श्रुतबोधः ४१) इति ।

ननु **विक्रमोर्वश्यामपि** नान्दीश्लोकः स्रग्धराच्छन्दसि वर्तते । कथं तर्हि तत्रापि सप्तांकत्वं न भवति इति चेदुच्यते । **विक्रमोर्वशी** कालिदासस्यापरिणतावस्थायाः रचना । किन्तु परिणतावस्थायां **शाकुन्तल**विरचनदशायां तस्य व्यञ्जनानैपुण्यं परां काष्ठां प्राप । अत एव तत्रेतरविलक्षणतया व्यंग्यार्थबाहुल्यं समस्ति । परन्तु कालिदासीयकाव्येषु प्रयोजनविशेषानुरोधेन छन्दोविशेषस्य प्रयोगस्यान्येऽपि दृष्टान्तास्सन्ति । **तद्यथा** देवतास्तुतिषु विशेषतः श्लोकच्छन्दस एव प्रयोगः **कुमारसम्भवे** (२।४-१६) तथा **रघुवंशे** (१०।१६-३२) चावलोक्यताम् । मृत्युवर्णनायां विलापादिषु च सार्थकभावेन वियोगिनीछन्दः प्रयुज्यते । तद्यथा **कुमारसम्भवे** चतुर्थसर्गे रतिविलापः, तथा **रघुवंशे** अष्टमसर्गे अजविलापः । तत्र तत्र वियोगसूचनार्थमेव वियोगिनीछन्दः प्रयुज्यत इति किमु वक्तव्यम् । तदेवं मेघस्य मन्दगतित्वसूचनार्थमेव **मेघदूतकाव्ये** मन्दाक्रान्ताच्छन्दः प्रयुज्यते ।

स्वकीयकृतिस्तुतेरभिव्यञ्जना

'या सृष्टिः स्रष्टुराद्या' इत्यनेन ग्रन्थः प्रारभ्यते । आद्यापदेन 'अभ्यर्हितं पूर्वम्' इति न्यायेन अभ्यर्हितत्वमभ्यर्हितत्वाच्च श्रेष्ठत्वम् । स्रष्टुरितिपदेन काव्यस्रष्टुरर्थात्कवेरित्यर्थः । आनन्दवर्धनेनापि तावदुक्तमस्ति अपारे काव्यसंसारे कविरेकः प्रजापतिरिति । तस्मादयं प्रारभ्यमाणः ग्रन्थः कवेः श्रेष्ठा कृतिरित्यभिव्यञ्जनया सामाजिकप्ररोचना । तदेवमन्यत्रापि कविभिः स्वकीया कृतिः प्रशस्यते इति दृश्यते । तद्यथा—

'अहो सरसरमणीयता संविधानकस्य' (**मालतीमाधवम्**–६) इति भवभूतेः ।[1] 'अहो संविधानकम्' (**उत्तररामचरितम्** ३-४७) इति च तस्यैव ।[2] एवंविधैर्वचनैः स्वकीयकथावस्तुविन्यासस्यैव (संविधानकस्यैव) स्तुतिर्गम्यते। मृच्छकटिकायामपि प्रथमांके सूत्रधारस्य 'नवमिव संविधानकम्' इति वचनं प्रकरणस्य **दरिद्रचारुदत्त**मूलकत्वेऽपि नवीनत्वं सूचयति । तथैव

1. G. K. Bhatt **Uttararāmacarita**, Introduction, p. 78.
2. **Ibid**, Notes. p. 78.

तत्रैव विदूषकस्य 'चतुरो मधुरश्चायमुपन्यास' इति वचनं चतुरमधुरपदाभ्यां प्रकरणस्य प्राशस्त्यमपि गमयतीति निपुणैरुन्नेयम् ।[1]

किञ्च—तदेष सर्गः करुणार्द्रचित्तैर्न मे भवद्भिः प्रतिषेधनीयः ।
यद्यर्थिता निर्हृतवाच्यशैलान् प्राणान् मया धारयितुं चिरं वः ॥
(**रघुवंशम्** १४-४२)

इत्यत्रापि कालिदासस्य स्वकीयप्रबन्धस्य सर्ग इति पदेन परामृष्टस्य प्रशंसा सूरिभिस्समुद्भाव्यते ।[2]

महाकाव्यप्रारम्भे वस्तुनिर्देशः

नाटकेषु यथा नान्दीश्लोकेनैव कथावस्तुनोऽभिव्यञ्जनं भवति तथैव महाकाव्येष्वपि प्रथमपद्येनैव प्रायशः कथावस्तुनोऽर्थात्प्रतिपाद्यस्य मूलविषयस्य निर्देश उपलभ्यते । यदुक्तं महाकाव्यलक्षणे—'आदौ नमस्क्रियाशीर्वा वस्तुनिर्देश एव वा' इति (**साहित्यदर्पणम्** 6-319) । अत्र वस्तुनिर्देशपदेन वर्णनीयनायकस्य नाम्ना निर्देश इति टीकाकाराः । तद्यथा **किरातार्जुनीये** प्रथमपद्ये 'युधिष्ठिरं द्वैतवने वनेचर' इति नायकनामग्रहणम् । तथैव **शिशुपालवधे** प्रथमपद्ये 'श्रियः पति' इत्यंशेन नायकस्य श्रीकृष्णस्य निर्देशः । मन्मते तु 'वस्तुनिर्देश' इत्यस्य 'वर्णनीय-विषयस्य सूचनम्' इत्यप्यर्थस्स्यात् । तद्यथा आदिकाव्ये **रामायणे** एव—

तपः स्वाध्यायनिरतं तपस्वी वाग्विदां वरम् ।
नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुंगवम् ॥ (१-१-१)

इति प्रथमपद्ये 'तपः स्वाध्यायनिरतम्' इति पदस्यैव तावद् व्यंग्यार्थः परामृश्यताम् । **रामायणस्य** च 'रामादिवत्प्रवर्तितव्यं न रावणादिवदिति उपदेशप्रदायकत्वं सुप्रसिद्धम् । अथवा रामचरितमेव **रामायणस्य** प्रधानं प्रतिपाद्यवस्तु । श्रीरामचन्द्र एव परब्रह्मतत्त्वादभिन्नः । 'यस्य ज्ञानमयं तपः' इति श्रुतेः तपः शब्देन ब्रह्मविषयकज्ञानमुच्यत इति **तिलकटीकायां** स्पष्टम् । तस्मात्तपः इति पदेन श्रीरामचन्द्रविषयकं तत्त्वज्ञानं प्रतीयते । 'स्वाध्यायशब्देनाप्रायत्यानध्ययनकालदेशपरिहारादिनियमोपेततया फलवदर्थावबोधपर्यन्तं स्वशाखाध्ययनमुच्यते ।' इति **तिलकटीका** । तस्मात् स्वाध्यायपदेनास्य

1. Mukunda Mādhava Sharmā, 'A Suggestion as to the Relation between Cārudatta and Mṛcchakaṭikā,' **Journal of the University of Gauhati**, Vol. IX. No. 1, Arts, 1958, p. 169.
2. S. Radhakrishan, **Meghadūta**, Sahitya Akademy edition, General Introduction, p. 10.

काव्यस्य 'स्वाध्यायोऽध्येतव्य' इति नियमानुसारं स्वाध्यायवदवश्यपठनीयत्वं सूच्यते। तथैव च वाल्मीकिना स्वशिष्ययोर्विनेययोर्लवकुशयोरेतन्निर्दिष्टमासीत्। एतच्च तत्त्वं ममैव निरीक्षकत्वे शोधकार्यं साफल्येन सम्पादितवता केरलदेशीयेन डा० के. शरच्चन्द्रनेन नचिरेण प्रकाशयिष्यमाणे स्वकीयशोधग्रन्थे सुनिपुणं निभालितम्।[1]

इदमत्र विशेषतोऽवधेयम्। 'चतुर्विंशत्सहस्राणि श्लोकानामुक्तवानृषिः' (**रामायणम्** १-४-२) इति वचनानुसारमत्र चतुर्विंशतिसहस्रश्लोकास्सन्ति। एवंक्रमेणैतत्काव्यं चतुर्विंशत्यक्षरात्मकगायत्रीमन्त्रस्य प्रतीकभूतम्। गायत्रीमन्त्रस्य यत्प्रतिपाद्यं ब्रह्मतत्त्वमस्यापि काव्यस्य तदेव प्रतिपाद्यमिति श्लोकसंख्ययैवैतत्सर्वमपि ध्वनितमिति व्यञ्जनाया एव गौरवम्। उक्तञ्च **तिलकटीकायाम्**—

'ब्रह्मांशभूत एव भगवान् प्राचेतसो वाल्मीकिः स्वकृतशतकोटिरामायणसारभूतं चतुर्विंशत्यक्षरगायत्र्याख्यपरब्रह्मविद्याविलासभूतं रामायणं चतुर्विंशतिसहस्रश्लोकरूपं कुशलवाभ्यामग्राहयत्॥' इति (पृ. १)। एवमेव महाकविवचनानां बाहुल्येन यदस्ति अभिव्यञ्जकत्वं तन्निपुणैः समुन्नेयम्। किन्तु काव्यगतमेतत्प्राज्यं व्यंग्यार्थवैभवं केवलं सचेता एवानुसन्धातुं प्रभवति। यदाह—

तद्वत् सचेतसां सोऽर्थो वाच्यार्थविमुखात्मनाम्।
बुद्धौ तत्त्वार्थदर्शिन्यां झटित्येवावभासते॥
(**ध्वन्यालोकः** १-१२) इति।

अन्यत्राप्येतदनुरूपः श्लोको यथा—

तत्त्वं किमपि काव्यानां जानाति विरलो भुवि।
मार्मिकः को मरन्दानामन्तरेण मधुव्रतम्॥ इति।
(**रसगंगाधरे** प्रतिवस्तूपमाप्रकरणे समुद्धृतोऽयं श्लोकः।)

अत एव **प्राचीनसाहित्यादिषु** भाषाग्रन्थेष्वपि रवीन्द्रनाथप्रभृतीनां

---

1. "That the Rāmāyaṇa was included in the curriculum of studies and given the status of **svādhyāya** (i. e., Vedic studies) may be inferred from the fact that the Muni desired from his disciples a regularity of reciting twenty cantos of the Rāmāyaṇa a day—a regularity so very essential in the matter of **svādhyāya.**" (K. Sarat Chandran, **Education in the Vālmīki Rāmāyaṇa, p. 178**)

सहृदयवर्याणामेवानल्पव्यंग्यार्थवैभवसमुद्भावनपाटवमाविर्भवति नान्येषामिति दिक्।

नान्दीश्लोकतः प्रस्तावनादिकम्

नान्दीश्लोकस्य व्यंग्यार्थवैभवं दिङ्मात्रेण प्रदर्शितम्। नान्दीश्लोकत आगत्य प्रस्तावनायामपि तावदेव व्यंग्यार्थवैभवमुपलभ्यते। तद्यथा भट्टनारायणस्य **वेणीसंहारे** प्रस्तावनायां –

सत्पक्षा मधुरगिरः प्रसाधिताशा मदोद्धतारम्भाः।
निपतन्ति धार्तराष्ट्राः कालवशान् मेदिनीपृष्ठे ॥ (१-६)

इत्यत्र शरदि हंसानां पृथिव्यां निपतनस्य वर्णनाच्छलेन धृतराष्ट्रपुत्राणां कौरवाणां नाटके प्रदर्शयिष्यमाणदिशा युद्धे निपतनं ध्वनितम्। कालिदासीये **शाकुन्तले** खलु प्रतिपदमेव भूयान् व्यंग्यार्थस्समुल्लसति। प्रस्तावनायामपि तथैव भवतीति किमु वक्तव्यम्। तथापि शिष्यशिक्षायै दृष्टान्तोपन्यासो यथा—

'आर्य, सम्यगनुबोधितोऽस्मि। अस्मिन् क्षणे विस्मृतं खलु मया कुतः—
तवास्मि गीतरागेण हारिणा प्रसभं हृतः।
एष राजेव दुष्यन्तः सारंगेणातिरंहसा ॥ (१-५) इति सूत्रधारवचनम्।

अत्र सूत्रधारस्य विस्मरणानुबोधाभ्यां दुष्यन्तस्यापि शकुन्तलाविस्मरणमथांगुरीयकदर्शनेन शकुन्तलास्मरणमिति कथावस्तुनोऽभिव्यञ्जना भवति। 'दुष्यन्तः सांरगेण हृत' इत्यत्र सारंगः शकुन्तलायाः प्रतीकम्। व्यंग्यार्थस्तु दुष्यन्तः शकुन्तलासौन्दर्येण मोहितो भविष्यतीति। सारंगस्य शकुन्तलाप्रतीकभूतत्वमग्रेऽपि गत्वा—

न खलु न खलु बाणः सन्निपात्योऽयमस्मिन्
मृदुनि मृगशरीरे तूलराशाविवाग्निः।
क्व बत हरिणकानां जीवितं चातिलोलं
क्व च निशितनिपाता वज्रसाराः शरास्ते ॥ (१-१०)

इति वैखानसवचनेऽप्युपलभ्यते। तत्रापि चाश्रममृग आश्रमपालितायाः शकुन्तलायाः प्रतीकम्। बाणश्च मदनबाणस्य प्रतीकम्। न खल्वसिधारव्रते नियुक्ताया आश्रमबालिकाया मनसि त्वया कामभावो जागरणीय इति ध्वन्यते। एवदेव दुष्यन्तस्य तपसो विघ्नभूतत्वमग्रेऽपि ध्वन्यते यथा—

तीव्राघातप्रतिहततरुः स्कन्धलग्नैकदन्तः
पादाक्रष्टव्रततिवलयासंगसंजातपाशः।
मूर्तो विघ्नस्तपस इव नो भिन्नसारंगयूथो
घर्मारण्यं प्रविशति गजः स्यन्दनालोकभीतः ॥ (१-३२) इत्यत्र।

पादाकृष्टव्रततिवलयासंगसञ्जातपाशोऽयं गजः शकुन्तलाप्रेमप्रकर्षपरवशं राजानं दुष्यन्तं सूचयति। स च शकुन्तलायाः तपसो विघ्नभूतः। अत्रापि सारंगपदमाश्रमबालिकाप्रतीकबोधकत्वेनोपलभ्यते। तस्माद् भिन्नसारंगयूथ इत्यनेन शकुन्तलाऽनसूयाप्रियंवदा इति तिसृणां मध्ये कामभावपीडितायाः शकुन्तलायाः पृथक्करणं गम्यते। आश्रमधर्मपालनविषये तासामधुना यौथभावस्यासम्भवात्।

रूपकेषु पताकास्थानकादिकम्

पताकास्थानकं हि पताकास्थानीयत्वेनान्यवस्तुनोऽभिव्यञ्जकं भवति। पताकाया अभिव्यञ्जकत्वं कथमस्तीत्यग्रे चतुर्थदर्शने दर्शयिष्यते।

यत्रार्थे चिन्तितेऽन्यस्मिंस्तल्लिगोऽन्यः प्रयुज्यते।
आगन्तुकेन भावेन पताकास्थानकं तु तत्॥ (**सा० द० ६-४५**)

इति **साहित्यदर्पणप्रदत्तं** पताकास्थानकलक्षणम्। **साहित्यदर्पण** एव पताकास्थानकस्य चातुर्विध्यं प्रदर्शितम्। तेषु चतुर्विधेषु प्रथमेतरप्रकारेषु मूललक्षणस्य 'अन्यः प्रयुज्यते' इति वचनानुसारं भूयानन्योऽर्थोऽभिव्यज्यते। तद्यथा—

रक्तप्रसाधितभुवः क्षतविग्रहाश्च।
स्वस्था भवन्तु कुरुराजसुताः सभृत्याः॥ (**वेणीसंहार 1-7**)

इत्यत्र रुधिरलिप्तगात्रतया (रक्तप्रसाधितभुवः) क्षतविग्रहत्वेन (क्षतविग्रहाः) कौरवाणां भावि अमंगलमभिव्यज्यते। एवमेव तृतीयचतुर्थप्रकारयोरपि व्यंग्यार्थः साहित्यदर्पण एव समुन्नेयः।

पताकास्थानकमेव आंगलभाषायाम् आयरणि इति वक्तुं युज्यते। पाश्चात्त्यनाटकेषूपलभ्यमानम् आयरणि द्विविधम्। भाषणात्मकं क्रियात्मकञ्चेति। उभयत्रैवानभिधीयमानोऽक्रियमाणो वा पदार्थविशेषोऽभिव्यज्यते। उभयविधमपि ग्रीक्नाटकेष्वपि बाहुल्येनोपलब्धमस्ति। क्रियात्मकस्य आयरणिप्रकारस्य तत्र महत्तरं प्राधान्यम्। तच्च ग्रीक्दार्शनिकस्य एरिष्टटोलमहोदयस्य पेरिपेटियातत्त्वेन तथा एनाग्नोरिसिस्तत्त्वेन सम्बद्धम्। तत्त्वद्वयमपि महापुरुषचरितोपजीविनाटकेषु विशेषतोऽपेक्षितम्। समासेन पेरिपेटिया नाम दशावैपरीत्यम्। एनाग्नोरिसिस् नाम स्वकृतदुष्कर्मणो ज्ञानाविर्भावः[1]। ग्रीक्नाटकेषु तावन् महापुरुषाणामपि जीवनं विपर्ययपूर्णम्।

1. "**Peripeteia** (sudden reversal) and **anagnorisis** (recognition) are the pivots of the complex action (**peplegmene praxis**) preferred by Aristotle.....At the same time, **peripet-**

असम्भावितभावेन स्वकृतकर्मणोऽपरिलक्षितत्रुटिविशेषवशतो यद्दशावैपरीत्यं जायते तदेव विपर्ययमूलम्। तदेवं महापुरुषस्य कर्मविशेषो यदा भावि अमंगलं सूचयति तदा स एव क्रियात्मकम् आयरणि भवति। एवंक्रमेण पेरिपेटिया-पदेन आशाभंगोऽपि सूच्यते। तदेवं पेरिपेटिया नाम मंगलादमंगलं प्रति दशायाः परिवर्तनम्[1]। क्रियात्मकम् आयरणि तत्रैव भवति यत्र कर्तुरवधानाऽसमालिङ्गित एव क्रियाविशेषस्तदभिप्रेतार्थविपरीतमेव वस्तु सामाजिकान् प्रति सूचयति। तदनन्तरभावि एनाग्नोरिसिस् तदैव भवति यदा पार्यन्तिकदशायां विपर्यस्तो नायकः स्वकृतकर्मणः त्रुटिं परिचिनोति[2]। भाषणात्मकमपि आयरणि ग्रीक्नाटकेषु मर्मस्पर्शिभावेन बाहुल्येन प्रयुक्तमस्ति। यदा हि भाषणविशेषो वाच्यार्थव्यतिरिक्तमपि अमंगलविषयकम् अर्थान्तरमभिव्यनक्ति तदैव भाषणात्मकम् आयरणि सञ्जायते[3]। एतदनुरूपाणि पतकास्थानकानि आद्येतरेषु सर्वेष्वपि प्रकारेषु सम्भवन्ति। विशेषस्तु इयानेव यद् आयरणि सदैवामंगलमेव सूचयति पताकास्थानकन्तु मंगलमपि सूचयतीति। यदाह **दर्पण**कारः—'एतानि चत्वारि पताकास्थानानि

---

eia and **anagnorisis** are key incidents in the serious story (**muthos**) of the upright protagonist, his **hamartia,** and his suffering." (**Literary Criticism : A Short History**, p. 44)

1. "**Peripeteia** is an acute form of **metabasis** or change from good to bad. In the light of Aristotle 's examples.....it would seem that **peripeteia** means something very much like a reversal of expectation or frustration of purpose, an unexpected catastrophe resulting from a deed unwittingly done.' **Peripeteia,** says one classical scholar, is a kind of irony of action." (**Literary Criticism : A Short History**. p, 44.)
2. "Irony of action occurs when 'deeds are caught up out of an agent' s grasp and charged with a meaning the very opposite, of what was meant. **Anagnorisis,** when used, as it may be, in close junction with **peripeteia,** is the hero's realization of the truth, the full meaning of the deed done in error." (**Literary Criticism : A Short History,** p. 44.)
3. "Irony of words, so frequent also in Greek tragedy and so telling, occurs 'when words, are caught up by circumstances and charged with **a** fuller meaning than the speaker meant." (**Ibid,** p. 44.)

क्वचिन्मंगलार्थं क्वचिदमंगलार्थं सर्वसन्धिषु भवन्ति । काव्यकर्तुरिच्छावशाद् भूयो भूयोऽपि भवन्ति ।' (**साहित्यदर्पणः** 6) इति ।

आयरणितत्त्वस्य वैशिष्ट्यम्

यत्र तावद् आयरणि वर्तते तत्र विपरीतः कश्चन अर्थः आविर्भवति । यद्यपि सोऽर्थः विपरीतलक्षणया समुत्पाद्यमान इति वक्तुं शक्यते तथापि लक्षणाया एवंविधेषु स्थलेषु व्यञ्जनानान्तरीयकत्वाद् व्यंग्यार्थेनैव तादृशार्थस्य परिपोषणमिति नियमेनैव आयरणि-प्रयोगे व्ययंग्यार्थसद्भावस्समुन्नेयः । तथा हि आयरणि-लब्धो विपरीतोऽर्थः प्रायशः शोकावह एव । तदेवं विपरीतार्थविषयकत्वेन तथा शोकविषयकत्वेन आयरणिपदार्थस्य प्रधानं धर्मद्वयं प्राचीनकालादेवोररीकृतमस्ति । विशेषतस्तु तत्र व्यंग्यार्थस्य शोकावहत्वम् । एतद्धर्मद्वयानुरोधेनैव एतावत्कालपर्यन्तम् आयरणितत्त्वं पाश्चात्यकाव्यमीमांसायां विशेषप्राधान्यं विगाहते । आधुनिकेषु रिचार्ड-महोदयस्य **फिलसफि अब रेटरिक्**-ग्रन्थे कन्टेक्ष्ट्तत्त्वेऽपि आयरणितत्त्वस्योपस्थितिः सम्भाव्यते । तथैव हेनरि जेमस्-महोदयस्य **दि लेछन् अब दि माष्टार्**-ग्रन्थस्य भूमिकायां लभ्यते—'आयरणि खलु सम्भवि विपरीतं वस्तु सूचयति आविर्भावयति वा ।' इति । टि. एस. इलियट्-महोदयेन विट्-पदार्थस्य लक्षणकरणदशायां प्रायश एतदनुरूपमेवाभिहितम् । यदुक्तम्—'**विट्**-पदार्थे अभिज्ञताविशेषस्य वर्णने तत्रैवान्तर्निहितानां तद्विपरीतानामपि सम्भाव्यानामभिज्ञताजातानामुपलब्धिर्जायते' इति । आर्. पि. वारेन्-महोदयस्य **पिओर् एण्ड इम्पिओर् पयेत्रि** (अमिश्रितं तथा मिश्रितं काव्यम्) नामके ग्रन्थेऽपि आयरणि-पदार्थस्य तथाविध एवार्थः प्रकाशितः । यत्तु अमिश्रितं काव्यं तत्र आयरणि-पदार्थस्य विट्-पदार्थस्य वा सद्भावो नास्ति ।[1]

1- "Thus might a sympathetic critic be expected to relate certain key terms of Richards' earlier critical theory to the 'context' theory elaborated in his **Philosophy of Rhetoric.** Such an interpretation of Richards' views has the merit of implying a conception of irony congenial to that held by many critics of the present and of the recent past. For example, Henry James, in his preface to **The Lesson of the Master,** declared that 'operative' irony 'implies and projects the possible other case'—an observation possibly echoed by T. S. Eliot in his defination of wit as involving 'a recognition, implicit in the expression of every experience, of other kinds of experience

वारेन्महोदयादीनां मते यत्र आयरणि वर्तते तत्र रमणीयमपि वस्तु शोकावहस्य वस्तुनः सूचकं भवति। अर्थात् 'भया एतद्विपरीतमपि वस्तु ज्ञायते। सावधानमेव आपातरमणीयमेतत् पश्यताम्।' इति हि तत्र कवेरभिप्रायः।[1]

एवमेव आयरणितत्त्वे किञ्चिद् गूढमुपनिषद्भूतं तत्त्वं विनिहितमस्ति। तत्तत्त्वानुसारं हि यदेव आपातरमणीयं तदेव पार्यन्तिकदशायां नियमेनेवासुखं जनयति। न हि कुत्रापि किञ्चिदविमिश्रं सुखमस्ति। सुखार्थं या आशा साऽपि दुःखाय एव भवति। तद्वैपरीत्येन दुःखमेव सुखं जनयति। नैराश्यमेव आशाबीजं सञ्चारयति। नैराश्यमेव सुखरूपेण परिणमते इति भावः। यदुक्तम्—'आशा हि परमं दुःखं नैराश्यं परमं सुखमिति।' यदेव लब्धुमभिलष्यते तन्नैव लभ्यते। आशायां परित्यक्तायां यदि परमप्रत्याशितभावेनैव लब्धुं शक्येत। किञ्च अतिमात्रमाह्लादोऽपि दुःखमेवावहति। तदेवं लौकेऽप्युक्तमस्ति—'हासे विघ्नभयम्' इति। तदेवंक्रमेणैतद् आयरणि-तत्त्वं वैराग्यं समर्थयतीति हेतोः पाश्चात्यानां मतेऽस्य धर्ममूलकमपि तात्पर्यमस्ति किञ्चित्।

आयरणितत्त्वस्यैवानुरूपो भावः भर्तृहरेर्वैराग्यशतके यथा—

भोगे रोगभयं सुखे क्षयभयं वित्तेषु भूभृद्भयं
दासे स्वामिभयं जये रिपुभयं वंशे कुयोषिद्भयम्।
माने म्लानिभयं गुणे खलभयं काये कृतान्ताद्भयं
सर्वं नाम भयास्पदं भगवतः शम्भोः पदं निर्भयम्॥[2]

(वैराग्यशतकम्-१००) इति॥

---

which are possible.' Such also is the function of irony described in R. Warren's 'Pure and Impure Poetry' (1943). The unwillingness to face up to the 'other possible case' constitutes for Warren the characteristic weakness of the 'pure' poetry that avoids on principle any manifestation of irony and witty intellection." (**Literay Criticism : A Short History.** p. 646.)

1. "It is, as Warren puts it, as if the poet seems to say : 'I know the worst that can be said on this subject, and I am giving fair warning. Read at your own risk.'" (**Ibid,** p. 647.)

२. अस्य पद्यस्य बहवोऽपि पाठभेदा उपलभ्यन्ते। तथा ही चतुर्थपाद एव 'सर्वं नाम भयास्पदं भुवि परं वैराग्यमेवाभयम्' इति पाठान्तरं विशेषतोऽवधानमर्हति। अस्यानुरूप एव कश्चन श्लोकः क्षेमेन्द्रेणापि औचित्यविचारचर्चायां प्रदत्तोऽस्ति यथा—

एतदेव आयरणितत्त्वं पूर्वोक्तं द्वैताद्वैततत्त्वमपि सूचयति। आयरणितत्त्वे यथा सुखदुःखयोराशानैराश्ययोर्मंगलामंगलयोः परस्परसापेक्षत्वेनावस्थानं तथैव सर्वेष्वपि सम्भाव्येषु द्वन्द्वेषु परस्परसापेक्षत्वम्। एतच्च द्वैताद्वैततत्त्वम् आयरणितत्त्वसन्दर्भे शेलिमहोदयेन तथा कोलेरिज्महोदयेन परिचितमासीत्।[1] फ्रेड्रिष श्लेगेल-महोदयप्रभृतीनां मते पुनरायरणितत्त्वं सर्वथा उपदेशपूर्णमात्मत्यागजनकं तथा नैराश्यस्यापि बीजं भवति।[2] विंशशतिकाया आयरणिवादिनां मते आयरणि-पदार्थः प्रतीकात्मकः। स च यथा दैन्यभावमसंलक्ष्यक्रमव्यंग्यरूपमावहति तथैव तत्त्वोपदेशमपि वितरति।[3] तदेवंक्रमेण पताकास्थानकस्थानीयाद् आयरणि-तत्त्वादेव साम्प्रतं आयरणिवादिनां सुखदुःखयोर्मंगलामंगलयोश्च सम्बन्धविषये महानेवाभिनिवेशः प्रक्रमते[4] इति परिलक्ष्यते।

'-शान्ते यथा मम चतुर्वर्गसंग्रहे—

भोगे रोगभयं सुखे क्षयभयं वित्तेऽग्निभूभृद्भयं
दास्ये स्वामिभयं गुणे खलभयं वंशे कुयोषिद्भयम्।
माने म्लानिभयं जये रिपुभयं काये कृतान्ताद्भयं
सर्वं नाम भवे भवेद् भयमहो वैराग्यमेवाभयम्॥" (पृ० १२) इति।

1. "We have observed that the reconciliation of opposites as it was meditated by Schelling and Coleridge had a largely metaphysical bearing. How to get subject and object together and yet explain their directness, how to unify inner and outer, general and particular, thought and emotion, art and nature, or a longer series of almost any such opposites one might name—this was the speculation that preoccupied these deeply introspective, transcendentally minded men." (**Lit. Crit.** P. 742.)
2. "An irony of a more darkly moral coloring, a sardonic self-transcendence, was known to Friedrich Schlegel and others." (**Ibid**, p. 742)
3. "The 20 th-century neo-classic irony of poetic inclusiveness, looking back to conventional ironic symbolism, and finding a theoretical hint in quotations from Coleridge by Eliot and Richards, has had a strongly emotive and at times moral accent." (**Ibid.** p. 742.)
4. "There is a direct concern with human affairs and human values here (human 'interests'),good and evil, pleasure and pain,

वाग्व्यवहारे काकोरभिव्यञ्जकत्वम्

पूर्वं वेणीसंहारे पताकास्थानकस्य सद्भावः प्रदर्शितः। **वेणीसंहार** एव काकोरपि बाहुल्येन प्रयोग उपलभ्यते। 'अभिप्रायवान् पाठधर्मः काकुरित्याह' राजशेखरः **काव्यमीमांसायाम्**। प्रथमतोऽस्याःसाकाङ्क्षनिराकाङ्क्षभेदेन द्वैविध्यमिति भरतः। यदुक्तम्—'द्विविधा काकुः साकाङ्क्षा निराकाङ्क्षा चेति, वाक्यस्य साकाङ्क्षत्वनिराकाङ्क्षत्वात्।' इति (**नाट्यशास्त्रम्**)। उच्च-नीच-दीप्त-मन्द्र-द्रुत-विलम्बित-भेदेन पाठधर्मस्य षड्भेदाः। व्यंग्यार्थ-विशेषानुक्रमेण साकाङ्क्षकाकोराक्षेपगर्भत्वेन प्रश्नगर्भत्वेन वितर्कगर्भत्वेन च त्रयो भेदाः। तदेवं साकाङ्क्षकाकौ वक्तुराक्षेपो वा वितर्को वा प्रश्न एव वा व्यंग्यार्थरूपेण लभ्यते। तथा हि आनन्दवर्धनप्रदत्तं काकोरुदाहरणं यथा—

लाक्षागृहानलविषान्नसभाप्रवेशैः
प्राणेषु वित्तनिचयेषु च नः प्रहृत्य।
आकृष्य पाण्डववधूपरिधानकेशान्
स्वस्था भवन्तु मयि जीवति धार्तराष्ट्राः॥ (**वेणीसंहारः १-८**)
इति भीमसेनवचनम्। (ध्वन्यालोकः ३. पृ. ४७७)।

अत्र स्वस्था नैव भवन्तीति आक्षेपो गम्यते। अभिनवगुप्तपादेन प्रदत्तं काकोरुदाहरणं यथा—

मथ्नामि कौरवशतं समरे न कोपाद्
दुःशासनस्य रुधिरं न पिबाम्युरस्तः।
संचूर्णयामि गदया न सुयोधनोरू
संधिं करोतु भवतां नृपतिः पणेन॥ (**वेणिसंहारः १-१५**) इति
भीमसेनवचनम्। (**लोचनम्**. ३. पृ. ४८०, **काव्यप्रकाशः ५**)।

अत्र 'न मथ्नामीति न' किन्तु मथ्नाम्येवेति प्रथमत आक्षेपगर्भत्वं तेन च मथ्नाम्येवेति निश्चयो गम्यते। यदुक्तमभिनवगुप्तपादेन—

"अत एव 'मथ्नामि कौरवशतं समरे न कोपात्' इत्यादौ विपरीतलक्षणां य आहुस्ते न सम्यक् परामृशुः। यतोऽत्रोच्चारणकाल एव 'न कोपात्' इति

---

rather than with the mysteries of knowledge and creation, the activity of that 'synthetic and magical power' the imagination, and so it seems to us that the recent ironists have put a hard problem very compellingly." (**Ibid**, p. 742)

दीप्ततरगद्गदसाकाङ्क्षकाकुबलान्निषेधस्य निषिध्यमानतयैव युधिष्ठिराभिमतसन्धिमार्गाक्षमारूपत्वाभिप्रायेण प्रतिपत्तिरिति मुख्यार्थबाधाद्यनुसरणविघ्नाभावात् को लक्षणाया अवकाशः।" इति (**लोचनम्**. पृ. ४८०)। अत्र मथ्नाम्येवेत्यर्थः झटित्येवावगतो वाच्यनिषेधसहभावेन स्थितस्सन् गुणीभूत इति गुणीभूतव्यंग्यकाव्यस्योदाहरणत्वेनैव प्रदत्तमेतत्पद्यं **काव्यप्रकाशकारेण**। तथापि **काव्यप्रकाश**कारप्रदत्तं काकोरुदाहरणान्तरमपि यथा—

तथाभूतां दृष्ट्वा नृपसदसि पाञ्चालतनयां
वने व्याधैः सार्धं सुचिरमुषितं वत्कलधरैः।
विराटस्यावासे स्थितमनुचितारम्भनिभृतं
गुरुः खेदं खिन्ने मयि भजति नाद्यापि कुरुषु॥

(**काव्यप्रकाशः** ३-१५) इति भीमसेनवचनम्।

अत्र 'गुरुः कथं न कुरुषु अद्यापि खेदं भजती'ति प्रश्नः काक्वा व्यज्यते। तस्यैव वैशिष्ट्येन 'मयि न योग्यः खेदः कुरुषु तु योग्य' इति ध्वन्यते।

निराकाङ्क्षकाकुरपि कदाचिद्विधिरूपा कदाचिदुत्तररूपा कदाचिच्च निर्णयरूपा भवतीति राजशेखरेण प्रदर्शितम्। तस्यायमाशयः। यदि किञ्चित्वावयं प्रश्नकर्तुर्वाक्यमिति गृह्यते काकुश्च तत्र वर्तते तर्हि तत् साकाङ्क्षं वाक्यम्। तत्र काकुलभ्यस्यार्थस्य क्रमेण आक्षेप–प्रश्न–वितर्करूपत्वम्। तदेव वाक्यं यदि उपदेष्टुर्वाक्यमिति गृह्यते काकुश्च तत्र परिचीयते तर्हि तन्निराकाङ्क्षं वाक्यम्। तत्र काकुलभ्यस्यार्थस्य क्रमेण विध्युत्तरनिर्णयरूपत्वम्। तस्मादेकमेव पद्यमाक्षेपविध्योरुदाहरणत्वेनापरञ्चैकं प्रश्नोत्तरयोरुदाहरणत्वेन तदपरञ्चैकं वितर्कनिर्णययोरुदाहरणत्वेन प्रदत्तमस्ति राजशेखरेण। एते षड्भेदा नियतनिबन्धाः। 'तद्वविपरीताः पुनरनन्ताः' इत्येतदप्युक्तं राजशेखरेण। तदेवमभ्युपगमानुनयकाकोरुदाहरणत्वेन तेनापि **वेणिसंहार**पद्यमेव प्रदत्तं यथा—

युष्मच्छासनलंघनाम्भसि मया मग्नेन नाम स्थितं
प्राप्ता नाम विगर्हणा स्थितिमतां मध्येऽनुजानामपि।
क्रोधोल्लासितशोणितारुणगदस्योच्छ्वन्दतः कौरवान्
अद्यैकं दिवसं ममासि न गुरुर्नाहं विधेयस्तव॥

(**वेणीसंहारः** १-१२) इति भीमसेनवचनम्।

अत्र प्रथमतरपादाभ्यामभ्युपगमो गम्यते। अन्तिमपादेन चानुनय इति दिक्। अस्मन्मते कदाचित्काक्वा वक्तुर्हृद्गतं शोकभीत्यादिकमप्यभिव्यज्यते। तत्रैव 'काकुः स्त्रीणां विकारो यः शोकभीत्यादिभिर्ध्वने'रिति

वचनं संगच्छते । किञ्चास्याः काकोर्व्यवहारो लौकिकवाग्व्यवहारे तथा शास्त्रवाक्येष्वप्युपलभ्यते । काव्यस्यापीयं जीवितभूता वर्तते । यदाह राजशेखरः—

अयं काकुकृतो लोके व्यवहारो न केवलम् ।
शास्त्रेष्वप्यस्य साम्राज्यं काव्यस्याप्येष जीवितम् ॥

(**काव्यमीमांसा**–७) इति ।

यद्यपि रुद्रट[1]–हेमचन्द्र[2]–भोजराजा[3]दिभिरपि काकुतत्त्वं विभिन्नमार्गेव्यारख्यातं तथापि अभिप्रायविशेषाभिव्यञ्जकत्वे काकोः प्राधान्यं प्रयोजनवत्त्वं वा सर्वत्रैव समानभावेन स्वीकृतमस्ति ।

इदन्त्वत्रावधेयम् । यद्यपि राजशेखरेण 'काव्यस्याप्येष जीवितम्' इति साधारण्येनोक्तं तथापि दृश्यकाव्येष्वेव वाचिकाभिनयमुखेनैव काकुप्रयोगः सम्भवति । तस्माद्व्यंग्यार्थलाभश्च जायते । अत एव दृश्यकाव्यविशेषतो **वेणिसंहारत** एव तदुदाहरणान्युद्धृतानि सन्ति । एरिष्टटोल्महोदयेनापि काकोरभिनयमात्रगतत्वं परिलक्षितम् । यदुक्तम्—'कथितभाषाया भंगीविशेष एव डिक्शन् (काकुः) इत्यभिधीयते । तयैव भङ्ग्या विध्यनुनययोः प्रश्नोत्तरयोस्तथैवंरूपाणामन्येषामपि विपरीतवस्तुयुगलानां वैशिष्ट्यमुत्पाद्यते । एतच्च तत्त्वं भाषणकलया तत्कर्तृभिश्च सम्बद्धम् तस्मान्नैतत् श्रव्यकाव्यविषयकं किन्तु कलान्तरसम्बन्धीति परित्यज्यते ।'[4] इति ।

तदेतत्काकुतत्त्वमाधुनिकभाषातत्त्वविद्भिरपि वाग्व्यवहारेषु टोन् (tone) पित्स् (pitch) इत्यादिनामभिर्बाहुल्येनोदाहृतम् । टोन्–पित्स्–इत्यादिनामधेयानामपि वाग्वैशिष्ट्यानामदभ्रं व्यञ्जकत्वमुरीकृतम् । किन्त्वेतत्सर्वमपि ग्रन्थरौरवभिया विदुषामुद्वेजनशङ्कया च नेह प्रतत्यते ।

---

१. विस्पष्टक्रियमाणादक्लिष्टा स्वरविशेषतो भवति ।
अर्थान्तरप्रतीतिर्यत्रासौ काकुवक्रोक्तिः ॥ (रुद्रटस्य काव्यालंकारः २-१६)

२. हेमचन्द्रस्य काव्यानुशासनम्-५

3. V. Raghavan, **Bhoja's Śṛṅgāraprakāśa**, pp. 13ff.

4. "As regards the Diction, one subject for enquiry under this head is the turn given to the language when spoken; e. g. the difference between command and prayer, simple statement and threat, question and answer, and so forth. The theoay of such matters, however, belongs to Elocution and the professors of that art.....Let us pass over this, then, as appertaining to another art, and not to that of poetry."
(Aristotle, **De poetica**, Chapter-19)

अनुकारशब्दस्याभिव्यञ्जकत्वम्

टोन्-पित्स्-इत्यनयोर्यथा व्यञ्जकत्वं समस्ति तथैवानुकारशब्दस्यापि प्रयोगो वाग्व्यवहारे बहुतरं व्यञ्जकत्ववैभवमावहति। अनुकारशब्दानामेव किञ्चिदुहारणं यथा—

झाणज्झणन्तबहुभूषणशद्दमिश्शं
किं दोवदो विअ पलाअशि लामभीदा।
एशे हलामि शहशत्ति जधा हणूमे
विश्शावशुश्श बहिणि विअ तं शुभद्दम्॥ (**मृच्छकटिका** १-२५)

इति शकारवचने 'झाणज्झणन्त' इति। यथा वा—

"विदूषक—किं दाणिं दासीए पुत्ता, दूब्भिक्खकाले बुड्ढरंको विअ उद्धकं सासाअसि 'एसा सा से' त्ति।

चेटः—अले, तुमं पि दाणिं इन्दमहकामुको विअ सुट्ठु किं काकाअसि—'का के' त्ति।" (**मृच्छकटिका**-५) इत्यत्र सासाअसि-काकाअसीति पदद्वयम्। एवंविधैरनुकारशब्दैः व्यञ्जनाद्वारेणैव मूलशब्दकारिणः किञ्चिद् विस्पष्टं चित्रं श्रोतुः समक्षं समुद्भाव्यते। इदन्त्वत्रावधेयम्। गोण्डामहोदयेन यथा आदिमजनानां तथा ग्रामीणजनानां वाग्व्यवहार उपमाया बहुलतरप्रयोगः परिलक्षितस्तथैवानुकारशब्दानामपि प्रयोगः प्रायशः चेट-शकार-विदूषकादीनां वचनेष्वेवानुसन्धेयः। अत एव खलु साओतालभाषायां तथा तत्समकक्षासु[1] अन्यास्वपि आदिमजनभाषासु अनुकारशब्दस्य बाहुल्यमुपलभ्यते। तद्यथा साओतालभाषायां खेतेर खेतेर इति दन्तपेषणे, खित्र खित्र इति वृक्षाद्यारोहणे, घुहुर् घुहुर् इत्यस्फुटभाषणे। डा० मुनीश्वर झा महोदयेनैवंविधानामनुकारशब्दानां प्रयोगस्यानेके दृष्टान्ताः साओतालभाषातः संगृह्य तदीये Echoism in Santali Language नामके निबन्धे प्रदर्शिताः। अनुकारशब्दानां व्यञ्जकत्वं सूचयता तेन तत्रैव एवमभिहितम्—

---

१. अथवा साधरण्येन सर्वेषामेव प्राचीनतरवाङ्मयानामेतद्वैशिष्ट्यमिति ग्राह्यम्।

(1) Satya Vrat, **The Ramayana—A Linguistic Study**, Delhi 1964, ch, IV, pp. 61-63.

(2) Madhusudan Mallik, "Onomatopoeia in Pali" **Indian Culture**, Vol. XV, No. s 1-4, July 1948—June 1949.

"भाषा हि नाम कलाविशेषः। सा च प्रतीकीकरणकलेति वक्तुं युज्यते। तत्र तावदनुकारशब्दा लोकसमयप्रसिद्धेभ्यस्तथा आधुनिकसंकेतसमन्वितेभ्यः शब्देभ्य आधिक्येनार्थगौरवसम्पन्ना अभिव्यञ्जनकुशलाश्च वर्तन्ते। ते तावत् तादृशाः शब्दा यत्र यथाश्रुतादधिकतरमेव प्रतीतिपथमवतरति। ते हि रस-भावाद्यनुभूतिमाविर्भावयन्तोऽस्माकं जीवने सहजरूपा भवन्ति। ते तावत् 'शब्दचित्रकल्पाः'। भाषाव्यवहाररूपायां विशालमरुभूमौ ते स्वभावजसुगन्ध-प्रस्फुटितपुष्परूपाः। किञ्च ते स्वयमेव काव्यरूपाः।" इति।[1]

काव्ये विभावादिसमाक्षेपः

दृश्यकाव्येषु काक्वा अर्थान्तरगतिरुपलब्धा। साम्प्रतमन्यदपि वैशिष्ट्यं दृश्यकाव्यानामालोच्यते। विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिस्स्या-दिति प्रदर्श्याभिनवगुप्तपाद एतदपि प्रदर्शयति यत्कदाचिद् विभावादिषु केवलं विभावस्यैव प्राधान्यं परिलक्ष्यते कदाचिद्वा अनुभावस्याथवा कदाचि-त्केवलस्य व्यभिचारिवर्गस्यैवेति। अत एव प्राधान्येनालब्धानामपि परि-कल्पनया एव रसास्वादस्समासाद्यते सहृदयैः। विभावादीनामेकैकस्य प्राधान्यं यथा तथैव द्वयप्राधान्येप्युदाहार्यम्। "किन्तु समप्राधान्य एव रसास्वादोत्कर्षः। तच्च प्रबन्ध एव भवति। वस्तुतस्तु दशरूपक एव। यदाह वामनः। 'सन्दर्भेषु दशरूपकं श्रेयः। तद्विचित्रं चित्रपटवद्विशेष-साकल्यात्।' (**काव्यालंकारसूत्रम्** १-३-३०-३१) इति। तद्रूपसमर्पणया तु प्रबन्धे भाषावेषप्रवृत्त्यौचित्यादिकल्पनात्। तदुपजीवनेन मुक्तके। तथा च तत्र सहृदयाः पूर्वापरमुचितं परिकल्प्य ईदृगत्र वक्ताऽस्मिन्नवसरे इत्यादि बहुतरं पीठबन्धरूपं विदधते। तेन ये काव्याभ्यासप्राक्तनपुण्यादि-हेतुबलादिभिः सहृदयास्तेषां परिमितविभावाद्युन्मीलनेऽपि परिस्फुट एव

---

1. "Language, above all, is an art, an art of symbolisation—and echo-words are more significant and more suggestive than the conventionalised and arbitrary words of language. They are the type of words 'where more is meant than meets the ear,' They posses sentimental appeal and thereby are true to our life. They are like 'sound paintings'. They are, so to say, natural and scented flowers blossoming in the vast desert of the linguistic conventions. They are poetry in themselves,"
(Munishwar Jha, 'Echoism in Santali Language', **Professor Birinchi Kumar Barua Commemoration Volume, p. 168.)**

साक्षात्कारकल्पः काव्यार्थः स्फुरति । अत एव तेषां काव्यमेव प्रीति-व्युत्पत्तिक्रदनपेक्षितनाट्यमपि ।" (**अभिनवभारती**–६. पृ. २८७) । अत्रायमभिप्रायः—

विभावादिषु सर्वेषु सत्स्वेव रसास्वादोत्कर्षः । किन्तु (एकमात्र-पद्यात्मक) मुक्तकादिषु विभावादीनां सर्वेषां साकल्येनोपस्थापनं नैव सम्भवति । महत्तरपरिसरात्मके प्रबन्ध एव सर्वेषामप्युवस्थापनं सुकरं भवति । विशेषतस्तु दृश्यकाव्येषु नायकनायिकादीनामालम्बनविभावाना-मुद्यानप्रभृतीनामुद्दीपनानां चित्रादिभिस्तथानुभावव्यभिचारिभावयोरभिनयेन इत्येवंक्रमेण सर्वेषामपि साकल्येनोपस्थापनं सम्भवतीति हेतोर्दृश्यकाव्यमेव श्रेष्ठम् । तत एव वामनेनाभिहितं–सन्दर्भेषु इत्यादि । तत एव च 'काव्येषु नाटकं रम्यम्' इति लोकवादः प्रसरतीति सम्भाव्यते । प्रबन्धे तु विभावा-दीनां चाक्षुषावलोकनं न सम्भवति । किन्तु यथोचितपरिकल्पनया सहृदयाः मानसपट एव तेषामवलोकनं कुर्वन्ति कविप्रदत्तवर्णनानुसारम् । यत्र मुक्त-कादिषु विभावादीनां वर्णनं परिपूर्णभावेन न सम्भवति अथवा विभावादिषु द्वयोरेकस्य एव वा चित्रणं सम्भवति तत्र झटित्यन्यसमाक्षेपेणार्थात्तद्व्यति-रिक्तानां परिकल्पनेनैव रसास्वादलाभो भवति । यदुक्तं विश्वनाथकवि-राजेनापि—

> सद्भावश्चेद्विभावादेर्द्वयोरेकस्य वा भवेत् ।
> झटित्यन्यसमाक्षेपे तदा दोषो न विद्यते ॥ (**साहित्यदर्पणः** ३–१६)

इति । अन्यसमाक्षेपश्च प्रकरणादिवशात् । यथा—

> दीर्घाक्षं शरदिन्दुकान्तिवदनं बाहू नतावंशयोः
> संक्षिप्तं निबिडोन्नतस्तनमुरः पार्श्वे प्रमृष्टे इव ।
> मध्यः पाणिमितो नितम्बि जघनं पादावुदग्रांगुली
> छन्दो नर्तयितुर्यथैव मनसः सृष्टं तथास्या वपुः ॥ इति ।

कालिदासस्य **मालविकाग्निमित्रे** (२-२) नृत्यारम्भसमये अग्निमित्रकर्तृकं मालविकायाः रूपवर्णनमिदम् । "अत्र मालविकामभिलषतोऽग्निमित्रस्य मालविकारूपविभावमात्रवर्णनेऽपि सञ्चारिणामौत्सुक्यादीनामनुभावानाञ्च नयनविस्फारादीनामौचित्यादाक्षेपः ।" (**सा. द.** ३) । तत एव च सहृदयानां रसास्वादलाभ इति व्यञ्जनाप्रपञ्चस्यैव बाहुल्यमेतदाकलयति ।

किञ्च कदाचिदालम्बनविभावभूतमेकं समग्रमपि नाटकीयं पात्रं दृश्य-काव्ये श्रव्यकाव्ये वा केवलैरिंगितैरेव सूच्यते न तु स्वरूपतस्समुपस्थाप्यते । तद्यथा कालिदासस्य **शाकुन्तले** प्रकृतिः । यथा शकुन्तला एकं पात्रं कण्व-

श्चापरं पात्रं दुष्यन्तश्च पुनरपरं प्रधानं पात्रं तथैव प्रकृतिरप्यत्र प्रधानपात्रविशेषः। अस्मन्मते शकुन्तला यथा कण्वस्य पालिता कन्या तथैव प्रकृतेरपि पालिता कन्या। कण्वो यथा पालकः पिता तथैव प्रकृतिरपि पालिका माता। 'न खलु तातनियोग एव, अस्ति मे सोदरस्नेहोऽपि एतेषु' (शकुन्तलायाः प्रथमांके), 'तात लताभगिनीं वनज्योत्स्नां तावदामन्त्रयिष्ये' (शकुन्तलायाः चतुर्थांके), 'अवैमि ते तस्यां सोदर्यस्नेहम्। इयं तावद्दक्षिणेन' (कण्वस्य चतुर्थांके) इत्येवंरूपैः वचनैः प्रकृतिजातानां लतादिकानां सोदरत्वकथनादेव प्रकृतेः शकुन्तलां प्रति मातृत्वं सूचितम्। एवमांगलकविरत्नस्य वर्डसवर्थमहोदयस्य काव्येषु, 'लूसी ग्रे' नाम्नी वालिकापि सर्वथा प्रकृतेरेव पालिताऽसीदिति वर्णितमस्ति। न खलु कालिदासीया प्रकृतिः हस्तपादाद्यवयवसंयुक्ता शरीरिणी वा। तथापि तस्या अवस्थितिः प्रथमतोऽन्ततः चतुर्थांकपर्यन्तं नियमेनैवोपलभ्यते। सचेतना सुखदुःखसमन्वितेयं प्रकृतिः। 'अन्तःसंज्ञा भवन्त्येते सुखदुःखसमन्विता' इति मनुसंहितावचनानुसारं प्रकृतिगता लताः पुष्पचयनादिविषये प्रमदानां रूपयौवनगर्वसम्पन्नानामपि दयामर्हन्ति। 'अवतंसयन्ति दयमानाः प्रमदाः शिरीषकुसुमानि' (**शाकुन्तलम्** १-४) इत्यभाणि कालिदासेनापि। सैव प्रकृतिः चतुर्थांके भाविशकुन्तलाविरहदुःखेन नितरां क्लिश्यते यथा—

उद्गलितदर्भकवला मृग्यः परित्यक्तनर्तना मयूराः।
अपसृतपाण्डुपत्रा मुञ्चन्त्यश्रूणीव लताः॥ (**शाकुन्तलम्** ४-१२)

इति पद्ये वर्णितक्रमेण। सैव प्रकृतिः वनस्पतिव्याजेन वर्तमाना पालितकन्यायै शकुन्तलायै वस्त्रभरणादिकं प्रयच्छति। (**शाकुन्तलम्** ४-५)। परभृतविरुतव्याजेन सैव प्रकृतिः शकुन्तलागमनमनुमनुते यथा—

अनुमतगमना शकुन्तला तरुभिरियं वनवासबन्धुभिः।
परभृतविरुतं कलं यथा प्रतिवचनीकृतमेभिरीदृशम्॥
(**शाकुन्तलम्** ४-१०)

इत्यत्र। एवमेवातीव सुनिपुणभावेन नाटकीयपात्ररूपेणाभिव्यज्यत इयं प्रकृतिः।

भारतीयव्यञ्जनातत्त्वानुकूलचिन्तनशीलेनांगलकविना व्यञ्जनातत्परेण कोलेरिज्महोदयेनापि क्रीष्टाबेल् (Christabel) नामके स्वकीये काव्यरत्ने तथैव मातृहीनायाः क्रीष्टाबेल्नामिकाया नायिकाया मातुरुपस्थितिं सूचयति। तथा हि कदाचिद् वाग्दत्ता क्रीष्टाबेल्नाम्नीयं भूस्वामिप्रवस्य दुहिता प्रोषितस्य स्वदयितस्य मंगलकामनार्थं मध्येरात्रं स्वभवनान्नातिदूरे

एकाकिनी महारण्यं प्रविश्य भगवन्तं प्रार्थयति। शवर्या मध्यमे यामे निर्जनं तत्स्थानं सर्वथा भयमेव जनयति प्रकामम्। तस्मिन्नेवावसरे काचनालौकिक-रूपलावण्यसम्पन्ना अवला सहसा तत्रागत्य ब्रवीति—'दुर्वृत्तैरपहृताहमत्र दुर्गमेऽरण्ये एकाकिनी विसर्जिता सदयं भवत्या एवाश्रयणीया' इति। क्रीष्टाबेल्नाम्नी सा कन्यापि तामादाय स्वभवनमन्दिरं प्रविशति। प्रवेश-मार्गे च बहिर्द्वारमेवैकदा इयं नवागता जिरेल्दाइन्-नाम्नी प्रमदा मूर्च्छति। तथापि कथं कथमपि मन्दिराभ्यन्तरं प्रविशति। तत्र मध्येरात्रं परिजनानां निर्भरप्रसुप्ततया अगत्या स्वशयनसंविभागमेव कर्तुं यावत्प्रवर्तते क्रीष्टाबेल् तावत्पुनरपि जिरेल्दाइन् असुस्थतां प्रकटयति। यावच्च क्रीष्टाबेल् निद्रा-परवशा सञ्जायते तावद् इयमज्ञातकुलशीला स्फुटास्फुटं भणति—

गच्छ गच्छ हि योषित् त्वं कालोऽयमस्ति वै मम।
मह्यमेव प्रदत्तोऽयं तदपेहि यथायथम्॥[1] इति।

एतावता इदमवगम्यते यदियमज्ञातकुलशीला जिरेल्दाइन् वस्तुतः काचन अभिचारिणी कुहकिनी क्रीष्टाबेल्नामिकायाः सरलहृदयाया अपकार-समीहया तामभिभवितुमिच्छति। किन्तु मृतायाः क्रीष्टाबेल्मातुरशरीरिणी सत्ता तद्भवन एव सदैव वर्तमाना दूरादेव स्वदुहितरमनवरतं परिरक्षति। तत एवेयं कुहकिनी पराभूता सती मूर्च्छति। क्रीष्टाबेल्हृदयमभिभवितुं न प्रभवति। अत एव क्रीष्टाबेल्मातुस्सत्तां संबोध्य भणति गच्छ गच्छेति। तदेवमस्मिन्नपि काव्ये प्रथमत एव साकारमप्रदर्श्यमानाऽपि क्रीष्टाबेल्माता स्वे महिम्नि प्रतिष्ठिता वर्तत इति बोधः सहृदयानां सञ्जायते। सा च शाकुन्तलप्रकृतिसाधारण्येनाभिव्यज्यमानस्वरूपा एवेत्यलं बहुना।

दृश्यकाव्येषु वास्तविकं तथा क्रियात्मकं प्रतीकम्

दृश्यकाव्येषु न केवलं वाङ्मात्रेणैव प्रतीकानां प्रयोगो भवति अपि तु प्रतीकभूतानां वस्तूनां तथा प्रतीकभूतानां क्रियाणामपि बाहुल्येन प्रयोग उपलभ्यते। स चायं प्रतीकप्रयोगः प्रायश एव आयरणिप्रख्यः। तद्यथा—

यात्येकतोऽस्तशिखरं पतिरोषधीना-
माविष्कृतोऽरुणपुरःसर एकतोऽर्कः।
तेजोद्वयस्य युगपद्व्यसनोदयाभ्यां
लोको नियम्यत इवात्मदशान्तरेषु॥ (**शाकुन्तलम्** ४–२)

---

1. "off, woman, off : this hour is mine—

× × × ×

off, woman, off : its given to me." (**Eight Poets, p. 282.**)

इति पद्येन वर्ण्यमानेन स्वाभाविकपरिस्थितिविशेषेण शकुन्तलाया भाविजीवनस्य क्रमागतौ व्यसनोदयौ संसूच्येते। किञ्च **शाकुन्तलस्य** चतुर्थांक एव सद्योहुताग्नेः प्रदक्षिणीकरणं शकुन्तलाया भाग्यचक्रस्यैव भाविपरिवर्तनमभिव्यनक्तीति संभावयितुं शक्यते। यथा वा **मृच्छकटिकायां** प्रवहणविपर्ययो नाम यः षष्ठोऽङ्कः सोऽपि वसन्तसेनाचारुदत्तयोर्जीवने महान् कोऽपि विपर्ययः समुत्पत्स्यत इति सूचयति। यथा वा मृच्छकटिकायामष्टमांके 'अले, शव्वं पि णश्शदु। पगालखण्डेण पवेशेहि पवहणम्।' इति शकारवचनोत्तरं चेटः प्राकारखण्डेनैव प्रवहणं प्रवेशयति। किन्तु सत्यामपि विनाशसम्भावनायां न किञ्चिदपि विनष्टम्। प्रवहणाभ्यन्तरे च वसन्तसेना प्रावर्तत। तदेवं प्राकारखण्डोत्तरणं वसन्तसेनाजीवनस्यैव उच्चावचभावं पिशुनयति।

इदन्तु अत्रावधेयम्। यद्यपि 'अवस्थानुकृतिर्नाट्यम्' (**दशरूपकम्**) इत्युक्तमस्ति तथापि खलु प्रतीकात्मकत्वेनैवैतदनुकरणं सम्भवति। किञ्च आलम्बनविभावभूतं समग्रमपि वस्तुजातं मूलतः प्रतीकरूपमेव भवितुमर्हति। तदेवं वस्तुतः प्रतीकात्मकमेव (सिम्बलिकेल्) नाटकं सम्भवति। वास्तविकं (रियेलिष्टिक्) नाटकन्तु नामत एव भवति। तथा हि वास्तविकनाटके उद्यानादीनामपि यथायथभावेनोपस्थापनं स्यात्। सप्तार्णवलंघनादीनां तथा गहनवनादीनां दर्शनीयत्वे तन्नैव सम्भवति। तेन च विशेषत उद्दीपनविभावरूपेण अथ च कथावस्तुनो याथार्थ्यख्यापनार्थमुद्यानहर्म्यादिकानां यत् प्रदर्शनमपेक्ष्यते तत्तु अंशतः सांकेतिकभावेनैव सम्भवति। एलिजाबेथ्कालीने च आंगलरंगमञ्चे वृक्षशाखामात्रेणैव समग्रस्यैव गहनवनस्य द्योतनमभवत्। न खलु वास्तववादिनां कृते तेन काचित् क्षतिः। अस्तु तावद् वृक्षशाखारूपप्रतीकेनैव वनस्य द्योतनम्। तथापि दर्शकानामियती कल्पनाशक्तिर्वर्तते यया तावदप्रदर्शितमपि प्रयोजनीयं वस्तुजातं तैः परिकल्प्यते। अस्ति तावदेतन्माहात्म्यं काव्यस्य नाटकस्य वा येन तत्पठनदर्शनयोः प्रारम्भत एव सामाजिकानां कल्पनाशक्तेः स्फुरणं भवति। अत्रापि पूर्वोक्तं—

> सद्भावश्चेद्विभावादेर्द्वयोरेकस्य वा भवेत्।
> झटित्यन्यसमाक्षेपे तदा दोषो न विद्यते॥
> (**सा. द.** ३–१६) इत्यादिकमेव मानम्।

एवं यथा विभावादीनां द्वाभ्यामेकेन वा तद्व्यतिरिक्तमपि अभिव्यज्यते तथैव कस्याश्चन अवस्थायाः प्रतीकमात्रेणापि समग्राऽप्यवस्थाऽभिव्यज्यते। एवञ्च वास्तवानुगनाटकेष्वपि व्यञ्जनाया एव प्राधान्यं सर्वत्र च व्यञ्जना-

मार्गेणैव नाटकस्य सौन्दर्यनिवार्हः ।[1] अत्रैव च कल्पनाशक्तेर्माहात्म्यं विस्पष्टमाविर्भवति । अत एव उदासीनेन सामाजिकेन न किञ्चिदपि सौन्दर्यं समधिगम्यते । प्रकृतिराज्येऽपि वस्तुजातस्यान्तर्निहितं सौन्दर्यं कल्पनाशक्ति-साहचर्येणैव स्फुरतीति इटालीदेशीयस्य क्रोचे महोदयस्यापि[2] मतम् । एतदनुरूपतया कोलेरिज्महोदयेनाप्युक्तमस्ति–'प्रकृतौ यावत् सौन्दर्यमस्माभिरुपाधीयते तावदेवास्माभिर्ग्रहीतुं शक्यते । अस्मासु जीवत्स्वेव प्रकृति-र्जीवति । अस्माभिः परिकल्प्यमानमेव तस्या विवाहाभरणं प्रावारकं वा अन्तिमं भवति ।' इति ।[3]

आधुनिकपाश्चात्यनाटकेषु प्रतीकात्मकत्वम्

पूर्वं वास्तविकप्रतीकस्य क्रियात्मकप्रतीकस्य चोल्लेखः कृतः । तत्र प्रतीकेन यत् प्रतीयमानं तदेवान्यथापि वाचा क्रियया वाऽभिधीयते कदाचित् । तत्र तावत्पर्यायोक्तन्यायः समुद्भाव्यः । यदुक्तं—'पर्यायोक्तं यदा भंग्या

---

1. "Elizabethan audience were actually 'seeing' forests and palaces on the most poorly equipped stage in the daylight, We have lost that power of seeing where there is no detail because mansions and mountains are shown to us ready-made on the stage. Aesthetic experience is an active condition wherein all our imaginative faculty should be at its fullest play in constructing what the artist meant us to eonstruct; it is not a process of passively receiving the sensations of whatever is given. The elements presented must be symbolic, The Elizabethan could accept the branch of a tree for a forest…" (S. L. Bhyrappa, **Truth and Beauty**, p. 10)
2. "Without the aid of imagination, nothing in nature is beautiful; and with its aid, according to our disposition, the same thing Is now expressive, now unmeaning, now expressive in one way, now in another, sad or joyful, sublime or ridiculous…" (Benedetto Croce, **Aesthetics**, 1901, Ainslie's Translation, quoted by Krishna Chaitanya, **Sanskrit Poetics**, p. 50)
3. "O Lady : we receive but what we give,
   And in our life alone does Nature live :
   Ours is her wedding garment, ours her shroud :"
   (S. T. Coleridge. Dejection : An ode, **Eight Poets.** p. 286)

गम्यमेवाभिधीमते ।' (**सा. द.** १०-६०) इति । प्रवहणस्य प्राकारखण्डोत्तरणेन वसन्तसेनाजीवनस्य उच्चावचभावो यथाभिव्यज्यते तथैवाभिनयेनाप्युत्तरत्र स एव विषयः साक्षात्प्रदर्शितः । अत एवात्र पर्यायोक्तन्यायोऽस्माभिस्सम्भाव्यते दूरतः । किञ्चाधुनिकपाश्चात्त्यनाठकेष्वपि वास्तविकप्रतीकानां बहुलप्रयोग उपलभ्यते । तादृशव्यवहारविषये च साम्प्रतम् आमेरिकादेशीयः टेन्नेसि विलियामस्महोदयो विशेषत उल्लेखमर्हति । तस्य हि प्रथमायां सफलतकृतौ **काचसंपुटरक्षयित्री**—(**दि ग्लास् मेनैजारी**) नामके नाटके तथाविधस्य प्रतीकस्य सफलः प्रयोगो विद्यते । तथा हि तत्र लौरानामिका कापि पंगुबालिका सजलकाचसंपुटके जलचरान् जीवान् पोषयति । तेषु जीवेषु एकतमस्यान्यवैलक्षण्येनैकं शृङ्गं परिलक्षितमासीत् । यथा इयं बालिकापि पंगुत्वेनान्यविलक्षणा । अथ यदा कदाचिद् अदृष्टकारणप्रभावेन तच्छृंगं व्यपगतं तदा तस्या अपि बालिकाया मनसि स्वाभाविकदेहलाभाशा समजनि । तामाशां प्रत्येतत् शृंगपतनं प्रतीकभूतमस्तीति तद्विदः[1] इति दिक् ।

नवीनकाव्येष्वभिव्यञ्जना

साम्प्रतं विशेषतो विंशशतिकायां प्रायशः सर्वेषु देशेषु सर्वासु च भाषासु इलियट्एम्प्सन्-मालार्मे-रिल्के-प्रमुखानां पाश्चात्त्यानां तथा भारतीयभाषासु बुद्धदेव-नवकान्तनगेन्द्र-प्रमुखानां यत्पद्यकाव्यजातं व्यञ्जनाप्रधानं प्रवर्तते तदेवात्र नवीनकाव्यमित्युच्यते । एते च कवयः काव्यगतमतवादानुसारं बहुष्वेव सम्प्रदायेषु विभज्यन्ते । ते च इमेज्वादि-सेटायार्वाद्यध्यात्मवादि-वामपथवादि-प्रतीकवाद्यतिवास्तववादिप्रभृतिभिर्नामभिर्ज्ञायन्ते । किन्तु तेषां वाग्व्यवहारेषु अर्थात् काव्यभाषासु अभिव्यञ्जकत्वं सर्वसाधारणं वर्तते । तदनुरोधेनैव तेषां कवीनां नवीनकविरिति सर्वसाधारणसमाख्या । तथा हि हिन्दीप्रगतिवादिकाव्यं मार्क्सीयदर्शनानुगं, हिन्दीप्रयोगवादिकाव्यञ्च फ्रेयेदीयमनोविश्लेषणानुगं भवति । तथापि छन्दोऽलंकारभाषादिविषये उभयो-

1. "In his first success, **The Glass Managerie,** Williams has shown how a cripple girl, Laura nurses the illusion of her own fragile childhood through a collection of little glass animals, one of which is different from the others by having a horn. When this horn is broken, she sees the symbol as her chance to live an ordinary life."
(Erederick Lumley, **Trend in 20th Century Drama**, Barrie & Rockliff, London, 1960, p. 195.)

रपि समाना गतिः ।[1] तदेवं यतोऽस्माकमभिव्यञ्जकत्वमेव विशेषतो लक्षणीयं तत एव नवीनकाव्य एवाभिव्यञ्जकत्वानुरोधेन तदुभयोरप्यन्तर्भूक्तिरिष्यतेऽस्माभिरित्यास्तां तावत् ।

दूरप्राच्यस्य चीनभाषीयकाव्ये तथा जापानदेशीयकाव्ये च मध्ययुगादेवारभ्य व्यञ्जनाप्रयोगस्य तथाविधं बाहुल्यमस्ति येन पाश्चात्त्यदेशीया अपि केचन नवीना व्यञ्जनाप्रयोगानुरागिणस्तत्तच्छायानुग्राहितयैव काव्यं विरचयन्ति । वाचाऽभिव्यञ्जनं नाम संवृत्याभिधानमर्थात् स्वल्पाक्षरभाषणम् । अत एव आंगलदेशीयानाम् इमेज्वादिनां (ख्रिः १६०८–१६१७) मते अत्यन्तसमासेनैव काव्यवाक्यं प्रयोक्तव्यम् । तत एव च इमेज्पदार्थस्य प्रयोगोऽपेक्ष्यते काव्ये । तर्हि किं नाम इमेज् इति चेदुच्यते। प्रधानेषु इमेज्वादिषु अन्यतमस्य एज्रा पाउण्ड्महोदयस्य मते 'यद्वस्तु क्षणमात्रेणैव मनसि बुद्धिविषयकं तथा भावाकुलं जटिलमवस्थाविशेषं जनयति तदेव इमेज् नाम ।'[2] अन्यतमस्य प्रधानस्य इमेज्वादिनः हार्वार्ट् रीड्महोदयस्य मते 'तदेव इमेज् नाम यद् वस्तुविशेषस्य साहाय्येनान्यतरमाविष्करोति । उभयोश्च साद्दश्येनाज्ञातमपि ज्ञातं भवति । किन्तु तत्साद्दश्यं सर्वथैव युक्तिसापेक्षं भवितुमर्हतीति नियमो नाभ्युपगम्यते ।'[3] वस्तुतस्तु अस्माकं मते इमेज्प्रयोगे सति अप्रस्तुतप्रसंसादिन्यायेन वस्तुध्वनिविशेष एव भवति । परन्तु एवंविधान्यपि इमेज्वादिनां कानिचन श्रेष्ठकाव्यानि जापानदेशीयटंककाव्यच्छायानुग्राहितया अथवा तद्देशीयहक्कुकाव्यच्छायानुग्राहितयैव विरचितानि सन्ति । अत्यन्तसमासेन रचितयोः श्लेषात्मकयोर्व्यञ्जनाप्रधानयोः टंकहक्कुकाव्ययोराद्ये एकत्रिंशन्मात्रास्तथा पञ्च पंक्तयो भवन्ति । द्वितीये च सप्तदशमात्रास्तथा तिस्रः पंक्तयः । बशोनामकेन कविप्रवरेण रचितमेकं हक्कुकाव्यमेवमनूद्यते—

---

१. खाण्डेलवाल, आधुनिक हिन्दी कविता में प्रेम और सौन्दर्य, पृ. ४४०–४४२.

2. "...that which presents an intellectual and emotional complex in an instant of time," (Geoffrey Bullough, **The Trend of Modern Poetry.** Oliver and Boyd, 1949)

3. "The Image discovers one thing with the help of another, and by their resemblance makes the unknown known. But it is not a logical resemblance." (John Press, **The Chequer'd Shade, P. 72.**)

एकं जीर्णं पल्वलं
शब्दश्चैकस्य भेकस्य लम्फनस्य
तस्मिन् जले ॥

अस्मिन् मुक्तकादपि क्षुद्रतरे काव्ये अर्थत्रयं सम्भवति । प्रथमतः वस्तुमात्रस्य यथायथं वर्णनम् । द्वितीयतश्च तत एव लब्धो **बीभत्सादि**भावसमालिंगितो **दैन्य**भावविशेषः । तृतीयतश्च काचन आध्यात्मिकी रूपकात्मिका कथा । मूलभाषायां सर्वेऽप्यर्थाः श्लेषानुगृहीततयाभिव्यज्यन्ते । आंगलानुवादे श्लेषाभावेनार्थबाहुल्यं न तथाऽविर्भवति ।[1] तत एव संस्कृतभाषायामनूदिते तु अस्माकं गत्यन्तरमेव नास्तीति एतावान् एवास्माकं विभवः ।

अभिधानाद् अभिव्यञ्जनं प्रति

मार्गारेट् गिलमेन्महोदयाया **दि आइडिया अब् पोयेट्रि इन् फ्रान्स्**—ग्रन्थे 'फ्रम् ष्टेट्मेन्ट् तु साजेशन्' (अभिधानाद् अभिव्यञ्जनं प्रति) इत्याख्यः परिच्छेदविशेषो वर्तते । तत्रैतत् प्रदर्श्यते यत् काव्येषु व्यंग्यार्थस्य सद्भावः पुराकालेऽप्यभवत् किन्तु इच्छापूर्वकभावेन व्यञ्जकत्वस्य प्रयोगः फ्रान्स्-देशीयकाव्ये प्रायः उनविंशशतकमध्यभागादेव प्रादुर्बभूव । एतदपि तत्र प्रदर्शितं यत् काव्यगतस्याभिव्यञ्जकत्वस्य विश्लेषणे कृते सति तत्र प्रतीकात्मकत्वमेव बाहुल्येन परिचीयत इति । एवंक्रमेण व्यञ्जनामार्गस्य समीक्षा प्रतीकप्रक्रियासमीक्षायामेव नियमेन पर्यवस्येत् । एतदेव विस्पष्टयितुं तद्ग्रन्थादेव कियानंशोऽत्रानूद्य समुपस्थाप्यते । तथा हि—

---

1. "Some of the best imagist poems were modelled upon the Japaness **Tanka** or the **hokku**. The **Tanka** consists of 31 syllables in 5 lines and the **hokku** had 17 syllables in 3 lines. One famous **hokku** written by Basho is literally translated as :
"An old pond
And the sound of a frog leaping
In to the water. "
The poem has three manings, firstly a statement of fact, secon dly an emotion deduced fron it and thirdly a sort of spiritual allegory. The Japanese original could have the suggested meanings from the few words because of a sort of serious punning.
For want of the advantage of pun the English counterpart could, however, be less densely suggestive." (Geoffrey Bullough, **The Trend of Modern Poetry**, p. 84.)

"उनविंशशतिकाया मध्यभागे अभिधानाद् अभिव्यञ्जनं प्रति परिवर्तनं विस्पष्टमासीत् । तत्तु आधुनिकसमालोचकैः भूयोभूयः परिलक्षितम् । खिस्तीय १८६६ वर्षे सेन्ट् बूव्महोदयेनैतत् परिवर्तनं परिलक्ष्य यदुक्तं तदत्रोद्धृतिमर्हति ।—

.....'पुराकाले क्लासिकेल् इति व्यपदिष्टे युगे स एव श्रेष्ठकविरूपेण परिगणित आसीत् यस्य काव्यं निर्दोषतमं सुन्दरतमं विस्पष्टतमं शोभनतमं तथा सर्वथा सर्वांगसुन्दरम् । तद् यथा **एनिद्**काव्यं **जेरुसालेम्-देलिभार्ड्** इत्याख्यं वियोगात्मकं काव्यं वा । अद्यास्माभिः किञ्चिद् विलक्षणमेवाभिलष्यते । अस्माकं कृते स एव श्रेष्ठः कविर्यस्य काव्यं सहृदयाय कल्पनार्थं पर्याप्तं स्थानं वितरति अथवा स्वप्नविषयत्वेन यथेष्टं वस्तु प्रयच्छति अपि च सहृदयमेव भावावेशसमारोपणेन कविरूपेण परिणमयति । यस्य काव्यं सर्वथाऽलंकारादिभिः शोभितं स एव श्रेष्ठः कविर्न भवति किन्तु अपर एव कोऽपि भवति यस्य काव्यं बहुतरमभिव्यनक्ति, झटित्येव यस्य समग्रमपि तात्पर्यं नावसाययितुं शक्यते, यस्तावत् सहृदयं नितरां परिप्रश्ने व्याख्याने अध्ययने तथा परिकल्पने नियोजयति[1] ।"

---

1. "Towards the middle of the century a change began to be apparent, which has been pointed out again and again by modern critics. Sainte-Beuve noted it in 1866, in a passage to which I have referred earlier, and which deserves to be quoted in full here .

.....Formerly, during the so called classical Period, the best poet was considered to be the one who had cnmposed the most perfect work, the poem that was the most beautiful, the most clear, the most pleasant to read, the most finished in every way, the **Aeneid**, the **Jerusalem Delivered**, a great tragedy, Today we want something different. For us the greattest poet is the one who in his work has given the reader the most to imagine and to dream about, who has most moved him to be himself a poet. The greatest poet is not the one whose work is the most accomplishcd : he is the one who suggests the most, with whom at first one does not grasp entirely all that he has meant to say and express, and who leaves one much to ask, to explain, to study, much for one to finish....."
(Margaret Gilman, **The Idea of Poetry in France**· P. 200)

किञ्च 'यदस्पष्टं यत्संवृत्याभिहितं यच्च कठिनं तदेव कियताचन महत्त्वेन संयोजितं सदभिमततमं भवति ।'[1] इति सेन्ट् बूव्महोदयेनैवाभिहितम् । अत्र मार्गारेट् गिलमेन्महोदयायाः किञ्चिन्मन्तव्यमपि प्रणिधानमर्हति । यदुक्तम्—" 'कल्पनम्' (इमाजिन्), 'स्वप्नः' (द्रिम्), 'अस्पष्टम्' (भेग्), 'संवृतम्' (अब्स्कियर्), 'कठिनम्' (दिफिकाल्ट्), तथा विशेषतः 'अभिव्यञ्जनम्' (साजेष्ट्) इत्येवंरूपाणि 'सिम्बलिष्ट्तत्त्वे' (प्रतीकतत्त्वे) वारंवारं प्रयुक्तान्येव पदानि अत्रापि (सेन्ट्बूव्महोदयस्य वचने) उपलभ्यन्ते । यतो हि यथा मम प्रतिभाति तथाक्रमेण शतिकाया मध्यभागे यन्महत् काव्यीयपरिवर्तनं प्रादुरभूत् तत्तावत् वाचककाव्यस्य व्यञ्जककाव्यरूपेण परिणाम इत्येव वक्तुं युज्यते समासेन । किन्त्वेतत् परिवर्तनं सेन्ट्बूव्प्रदर्शितदिशा अतीवविस्पष्टं नासीत् । यतो हि सर्वमपि महत्काव्यं तथा सर्वमपि शोभनं काव्यं कियताचित्परिमाणेनाभिव्यञ्जकं भवत्येवास्मिन्नर्थे यदेतद् वाच्यादर्थान्नियमेनैव किञ्चिदधिकतरमाभिव्यनक्ति ।[2]"

काव्यस्याभिव्यञ्जकत्वस्य स्वीकरणान्नियमेनैव प्रतीकात्मकत्वमपि उररीकृतमासीत् । तद्विषयकश्च प्रतीकवादो न केवलं वास्तविकप्रतीकानां व्यवहारमेवाकलयति किन्तु किञ्चिदाध्यात्मिकमपि तत्त्वमभिव्याप्नोति । तथा हि—

'प्रतीकवादी कविः स्वकीयप्रतिभाबलेन प्रकृतावन्तर्निहितमलौकिकं तत्त्वजातमनुभवति । प्रतिभावशत एव भाषाकौशलं तथा प्रतीकतत्त्वं

---

1. "The vague, the obscure, the difficult, if they are combined with some greatness, are what it prefers."
(Sainte-Bauve, quoted by Margaret Gilman, **The Idea of Poetry in France**, p. 201.)

2. "Here are the words which were to recur so often in symbolist theory : 'imagine', 'dream', 'vague', 'obscure', difficult', and above all 'suggest, . For it seems to me that the great poetic change which took place about the middle of the century can be summed up as a passage from a poetry of statement to a poetry of suggestion. The change is not so clear-cut, to be sure, as Sainte-Beuve's passage implies. Surely all great poetry, even all good poetry, is to some extent suggestive, in the sense that it implies more than the literal and prosaic meaning of the words."
(Margaret Gilman, **The Idea of Poetry in France**, P. 201.)

जानाति। परिदृश्यमाने जगति ईश्वरो यथा शब्दालोकरूपादिभिर्व्याहरति तथैवायं कविः रूपकल्पैः (इमेज्) स्वकीयामनुभूतिं प्रकाशयति।"[1] एवं-क्रमेणैवाभिव्यञ्जनातत्त्वं प्रतीकतत्त्वेन स्वभावत एव संपृक्तमस्ति।

प्रतीकस्य तावद् भाषिक—वास्तविकभेदेन द्वैविध्यमस्ति। भाषायामपि वर्ण्यमानो वस्तुविशेष एव प्रतीकम्। तद् यथा अप्रस्तुतप्रशंसायामप्रस्तुतं वाच्यार्थरूपेणोपस्थापितमप्राकरणिकं वस्तु प्रस्तुतस्य व्यङ्ग्यार्थरूपेणाक्षिप्तस्य प्राकरणिकस्य वस्तुनः प्रतीकम्। एवमेव तत्र वस्तुविशेषो वस्त्वन्तरस्य प्रतीकं भवति। किन्तु प्रतीकतत्त्वमेवाभिव्यञ्जनातत्त्वसाधारण्येन रसाद्यभिव्यक्तिमपि क्रीडोकरोतीति हेतोः प्रतीकतत्त्वसमीक्षायां नियमेनैव रसादिस्वरूपपरीक्षणादिकमपि समायाति। वास्तविकप्रतीकस्य व्यवहारस्तु उपासनादिष्वप्युपलभ्यते। स च वास्तविकप्रतीकव्यवहार आपाततः काव्यगतप्रतीकतत्त्वाद् विशकलित एव वर्तते। **किन्तु वस्तुतो भाषिकप्रतीकवास्तविकप्रतीकयोरस्त्येव कश्चन मौलिकः सम्बन्धः। किञ्च एकमेवोपजीव्यभूतं मूलं दर्शनं काव्यगतभाषिकप्रतीकव्यवहारस्तथा उपासनादिगतवास्तविकप्रतीकप्रयोग इत्युभावप्यभिव्याप्य वर्तत इत्येतदेवोत्तरदर्शनेषु** सामग्रिकभावेन प्रतीकतत्त्वविशेषस्थापनहेवाकेनास्माभिः प्रतिपादयिष्यत इत्यलं पल्लवितेन।

---

1. "The relationship comes out clearly in a passage from La Morvonnais : 'The power of the Poet will be then, to my mind, an intimate power of spiritual communion which the invisible powers of nature, and his knowledge of the art of language, the knowledge of **symbolism**, the art of clothing his feelings in images, of speaking, as God speaks in the visible universe, by means of sound. light, and form."
(Margaret Gilman, **The Idea of Poetry in France**, p. 219.)

चतुर्थं दर्शनम्

भारतीयप्रतीकवादस्य ऐतिह्यम्

परब्रह्मतत्त्वस्य प्रतीकेन प्रकाशनम्

सिंहस्था शशिशेखरा मरकतप्रख्या चतुर्भिर्भुजैः
शंखं चक्रधनुः शराँश्च दधती नेत्रैस्त्रिभिः शोभिता।
आमुक्तांगदहारकंकणरणत् काञ्चीक्वणन्नूपुरा
दुर्गा दुर्गतिहारिणी भवतु नो रत्नोल्लसत्कुण्डला ॥ इति

स्तवकवचमालायां[1] प्रदत्तः श्रीदुर्गाया ध्यानमन्त्रः। अत्र वर्ण्यमाना देवी साकारा सगुणा च। तस्या वाहनमस्ति, आयुधमप्यस्ति। सा खल्वलंकारेणापि भूषिता। किन्तु यथार्थत इयं देवी निराकारा निर्गुणा च। सैव परमा शक्तिः परा शक्तिरेव तावद् ब्रह्मतत्त्वम्। अस्माभिस्तु सदैव विभिन्नशक्तीनां क्रियाप्रतिक्रिये अवलोक्येते। किन्तु शक्तिस्तु स्वयमलोकयितुं न पार्यते। शक्तेर्नास्ति किञ्चिद्रूपमित्यत एव नावलोक्यते। यदुक्तं 'गृह्णाति चक्षुः सम्बन्धादालोकोद्भूतरूपयो' रिति (**भाषापरिच्छेदे** प्रत्यक्षखण्डे)। तथा हि वह्नेर्दाहिका शक्तिः नास्माभिरवलोकयितुं शक्यते। किन्तु तत्कार्यं दहनन्तु अवलोक्यत एव। परन्तु इयमपि अवलोकनायोग्या दाहिकाशक्तिः पराशक्तेर्ब्रह्मतत्त्वादभिन्नरूपा। आधुनिकविज्ञानशास्त्रमतेनापि सर्वाः शक्तयो मूलत एकरूपाः। तस्मादेका एव शक्तिर्विभिन्नशक्तिरूपेण परिणमयितुमपि शक्यते। देवीरूपेण पूजितेयं शक्तिरथवा ब्रह्मतत्त्वमनादि अनन्तश्च। विज्ञानशास्त्रमतेनापि शक्तिर्न शेषमेति। केवलं कमपि परिणाममेव भजते। शक्तेः क्षयस्तु न कदाचिद्भवति। नैयायिकानां मते शक्तिरेव कारणत्वम्।[2] परब्रह्म अथवा परा शक्तिरेव समग्रस्य जगत्प्रपञ्चस्य मूलकारणम्। वेदान्तदर्शनेन प्रतिपादितस्य 'ब्रह्म सत्यं जगन्मिथ्ये'ति वचनस्यायमाशयः। घटपटादिरूपेण यानि वस्तूनि दृश्यन्ते तानि वस्तुतोऽसत्य-

---

१. श्रीकालीप्रसन्नदेवशर्मणा सम्पादिता। पञ्चमं संस्करणम्। वंगीय–१३३२–वर्षे मुद्रिता। पृ. ६४६.

२. 'नहि नो दर्शने शक्तिपदार्थ एव नास्ति। कोऽसौ तर्हि ? कारणत्वम्' इति **न्यायकुसुमाञ्जलौ** (१-१३) उदयनाचार्यः।

रूपाणि। तेषु विनिहितं सत्यवस्तु शक्तिरेव। यः कोऽपि घटः शक्तेरेव परिणामः। शक्तेरेव कार्यम्। घटस्तु घटरूपेण सर्वदा नासीत् न चापि तथैव सर्वदा स्थास्यति। किन्तु यस्याः शक्तेः परिणामरूपेणायं घटो भवति सा तु नित्या क्षयरहिता एव। आधुनिकविज्ञानेनाप्येतदेवाभिहितम्। वेदान्तेन च पुनरप्युक्तं–'सर्वं खल्विदं ब्रह्म' इति। अर्थात् समग्र एव जगत्प्रपञ्चः ब्रह्ममयः अथवा शक्त्यात्मक इति। आधुनिकविज्ञानेनापि एतत्तत्त्वं प्रदर्शितम्। घटे विनष्टे सति असंख्याः परमाणव उपलभ्यन्ते। परमाणौ विश्लिष्टे सति वैद्युतिकविन्दुविशेषाणामेव समष्टिरयमिति परिलक्ष्यते। परमाणौ तावद् इलेक्ट्रन्–प्रटन्–पजिट्रन्–इत्येवमादिनामधारिणः चलमानविन्दुविशेषा एव वर्तन्ते न तु तदतिरिक्तं किञ्चित्। अथवा वस्तुविशेषस्य यद्रूपं दृश्यते तदपि आलोकतरंगविशेषैरेवानीयते। तद्वस्तुतः प्रतिफलिता आलोकतरंगा एव रूपत्वेन गृह्यन्ते न तु परमार्थतः रूपमस्ति किञ्चित्। आलोकस्तु शक्तिविशेषः। तस्माद् यदा घटं पश्यामीति बोधो जायते तदा वस्तुतः शक्तेरेवावस्थाविशेषं पश्यामि। एवमेव विश्लेषणे कृते समग्र एव जगत्प्रपञ्चः शक्तिमय एवेति अवितथं तथ्यमाविर्भवति। अस्या एव पराशक्तेराद्याशक्तेर्ब्रह्मतत्त्वस्य वा भक्तो देवीरूपेण साकाररूपेण मातृरूपेण चाराधनं करोति। तस्या एव निर्गुणनिराकारशक्तेः प्रतिमाकल्पनेन आह—'दुर्गा दुर्गतिहारिणी भवतु नो रत्नोल्लसत्कुण्डला' इति।

प्रतीकोपासनाया उपयोगित्वम्

पूर्वप्रतिपादितेन ब्रह्मतत्त्वेन जीवस्य सायुज्यलाभ एव मोक्षः। स च जीवानां परमपुरुषार्थः। भगवल्लाभार्थमेव तावद् भक्तः सभक्तिकं प्रतीकोपासनां करोति। तत्रायं प्रश्नः समुदेति। ननु 'तस्माद् गीतासु केवलादेव तत्त्वज्ञानान्मोक्षप्राप्तिः न कर्मसमुच्चितादिति निश्चितः अर्थः' (**गीतायां शांकरभाष्ये** द्वितीयाध्याये) इत्यादिवचनानुरोधेन तत्त्वज्ञानादेव यदि ब्रह्मलाभः स्यात् तर्हि कुतस्तत्र प्रतीकोपासनाया अवकाश उपयोगित्वं वा इति। तत्रोच्यते। बुद्धिगम्यस्यापि ज्ञानस्य पूर्णतासम्पादनार्थं पश्चात् तस्याचरणार्थं तथा कार्ये तस्य फलद्रूपतासम्पादनार्थं तज्ज्ञानं सदैव श्रद्धादयावात्सल्यप्रेमप्रभृतिभिर्नैसर्गिकमनोवृत्तिभिः सम्बद्धं स्यात्। प्रेमश्रद्धादिमनोवृत्तिसंस्पर्शव्यतिरेकेण न कदापि बुद्धिगम्यं ज्ञानं कञ्चिदपि समुद्धरति। सूर्यः सद्रैव समुदेति। अत एव श्वोऽपि सूर्यः समुदेष्यतीति ज्ञानं यद्यप्यनुमानलभ्यमित्युच्यते तथापि तज्ज्ञानं निरतिशयविश्वासविशेषसापेक्षमिति न केनाप्यपह्नोतुं शक्यते। स च विश्वासविशेष एव श्रद्धा इत्यपि वक्तुं युज्यते। तदेवं

ज्ञानादपि श्रद्धा नाम मनोवृत्तिर्गरीयसी। श्रद्धाप्रेमादिसाहचर्येण साधारणमपि ज्ञानं महत्तरं गौरवं समश्नुते। तद्यथा मम माता नैयायिकस्य मते—'गर्भधारणप्रसवादिस्त्रीत्वसामान्यावच्छेदकावच्छिन्नव्यक्तिविशेषः'। तत्रैतन्नैयायिकज्ञानं श्रद्धादिसंस्पर्शरहितम्। तदितरजनस्य कृतेऽपि सा साधारणस्त्रीविशेष एव। मम कृते तु सा एव देवतावद् वन्दनीया पूजनीया च। एतच्च मदीयं ज्ञानं श्रद्धास्नेहादिसापेक्षमिति तस्य वैलक्षण्यं परिलक्ष्यताम्।[1] तदेवं ब्रह्मतत्त्वलाभार्थं ज्ञानादपि श्रद्धाप्रेमादिसुकुमारवृत्तीनामधिकतरमुपयोगित्वमस्तीति मन्तव्यम्। किञ्च 'निर्गुणं ब्रह्म' इत्यनेनैव केवलेन शुष्कज्ञानेन न कस्यापि ब्रह्मसायुज्यलाभः भवितुमर्हति। किन्तु वस्तुतः तज्ज्ञानवतोऽपि दीर्घेण अभ्यासेन नित्यसाधनेन च तज्ज्ञानं हृद्गतमिन्द्रियेषु प्रविष्टं भवितुमर्हति। आचरणैरपि भक्तस्य सर्वदेहव्यापिनी ब्रह्मात्मैक्यबुद्धिस्समुदियात्। एतदर्थञ्च परमेश्वरस्वरूपस्य प्रीतिपूर्वकचिन्तनेन मनसस्तदाकारेण परिणमनमेव सुलभतमो मार्गः। अयमेव मार्गः सगुणव्यक्तोपासनामार्गः अथवा भक्तिमार्ग इत्युच्यते। यदुक्तं—'सा (भक्तिः) परानुरक्तिरीश्वरे' इति। (**शाण्डिल्यसूत्रम्-२**)। तदेवं यद्यप्युक्तमस्ति—'ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापर' इति तथापि समायातः खलु ब्रह्मजीवयोः कश्चन भेदः। उपनिषदि वर्णितं यदिन्द्रियातीतमव्यक्तमनन्तं निर्गुणमेकमेवाद्वितीयं ब्रह्म तदुपासनास्थानं भवितुं न शक्नोति। तस्मिन् परब्रह्मणि लब्धे सति उपास्योपासकयोर्भेद एव नावशिष्यते। किन्तु यावद्भक्तिः प्रगल्भते तावदुपास्योपासकयोः **कश्चन** भेदोऽवश्यमेव स्यात्। उपासनार्थं यद्ब्रह्म परिकल्प्यते तन्निर्गुणब्रह्मणः किञ्चिद् विलक्षणम्। तत्तु ब्रह्म सगुणत्वेन मनसो गोचरी भवति। तस्माद् उपनिषदि यत्र यत्र ब्रह्मोपासना निर्दिश्यते तत्र तत्रैवोपास्यं ब्रह्म अव्यक्तं सदपि सगुणत्वेनैव वर्णितमस्ति। तद्यथा **छान्दोग्योपनिषदि** (३-१४) तदेव ब्रह्म प्राणशरीरं, सत्यसंकल्पं सर्वगन्धं, सर्वरसं, सर्वकर्म तथा मनोगोचरैः सर्वैरपि गुणैर्युक्तमित्युच्यते। किन्तु तदुपास्यं ब्रह्म सगुणं सदपि अव्यक्तमेव निराकारमेव। किन्तु नेत्रादीन्द्रियागोचरे वस्तुनि प्रेमस्थापनं मनुजानां कृते नितरां कष्टकरमस्ति। तस्माद्भक्तानां सौकर्यार्थमेव निर्गुणस्याव्यक्तस्य ब्रह्मणोऽपि किञ्चित् सगुणं व्यक्तं रूपं कल्पनीयमस्ति।[2] अत्रैको दृष्टान्तः

---

१. तिलकस्य **गीतारहस्ये** (बंगीये) पृ. ४१३-४१४.

२. अस्मिन् विषये स्वामिकियानन्दनामा आमेरीकादेशजन्मा योगिप्रवरो यदाह तत्प्रणिधानमर्हति। यदाह—"The difficulty most people face in religion is that they simply cannot visualise an abstraction. Yet if we do'nt visualise Him at all, how can we love Him?

परामृश्यताम्। भूमितिशास्त्रे कदाचित् काचन अनन्ता रेखा परिकल्प्यते। सा रेखा विस्तृतिहीना अपरिसीमा चेति कृत्वा अव्यक्तरूपा किन्तु दैर्घ्यगुण-युक्तत्वात् सगुणा। सा एव रेखा यदा फलके अंकनीया भवति तदा अपरि-सीमापि विस्तृतिरहितापि ह्रस्वरूपेण तथा लघुतरविस्तृतियुक्तत्वेनांकन-मर्हति। तदेवम् अव्यक्तायाः सगुणाया एव फलके व्यक्तं रूपं प्रकटितमस्ति।[1] एवमेव भक्तानामुपासनासौकर्यार्थं प्रथमतो ब्रह्मणः सगुणरूपं तदनन्तरञ्च सगुणं व्यक्तञ्च रूपं परिकल्प्यते। यदुक्तं **भगवद्गीतायाम्**—

क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम्।
अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते॥ (१२-५) इति।

इदन्त्वत्रावधेयम्। सगुणस्याव्यक्तरूपस्य ब्रह्मण उपासना केवलमुपासना अथवा ज्ञानमार्ग इत्युच्यते। सगुणस्य व्यक्तरूपस्य तूपासना भक्तिमार्ग इत्युच्यते। तदेवमुपनिषदि यत्रोपासना उपदिश्यते तत्र न केवलं प्राणमनः-प्रभृतीनि सगुणरूपाण्येव परामृष्टानि अपितु सूर्यान्नप्रभृतीनि सगुणव्यक्त-रूपाण्यपि उपासनार्थं निर्दिष्टानि सन्ति।[2] **भगवद्गीतायामपि**—दशमा-ध्याये—

अक्षराणामकारोऽस्मि द्वन्द्वः सामासिकस्य च।
अहमेवाक्षयः कालो धाताहं विश्वतोमुखः॥ (१०-३३)

इत्यादिभिः श्लोकैर्भगवतः कानिचन व्यक्तरूपाण्युदाह्रियन्ते। तदेवं सूर्यान्नप्रभृतीनि यानि नामरूपात्मकानि वस्तूनि **उपास्यपरब्रह्मणः चिह्न-**

How can we begin to worship Him ? Fortunately for man. an exact mental picture of what God is like is not a pre-requisite of the spiritual life. In whatever way we worship the Lord, certain it is that as we approach Him, He will Himself be able to enlighten us as to His true nature. Images are helpful because one must start with something. Forms help to focus the mind in prayer. Westerners should understand this distinction between primitive idolatry and the use of the **symbols** as stimuli to divine devotions."

(Idol worship ; **Bhavan's Journal**, August 1963.)

१. तिलकस्य **गीतारहस्ये** (वंगीये) पृ० ४१७.

२. तै. उ. ३, २-६, **छान्दोग्य** ७.
"स योऽन्नं ब्रह्मेत्युपास्तेऽन्नवतो वै स लोकान् पानवतोऽभिसिद्धचति याव-दन्नस्य गतं तत्रास्य यथा कामचारो भवति योऽन्नं ब्रह्म इत्युपास्ते···"
(**छान्दोग्योपनिषद्** ७. ९. २)

परिचय-अवतार-प्रतिनिधिप्रभृतिभीरुपैरुपयुज्यन्ते तान्येव वेदान्तशास्त्रे प्रतीकपदेन व्यवह्रियन्ते। प्रतिपूर्वकादिनैरेतत् **प्रतीकपदं निष्पन्नमस्ति। प्रति आत्मानं प्रति इकः समायातः प्रतीकम्।** अर्थान्महत्तरवस्तुनो योंऽशः प्रथमतोऽस्मान् प्रति आत्मानमुन्मोचयति स एव तद्वस्तुनः प्रतीकम् इति भावः। परब्रह्मणः प्रतीकभूतं वस्तु परब्रह्म अभिव्यनक्ति। तदेवं ब्रह्मणो यदेव रूपं परिकल्प्य शब्दचित्रपुस्तकर्मादिषु प्रकाश्यते तदेव तस्य प्रतीकं भवति। किञ्च मृन्मयी मूर्तिस्तथा शालग्रामस्तथा तुलशीशाखा इत्येवमादिषु येषु वस्तुषु भगवद्बुद्ध्या भक्तिस्स्थाप्यते तानि सर्वाण्येव प्रतीकभूतानि सन्तीति मन्तव्यम्। तेषां चेन्द्रियगोचरत्वात् तथा सहजलभ्यत्वात्तेषु भक्तानां भक्तिस्थापनमनायाससिद्धमस्तीत्यास्तां तावत्।

ब्रह्मणः सर्वव्यापकत्वे प्रतीकोपासनाया युक्तियुक्तता

'सर्वं खल्विदं ब्रह्म' इत्यादिवचनानुसारं जगति परिदृश्यमानं समग्रमपि पदार्थजातं परब्रह्मण एव प्रतीकभूतमस्ति। किञ्च **गीतायामपि** दशमाध्याये भगवता उक्तमस्ति—

यद् यद् विभूतिमत् सत्त्वं श्रीमदुर्जितमेव वा।
तत्तदेवावगच्छ त्वं मम तेजोंऽशसम्भवम्॥ (१०-४१) इति।

किञ्च—तदेजति तन्नैजति तद्दूरे तद्वन्तिके।
तदन्तरस्य सर्वस्य तदु सर्वस्यास्य वाह्यतः॥(**ईशोपनिषद्**-५)
तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च।
अमृतं चैव मृत्युश्च सदसच्चाहमर्जुन। (**गीता.** ९-१९)
सर्गाणामादिरन्तश्च मध्यं चैवाहमर्जुन॥
अध्यात्मविद्या विद्यानां वादः प्रवदतामहम्॥ (**गीता.** १०-३२)

इत्यादिवचनानुसारं सदसदादिभेदेन सर्वमेव पदार्थजातमभिव्याप्यैव वर्तते ब्रह्मतत्त्वम्। किं बहुना सर्वाण्यपि भूतानि तद्ब्रह्मतत्त्वतोऽभिन्नरूपाण्येव। यदुक्तम्—

यस्तु सर्वाणि भूतानि आत्मन्येवानुपश्यति।
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते॥ (**ईशोपनिषद्**-६) इति।

सति चैवं भगवतः प्रतीकभूते कस्मिंश्चन विशेष एव वस्तुनि कथं भगवत्तत्त्वं परिचीयते उपास्यते च भक्तैः। ननु भक्तानां सर्वत्रैव भगवद्बुद्धिर्भवतु सर्वत्रैव च श्रद्धा प्रवर्ततां नाम इति शंकायामुच्यते—यस्य तावद्भक्तस्य मनसि भगवतः सर्वव्यापकरूपस्योपलब्धिर्न जाता स भगवतोंऽशभूतेषु यत्किञ्चिदेव वस्तु प्रतीकरूपेणावलम्ब्य तत्रैव भगवद्बुद्धिं कृत्वा भगवन्त-

माराधयतु नाम। तत्र न काचन हानिः। किञ्च श्रीश्रीजीवगोस्वामिनः **श्रीभक्तिसन्दर्भेऽपि** अयं प्रश्न आशंक्य तथैव समाधीयते। तत एवात्र प्रासंगिको ग्रन्थविशेषो यथायथमनूद्यते यथा—

"तदेवमीश्वरज्ञानाभावाद् भक्तावश्रद्दधानस्य दोष उक्तः। अथ तच्छ्रद्धाहेतुतज्ज्ञानस्य स्वधर्मसंयुक्तं तदर्चनमेव कारणमुपदिशन् तादृशार्चनस्याप्यव्यर्थतामंगीकरोति—

अर्चादावर्चयेत्तावदीश्वरं मां स्वकर्मकृत्।
यावन्न वेद स्वहृदि सर्वभूतेष्ववस्थितम् ॥(**भागवतम्** ३-२९-२५)

तावदेव स्वकर्मकृत् सन् अर्चादावर्चयेद् यावत् सर्वभूतेष्ववस्थितमीश्वरं मां न वेद न जानाति। अत्र स्वकर्मसहायत्वमजातश्रद्धस्य शुद्धभक्तावनधिकारात् तत् प्रतिपादयिष्यते—'जातश्रद्धो मत्कथासु' (**भागवतम्**. ११-२०-२७) इत्यादिना। अतो भगवज्ज्ञानादूर्ध्वं जातश्रद्धस्तु स्वकर्मकृत् सन् नार्चयेत् किन्तु शुद्धमर्चादिकमेव कुर्वीतेत्यायातम्। तच्च प्रतिपादयिष्यते—'तावत् कर्माणि कुर्वीत' (**भा**. ११-२०-९) इत्यादिना नत्वर्चां परित्यजेदित्यर्थः—

प्रतिष्ठितार्चा न त्याज्या यावज्जीवं समर्चयेत्।
वरं प्राणपरित्यागः शिरसो वापि कर्तनम् ॥

इति **ह्यशीर्षपञ्चरात्रविरोधात्**।[1]

सर्वभूतेषु यः पश्येद्भगवद्भावमात्मनः।
भूतानि भगवत्यात्मन्येष भागवतोत्तमः ॥

(**भा**. ११-२-४४)

इत्युपदेशस्तु परमसिद्धानामेव कृते इति तत्रैव स्पष्टम्।[2] भागवत एव तृतीयस्कन्धस्य ऊनत्रिंशाध्याये—

अथ मां सर्वभूतेषु भूतात्मानं कृतालयम्।
अर्हयेद्दानमानाभ्यां मैत्राभिन्नेन चक्षुषा ॥

(३-२९-२७) इत्येतदनन्तरमेव

जीवाः श्रेष्ठा ह्यजीवानां ततः प्राणभृतः शुभे।
ततः सचित्ताः प्रवरास्ततश्चेन्द्रियवृत्तयः ॥

---

१. **श्रीभक्तिसन्दर्भः** (कलिकाताविश्वविद्यालयीयं संस्करणम्), १९६२; पृ० १४३-१४४

२. यदुक्तम्—"तत्र परमसिद्धानाञ्च 'सर्वभूतेषु यः पश्येद्भगवद्भावमात्मनः' इत्याद्यनुसारेण सिद्ध एव सः।" इति। (**श्रीभक्तिसन्दर्भः**, पृ० १४८)

तत्रापि स्पर्शवेदिभ्यः प्रवरा रसवेदिनः ।
तेभ्यो गन्धविदः श्रेष्ठास्ततः शब्दविदो वराः ॥
रूपभेदविदस्तत्र ततश्चोभयतो दतः ।
तेषां बहुपदाः श्रेष्ठाश्चतुष्पादस्ततो द्विपात् ॥
ततो वर्णाश्च चत्वारस्तेषां ब्राह्मण उत्तमः ।
ब्राह्मणेष्वपि वेदज्ञो ह्यर्थज्ञोऽभ्यधिकस्ततः ॥
अर्थज्ञात् संशयच्छेत्ता ततः श्रेयान् स्वधर्मकृत् ।
मुक्तसंगस्ततो भूयान्नदोग्धा धर्ममात्मनः ॥
तस्मान्मय्यर्पिताशेषक्रियार्थात्मा निरन्तरः ॥
मय्यर्पितात्मनः पुंसो मयि सन्न्यस्तकर्मणः ।
न पश्यामि परं भूतमकर्तुः समदर्शनात् ॥

(**भा.** ३. २९।२३-२८)

इत्येवंरूपश्लोकपूगदर्शनात् **श्रीभक्तिसन्दर्भे** 'ततो मद्भक्तेष्वेवादरबाहुल्यं कर्तव्यमन्यत्र च यथाप्राप्तं यथाशक्ति चेति भावः ।' इति सिद्धान्तितम् ।[1] अस्मन्मते एवंक्रमेणैव गुर्वादिषु विशिष्य श्रद्धातिशयः संगच्छते इति दिक् ।

न प्रतीके न हि सः

भागवत एव

यो मां सर्वेषु भूतेषु सन्तमात्मानमीश्वरम् ।
हित्वार्चां भजते मौढ्याद् भस्मन्येव जुहोति सः ॥

(३-२९-२२) इति श्लोको वर्तते ।

तस्याशयस्तु **श्रीभक्तिसन्दर्भे** एवं निभालितः—

"**मौढ्यात्** शैली दारुमयी वा काचित् प्रतिमेयमिति मूढबुद्धित्वाद् यं सर्वेषु भूतेषु वर्तमानं परमात्मानमीश्वरं मां हित्वा तस्या मयैक्यमविभाव्यार्चां मदीयां प्रतिमां भजते केवललोकरीतिदृष्ट्या तस्यै जलादिकमर्पयति । यथा **अग्निपुराणे** दशरथमारितपुत्रस्य तपस्विनो विलापे—

शिलाबुद्धिः कृता किंवा प्रतिमायां हरेर्मया ।
किं मया पथि दृष्टस्य विष्णुभक्तस्य कर्हिचित् ॥
तन्मुद्रांकितदेहस्य चेतसानादरः कृतः ।
येन कर्मविपाकेन पुत्रशोको ममेदृशः ॥

इति । यथा चोक्तं—

---

१. श्रीभक्तिसन्दर्भः, पृ० १४७

विष्ण्वर्चायां शिलाधीर्गुरुषु नरमतिर्वैष्णवे जातिबुद्धि-
र्विष्णोर्वा वैष्णवानां कलिमलमथने[1] पादतीर्थेऽम्बुबुद्धिः॥
शुद्धे तन्नाम्नि मन्त्रे सकलकलुषहे शब्दसामान्यबुद्धि-
र्विष्णौ सर्वेश्वरेशे तदितरसमधीर्यस्य वै नारकी सः॥ इति।

तस्य च मूढस्य मद्दृष्ट्यभावात् सर्वभूतावज्ञापि भवति। ततस्तद्दोषेण भस्मनि यथा जुहोति कश्चित् तस्याश्रद्दधानस्य फलाभाव इत्यर्थः।"[2] इति। एतद्व्याख्यानानुरोधेन उपास्यप्रतीकयोस्तादात्म्यबुद्धिरेव कर्तव्या उपासकैरिति सिद्धम्। किन्तु **वेदान्तदर्शने** 'न प्रतीके न हि सः' (४-१-४) इति सूत्रं वर्तते। तत्सूत्रमत्र कथं संगच्छते इति शंका समुदेति। किञ्चोपास्यप्रतीकयोर्यथार्थतः को वा सम्बन्ध इति तदप्यनुसन्धेयमस्ति। तत्रोच्यते। पूर्वोक्तवेदान्तसूत्रस्य तावदयमाशयः—

'मनो ब्रह्मेत्युपासीत' 'आदित्यो ब्रह्मेत्युपासीत' इत्यादिना सिद्धेषु प्रतीकोपासनेषु प्रतीकेषु ब्रह्मणः साक्षादुपस्थितत्वे मनआदिविशिष्टरूपेणैव ब्रह्मण उपास्यत्वं फलति। किन्तु मनआदेर्ब्रह्मगुणत्वाभावात् विकारत्वमेव। आत्मनोऽपि विकारास्पदत्वं स्यात्। तन्मा भूदिति न हि प्रतीकेषु परमेश्वरः साक्षादुपास्यः किन्तु परमेश्वरदृष्टिसंस्कृतो मनआदिरेव साक्षादुपास्यः। तदेव द्रढयति 'ब्रह्मदृष्टिरुत्कर्षात्' (४-१-५) इत्युत्तरसूत्रेण। समासेन अस्यायमाशयः—ब्रह्मणः "सर्वोत्कृष्टस्य सर्वनमस्कार्यस्य व्याप्तिदृष्ट्या सर्वेषां मनआदित्यादीनां प्रतीकानामुपास्यत्वम्। अत एव 'श्वभ्यः श्वपतिभ्यश्च वो नमः' इत्यादिषु श्वादिष्वत्यन्तनिकृष्टेष्वपि सर्वोत्कृष्टब्रह्मव्याप्तिदृष्ट्या श्रुतिर्नमः प्रयुंक्ते। तस्मादुत्कृष्टसंबन्धान्निकृष्टेषूपचारदर्शनात् विश्वाधिकब्रह्मदृष्ट्या मनः प्रभृतीनामुपास्यत्वं सिद्धम्।"[3] इति।

वस्तुतस्तु प्रतीकं साधनभूतमेव। न तु तस्य ब्रह्मणा तादात्म्यं संगच्छते। तदेवं भक्तिसन्दर्भे यत्तादात्म्यमुक्तं तदुपचारेणैव ग्रहणीयम्। किञ्च व्यंग्यव्यञ्जकयोरपि सर्वथा तादात्म्यं नाभ्युपगन्तव्यम्। प्रतीकन्तु व्यञ्जकमुपास्यस्तु व्यंग्य इति कृत्वाप्युभयोर्भेदः। अत्रापि तावदायातं द्वैताद्वैततत्त्वं प्रकारान्तरेण। किञ्च नामरूपात्मकं यत्किञ्चिदपि व्यक्तं वस्तु ब्रह्मणाभिव्याप्तं सदपि वस्तुतो मायिकमेव। न खलु तन्मायिकं वस्तु सत्येन ब्रह्मतत्त्वेन सर्वात्मना तादात्म्यममर्हति। तस्मात् प्रतीकमेव साधनत्वेनोररीकृत्य

---

१. 'कलिमालिन्यमथने' इति मुद्रितपुस्तकपाठः दुष्ट इति प्रतिभाति।

२. **श्रीभक्तिसन्दर्भः**, पृ० १४१.

३. **ब्रह्मसूत्रे श्रीकण्ठभाष्ये**, पृ० ४३२.

ततोऽप्यूर्ध्वं ब्रह्मतत्त्वमेव लब्धुमभिलषेद्भक्त इति परमार्थः। परमार्थतो ब्रह्मतत्त्वन्तु अव्यक्तमेव। तत एवोक्तं **गीतायां** सप्तमाध्याये—

अव्यक्तं व्यक्तिमापन्नं मन्यन्ते मामबुद्धयः।
परं भावमजानन्तो ममाव्ययमनुत्तममिति॥ (७-२४) इति।

एतदेवाभिप्रेत्य केनोपनिषद्यप्युक्तमस्ति—

यद्वाचानभ्युदितं येन वागभ्युद्यते।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते॥
यन्मनसा न मनुते येनाहुर्मनो मतम्।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते॥
यच्छोत्रेण न शृणोति येन श्रोत्रमिदं श्रुतम्।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते॥
यत्प्राणेन न प्राणिति येन प्राणः प्रणीयते।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते॥ (५-९) इति।

न खलु निर्जीवस्य प्रतीकस्य स्वत एव मोक्षप्रदायकत्वमस्ति किन्तु प्रतीके यस्य परमेश्वरस्य भावना क्रियते स एव मोक्षप्रदाता। अत एव चोक्तं न प्रतीके न हि स इति। किञ्च मोक्षव्यतिरिक्तफलान्तरसमीहयापि प्रतीके देवताविशेषं स्वाभीष्टरूपमुपासते जनः। अत एव भिन्नभिन्नदेवतानामुपासनायाः फलेष्वपि वैभिन्नं परिलक्ष्यते। यदुक्तं **गीतायाम्**—

'श्रद्धामयोऽयं पुरुषः यो यच्छ्रद्धः स एव सः।' इति।
'ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्' इति च।

किञ्च प्रतीकमेवोपास्य-देवता न भवतीति हेतोः सपर्यायाः पूर्वमेव प्रतीके उपास्यदेवतायाः प्राणप्रतिष्ठा करणीया[1] अथच केवलं सहृदय

---

१. कालिकापुराणस्य (वङ्गीय संस्करणे तथा चौखम्बा संस्करणे) अष्टाशीतितमाध्याये (वेङ्कटेश्वरमुद्रणालयसंस्करणे एकनवतितमेऽध्याये) आदितोऽष्टादशश्लोकपर्यन्तं प्राणप्रतिष्ठाविधिरुपवर्णितोऽस्ति। तत्रैव विशेषभावेनावलोक्यताम्—

अकृतायां प्रतिष्ठायां प्राणानां प्रतिमासु च।
यथापूर्वं तथाभावः स्वर्णादीनां न विष्णुता॥ १०॥
अन्येषामपि देवानां प्रतिमास्वपि पार्थिव।
प्राणप्रतिष्ठा कर्तव्या तस्या देवत्वसिद्धये॥ ११॥
सुवर्णं तु सुवर्णं स्याच्छिला दारु तथा शिला।
अन्यच्च स्वस्वरूपं स्यात् प्राणस्थानमृते सदा॥ १२॥ इति॥

एव यथा व्यंग्यमर्थमासादयति नेतरः तथैव श्रद्धावान् एव केवलं प्रतीके उपास्यदेवतामनुभवति नेतर इत्यास्तां तावत् ।

परब्रह्मणो देवताभिः सम्बन्धः

पूर्वं श्रीविष्णुव्यतिरिक्तानामपि भिन्नभिन्नदेवतानामुपासनाया उल्लेखः कृतः । तदेवमस्य विभिन्नदेवताराधनपक्षस्य ।

यथा तरोर्मूलनिषेचनेन तृप्यन्ति तत्स्कन्धभुजोपशाखाः ।
प्राणोपहाराच्च यथेन्द्रियाणां तथैव सर्वार्हणमच्युतेज्या ॥
(भा.. ४-३१-१४)

इति भागवतवचनेन विरोधः । स च विरोधः श्रीभक्तिसन्दर्भे एवं समाहितः—

"तत्र साधकानां यत्तु 'यथा तरोर्मूलनिषेचनेन' इत्यादौ तदन्योपासनानां पुनरुक्तत्वमुपलभ्यते, तत्पुनः केवलस्वतन्त्र-तत्तद्दृष्टयोपासनानामेव । अत्र तु तत्तदधिष्ठानक-भगवदुपासनमेव विधीयते । तदादरावश्यकत्वञ्च तत्सम्बन्धेनैव सम्पाद्यत इति भेदः ।" इति (**श्रीभक्तिसन्दर्भः**. पृ० १४८) एतदेव तत्त्वम् उपरिष्ठाद् वैशद्येन प्रतिपाद्यते ।

तथा हि मूलत एवायं प्रश्नः समुदेति, ननु निर्गुणस्याव्यक्तस्यैकस्य परब्रह्मणो विभिन्नवाहनाभरणायुधादिसम्पन्नाभिर्देवताभिः को वा सम्बन्ध इति । किञ्च देवताविशेषाणां कृते आयुधादिविशेषाणां कल्पनस्य किं तात्पर्यम् । तदेवंविधानां शङ्कानां समाधानार्थं प्रथमतो वैदिकदेवतातत्त्वमस्माभिरवगन्तव्यम् ।

ऋग्वेद एव देवतासहस्राणामुल्लेखोऽस्ति । यदुक्तं—'त्रिणि शता त्रीसहस्राण्यग्निं त्रिंशच्च देवा नव च सपर्ययन् ।' (**ऋ० सं०** ३-९-९) इति । **शतपथब्राह्मणे** शाकल्यः याज्ञवल्क्यं पृच्छति—"कति देवता याज्ञवल्क्ये"ति । याज्ञवल्क्यस्त्वाह—"त्रयश्च त्री च शता त्रयश्च त्री च सहस्रे"ति । तदेवंक्रमेण न केवलम् इन्द्र-चन्द्र-वायु-वरुण-ब्रह्मादय एव देवताः किन्तु **निरुक्तलक्षणानुसारं** वृक्षशाखा, उदूखलः, मूषलः, प्रस्तरः, हयः, मण्डूकः, मुद्गरस्तथा एवंरूपा अन्येऽपि निर्जीवाः पदार्थाः वेदेषु देवतारूपेण स्तूयन्ते पूज्यन्ते च । तत्कथं संगच्छते इति प्रश्नो नियमेनैव समुदेति पृच्छावताम् । किन्तु वेदेषु तथा उपनिषत्स्वेव एतद् विस्पष्टमुक्तमस्ति यद् बहुसहस्रदेवतासु तावद् एकमेव परब्रह्मतत्त्वमन्तर्निहितमस्तीति । किञ्चाचेतनानामपि रथपाषाणादीनां स्तुतिदर्शनेन आह यदपरिसीमैश्वर्यवशत एक एव महान् देवः बहुरूपाणि धारयति बहुधा स्तूयते च । देवतानां काश्चन तस्यैवांगभूताः पुनरपराः काश्चन

तस्यैव प्रत्यंगभूता इति। तद्यथा सूर्याग्निप्रभृतयः परमेश्वरस्यांगभूता वायुभगाश्वप्रभृतयस्तु प्रत्यंगभूताः। तथा हि घटशरावादयो यथा स्वतन्त्ररूपेण विभिन्नाः मृत्तिकारूपेण त्वभिन्ना एव तथैव सूर्याग्निप्रभृतयः स्वतन्त्रभावेन भिन्नरूपा अपि परमेश्वरसम्बन्धेनाभिन्नरूपा एव। देवताः स्वयमेवाणिमाद्यैश्वर्यसम्पन्नतया स्वसंकल्पानुसारं स्वयमेव रथादिरूपं धारयन्तीत्येतदप्येकं व्याख्यानम्। तस्मात् स्वयमेव देवताः रथादिरूपा आयुधादिरूपा वा। तत एव रथादिरूपत्वेनापि पूजिता अभीष्टफलं ददन्ति। यदाह—

"महाभाग्याद्देवताया एक आत्मा बहुधा स्तूयते। एकस्य आत्मनः अन्ये देवाः प्रत्यंगानि भवन्ति। × × × × × आत्मा एव एषां रथः भवति आत्मा अश्वा आत्मा आयुधम् आत्मा इषवः आत्मा सर्वं देवस्य देवस्य॥" इति (**निरुक्तम्**. ७-४)[1]

शतपथब्राह्मणे यद्यपि याज्ञवल्क्य आह—"त्रयश्च त्री च शता त्रयश्च त्री च सहस्रेति" तथापि स एव पुनराह-त्रयस्त्रिंशद्देवता इति। तदनन्तरमप्याह षड्देवता इति। पुनश्च द्वे इति। एवमन्ततो गत्वा आह वस्तुत एका एव देवता इति। शाकल्यस्तदा अपृच्छत्—"कतम एकः देव" इति। तदाह याज्ञवल्क्यः—"प्राण इति स ब्रह्म इत्युच्यते" इति। तदेतदेव तत्त्वम् ऋङ्मन्त्रोऽपि प्रतिपादयति यथा—

इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान्।
एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः॥
(**ऋ० सं०** १-१६४-४६) इति।

---

१. किञ्च आयुधादीनां देवतायाश्च अभेदत्वं बौद्धधर्मेऽपि प्रसिद्धम्। तथा हि बुद्ध एव तथागतः। तथात्वमेव बुद्धत्वम्। तथात्वं च वज्रेणापि प्रतीकभूतेन सूच्यते। तदेवं बुद्धस्य बुद्धभावस्य वा वज्रेण अभेदः। अथ च बुद्धः स्वयमेव वज्रं धारयतीति बुद्धमूर्तिषु स्पष्टम्। तदेवम् आत्मा एव एषां रथ इति न्यायोऽत्रापि नितरां संगच्छते। यदाह—

"Just as the animal 'determinants' of the Hindu gods are in essence identical with the anthropomorphic forms that they support, so also, in the case of this supreme symbol of the Vajrayana sect, the adamantine bolt is identical with the Buddha who holds it in his hand."

(Zimmer, **Myths and Symbols in Indian Art And Civilization**, p. 149,)

अयमेव भावो **मनुसंहिता**यामप्युपलभ्यते यथा—

आत्मैव देवताः सर्वाः सर्वमात्मन्यवस्थितम् ।
एतमेके वदन्त्यग्निं मनुमन्ये प्रजापतिम् । (१२-११९)
इन्द्रमेके परे प्राणमपरे ब्रह्म शाश्वतम् (१२-१२३) इति ।

इदमत्रावधेयम् । यदा तावदचेतनाः प्रस्तरोदूखलमूषलप्रभृतयो देवतारूपेणोपास्यन्ते तदा तेषां जडांशे शरीरबुद्धिं कृत्वा तद्व्यतिरिक्तायाः कस्याश्चिदभिमानिदेवताया अधिष्ठातृदेवताया एव वा सद्भावः स्वीक्रियते । वस्तुतस्तु तेषु तेषु प्रतीकेषु अभिमानिदेवता एव स्तूयन्ते न तु तान्येव तथैवेति भावः । अयमेव परमार्थः **वेदान्तदर्शने** 'अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम्' (**वे० सू०** २-१-५) इति सूत्रेण समर्थितः । **श्रीकण्ठभाष्ये** अस्य सूत्रस्य व्याख्यानं यथा—

"यद्यचेतनत्वेन चेतनात् ब्रह्मणो विलक्षणमिदं जगत्, तत्कथमस्मिन् 'तं पृथिव्यब्रवीत्' 'आपो वा अकामयन्त' 'शृणोत ग्रावाणो विदुषः' इत्यादौ चेतनकार्यव्यपदेशः । तस्मादिदं चेतनमेव सर्वं जगत् । अतो न ब्रह्मप्रपञ्चयोश्चेतनाचेतनरूपतया न वैलक्षण्यमिति शंक्यम् । यतस्तथा सर्वत्र ज्ञानकार्यव्यपदेशस्तु तदभिमानिदेवताविषय एवेत्यवगम्यते, 'हन्ताहमिमास्तिस्रो देवताः' इति देवताशब्दविशेषात्[1] 'अग्निर्भूत्वा मुखं प्राविशत्' इत्यादिना अचिद्वस्त्वभिमानिदेवतानुगतेश्च ।[2]" इति ।

न खल्वेतावता एनं शंकनीयं यद् "अचेतनत्वादिना विलक्षणमेव जगत् ब्रह्मणः । ततोऽस्य कार्यत्वं ब्रह्मणः कारणत्वं च युक्तिबाध्यमेव" इति । यतस्तत्रैवैतच्छंकापरिहारमुखेन सूत्रं प्रदत्तमस्ति 'दृश्यते तु' (**वे० सू०** २-१-६) इति । सूत्रस्यायमाशयः—

"विलक्षणयोरपि ब्रह्मप्रपञ्चयोः कार्यकारणभावः सम्भवति, अचेतनाद् गोमयात् चेतनवृश्चिकोत्पत्तिदर्शनात् । चेतनात् पुरुषात् अचेतनकेशाद्युत्पत्तिदर्शनाच्च । अतः शुष्कतर्को न बाधकः श्रुतिसमन्वयस्येति निर्णयः" इति (**श्रीकण्ठभाष्यम्**. पृ० ११) ।

उव्वटसायणमहीधरप्रभृतिभिर्वेदभाष्यकारैरपि अभिमानिव्यपदेशन्यायेनैव वृक्षशाखापाषाणप्रभृतीनां देवतात्वं व्याख्यातम् । तद्यथा **शुक्लयजुर्वेद-**

---

१. देवताशब्देन चेतनवाचिना पृथिव्यादीनां विशेषितत्वादित्यर्थः ।

२. अनुगतेरनुप्रवेशप्रतिपादनादित्यर्थः ।

भाष्ये उव्वट आह—"अधिष्ठात्र्यो देवता विद्यन्ते प्रतिमाभूतास्तु शाखादयः तं फलं साधयन्तीत्यदोषः।"[1] इति।

वस्तुतस्तु सूर्याग्निप्रभृतिष्वपि अभिमानिव्यपदेशेनैव देवताबुद्धिर्जायते। सोऽयमभिमानिव्यपदेश एव पाश्चात्यैः पार्सनिफिकेशन् अर्थात् पुरुषीकरणमित्युच्यते। संस्कृतालंकारशास्त्रेऽपि अभिमानिव्यपदेशस्योपयोगित्वं स्वीकृतमस्ति। तथा ह्यवस्थाभेदेन कथमेकस्यैव वर्णनीयवस्तुनो नावीन्यमानेतुं शक्येत इति विचारयन्नाह आनन्दवर्धनः—

अयमपरश्चावस्थामेदप्रकारो यदचेतनानां सर्वेषां चेतनं द्वितीयं रूपमभिमानित्वप्रसिद्धं हिमवदगंगादीनाम्। तच्चोचितचेतनविषयस्वरूपयोजनयोपनिबध्यमानमन्यदेव सम्पद्यते। यथा कुमारसम्भव एव पर्वतस्वरूपस्य हिमवतो वर्णनं, पुनः सप्तर्षिप्रियोक्तिषु चेतनतत्स्वरूपापेक्षया प्रदर्शितं तदपूर्वमेव प्रतिभाति। इति। (**ध्वन्यालोकः**—४, पृ. ५३९)

प्रतीकस्यापि प्रतीकम्

इदन्त्वत्र परिलक्षणीयं यत् पूर्वोक्तन्यायेन वृक्षशाखा अभिमानिदेवतायाः प्रतीकम्, अभिमानिदेवता च परब्रह्मतत्त्वस्य प्रतीकम्। तदेवं प्रतीकस्यापि प्रतीकं भवति। वस्तुतस्तु भगवदाराधनायाः प्रत्येकमेव साधनं प्रतीकभूतमस्तीति कृत्वा उपासनाप्रक्रियायां व्यायता एव काचन प्रतीकपरम्परा समुद्भावयितुं शक्यते। तद्यथा भगवन्तं प्रति यन्नैवेद्यं समर्पितमस्ति तदस्माकं भक्तेः प्रतीकम्। तदपि च भगवदभिरुचिज्ञानव्यतिरेकेणैवास्माभिरस्मदभिरुच्यनुसारं तथा शक्त्यनुसारमेव प्रस्तूयते। यदाह—

इदं भुंक्ष्व महाराज प्रीतो यदशना वयम्।
यदन्नः पुरुषो भवति तदन्नास्तस्य देवताः॥

—**रामायणे** अयोध्याकाण्डे

---

१. (१) " 'ओषधे त्रायस्वैनम्', 'शृणोत ग्रावाणः' इत्यादावचेतने द्रव्ये चेतनोचितरक्षणश्रवणाद्यर्थं बध्नाति। स चायुक्तः। ननु अभिमानिव्यपदेश इति वैयासिकशास्त्रे सूत्रितत्वात् ओषध्याद्यभिमानिचेतनदेवता अत्र विवक्ष्यताम्..." (सायणस्य **ऋग्वेदभाष्योपक्रमणिका,** हिन्दीसंस्करणम्. पृ. ८)
(२) श्रीशचन्द्रविद्यार्णवकृते छान्दोग्योपनिषद **आनन्दगिरिटीकाया आंग्लानुवादे** (इलाहाबाद, १९१८ ख्रिस्ताब्दीयसंस्करणे पृ. ४८६–४८८) प्रतीकोपासनामधिकृत्य सुविशदं विवरणमस्ति। तच्च सुधीभिर्मूल एवावलोकनीयम्।

१०३-३०) इति । धारावाहिकभावेन प्रतीकस्यापि प्रतीकप्रयोगस्योदाहरणं यथा—श्रीविष्णोः प्रतीकं विष्णुमूर्तिः । मूर्तेरेव प्रतीकं शालग्रामः, शालग्रामाभावे शालग्रामप्रतीकभूतस्तु गीताग्रन्थो भागवतग्रन्थो वा । यस्मिन्नाधारे स ग्रन्थः स्थाप्यते तमपि पुरुषाः श्रद्दधते इति कृत्वा आधारोऽपि परम्पराक्रमेण परब्रह्मणः प्रतीकमित्यास्तां तावत् ।

उव्वटेन प्रतीमाभूतास्तु शाखादय इत्युक्तम् । आंगलभाषायां प्रतीमा एव इमेज् इत्युच्यते । सेयं प्रतिमापि प्रतीकविशेष एव । प्रतिमाप्रतीकयोरेव निविडसम्बन्धं द्योतयन्नाह आनन्दकुमारस्वामी यथा—

प्रतिमाद्वारेण वस्तुविशेषस्य चिन्तनस्य कला एव प्रतीकतत्त्वम् । इति ।[1] तदेवं दुर्गा दुर्गतिहारिणी भवतु नो रत्नोल्लसत्कुण्डला इति दुर्गाप्रतिमाया (इमेज्) यद् ध्यानं तदेव प्रतिमाद्वारेण चिन्तनस्य कलेति अवदातम् । ध्यानमन्त्रानुसारं कुण्डलादिधारिण्यो देव्यो मृत्तिकादिभिः पदार्थैर्या मूर्तिर्निर्मीयते[2] सैवोपासनायां प्रतीकमित्यलं बहुना ।

अत्रायं प्रश्नः समुदेति । ननु देवीमूर्तौ उपलब्धानां शंखचक्रादीनां कोऽभिप्रायः । उच्यते । समग्रापि मूर्तिर्यथा देवताविशेषस्याथवा परब्रह्म-

---

1. "For the Hindu philosopher Ananda K Coomaraswamy, symbolism is 'the art of thinking in images', an art now lost to civilized Man, notably in the last three hundred years, perhaps in consequence of the 'catastrophic theories of Descartes', to quote Schneider. Coomaraswamy, then, shares the views of Fromm and Bayley, explicit in the titles of their respective works: **The Forgotten Language** and **The Lost Language of Symbolism.** However, this loss–as anthropology and psychoanalysis have shown–is limited to consciousness and not to the 'unconscious', which, to compensate, is perhaps now overloaded with symbolic material. (J. E. Cirlot, **A Dictionary of Symbols,** Introduction, p. XXIX)

अयमाशयः—विगतवर्षशतत्रयेणेयं कला सभ्यजनैः विस्मृतास्ति । तत्र सम्भवतः डेस्कार्टेसभिधस्य दार्शनिकस्य प्रतीकविरोधिमतमेव कारणम् । प्रतीकस्य साम्प्रतं लोकव्यवहारे विस्मृतत्वं फ्रोम्-बेइलिमहोदयाभ्यामपि परामृष्टम् । किन्तु ग्रन्थकर्तुः चार्लोट्महोदयस्य मते यद्यपि स्वेच्छाकृतभावेन प्रतीकस्य व्यवहारः साम्प्रतं न भवति अज्ञातभावेन तु प्रतीकस्य बहुलतर एव प्रयोगः प्रवर्तते इदानीमपि ।

२. मूर्तत्वं नाम अपकृष्टपरिमाणवत्त्वम् ।

तत्त्वस्य प्रतीकं तथैव तद्गता शंखचक्रादयोऽपि अर्थविशेषाणां प्रतीकं भवन्ति। एवं हस्तपादाद्यंगान्यपि यथादृष्टतोऽप्यतिरिक्तमर्थमभिव्यञ्जन्ति। तथा हि **भागवतस्य** द्वादश स्कन्धे एकादशाध्याये श्रीविष्णोरंगानामलंकारादिकानां च तात्पर्यमेवं व्याख्यायते यथा—

एतद्वै पौरुषं रूपं भूः पादौ द्यौः शिरो नभः।
नाभिः सूर्योऽक्षिणी नासे वायुः कर्णौ दिशः प्रभोः॥ (६)
प्रजापतिः प्रजननमपानो मृत्युरीशितुः।
तद्बाहवो लोकपाला मनश्चन्द्रो भ्रुवौ यमः॥ (७)
कौस्तुभव्यपदेशेन स्वात्मज्योतिर्बिभर्त्यजः।
तत्प्रभा व्यापिनी साक्षात् श्रीवत्समुरसा विभुः॥ (१०)
स्वमायां वनमालाख्यां नानागुणमयीं दधत्।
वासश्छन्दोमयं पीतं ब्रह्मसूत्रं त्रिवृत् स्वरम्॥ (११)
बिभर्ति सांख्यं योगं च देवो मकरकुण्डले।
मौलिं पदं पारमेष्ट्यं सर्वलोकाभयंकरम्॥ (१२) इत्यादि।

एवं **ललितासहस्रनामस्तोत्रे** च देवीरूपवर्णनायां पाशादीनां तात्पर्यं यथा—

उद्यद्भानुसहस्राभा चतुर्बाहुसमन्विता।
रागस्वरूपपाशाढ्या क्रोधाकारांकुशोज्ज्वला॥
मनोरूपेक्षुकोदण्डा पंचतन्मात्रसायका।
निजारूणप्रभापूरमज्जद्ब्रह्माण्डमण्डला॥ इति (२, २-३)[1]

मन्त्र-यन्त्र-मुद्राप्रभृतीनां प्रतीकत्वम्

एतावता प्रतिमायाः प्रतीकत्वमुक्तम्। सम्प्रति तामेव प्रतिमामुद्दिश्य ये मन्त्रादयः प्रयुज्यन्ते तेषामपि प्रतीकत्वं दिङ्मात्रेण समुदाह्रियते। तथाहि सर्वेऽपि मन्त्रा नियमेनैव व्यञ्जकत्वसमन्विताः। वैदिकमन्त्राणां व्यंगार्थसमृद्धाः केचन मन्त्रास्तावद् इतः पूर्वमेवोदाहृताः। तेषूदाहृतमन्त्रेषु तावद् वस्तुमात्रस्यैव व्यंग्यार्थत्वं समुद्भासितम्। किन्तु मन्त्राणां प्रायश एव देवतास्तुतिपरकत्वेन देवता विषयकरतिभावाभिव्यञ्जकत्वाद् ध्वनि-

---

१. वशिन्याद्याः शक्तयः स्युस्तन्मात्राः पुष्पसायकाः।
मनो भवेदिक्षुधनुः पाशो राग उदीरितः॥
द्वेषः स्यादंकुशः प्रोक्तः क्रमेण वरवर्णिनि॥
(**तन्त्रराजतन्त्रम्** ३५,११-१२) इत्यादिकमप्यत्र दूरतस्तुलनीयम्।

त्वमप्युररीकार्यम्। तदेवं ध्वनिरूपत्वेनापि मन्त्राणां प्रतीकरूपता। अथच मन्त्राणां सांकेतिकरूपनयापि प्रतीकरूपता। तथा हि सावित्रीमन्त्र एव गायत्रीत्युच्यते। यदुक्तम् **अग्निपुराणे**—

गायत्र्छिष्यान् यतस्त्रायेद् मायां प्राणांस्तथैव च।
ततः स्मृतेयं गायत्री सावित्रीयं ततो यतः॥
प्रकाशनात् सा सवितुर्वाग्रूपत्वात्सरस्वती॥ (२१६-२) इति।

तत्रैव सवितुः प्रकाशनादिति ग्रन्थेन सवितुर्विशेषत्वप्रकाशनात् सावित्रीमन्त्रस्य व्यञ्जकत्वं ख्यापितम्। किं च गायत्रीमन्त्रस्य यत् पादत्रयं तस्यापि प्रतीकरूपत्वमुक्तं **देवीभागवतटीका**कारेण शैवनीलकण्ठेन यथा—अनया च पादत्रयाद् वैदत्रयलोकत्रयाग्न्यादितेजस्त्रयपूर्वकं सर्वब्रह्माण्डसृष्टिः सावित्रीत एवोक्ता। इति (९-२६-२)। गायत्री एव समग्रवेदविद्यायाः सारभूतत्वात् श्रुतेः प्रतीकम्। श्रुतिरेव परब्रह्मविद्या। तस्मादत्र चतुर्विंशत्यक्षर**गायत्र्याख्य**परब्रह्मविद्याविलासभूतमित्यादिकं पूर्वोक्तं **तिलकटीका**कारवचनमपि (**रामायणे** १-१-१) दूरतस्तुलनीयम्।

बृहत्साम तथा साम्नां गायत्री छन्दसामहम्।
मासानां मार्गशीर्षोऽहं मृत्युनां कुसुमाकरः॥ (**गीता**, १०-३५)

इत्याद्यनुसारमपि गायत्री परमेश्वरस्य प्रतीकं भवति।

तत्र तावद् गायत्रीमन्त्रस्यापि प्रतीकभूतोऽस्ति ओंकारः। ओंकारस्तु अ-उ-म इति वर्णत्रयात्मको भूर्भुवः स्वरिति लोकत्रयं बोधयति। तदेवं विश्वव्यापिनो ब्रह्मतत्त्वस्यैव प्रतीकं भवति। ब्रह्मतत्त्वमपि साधकानां कृते परिदृश्यमानलोकत्रयाद्यनुभवक्रमेणैव साक्षात्करणीयमिति अधस्तात् यन्त्रतत्त्वव्याख्यानावसरे विष्पटं प्रतिपादयिष्यते। किं च ओंकार एव समग्राया एव श्रुतेः प्रतीकभूतस्तथा शब्दात्मकत्वात् शब्दब्रह्मणः प्रतीकभूत इति एवं क्रमेण समग्रमपि मन्त्रतत्त्वं प्रतीकप्रक्रियाया एव विजम्भितमस्तीति दिक्।

अत्र प्रसंगतो वर्णानामपि प्रतीकात्मकत्वं दिङ्मात्रेण परिलक्ष्यताम्। सर्वेषामपि वर्णानां प्रातिस्विकभावेनार्थविशेषाभिव्यञ्जकत्वं **वर्णाभिधान-तन्त्र-कामधेनुतन्त्रप्रभृतिषु** वैशद्येन निाभलितम्। **कामधेनुतन्त्रो**क्तमेकारतात्पर्यं तावत्प्रथमदर्शन एव प्रदर्शितम्। अत्र दिङ्मात्रेण आकारस्य तात्पर्यं कामधेनुतन्त्रप्रोक्तं यथा—

आकारं परमैश्वर्यं शंखज्योतिर्मयं प्रिये।
ब्रह्मविष्णुमयं वर्णं तथा रूद्रमयं प्रिये।
पंचप्राणमयं वर्णं स्वयं परमकुण्डली॥ इति।

एवमेव समग्रमपि वर्णतत्त्वं **कामधेनुतन्त्रतः स्तवकवचमालायां** समुद्धृतमस्तीति तत्रैवावलोकनीयम्। किं च पृथिव्यामन्येष्वपि देशेषु आदिमकालादेवारभ्य वर्णानां तात्पर्यबाहुल्यं बाहुल्येन स्वीकृतमस्ति। तद्यथा हीब्रूभाषायाम् आलेफ्-वर्णस्य (आकारस्य) इच्छाशक्तिर्मनुष्य ऐन्द्रजालिकश्चेति तात्पर्यम्। पाश्चात्यरसविद्यायाम् (एल्केमि)[1] ए-(अ) इत्यस्याक्षरस्य सर्वेषां वस्तूनां प्रारम्भ इति तात्पर्यम्। तदेवमन्यत्रापि समुन्नेयम्। लोइफ्लार्महोदयस्य मते आर्याणां तथा सेमेटिक् जातीयानां मते मकारस्तु सदैव जल-जीव-जन्म-संसारसृष्ट्यादिबोधकपदानां प्रथमाक्षरतया तादृशानां पदार्थानां प्रतीकं भवति। तद्यथा मन्त्र-मय-मनु-माधव-महदादिपदानां मकारेणैव आरम्भ इति।[2] तदेवमक्षराणामर्थविशेषप्रतीकभूतत्वादेव प्रतीकात्मकेषु मन्त्रेष्वपि आपाततोऽर्थरहितानामथच व्यंग्यार्थवैभवसमृद्धानामक्षराणां बाहुल्येन प्रयोगोऽस्ति। तद्यथा—श्रीं ह्रीं स्त्रीं हूँ फट्—इति तारामन्त्रः।[3] (**स्तवकवचमालायां** ताराध्यानम्, पृ० ७९६)। यथा वा—

शिरो मे पातु **ओं ह्रीं ऐं श्रीं क्लीं** पातु ललाटकम्।
सम्बोधनपदं पातु नेत्रे श्रीवगलानेन॥
(**स्तवकवचमाला**, पृ. १२२४) इत्येवमादिषु

ओं ह्रीं ऐं श्रीं क्लीमित्यादीनां बीजमन्त्राणां बाहुल्येन प्रयोगोऽस्ति। तत्र बीजमन्त्राणां व्यंग्यार्थबहुलत्वादेव बीजमन्त्र इति समाख्या भवति। यथा बीजांकुरे संभाव्यमानः सुविशालो वटवृक्षः संचितो वर्तते तथैव बीजमन्त्रेऽपि तत्संबंधि समग्रमपि देवतातत्त्वं संनिहितं वर्तते। तदेवं बीजमन्त्र-

---


१. मूलतः एल्केमि नाम ख्रिस्तीयप्रथमशतिकायां ग्रीकदेशीयैरारबदेशीयैश्च प्रारब्धा रसविद्या। परवर्तिनिकाले प्रतीकात्मकतया स्वर्णस्य वह्न्यादिप्रयोगेन यथा विशुद्धिकरणं तथैव वाङ्मनःकायमलादिदूरीकरणेन आत्मनो विशुद्धिकरणस्य यौगिकप्रक्रियाविशेष एव एल्केमिपदस्य रूढार्थः सञ्जात इति दिक्। (J. E, Cirlot. **A Dictionary of Symbols,** p. 6)

२. "Leoffler recalls that, among the Aryans and also among the Semites. M has always been the initial letter of words related to water and to birth of beings and the worlds (Mantras. Manu. Maya, Madhava. Mahat. etc.)" (J.E. Cirlot. **A Dictionary of Symbols,** p. 177)

३. ऐं ऐं ऐं इष्टमन्त्रे कमलभवमुखाम्भोजभूतिस्वरूपे।
रूपारूपप्रकाशे सकलगुणमये निर्गुणे निर्विकारे॥ (**स्तवकवचमालायां** सरस्वतीस्तोत्रम्-३) इत्यादिकमप्यत्र तुलनामर्हति।

पदेनैव बीजमन्त्रस्य प्रतीकत्वं स्फुटमवभासते। अनेनैव क्रमेण यन्त्रेष्वपि प्रतीकात्मकतया अक्षराणां स्थापनमस्ति । तद्यथा **स्तवकवचमालायामेव** (पृ. १४१६) प्रदत्तं तारायन्त्रम् ओं ऐं ह्रीं फट् स्वाहा ऐं ह्री मिति-वर्णाष्टकसमन्वितम् । (प्रकृतग्रन्थे १ संख्यकं चित्रम् ।)

१ संख्यकं चित्रम्



तारायन्त्रम्

समासेन यन्त्ररहस्यम्

प्रतीकेषु तावद् यन्त्रमेव बहुलतमप्रतीकधर्मसम्पन्नम् । तद्बोधनार्थं साम्प्रतं समासेन यन्त्रतत्त्वमप्यत्रावतार्यते । नियन्त्रणार्थकाद् यमधातुतो यन्त्र-शब्दो निष्पन्नः । येन शक्तिविशेषस्य विभूतिविशेषस्य वा श्रेयोलाभार्थं नियमनं भवति तदेव यन्त्रम्। एवंक्रमेण साधारण्येन भगवद्भक्तेराधिक्यसाधनार्थं मनस-स्स्थिरीकरणार्थं यदेव साधनं भवति तदेव यन्त्रम् । फलतः (१) भगवतो यत्किञ्चिदेव व्यक्तीकरणं (पार्सनिफिकेसन्) अथवा तस्य विभूतिविशेषस्य


प्रतीकमेव यन्त्रम्। (२) सिद्धसाधकानां कृते केवलं हृद्गतो भगवतो मूर्तिविशेषो हृदि आराध्यमान एव यन्त्रम् । (३) भगवत्तत्त्वस्य सृष्टितत्त्वस्य वा प्रतीकभूतो रैखिकचित्रविशेषो यत्र साधकः क्रमात्क्रममात्मन एव स्वरूपमुपलभते सोऽपि यन्त्रम् । व्यवहारदशायां यन्त्रस्य तृतीयविध एवार्थः प्रसिद्धतर इति मन्तव्यम् । **तृतीयविधार्थानुसारं यन्त्रमेव मण्डलमित्युच्यते** । मण्डलमेव तावद् भारतीयसाधनधारायां प्रतीकस्य प्रकृष्टतमो दृष्टान्तः : मण्डलेष्वपि श्रीयन्त्रं विशेषत उल्लेखमर्हति । श्रीयन्त्रतात्पर्यस्य व्याख्यानं **योगिनीहृदय-तन्त्र-नित्याशोडशिकार्णवतन्त्र-भावनोपनिषत्**-प्रभृतिषु ग्रन्थेषु तथा **तन्त्रराजतन्त्रस्य** वासनापटले (३५ श पटले) प्रदत्तमस्ति । किञ्च पाश्चात्येष्वपि सिम्बलिजिम्विषयकेषु ग्रन्थेषु प्रायश एवास्य बहुलतरं व्याख्यानं दृश्यते । अत्र तु केवलमभिव्यञ्जकत्ववैभवमात्रप्रकटनार्थं दिङ्मात्रेण श्रीयन्त्रतात्पर्यं निभालयिष्यते । यन्त्राणां रैखिकचित्रस्य तावत् साधनमार्गे बहुधा व्यवहारो भवति । तद्यथा-(१) मनसा कल्पितस्य चित्रस्य हृदि आराधनम् । (२) भूर्जपत्रादिषु विलिख्य कवचरूपेण धारणम् । (३) वेदिकायां विलिख्य तत्रेष्टदेवतापूजनार्थं घटादिस्थापनम् । (४) मन्दिरगात्रे, विशेषतो मन्दिरविताने अंकनम् । तद्यथा तिब्बतदेशे लासानगरे मन्दिरविताने लब्धं सौगतचित्रसमन्वितं श्रीयन्त्रम् ।[1] (५) मण्डलानुरूपं मन्दिरनिर्माणम् । यथा यवद्वीपे खिस्तीयाष्टमशतके पर्वताकारं निर्मितस्य देवालयविशेषस्य भित्तिरूपकल्पना (ग्राउण्ड्प्लेन्) खलु यन्त्रमण्डलानुरूपा एव ।[2] किञ्च सा भित्तिरूपकल्पना श्रीयन्त्रानुरूपा एवेति वक्तुं युज्यते । तदेवं

---


1. Zimmer, **Myths and Symbols in Indian Art and Civilization**, p. 144 and plate, 37.

2. "The structure of a temple-the Borobudur temple for instance in the form of a mandala has as its aim the creation of a monumental image of life and the 'distortion' of the world to make it a suitable vehicle for the expression of the concept of supreme order which man-the neophyte or initiate-might then enter as he would enter into his own spirit." (J. E, Cirlot, **A Dictionary of Symbols**. p. 193). कदाचित्कानिचन मण्डलानि रुञ्जकद्रव्यचूर्णेनाथवा वर्णसूत्रेण भित्तौ निर्मितानि भवन्ति येषु प्रवेशक्रमेण साधकः स्वात्मस्वरूपेण मण्डलेनाभिव्यक्तस्य भगवत्तत्त्वस्याभेदमनुभवति-इत्येतदपि चार्लोट्महोदयेन प्रदर्शितम् । यदुक्तं पूर्वानूदितवचनशेषतया तेनैव—

(उत्तरपृष्ठमवलोक्यताम्)



२ संख्यकं चित्रम् पृ० २२३



श्रीयन्त्रम्

यन्त्रव्यवहारबाहुल्यं नितरां प्रतीकतत्त्वमहत्त्वमेवाकलयति । श्रीयन्त्रेस्य तात्पर्यावबोधनार्थं तावत् प्रकृतग्रन्थस्य २ संख्यकं चित्रमवलोक्यताम् । एतच्चातीव सुप्रसिद्धं श्रीयन्त्रं भारतीयतान्त्रिकसाधनामार्गे विशिष्टं स्थानमधिकृत्य वर्तते । तिब्बत–चीनादिष्वपि देशेषु बौद्धादिष्वपि धर्मेषु प्रकारान्तरेण प्रयुज्यमानमस्ति । तस्मादत्र तस्यैव तात्पर्यमालोच्यते ।

श्रीयन्त्ररहस्यम्

श्रीयन्त्रं परमात्मतत्त्वस्य, निजदेहस्य तथा विश्वप्रपञ्चस्य प्रतीकभूतम् । साधकः अस्मिन्नेव यन्त्रे मनः स्थिरीकृत्य इष्टदेवताया अथवा परमात्मतत्त्वस्य चिन्तनं करोति । किञ्च समग्रोऽपि विश्वप्रपञ्चः परमात्मनोऽभिन्नः । तेन चात्मनोऽप्यभेदावगतिस्तादात्म्यावधारणं वा श्रीयन्त्रसाधनस्य फलम् । तस्मात्परमात्मतत्त्वचिन्तने नियमेनैव विश्वप्रपञ्चस्यापि स्वरूपं समुद्भासितं भवति । किञ्च स्थूलप्रपञ्चस्वरूपावधारणक्रमेण सूक्ष्मप्रपञ्चस्वरूपावगतिर्भवति । तस्या एव परमात्मतत्त्वस्य सर्वकारणभूतस्य स्वरूपावगतिर्जायते । अथवा विपरीतक्रमेण, परमात्मतत्त्वादेव सूक्ष्मप्रपञ्चस्योत्पत्तिः । तत एव स्थूलप्रपञ्चस्योत्पत्तिरित्यपि श्रीयन्त्रादेवावधार्यते । तदेवं यन्त्रस्य बहिश्चक्रात् केन्द्रं यावद् यन्त्रस्थ-चतुष्कोण-मण्डलत्रिकोणादिकानां क्रमशस्तात्पर्यावधारणमेव लयक्रम इत्युच्यते । तथैव केन्द्रस्थानात्क्रमशः त्रिकोणादिकानां तात्पर्यावधारणं सृष्टिक्रम इत्युच्यते ।

यन्त्रस्य बहिः पार्श्वे एकं चतुष्कोणमण्डलमस्ति । तस्य शिश्रितस्य चतुष्कोणस्य द्वारचतुष्टयमस्ति । एतदेव आशाचतुष्टयसमन्वितस्य स्थूलप्रपञ्चस्य प्रतीकम् । अथवा एतदेव मन्दिरविशेषस्य मूलाधारस्थान-

---

The same is true of the great mandalas traced on the grounds with coloured threads or coloured dust. Here, rather than serving the purpose of contemplation, they have a ritual function, in which a man may move gradually towards the inner area, identifying himself with each stage and each zone as he goes. (Ibid. P. 193)

यवद्वीयस्य बरबुदुरमन्दिरस्य मूलाधारस्थानकल्पनाविषये चार्लीट्महोदयेनेतदप्युक्तं यथा–

At the same time, the ground plan of the Borobudur temple is diagrammatically a true **yantra**, and its various square and roundshaped levels constitute a mandala related to the symbolism of squaring the circle—(**Ibid**, p. 317)

मिति गृह्यताम्। तस्मिन्नेव मूलाधारस्थाने सोपानचतुष्टयमस्तीत्यपि परिकल्प्यताम्। मन्दिरस्य अन्तरा इष्टदेवतायाः पीठस्थानं मण्डलत्रिकोणादिभिरंकितमस्ति।

शिश्रितमण्डलान्तः पाति चक्रचतुष्टयम्। तद् व्यतीत्य पद्मदलसहितमपरमपि चक्रद्वयं वर्तते। एषु चक्रेषु विभिन्नशक्तीनां विभिन्नदेवतानां वा स्वरूपचिन्तनं भवति। वस्तुतो देवताभिरपि प्रपञ्चस्यैव विभुतिविशेषाः प्रतीकमार्गेण संसूच्यन्ते। ते च सूक्ष्मतरप्रपञ्चगोचराः पदार्थाः चक्रपञ्चकेनोपस्थापिता इति हेतोः सूक्ष्मतरप्रपञ्चस्य प्रतीकभूतमेतन्मण्डलपञ्चकमिति ध्येयम्।

ततोऽपि गत्वा त्रिकोणनवकमुपलभ्यते। तेषां त्रिकोणानां परस्परच्छेदनेन बहूनां नूतनमण्डलानान्तथा बहुकोणक्षेत्राणामुद्भवो भवति। तेषामपि सूक्ष्मतरप्रपञ्चविषयकं बहुविधं तात्पर्यमस्ति। समासेन तु त्रिकोणनवकं सृष्टितत्त्वस्य प्रतीकम्। तत्र तावदूर्द्ध्वशीर्षत्रिकोणचतुष्टयं पुरुषतत्त्वस्य प्रतीकभूतम्। निम्नशीर्षत्रिकोणपञ्चकं स्त्रीतत्त्वस्य प्रतीकम्। स्त्रीपुरुषयोर्मिलनेन शिवशक्तितत्त्वयोः सहयोगेन इयं सृष्टिः प्रक्रमत इति तात्पर्यम्।

त्रिकोणनवकं व्यतीत्य समग्रस्यापि श्रीयन्त्रस्य केन्द्रमस्ति। तदेव केन्द्रं सर्वकारणभूतस्य परब्रह्मतत्वस्य प्रतीकमस्ति। साधकः स्थूलसूक्ष्मसृष्टचाद्यवधारणक्रमेणान्ततो गत्वा ब्रह्मस्वरूपमवधारयन् ब्रह्मणात्मनोऽभिन्नत्वमुपलभते। तदेतद्ब्रह्मतत्त्वप्रतीकभूतं केन्द्रस्थानं न केनापि बिन्दुना मण्डलेन त्रिकोणेन वा प्रदर्श्यते। किन्तु सर्वात्मना ब्रह्मतत्त्वप्रतीकभूतं तत्स्थानं शून्यमेव प्रतिभाति। साधकः स्वसाधनमहिम्ना अलिखितमपि तत्तत्त्वमवधारयति।[1] किञ्च वस्तुतः शून्यमेव अवाङ्मनसो गोचरस्य ब्रह्मतत्त्वस्य प्रतीकं भवितुमर्हति। केन्द्रस्य समन्ताद् वर्तमाना त्रिकोणादयः सर्वथा केन्द्राभिमुखिन एव सन्तस्तत्केन्द्रमेव हस्तयन्ति यथा विश्वप्रपञ्चस्य स्थूलसूक्ष्मभेदेन सर्वेऽपि पदार्थाः सर्वाधिष्ठानभूतं ब्रह्मतत्त्वमेव सूचयन्ति। तदेवं चित्ररहितेन शून्येनापि सर्वप्रधानभूतं ब्रह्मतत्त्वमभिव्यज्यत इति व्यञ्जनातत्त्वस्यैव महाहं भूषणमेतत्। किञ्च चतुष्कोण–चक्र–त्रिकोणादिजालं व्यतीत्य एव

---

१. रसाभिव्यञ्जने यथा केवलं विभावादीनामेव वर्णनं सम्भवति न तु साक्षाद् रसस्य, तथैव अत्रापि परब्रह्मतत्त्वस्य, दृष्टिगोचरेण प्रतीकेन साक्षादुपस्थापनं न सम्भवति। रसो यथा विभावादिषु सत्सु केवलैः सहृदयैरेव साक्षात्कर्तुं शक्यते तथैव ब्रह्मतत्त्वमपि केवलं साधकानां कृत एव हृदयसंवेद्यमस्तीति रसतत्त्वब्रह्मतत्त्वयोरेतत्साम्यमपि निपुणैः समुन्नेयमिति दिक्।

तत्केन्द्रं समासादयितुं शक्यत इत्येतत् तत्त्वं ब्रह्मतत्त्वस्यैव दुरधिगम्यत्वं व्यनक्ति इत्येवंरूपो व्यग्यार्थः चार्लोट्महोदयेनापि निभालितः।[1] फ्रान्स्देशीयेन लुक्बेनोवामहोदयेनापि ब्रह्मतत्त्वस्य इन्द्रियागोचरत्वाद् रेखाचित्रादिव्यतिरेकेण शून्येनैव संसूचनं भवतीत्युक्तम्।[2] यच्च ब्रह्मतत्त्वं तन्निश्चलं निष्क्रियं निर्गुणं वर्तते। तस्य तादृशी दशा शून्येनैव संसूच्यत इत्यवदातम्। ब्रह्मतत्त्वेन साक्षात्कृततया यदा सृष्टिः प्रक्रमते तदा कश्चन संक्षोभः जागर्ति। तस्मात् सृष्टिरेव क्रियात्मिका। सृष्टिक्रमविषयभूतः समग्रोऽपि विश्वप्रपञ्चः चलमानः सक्रियश्च वर्तते। सृष्टिप्रारम्भादेव प्रपञ्चस्य येयं गतिशीलता सापि परस्परभिन्नेन शिवशक्तितत्त्वप्रतीकभूतेन त्रिकोणनवकेन संसूच्यते। निश्चलानां त्रिकोणानां परस्परभेदनेन नक्षत्रस्यास्थिरत्वेन तुल्यस्य चाञ्चल्यविशेषस्य भानं समुपजायते। एवंक्रमेण येयं चलद्रूपताऽविर्भवति प्रकामं सा खलु विश्वप्रपञ्चस्यैव प्रवाहरूपतामभिव्यनक्ति। विश्वप्रपञ्चस्यैयं प्रवाहरूपता भारतीयभास्कर्ये तथा चित्रकलायामपि बाहुल्येनाभिव्यज्यमाना वर्तते इत्यग्रे नटराजमूर्तितात्पर्यविश्लेषणदशायां वैतत्येन प्रतनिष्यते। त्रिकोणनवकेन सृष्टिक्रमस्य चलद्रूपताया अभिव्यञ्जनं भवतीति तत्त्वं जिम्मारमहोदये-

---

1. "Even though the mandala always alludes to the concept of the centre—never actually depicting it visually but suggesting it by means of the concentricity of the figures—at the same time it exemplifies the cbstacles in the way of achieving and assimilating the centre. "(J. E. Cirlot, **A. Dictionary of Symbols**, P. 162)

2. "The characteristics of the Shri Yantra, one of the finest mandala-instruments, have been explained by Luc Benoist. It is composed around a central point which is the metaphysical and irradiating point of primordial energy; however, this energy is not manifest and therefore the central point does not actually appear in the drawing, but has to be visualized." (**Ibid**, p. 194)
अनिर्वचनीयं यद्ब्रह्मतत्त्वं तस्य शून्येनैवोपस्थापनं श्रीयन्त्रे यथा भवति तथैव महम्मदीयधर्मेऽपि आल्लाख्यस्य ईश्वरस्य अनिर्वचनीयत्वादुपासनागृहेषु मस्जिदाख्येषु वास्तविकं प्रतीकं विना एकं शून्यमेव स्थानं भवति। तत एव आपाततो यत् प्रतीकराहित्यं तदेवात्र प्रतीकायते इति निपुणैरुन्नेयम्।


नापि सुशोभनं समुट्टंकितम् ।[1] श्रीयन्त्रे त्रिकोणैरेव चलद्रूपताया अभिव्यञ्जनस्य या शैली सा खल्वस्मन्मते साम्प्रतं पाश्चात्त्यैरुद्भाव्यमानेन दृष्टिविषयकशिल्पेन तुलनामर्हति । अप्टिकेल् आर्ट् इत्यभिहिते दृष्टिविषयकशिल्पे वस्तुतो निश्चलमपि किञ्चिद्रेखाचित्रं द्रष्टुः समक्षं चाञ्चल्यस्य भानं जनयति । यया अत्रैव सन्निहिते चित्रे (३ संख्यकं चित्रम्) चित्रपटस्य तथा चित्रे लिखितानां विषयाणां गतिहीनत्वेऽपि गतियुक्ततयैव भानं भवतीति सर्वजनसंवेद्यमेतत् । एतच्च दृष्टिविषयकं शिल्पं न कस्यापि वस्तुविशेषस्य स्वरूपमातनोति किन्तु तत्र रेखादिभिर्निर्मितं यच्चित्रं भवति तत् सर्वथा नैर्व्यक्तिकमेव भवति । ननु किमनेन नैर्व्यक्तिकेन रेखाचित्रेण किं वास्य तात्पर्यमिति जिज्ञासायामुच्यते—दृष्टिविषयकेन शिल्पेन वस्तूनां बाह्यिकं रूपं न प्रतन्यते । यतो हि वस्तूनामापातलभ्येन रूपेण तदन्तर्निहिता नित्या शक्तिनैवावगन्तुं शक्यते । आधुनिकविज्ञानेन तावदेतत् तत्त्वं विस्पष्टं समुद्भासितं यत् कालद्रव्यदिग्ज्योतिरित्यादयः सर्वेऽपि प्रपञ्चगताः पदार्था नियतं गतिशीला एव । समग्रोऽपि प्रपञ्चः नियतं प्रवाहविशेषस्य विषयो वर्तते । तदेवं नैर्व्यक्तिकमपि रेखाचित्रं विश्वप्रपञ्चस्य नियतं स्वरूपं समुट्टंकयतीति तत्रैव दृष्टिविषयकशिल्पस्य महत्त्वम् । तस्य च नैर्व्यक्तिकत्वमेव सार्वजनीनत्वबीजम् । सार्वजनीनत्वव्याजेन च सार्वजनीनब्रह्मतत्त्वस्यैव प्रतीकभूतमित्यास्तां तावत् ।[2]

---

1. "The five female triangles expanding from above and the four male emerging from below, signify the continuous process of creation. Like an uninterrupted series of lightning flashes they delve into each other and mirror the internal procreative moment—a dynamism nevertheless exhibited in a static pattern of geometrical repose." (Zimmer, **Myths and Symbols in Indian Art and Civilization**, P. 148)

2. "But the optical artist counters this rebuttal with one of his own. Times have changed, he says, and optical art has its own parallels to the new philosophies we live by, whether we know ···or not. The now-you-see-it-now-you-do'nt aspect of some optical art parallels the ambivalance of human nature, jibing with the modern realization that nothing is what it appears to be, that surfaces are not expressive of the energies that lie beneath them. Science has shown us that time, matter, space and even such a dependable stand-by as light are actually in

३ संख्यकं चित्रम् पृ० २२६



ऑप्टिकेल् आर्ट्

४ संख्यकं चित्रम् पृ० २२७



१८०० खिस्ताब्दीयराजपुतचित्रांकने मणिद्वीपम्

रत्नद्वीपप्रतीकरहस्यम्

सुधासिन्धोर्मध्ये सुरविटपिवाटीपरिवृते
मणिद्वीपे नीपोपवनवति चिन्तामणिगृहे ।
शिवाकारे मञ्चे परमशिवपर्यंकनिलयां
भजन्ति त्वां धन्याः कतिचन चिदानन्दलहरीम् ।।
(सौन्दर्यलहरी-८)

श्रीयन्त्रे शिवशक्त्योरथवा पुरुषतत्त्वस्त्रीतत्त्वयोर्यादृशी स्थितिः रत्नद्वीप-प्रतीकेऽपि तादृश्येवेत्युन्नेतुं शक्यते । तथा हि तान्त्रिकसाधनामार्गे रत्नद्वीपे रत्नवेदिकायां समासीनाया देव्याः काचन मूर्तिः परिकल्प्यते । तस्याश्च यच्चित्रं तदेव साधकेन मनसि निधाय समाराध्यते । चित्रे प्रदर्शितानां वस्तुजातानां तात्पर्यबहुलत्वादस्य चित्रस्य यन्त्ररूपत्वमप्युररीकार्यमस्ति । (४ संख्यकं चित्रं द्रष्टव्यम्) । तस्य तात्पर्यानुधावनक्रमेण मननपूर्वकतया साधकः समाधिं गच्छति ।[1] तस्मिन् चित्रे एकः समुद्रो वर्तते । समुद्र एवा-परिसीमस्य विश्वावकाशस्य आकाशस्य वा दिशो वा प्रतीकम् । क्षीर-समुद्रस्यापि एतदनुरूप एव तात्पर्यार्थोऽनुसन्धेयः । ससुद्रगर्भे एकं द्वीपमस्ति । समुद्र एव महाशून्यस्य प्रतीकं यद्गतत्वेन यत्र वर्तमानः सन्नेव जगत्प्रपञ्चः प्रारभते । यदत्र द्वीपमस्ति तद्गोलाकारप्रायम् । गोलाकारं तद् दीपं सर्वतः रत्नैः खचितं सद्रत्नद्वीपमित्युच्यते । एतद्द्वीपमेव तान्त्रिकैर्बिन्दुरित्यप्युच्यते । जले तैलबिन्दुर्यथा सर्वतो विसारी सर्वतो विसर्पी भवति तथैवायमपि बिन्दुः

---

a state of eternal flux in a universe that we have only begun to explore. The job of art is to give form to this new and impersonal universe that stretches from the atom to the cosmos ……Why is optical art, as an ultimate abstraction, any different from other abstraction ? It gives you even less to hang onto, in fact, it gives you absolulely nothing——no chance hang onto, in fact, it gives you absolutely nothing—no chance of interpreting abstract form and colour as an expression of this or of that. This where the impersonal-universal idea comes in." (**Span**, September 1965, pp. 20-23)

1. "This painting is intended to serve as a model or pattern for the guidance of the inward contemplation of the initiate-devotee. It is a yantra." (Zimmer, **Myths and Symbols in Indian Art and Civilization**, pp. 201-202)

चलमान इति समुन्नेयम्। चलमानोयं बिन्दुर्महाशून्ये जगत्प्रपञ्चस्य सृष्टिं सूचयति। द्वीपस्य सर्वतो रत्नानां यदौज्ज्वल्यं तदपि पूर्वोक्ताष्टिकार्ट्न्यायेन बिन्दोः काञ्चन चलद्रूपतामाविर्भावयति। एतच्च द्वीपं प्रस्फुटितैः सुरतरुभिः परिव्याप्तम्। तेन च ब्रह्माण्डतत्त्वस्य सृष्ट्युन्मुखत्वं सजीवत्वं च सूच्येते। जगत्प्रपञ्चसृष्टेर्यादृशः क्रमः जीवस्यार्थात्साधकस्य स्वस्यापि सृष्टेः स एव क्रम इति सर्वत्रैव मन्तव्यम्। तदेवं रत्नद्वीपस्वरूपावधारणेन न केवलं विश्वप्रपञ्चस्वरूपावधारणमपितु साधकस्यात्मनोऽपि स्वरूपज्ञानं स्यात्। अनेनैव क्रमेण ब्रह्माण्डपिण्डाण्डयोरभेदावगतिरेव साधनायाः परमं फलं भवति। तथा हि रत्नद्वीपस्य मध्यभागे चिन्तामणिनिर्मितं मण्डपमस्ति। रत्नद्वीपयन्त्रसाधनेन ब्रह्मतत्त्वस्यापि लाभसम्भव इति तदेव सूचयितुमत्र चिन्तामणेर्ग्रहणम्। चिन्तामणिमण्डपस्याधः स्वर्णवेदिकायां रत्नखचितायां जगदम्बा समासीना वर्तते। सैव त्रिपुरसुन्दरी रक्तवर्णा विमर्शशक्तिरित्युच्यते। विमर्शपूर्वकतया चिन्तापूर्वकतया जगत् सृजति। रक्तत्वमेव तस्याः सृष्टिप्रावण्यं सूचयति। सैव माया। माति इति माया। यथा कश्चन शिल्पी गृहादिनिर्माणकाले सूत्रधार इव सूत्रेण निर्माणभूमिं माति तथैवेयमपि विश्ववेदिकां माति इत्याशयः।

देव्या अधः सकलः शिवः शेते। स च चन्द्रकलां धारयति। तदधश्च अपरः शिवो निष्कलो वर्तते। स तु चन्द्रकलां न धारयति। सकलः शिवः परिपूर्णं सृष्ट्युन्मुखं पुरुषतत्त्वम्। निष्कलः शिवोऽपरिपूर्णो निर्जीवः निष्क्रियः परमशान्तः पुरुषः। सकलशिवस्य शक्त्या साक्षात् सम्बन्धः। निष्कलस्य तु शक्त्या साक्षात् सम्बन्धो नास्ति। तत एवोक्तं शक्तिसहयोगादेव शवः शिवो भवति। इ-कार एव शिवस्य शक्तिं सूचयति। शक्तिविरहे तु स शवः (इ-काररहितः शिवः) निर्जीवः वर्तते। श्रीयन्त्रे शून्येन सूच्यमानः परमपुरुष एवायं निष्कलः शिवः। त्रिकोणनवकेन सूचितौ तु शक्तिसकलशिवाविति ध्येयम्। एतदेव शिवशक्तितत्त्वं सर्वत्रैवार्धनारीश्वरतत्त्वे निहितमस्ति। एतदेव तत्त्वं पार्वतीपरमेश्वरयोर्विवाहितजीवनस्य मूलम्। पार्वतीपरमेश्वरयोः संसार एव जगत्प्रपञ्च इति किमु वक्तव्यम्। किञ्च वैवाहिकजीवनेऽपि स्त्रीपुरुषयोर्मेलनेन एकमेव तत्त्वमाविर्भवति, तदेव चार्धनारीश्वरतत्त्वम्। यदाह कालिदासः—

तां नारदः कामचरः कदाचित् कन्यां किल प्रेक्ष्य पितुः समीपे।
समादिदेशैकवधूं भवित्रीं प्रेम्णा शरीरार्द्धहरां हरस्य॥

(**कुमारसम्भवम्**, १-५०)

एतदेवाभिलक्ष्य राधाकृष्णन् महोदयेनाप्युक्तम्—

"The aim of love is a happy harmony of man and women. The concept of ardhanārīśvara brings it out. The wife does not belong to the husband but makes a whole with him."

(**Meghadūta,** Sahitya Akademy edition, Introduction, p. 31)

रत्नद्वीपस्था देवी हस्तेषु बाणं कोदण्डं पाशं तथा अंकुशं च धारयति। बाणकोदण्डावेव कदाचिद् इक्षुकोदण्डावित्यप्युच्येते। एतेऽपि आयुधाः प्रतीकभूता इति किमु वक्तव्यम्। या च शक्तिः देवीत्युच्यते सा तु साधकहृदय एव वर्तते। तदेवंक्रमेण बाणकोदण्डौ देव्या इच्छाशक्तेः प्रतीकम्। पाशश्च ज्ञानस्य प्रतीकम्। एवमंकुशमपिक्रियाशक्तेः प्रतीकम्। व्याख्यानन्तरमते च पाशः रागस्य, अंकुशः क्रोधस्य, कोदण्डं मनसः, बाणश्च पञ्चतन्मात्राणां रूपरसगन्धस्पर्शशब्दानां प्रतीकम्। तथा हि **ललितासहस्रनामस्तोत्रत** इतः प्रागेवोद्धृतं यथा—

उद्यद्भानुसहस्राभा चतुर्बाहुसमन्विता।
रागस्वरूपपाशाढ्या क्रोधाकारांकुशोज्ज्वला॥
मनोरूपेक्षुकोदण्डा पञ्चतन्मात्रसायका।
निजारुणप्रभापुञ्जमज्जद्ब्रह्माण्डमण्डला॥ इति। (२. २-३)

तान्त्रिकपूजाप्रक्रियायामेवंविधानां कोदण्डपाशादीनाम् अंगुल्यादिमुद्रया इष्टदेवतायाः पुरतः प्रदर्शनं विहितमस्ति। वास्तविककोदण्डादीनां स्थाने प्रदर्शिता अंगुल्यादिमुद्राऽपि वस्तुतः परम्पराक्रमेण प्रतीकस्यापि प्रतीकरूपा भवतीत्यग्रे दर्शयिष्यते। साम्प्रतन्तु यन्त्रसाधनाविषये एकमुपनिषद्भूतं तत्त्वमत्रावधानमर्हति। श्रीयन्त्रादिकमवलम्ब्य साधको यदा समाराधयति तदा तेन तद्गतचित्तेन भवितव्यम्। तत्र तस्य तथाकारं तन्मयीभवनमपेक्ष्यते येन ज्ञातृज्ञेयज्ञानानां नितरामभिन्नत्वमाविर्भवेत्। यदुक्तम्—

ज्ञाता स्वात्मा भवेज्ज्ञानमध्यं ज्ञेयं बहिःस्थितम्।
श्रीचक्रपूजनं तेषामेकीकरणमीरितम्॥
(**तन्त्रराजतन्त्रम्** , ३५-६) इति।

एवंक्रमेण ब्रह्मतत्त्वेन साधकस्य सामरस्यं सम्भवति। एतच्च यन्त्रसाधनविषयमेकीकरणं रसचर्वणाविषयकतन्मयीभवनेन तुल्यम्। रसचर्वणायामपि तन्मयीभवनपूर्वकतया सहृदयेन यत्सुखं समनुभूयते तदपि विगलितवेद्यान्तरमानन्दमात्रं ज्ञानस्वरूपमात्रं यत्र ज्ञातृज्ञेयज्ञानानां नियमेनैव

एकीकरणं भवति[1] इति द्वितीयदर्शन एवैतन्निभालितम् । तदेवमेकमेव प्रतीकतत्त्वं रसमार्गं तथा परमात्मसाधनमार्गमप्यभिव्याप्नोतीत्येतदेवात्रास्माकमाकूतम् । तच्चाग्रेऽपि "रसतत्त्वोपासनातत्त्वयोः सम्बन्ध" इत्याख्ये परिच्छेदे सुविशदं दर्शयिष्यते ।

मुद्रादिपञ्चमकारतत्त्वम्

तान्त्रिकसाधनायां पञ्चमकारप्रयोगस्थले प्रतीकवादस्य विशेष उपयोग उपलभ्यते । मुद्रा–मद्य–मत्स्य–मांस–मैथुन–भेदेन पञ्चमकाराः । तत्र **कौलावलीनिर्णयमते** तण्डुलचूर्णनिर्मितमोदकविशेष एव मुद्रा । तच्च पिष्टकं मांसादिवदाहार्यम् । यदुक्तम्—

शेषं पूर्ववदाचर्य मुद्राश्च परिशोधयेत् ।
ब्रैहेयं मण्डलाकारं चन्द्रबिम्बनिभं शुभम् ॥
चारु पक्वमनोहारि शर्कराद्यैः प्रपूरितम् ।
पूजाकाले देवताया मुद्रैषा परिकीर्तिता ॥
भ्रष्टधान्यादिकं यद्यच्चर्वणीयं प्रकल्पयेत् ।
तस्याः संज्ञा स्मृता मुद्रा महामोदप्रवर्धिनी ॥
मुदं रातीति मुद्रा स्याद् यैनेका मुष्टिभेदतः ।
मुद्राश्च मोक्षयेदादौ शेषं पूर्ववदाचरेत् ॥ इति

(**कौलावलीनिर्णयः**, ५. २६–२९)

एतदनुसारं कोदण्डपाशादिकानां मुद्राव्यपदेशो न स्यात् । **भावनोपनिषद**ादिग्रन्थानां मते तु आवाहनी, संस्थापनी, संनिरोधनी, अवगुण्ठनी, सन्निधापनी, हेतिः (वाणः, धनुः, अंकुशः, पाशः), नमस्क्रिया, संक्षोभनी, द्राविणी, आकर्षणी, वश्या, उन्मादनी, महांकुशा, खेचरी, बीजं, योनी, शक्त्युत्थापनी (त्रिखण्डा) चेति विंशतिविधाः मुद्राः । (**भावनोपनिषद्**–१२, **तन्त्रराजतन्त्रम्** ४. ३०–३१) । मुदं रातीति मुद्रा इति निर्वचनन्तु आसामपि संगच्छते । (**तन्त्रराजतन्त्रम्** , ४, ५८) । आसामेव पुनः स्थूल–सूक्ष्म–पर–भेदेन त्रैविध्यम् **भावनोपनिषदि** (२१–२४) तथा **तन्त्रराजतन्त्रे** परिकीर्तितम् । अंगुल्या पाशादिरूपविरचनेन स्थूलमुद्रा, मन्त्रेण तथाकारं

---

१. ज्ञातृ–ज्ञेय–ज्ञानानामभेदतत्त्वं भर्तृहरिप्रतिपादितेन भोक्तृ–भोक्तव्य–भोगाभेदतत्त्वेन तुलनीयम् । तथा चोक्तम्—

एकस्य सर्वबीजस्य यस्य चेयमनेकधा ।
भोक्तृभोक्तव्यरूपेण भोगरूपेण च स्थितिः ॥ (**वाक्यपदीय. १–४**)

मनसि स्मरणेन सूक्ष्ममुद्रा, तत्त्वत एव कोदण्डादीनां प्रयोगेण परमुद्रा भवतीति ज्ञेयम् । यदाह—

मुद्राः स्युस्त्रिविधा देवि रचनामन्त्रतत्त्वतः ।
स्थूलसूक्ष्मपराख्यातास्तत्त्रैविध्यं शृणु प्रिये ॥
रचनामन्त्रयो रूपं कथितं तव साम्प्रतम् ।
तत्त्वरूपाण्यंगुलयोः भूतान्यंगुष्ठतः क्रमात् ॥

(**तन्त्रराजतन्त्रम्**, ४. ५५-५६) इत्यादि ।

तदेवं मुद्राव्यवहारविषये अनल्पमेव प्रतीकप्रयोगप्राबल्यमुपलब्धव्यमस्तीति दिक् । किञ्च, मद्य-मैथुनादिप्रयोगप्रसंगेऽपि प्रतीकव्यवहारस्य सैव वार्ता । बहुष्वपि तन्त्रग्रन्थेषु पञ्चमकाराणां यथार्थत एव प्रयोगो विधीयते । किन्तु बहुतरेष्वपि ग्रन्थेषु पञ्चमकाराणां प्रतिनिधिप्रयोग एवोपदिश्यते । प्रतिनिधिप्रयोगस्तु प्रतीकव्यवहारप्रक्रियायाः परां काष्ठां विगाहते । प्रतिनिधिरेव अनुकल्प इत्यप्युच्यते । तत्रानुकल्पप्रयोगविषये दिङ्मात्रेण शास्त्रीयविधिर्यथा—

एतत्तु कथितं द्रव्यं सर्वसिद्धिप्रदायकम् ।
द्विजानामनुकल्पन्तु न साक्षाच्च विकल्पिनाम् ॥
अथातः संप्रवक्ष्यामि द्रव्यादिपरिकल्पनम् ।
ब्राह्मणस्ताम्रपात्रे तु मधु मद्यं प्रकल्पयेत् ॥
अथवा ताम्रपात्रेषु गव्यं दद्याद् घृतं विना ।
नारिकेलोदकं कांस्ये गुडार्द्रकं तथैव च ॥
गौडी देया क्षत्रियेण माध्वी वैश्येन तत्र वै ।
सर्वं शूद्रेण दातव्यं यत्र वा तद्रुचिर्भवेत् ॥

इति **कौलावलीनिर्णये** (५. ११२-११५) ।

एवमेव मकारेषु द्रव्यविशेषस्य द्रव्यान्तरं प्रतिनिधिर्भवति । मैथुनक्रियायाश्चापि क्रियान्तरं प्रतीकमस्ति यथा—

अपरापुष्पगर्भे तु कुलस्थानं मनोरमम् ।
सर्वसुखं भवेत् तत्तु महाकामकलात्मकम् ॥
हयारिकुसुमे नित्यं स्वयमस्ति सदाशिवः ।
तन्मुखे द्रव्यमादाय पुष्पमध्ये तु चन्दनम् ॥
रक्तकुंकुमरागं वा भिन्नं तत्त्वं शिवात्मकम् ।
योजयेच्छिवशक्त्योस्तु ऐक्यं सम्भावयन् धिया ॥

इति **कौलावलीनिर्णये** (५. १२१-१२४) ।

अपरापुष्पस्य हयारिपुष्पेण संयोग एव सादृश्यवशतो मैथुनस्य प्रतीकम्। किन्तु मैथुनस्यापि किञ्चित् भावविषयकं तात्पर्यमस्ति। तथा हि भावानुसारं मानसिकोत्कर्षतारतम्यानुसारं साधकास्त्रिविधाः। दिव्यसाधकः, वीरसाधकः, पशुभावसाधकश्चेति। वीरभावसाधको मुख्यार्थत एव, स्वरूपत एव पञ्चमकाराणां प्रयोगं करोति। पशुभावसाधकः अनुकल्पानामेव प्रयोगं विधत्ते। दिव्यभावसाधकस्तु आभ्यन्तरीणध्यानेनैव पञ्चमकाराणां प्रयोगं कल्पयति।[31] आभ्यन्तरीणध्यानविषये मैथुनस्य तात्पर्यन्तु कुण्डलिन्या सह जीवात्मतत्त्वस्य संगोगः। यदुक्तम्—

सूक्ष्मरूपकमात्मानं शक्तिं कुण्डलिरूपिणीम्।
जिह्वां मूलमयीं चिन्त्य योनिञ्च कुलरूपिणीम्॥
कुलाकुलविभागेन आत्मानं नीयते त्वयि।

इति **कौलावलीनिर्णये** (५. ६१-६२)।

तदेवं जीवात्मतत्त्वस्य कुण्डलिन्या संयोग एव मूलं वस्तु। मैथुनं तस्य प्रतीकम्। हयारिकुसुमापरापुष्पयोस्संयोगस्तु तस्य प्रतीकस्यापि प्रतीकमिति सर्वत्रैवेदृशी परम्परानुसन्धेया इति दिक्। अत्र यथा कुण्डलिनी एव योनीरूपा तथैव महायानबौद्धतन्त्रात्मकेषु चर्यापदेष्वपि कुण्डलिनी नारीरूपेण वर्ण्यते। तच्च चर्यापदादिगतप्रतीकप्रयोगविचारप्रसंगे अनुपदमेव विशदीक्रियते।

चर्यापदादिषु प्रतीकप्रयोगः

महामहोपाध्यायहरप्रसादशास्त्रिमहोदयेन नेपाल आविष्कृतेषु महायानबौद्धतान्त्रिकतत्त्वसंवलितेषु चर्यापदेषु प्रतीकस्य प्रयोगः प्रतिपदमेवोपलभ्यते प्रकामम्। तत्र दिङ्मात्रेणोदाहरणं यथा शवरपादानाम्—

उचा उचा पावत तँहि वसइ सवरी वाली।
मोरंगि पिच्छ परिहिण सवरि गिवत गुञ्जरी माली।
उमत सवरो, पागल सवरो माकर गुली गुहाडा तोहोरि।
णिअ घरिणी नामे सहज सुन्दारी॥
नाना तरुवरमौलि लरे गअणत लागेलि डाली।
एकेली सवरी एवन हिण्डइ कर्णकुण्डलवज्रधारी॥

(**चर्या सं** २८)। इति।

---

31. "Ordinarily the Divya Sādhaka follows the inner (Ābhyantarīṇa) Pañcatattva by Dhyāna; the Vīra the primary (Mukhya) Pañcatattva in their literal sense; and the substitutes are for Pashubhāva." (Avalon, **Kālīvilāsatantra,** Introduction, p. 4)

अत्रायमापातलभ्योऽर्थः—काचन मयूरपुच्छसमलंकृतमूर्धजा गुञ्जाहार-सुशोभितग्रीवा नितान्तम् उद्भिन्नयौवना शबररमणी सच्छन्दमुच्चतरेषु पर्वतशिखरेषूपवेशनसुखमनुसन्धत्ते। सा च दूरतो वन्यशकुनभ्रान्तिं जनयति। तत एव तामेवाभिलक्ष्यास्त्रं व्यापारयितुमुद्युक्तः कश्चन शवरः उमत सवर इति पादद्वयेन निवार्यते।—हे उन्मत्त शवर, हे उन्माद शवर, मा खलु मयि अस्त्रं निक्षिप। इदं खलु सविनयमावेदनं तव प्रणिधानमर्हति। अहन्तु वस्तुतस्तवैव गृहिणी नाम्ना सहजसुन्दरी—इति। तस्य पर्वतप्रदेशस्य विभिन्नवृक्षाणां शीर्षभागः कम्पते। वृक्षशाखा च गगनं स्पृशति। तस्मिन्नवसरे कर्णकुण्डलवज्रधारिणी एकाकिनी एव सा शबररमणी तद्वनमाहिण्डते।

अत्र व्यंग्यार्थस्तु एवंरूपः—साधकस्य हृदयगुहायां देहे वा कुण्डलिनी निलीना वर्तते। सा च साधकस्य सहजा साधकेन आजीवनं वर्तमाना **साधकस्य** गृहिणीरूपा अवश्यमेव साधकेन सुस्थिरमनसा यथायथं परिचेतव्या। तदेवं **शबररमणी** कुण्डलिन्याः प्रतीकम्, शबरश्च साधकस्य प्रतीकम्। शहजसुन्दरीति पदेन च महायानबौद्धतन्त्राद्यभिमतः सहजमार्गोऽप्यभिव्यज्यत इति प्रतिभाति। यदा च साधकः शकुनभ्रान्तिं परित्यज्यास्त्रसंवरणपूर्वकं शबररमणीमर्थात् कुण्डलिनीं स्वरूपतः परिचिनोति तदा साधकस्य साधनं प्रारभते। वृक्षशाखा च इन्द्रियस्य प्रतीकम्। आकाशः परममहत्परिमाणवान् परमात्मतत्त्वस्य प्रतीकम्। साधकस्य साधने प्रारब्धे तदिन्द्रियाणि परमात्मतत्त्वं स्पृशन्ति। तदिन्द्रियाणि पार्थिवविषयेभ्य ऊर्ध्वं गत्वा परमात्मतत्त्व एव प्रलीयन्ते। तदा च साधकस्य मनोगहने नान्यत् किञ्चिदवशिष्यते किन्तु वेद्यरूपेण केवलं कुण्डलिनी एवावशिष्यते। तत एवोक्तमेकाकिनी शबरी तद्वनमाहिण्डत इति।[1] वज्रधारीति पदेनाऽपि च बौद्धवज्रयानमार्गस्याभिव्यञ्जनं भवतीति समुन्नेतुं शक्यते। अत्र वृक्षशाखा यथा इन्द्रियस्य प्रतीकं तथैव **लुइपादेन** विरचितायामपि दोहायां पञ्च

१. टीकाकारस्य मुनिदत्तस्य मते व्यंग्यार्थस्तु एवंरूपः—योगीन्द्रस्य कायकंकालदण्डसमुन्नते सुमेरुशिखराग्रे महासुखचक्रे नानाविचित्रपक्षविकल्परूपं मयूरपूच्छं परिदधाना ग्रीवायां (सम्भोगचक्रेऽपि) गुह्यमन्त्ररूपां गुञ्जामालां धारयन्ती भगवती **नैरात्मा** निर्वाणसुखात्मिका विराजते। सा एव भावकायाश्वासं ददाति—भो उन्मत्त विषयविह्वलचित्त शबर मद्विषये आनन्दादिविकल्पं मा कुरु। अहं तव गृहिणी ज्ञानमुद्रा सहजसुन्दरी—इति। एवमेव शबरीपदस्य नैरात्मदेवीपरकत्वेनैव व्याख्यायते समग्रोऽपि ग्रन्थः। यथा तथा वास्तु, सर्वथैव चर्यापदेषु व्यंग्यार्थस्यानल्पं भारमाविर्भवतीति सुभणमेतत्। विस्तरस्तु मनीन्द्रमोहनवसुसम्पादिते चर्यापदे द्रष्टव्यः! (पृ. १३५–१४६)।

इन्द्रियाणि देहरूपिणो वृक्षस्य पञ्च शाखा इत्युच्यन्ते । यदुक्तं—काआ तरुवर पञ्च वि डाल—(**चर्या सं**-१) इति । **काह्नपादे**नाऽपि मनोरूपस्य वृक्षस्य पञ्च इन्द्रियाणि शाखा भवन्तीति प्रतिपादितम् । यथा—मनतरु पाञ्च इन्दि तसु साहा—इति (**चर्या सं**-४५) । वृक्षशाखानामिन्द्रियत्वेन व्यवहारः पूजाकर्मणि घटस्थापनप्रक्रियायामपि प्रसिद्धः । तथा हि साधकः स्वदेहमेव देवमन्दिररूपेण परिकल्प्य तत्रत्यां देवतां पूजयेत् । यदुक्तं **स्कन्दोपनिषदि**—

देहो देवालयः प्रोक्तः जीवो देवः सनातनः ।
त्यजेदज्ञाननिर्माल्यं सोऽहंभावेन पूजयेत् ॥ इति ।[1]

तथा हि घटः देहदेवालयस्यैव प्रतीकम् । तत्र भगवद्बुद्धिं कृत्वा साधकः पूजयति ।[2] घटस्तु गुहारूपः । स च अन्नमय-प्राणमय-मनोमय-विज्ञानमय आनन्दमय इति पञ्चकोशात्मकस्य जीवदेहस्य प्रतीकम् । घटे स्थापितं जलं साधकस्य भावप्रवाहस्य प्रतीकम् तत्रत्यं पञ्चरत्नं पञ्चतन्मात्राणां प्रतीकम् । पञ्चपल्लवानि च घटमुखे स्थापितानि ज्ञानेन्द्रियाणां प्रतीकत्वं यन्तीत्यलं बहुना ।

आधुनिककाव्यमीमांसकानां **मिष्टिक्**संज्ञामवगाहमानेषु रहस्यवादपरिपुष्टेषु **चर्यागीतेषु** यथा प्रतीकप्रयोगस्य प्राधान्यं तथैव तच्छायानुग्राहिषु वंगीय—**बाउलगीतेषु** अथवा असमीय—**देहविचारगीतेषु** तद्भिन्नेष्वपि तत्सदृशेषु अन्येषु भाषागीतेषु प्रतीकप्रयोगस्य प्राधान्यमनन्यसाधारणत्वेन विराजते । तद्यथा असमीय—**देहविचारगीतेषु** देहस्तु नवद्वारं पुरम् । तदभ्यन्तरं पूर्णानन्दो हरिर्विराजते । तस्मिन् गृहे च एका एव गृहिणी । यस्तु तामवलोकयितुं शक्नोति स एव महामुनिर्भवति । यदुक्तम्—

नौखान दुवारे थैला नौटा दुवरी ।
माजत वसिया रैला पूर्णानन्द हरि ॥.....
एक जना कन्या आछे घरर घरिणी ।
ताक येये पावा देखा होवे महामुनि ॥ इति ।

अस्य च प्रतीकव्यवहारस्यादिमतमदृष्टान्तो वैदिकवाङ्मय एव उपलभ्यत इति प्रागेव उक्तम् । पारसीकसुफीदर्शनवादिनामपि कवीनां **मिष्टिक्**—

1. Dr D. N. Shukla, The Philosophy of Vāstu-Brahma, **Proceedings and Transactions, XXII All India Oriental Conference**, P. 201 इत्यत्र समुद्धृतम् ।

२. —ततो हंस इति मन्त्रेण जीवादिकं स्व-स्वस्थाने संस्थाप्य देवरूपमात्मानं विचिन्तयेत् । —(**पुरोहितदर्पणे** भूतशुद्धिप्रकरणम्, पृ. ३३)

पदाभिधानयोग्येषु काव्येषु प्रतीकप्रयोगस्य सममेव प्राधान्यमनपह्नवनीयं वर्तते। किं बहुना, वाग्व्यवहारस्य प्रतीकात्मकत्वाभ्युपगमं विना तेषां काव्यानां तात्पर्यार्थस्तु लेशतोऽपि नावभासते। तत्र खलु ईश्वरी नायिका साधकस्तु नायकः। साधकस्य भगवदाराधनायां या तन्मयता सा एव मदिरा (मै)। या खलु षोडशी भगवत्प्रेमात्मकं पानपात्रं वितरति सा साकी इत्युच्यते। एवमेव सर्वथा प्रतीकप्रयोगस्वीकाराभावे तेषु पद्येषु कश्चनासभ्य एवार्थः समुदियादित्यलं बहुना।[1]

पूजादिकर्मसु प्रतीकप्रयोगः

इतः पूर्वं पूजाविषयभूतायाः प्रतीमायास्तथा घटस्य प्रतीकात्मकत्वं निभालितम्। साम्प्रतं प्रतिमाया घटस्य वा समक्षं यत् पूजाकर्म विधीयते तस्यापि प्रतीकात्मकत्वं कथ्यते। पूजायां प्रदर्शितानां मुद्रादिकानां तथा पूजायां नैवेद्यत्वेन प्रदत्तानां मद्यमांसादिकानां प्रतीकभूतत्वमुक्तमेव। वस्तुतस्तु श्रद्धाभाजनं प्रति प्रीतिप्रकाशात्मिका क्रिया एव पूजा भवति। प्रीतेर्मनोभावविशेषभूतत्वात् सर्वमपि पूजाकर्म मानसिकमेव भवितुमर्हति। तत एव यद्यपि पूजायां स्थूलवस्तूनां नैवेद्यरूपेण प्रयोगो विधीयते तथापि मानसपूजायाः विशेषस्थानमस्ति।[2] मानसपूजायां च भूस्वर्गपातालेषु यद्यद् अप्रमेयं द्रव्यं तत्सर्वं बलिरूपेण प्रकल्प्य अनाहतध्वनिमयघण्टानादेन निवेद्य निर्द्वन्द्वजपमारभेत् साधकः। वास्तविकद्रव्यैर्या पूजा साऽपि वस्तुतः प्रतीकात्मिका एव यतो हि तत्र स्थूलवस्तु प्रति या प्रीतिः सैव भूमप्रीतौ पर्यवसिता

---

1. "Sūfi poets invented a technical terminology for manifesting their love-devotion, and without a proper knowledge of the **Symbolism** used by them their poems are likely to appear materialistic and even obscene. We have already noticed that in Sūfi poems God is the beloved and the devotee the lover. The inspiration required for the union of the two is called 'mai' (wine); the youngstar who circulates the wine is the Saqī (cup bearer), whose handsome face and figure makes the devotee restless with joy."

(F. C. Davar, **Iran and its Culture**, P. 273)

२. बाह्यपूजाक्रमेणैव ध्यानयोगेन पूजयेत्।
संपूज्य चिन्तयेद् देवं वचसा मनसा हृदा॥
तथैव साधको लोके चान्तर्योगपरायणः। इति पुरोहितदर्पणोद्धृतं (पृ. ४१-४२) मुण्डमालातन्त्रवचनमत्रावलोकनीयम्।

भवतु इत्याशयेनैव द्रव्यत्यागो भवति। किञ्च तान्त्रिकपूजां विहाय अन्वेष्वपि वैदिकयागयज्ञादिषु दशसंस्कारेषु च प्रायशः सर्वमपि कर्मजातं प्रतीकात्मकमेव भवति। तद्यथा दीक्षणीयेष्टौ (**ऐतरेयब्राह्मणोक्तायां**) यजमानः मुष्टी कुरुते। यथा जन्मनः प्राक् गर्भावस्थायां शिशुः मुष्टी कुरुते तथैवायं यजमानः मुष्टी कुरुते। यजमानश्चानया दृष्ट्या दीक्षितः सन् द्विर्जन्म लभते। दीक्ष्यमाणो यजमानो गर्भस्थशिशुतुल्य इति भावेन मुष्टी कुरुते इति मुष्टीकरणस्य जन्मपूर्वावस्थासूचकत्वेन प्रतीकत्वमित्यलं बहुना। एवं विवाहसंस्कारेऽपि ध्रुवदर्शनस्य प्रतीकरूपता विस्पष्टं समासादनीया। एतच्च ध्रुवदर्शनकर्म **पारस्करगृह्यसूत्रे** (१-८) विहितमस्ति। विवाहकाले उभाभ्यामपि स्त्रीपुरुषाभ्यां ध्रुवदर्शनं कार्यम्। तत्र पुरुषो ब्रूते—ध्रुवमसि ध्रुवं त्वा पश्यामि।—इति। तद्भार्यापि अनुब्रवीति—ध्रुवैधि पोष्ये मयि। इति। एवमेवैतद् ध्रुवदर्शनकर्म स्त्रीपुरुषयोरुभयोरपि दाम्पत्यजीवनस्य परस्परं दृढप्रेमानुबन्धानुसन्धानकर्मणः प्रतीकम्। अस्य प्रतीकात्मकस्य कर्मण ऐतिह्यम् तावत् कालिदासस्य **कुमारसम्भवे** हरगौरीविवाह एवानुसन्धीयताम्। यदाह—

ध्रुवेण भर्त्रा ध्रुवदर्शनाय प्रयुज्यमाना प्रियदर्शनेन।
सा दृष्ट इत्याननमुन्नमय्य ह्रीसन्नकण्ठी कथमप्युवाच॥
(७-८५) इति।

देवालयस्य प्रतीकरूपता

देवालयस्थितायाः प्रतिमायाः प्रतीकरूपत्वमुक्तम्। सा यत्र स्थाप्यते स देवालयोऽपि प्रतीकरूप एव। तथा हि मूलत एव स देवालयो वास्तुब्रह्मणः प्रतीकम्। पाञ्चभौतिकं यज्जगत् तत्तु पाञ्चभौतिकजीवदेहान्न भिद्यते। जगतो यादृशः सृष्टिक्रमो लयक्रमो वा जीवस्यापि तादृश एव। तस्मिन्नेव जीवदेहे भगवतत्त्वं मूलतोऽनुसन्धेयमिति पूर्वमेव बहुधा प्रतिपादितम्। ततश्च देह एव देवालयः प्रोक्तः। तदेवं देहो यथा देवालस्य प्रतीकं तथैव देवालयोऽपि जीवदेहस्य प्रतीकम्। अथवा देवालयः परमपुरुषदेहस्य प्रतीकम्। विश्वप्रपञ्च एव परमपुरुषस्य देहरूपः। ततश्च देवालय एव विश्वप्रपञ्चस्य प्रतीकम्। विश्वप्रपञ्चोऽपि ब्रह्मणोऽभिन्नः। तदेव ब्रह्मास्मिन् प्रसंगे वास्तुब्रह्म इत्युच्यते। देवालयस्तु तस्यैव वास्तुब्रह्मणः प्रतीकम्। विश्वप्रपञ्चे यथा ब्रह्मतत्त्वं निलीय वर्तते, जीवदेहे च यथा आत्मतत्त्वमन्तर्निहितं वर्तते तथैव देवालयेऽपि भगवत्तत्त्वमन्तर्निहितमस्ति। तदेवं देवालयस्य देहरूपत्वादेव जीवदेहे प्रयोज्यम् अंकुरारोपण-गर्भविन्यास-प्रदक्षिण-नयनोन्मील-

नादि कर्मजातमत्रापि संगच्छते। अत एव **अग्निपुराण-हयशीर्षपञ्चरात्र-शिल्परत्न**-प्रभृतिषु ग्रन्थेषु देवालयांगानां देहांगरूपेण वर्णनमस्ति। दिङ्मात्रेणोदाहरणं यथा—

प्रासादं वासुदेवस्य मूर्तिभेदं निबोध मे।
धारणाद्धरणीं विद्धि आकाशं शुषिरात्मकम्॥
तेजस्तत् पावकं विद्धि वायुं स्पर्शगतं तथा।
पाषाणादिष्वेव जलं पार्थिवं पृथिवीगुणम्॥
प्रतिशब्दोद्भवं शब्दं स्पर्शः स्यात् कर्कशादिकम्।
शुक्लादिकं भवेद् रूपं रसमन्नादिदर्शनम्॥
धूपादिगन्धो भवेत्तत्र वाङ्मन्त्रादिषु संस्थिता।

(**अग्निपुराणम्** ६१. १९-२२)

इत्येतावता देवालयदेहस्य पञ्चमहाभूतात्मकत्वमुक्तम्। तथैव—

शुकनासाश्रिता नासा बाहू तद्रथकौ स्मृतौ।
शिरस्त्वण्डं निगदितं कलसं मूर्द्धजं स्मृतम्।
कण्ठं कण्ठमिति ज्ञेयं स्कन्धं वेदी निगद्यते॥
पायूपस्थे प्रणाले च त्वक् सुधा परिकीर्तिता।
मुखं द्वारं भवेदस्य प्रतिमा जीव उच्यते॥

(**अग्निपुराणम्** ६१. २२-२४)

इत्येवंक्रमेण देवालयस्य ज्ञानेन्द्रियकर्मेन्द्रियादियुक्तत्वात् स्थूलदेहरूपत्वं प्रतिपादितम्। तथैव—

पायूपस्थौ प्रणालौ द्वौ नेत्रौ ज्ञेयौ गवाक्षकौ।...
जंघा जंघा तु विज्ञेया वरण्डी वसना मता।...
गर्भः स्थिरत्वं विज्ञेयो मुखं द्वारं प्रकीर्तितम्। इत्यादिकञ्च

हयशीर्षपञ्चरात्रे

(३९ अध्याये) वर्णितमत्र तुलनामर्हति। किञ्चास्मिन् विषये—

प्रासादं पुरुषं मत्वा पूजयेन्मन्त्रवित्तमः।
प्रपदं पादकं विद्याच्छिता स्तूपीति कथ्यते॥
लोहकीलकपत्रादि सर्वं दन्तनखादिकम्॥
सुधा शुक्लं त्विष्टकौघमस्थिमज्जा च पीतरुक्।
भेदः श्यामरुचिस्तद्वद् रक्तं रक्तरुचिस्तथा॥
मांसं मेचकवर्णं स्याच्चर्म नीलं न संशयः।
त्वक् कृष्णवर्णमित्याहुः प्रासादे सप्तधातवः॥

(**शिल्परत्नम्**, १६, १२१-१२३)

इत्यादिकमप्यवलोकनमर्हति । देवालय एव प्रासाद इत्युच्यते । स एव परब्रह्मणो गृहम् । न त्वयं बौद्धचैत्यादिवत् प्रार्थनागृहमात्रं भवति । किन्तु इष्टदेवताया एव आवासः । तत एव देवमूर्तिसमन्वितस्य मूलमन्दिरस्य गर्भगृहम् इति समाख्या वर्तते । यथा चेष्टदेवता प्रदक्षिणकार्यमर्हति तथैव देवालयोऽपि प्रदक्षिणकार्यमर्हति । तदर्थञ्च देवालयस्य समन्तात् कश्चन प्रदक्षिणपथोऽपि वर्तते । तदेवं देवदेवालयोरभेदारोपणाद् देवालयोऽपि देववदेवार्हणामर्हति । तत एव देवालयस्य परब्रह्मप्रतीकभूतत्वं संगच्छते । तदेवं देवालयस्यैव देवताबुद्धया प्रवेशकाल एव द्वारदेश एव प्रणामादिकं युज्यते । यदुक्तम् **ईशानशिवगुरुदेवपद्धतौ**—

प्रासादं यच्छिवशक्त्यात्मकं तच्छक्त्यन्तैः स्याद् वसुधाद्यैस्तु तत्त्वैः ।
शैवी मूर्तिः खलु देवालयाख्येत्यस्माद् ध्येया प्रथमं वाभिपूज्या ॥
(३. १२) इति ।

अत्रायमाशयः । प्रासादं शिवशक्त्यात्मकम् । तच्च वसुधाद्यैरर्थात् क्षित्यादिपञ्चभूतैर्निर्मितम् । पञ्चभूतान्यपि तच्छक्तिसमन्वितान्येव । एवमेव देवालयः स्वयमेव इष्टदेवतामूर्तिरूपः । तत एव तस्य प्रथममेव ध्यानं पूजनं वा कार्यमित्यवदातमेतत् ।

पताकारहस्यम्

सूत्रधारकृतारम्भैर्नाटकैर्बहुभूमिकैः ।
सपताकैर्यशो लेभे भासो देवकुलैरिव ॥ (**हर्षचरितम्**-१)

इत्येवमभाणि बाणभट्टेन । तदेवं देवकुलं दूरादेव पताकाभिः शोभत इति नियमः । वृक्षादिभिर्मूलमन्दिरस्याच्छादितत्वात् दूरतो भक्तैः पताका एवावलोक्यते । तदेवं पताका देवकुलावस्थानं सूचयतीति हेतोः पताका देवकुलस्याभिव्यञ्जिका । तत एवास्याः प्रतीकत्वम् । किञ्च पताकाया वर्णाकारादिभिरेव देवकुले पूजिताया देवताया अपि स्वरूपमुपलब्धुं शक्यते । एवञ्च राजनैतिकमतविशेषमथवा धर्मीयमतविशेषमपि सूचयितुं पताका प्रयुज्यते । एवन्तर्हि महम्मदीयधर्मे व्यवहृता हरित्पताकाऽपि प्रतीकरूपा भवितुमर्हति । किन्तु महम्मदीयधर्मे प्रतीकव्यवहारो नियमेनैव नाभ्युपगम्यत इति कथमेतत् । उच्यते । साम्प्रतं बहुव्यवहृता महम्मदीयपताका हरिद्वर्णा । तस्याश्च सनक्षत्रैका चन्द्रकला विराजते । हरिद्वर्णं तत्र यथाकथञ्चिदेव व्यवहृतं न तु तात्पर्यविशेषानुधावनसमीहया । किञ्च निर्दिष्टतात्पर्याभावात् सम्प्रदायभेदेन पताकाया वर्णस्य भेदोऽपि समजनि । आब्बासादीयैः कृष्णवर्णं स्वीकृतम । तेषां पताकायां खाकानिनामकेन कविना स्वर्णशकुन-

स्यैव चित्रं परिलक्षितं न तु चन्द्रकलायाः। फतेमीयैः हरिद्वर्णमुरीकृतम्। उम्मेयादीयैस्तु शुक्लवर्णमेव गृहीतम्। तुरस्केभ्य एव सनक्षत्रा चन्द्रकला समायाता। तस्या अपि इतिवृत्तं सुविस्पष्टं परिज्ञातुं न शक्यते। तदेवं घुणाक्षरन्यायेन कालप्रवाहेणैव सा पताका हरिद्वर्णं लभते तद्गतं चित्रमपि वर्तमानरूपतां विगाहते। न तु तत्राभिव्यंग्यः तत्त्वविशेषस्समस्ति। अत एव तस्याः प्रतीकत्वं नास्तीत्यपि वक्तुं युज्यते[1]। तथापि अस्मन्मते महम्मदीयपताकाया अपि सामान्यभावेन प्रतीकरूपता न व्याहन्यते। तथा हि वर्णचित्रादिकानां तात्पर्यविशेषाभावेऽपि सा हरित्पताका सामान्यभावेन महम्मदीयधर्मस्यैव प्रतीकमिति केनापि अपलपितुं न शक्यते। देशविशेषस्य प्रतीकभूततया पताकाविशेषो यथा तद्देशीयानां विशेषश्रद्धां समश्नुते तथैवेयं पताका सर्वेषामपि महम्मदीयसम्प्रदायगतानां जनानां श्रद्धामवगाहत इति प्रतीकतत्त्वस्यैव भूषणमेतत्।

राष्ट्रविशेषस्य प्रतीकरूपेण न केवलं पताका एवापितु मुद्रा(सिम्बल्)-विशेषोऽपि व्यवह्रियते। तदुभयोरपि प्रकृष्टतममुदाहरणं भारतराष्ट्र एवोपलब्धव्यम्। तदुभयोरपि तात्पर्यं वांगालोरनगरे संस्कृतविश्वपरिषदोऽष्टमाधिवेशने ड० भि० राघवन्महोदयेन प्रकाशित इति समुद्घोषिते श्रीमनोरञ्जनशास्त्रिविरचिते **पताकाम्नाये** सुविशदमुपलभ्यते। राष्ट्रीयपताका अथवा राष्ट्रीयमुद्रा व्यञ्जनाप्रपञ्चस्यैव विषय इत्यत्र ग्रन्थनाम्नोऽधस्तात् प्रदत्तं 'भारतराष्ट्रीयमुद्रापताका-**व्यञ्जितार्थ**व्याख्यानात्मको ग्रन्थः' इति ग्रन्थ-

---

1. "Symbolism is unknown to Islam and there is nothing in it as a religion possessing any religious significance. With the exception of the above-mentioned **Panja** or **Alam,** kept up during the Moharrum in various shapes, the most common being the palm of the hand, there may be said to be no symbols used in it or sanctioned by it. It is not even known whether the standard used by the Prophet and his early successors had any figure in it, though it was called the **Eagle** (or the Uqab). The Abbasides adopted the black colour for their standard and their official dress. Their standard, as seen by Khaqani, the Irānian poet, had the figure of the golden eagle on the top. The Fatamids adopted the green colour and the Umayyeds the white. The history of the Crescent and the Star used by the Turks is obscure..." (A. M. A. Shushtery, **Outlines of Islamic Culture,** p. 55 4)

कृद्वचनमेव मानम्। "वस्तुजातानां प्रतीकात्मकत्वव्याख्याने गूढार्थव्याख्याने वा प्राचीनभारतीयपण्डितानां कल्पनाप्रकर्षः विशेषतः प्रवल्गते। पताकाम्नाये ग्रन्थकारेण स एव कल्पनाप्रकर्षः प्रकामं प्रकटितः। राष्ट्रनायकैः महदादर्शविशेषानुधावनक्रमेण तथा प्रतीकात्मकत्वहेवाकिभिरेव यथालब्धरूपेण राष्ट्रीयमुद्राया राष्ट्रीयपताकायाश्च चयनं कृतमित्यत्र नास्ति कोऽपि सन्देहावकाशः।" इति राघवन्—महोदयेनापि सुशोभनमभाणि[1]। शास्त्रिमहोदयेन तु कल्पनाप्रवणतया बहुलतरा एवार्था अत्र समुद्भाविताः। तद्ग्रन्थानुसरणक्रमेणैवास्माभिरप्यत्र दिङ्मात्रेण मुद्रायाः पताकायाश्च तात्पर्यं प्रतिपाद्यते। तथा हि अशोकस्तम्भाद् गृहीतां राष्ट्रीयमुद्रां व्याख्यानयन्नाह—

स्वातन्त्र्यमभयं वीर्यं शौर्यं चेति चतुष्टयम्।
संहतैर्हरिभिर्ज्ञेयं स्वतस्तद्गुणवत्त्वतः॥ (१–८)
एवं भारतराष्ट्रस्थाः स्वतन्त्राश्चापरिग्रहाः।
स्वावलम्बाश्च जीवेयुर्न बिभीयुः कुतश्चन॥ (१–११)
स्वेतरनिरपेक्षाश्च स्ववीर्येणात्मरक्षणे।
समर्था द्विषतः शत्रून् जयेयुः स्वबले स्थिताः॥ (१–१२) इति।
चतुर्णां समभावेन परस्परानुकूल्यतः।
गुणानां युगपत् स्थित्या प्रीतिः सर्वत्र राजताम्॥
(१–१५) इति च।

किञ्च, साम दानं च भेदश्च दण्डश्चेति चतुर्विधा।
नीतिः परस्परापेक्षा सिंहसंहतिलक्षिता॥ (१–१६)

इत्यादिकमप्यत्रावलोकनीयम्। मुद्राया यज्ञप्रतीकभूतत्वमपि प्रत्यपादि यथा—

तदधोऽवस्थितं चक्रं महोक्षहयमध्यगम्।
अग्नीसोमान्वितं सर्वं यज्ञरूपं प्रवर्तते॥ (१–२०)

---

1. "Symbolism and esoteric interpretation are trends in which the traditional Sanskrit mind always revels. It is this trend that the author pursues in this work. There is no doubt that in a spirit of high idealism and with certain symbolic ideas in mind that these two, the Emblem and the Flag, as we have them, were chosen by the leaders." (V. Raghavan, Foreword to **Patākāmnāya, p. 2**)

अश्वोऽग्निर्वृषभः सोम आधाराधेयभावतः ।
आभ्यां सम्पद्यते यज्ञो यस्मादिष्टफलं लभेत् ॥ (१-२१) इति ।

हयवृषभयोरादर्शविशेषप्रतिपादकत्वं यथा—

त्यागात्मा वृषभो ज्ञेयो भोगात्माश्वः प्रतीयताम् ।[1]
तेन त्यक्तेन भुञ्जीथा इत्येवं श्रुति-चोदना ॥ (१-३४) ।

एवमेव यदधिकाधिकं शास्त्रीयं तात्पर्यं शास्त्रिमहोदयेनाग्रे निभालितं तन्मूल एवानुसन्धेयमित्यास्तां तावत् । मुद्रागतस्य चक्रस्य तु कालचक्र-भैरवी-चक्र-श्रीचक्रयुगचक्र-जगच्चक्र-विष्णुचक्र-ज्योतिषचक्र-बौद्धधर्मचक्र-गान्धीय-सूत्रचक्रादिप्रतीकभूतत्वेनानल्पमविरलं तात्पर्यजातं नितरामनुरञ्चयति तत्त्वविदां हृदयमिति भारतीयप्रतीकपरम्पराया एवात्र गौरवम् ।

प्रसंगप्राप्ततया राष्ट्रीयपताकायास्तात्पर्यं व्याख्यानयन् श्रीचक्रादिसाम्येनास्याः प्रतीकभूतत्त्वमपि संसूचयन्नाह—

कीलकं पुरुषं विद्यात् प्रधानं वाससं तयोः ।
सम्बन्धहेतुं तद्रज्जुं येन सर्गः प्रवर्तते ॥
शुक्लः कृष्णश्च रक्तश्च त्रिवर्णाः प्रकृतेर्गुणाः ।
अजामेकामिति श्रुतेस्तेजोऽवन्नसरूपतः ॥
वाससश्चलता क्षोभो विपरिणाम एव च ।
यदुत्थापनमेतस्य कीलबद्धस्य वाससः ॥
तत्सर्गोन्मुखता तस्य सृजते तनुते च यत् ।
तथावतिष्ठते यत्तु तत् सर्गस्थितिरुच्यते ॥
यत्संकोचनमेतस्य तल्लयावस्थितिर्मता ।
यन्नामयति तद् विद्याद् विपरीतक्रमं लये ॥ (१, ३-७) इति ।

पताकावस्त्रस्य प्रकृतिरूपत्वे प्रमाणरूपेण स्वकृतटीकायां समुद्धृतं श्रुतिवाक्यं यथा—

अजामेकां लोहितशुक्लकृष्णां
बह्वीः प्रजाः सृजमानां सरूपाम् ।
अजो ह्येको जुषमाणोऽनुशेते
जहात्येनां भुक्तभोगामजोऽन्या ॥ (श्वे० उ० ४-५) इति ।

---

१. किञ्च वृषभतुरगसिंहैः बुद्धदेवस्य जीवनस्यावस्थात्रयं सूच्यते । तद्यथा वृषभेण बुद्धस्य गर्भे धारणं, तुरगेण तस्य प्रव्रज्याग्रहणं सिंहेन शाक्यसिंहरूपत्वमर्थाद् बोधिलाभ इति ।

पताकाया वर्णत्रयस्य तेजोऽवन्न (तेजः-अप्-अन्न) रूपत्वे श्रुतिर्यथा—तत् तेजोऽसृजत—तदपोऽसृजत—ता अन्नमसृजन्त—इति । (**छा० उ०** ६.२. ३-४) ।—यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां, यत् कृष्णं तदन्नस्ये—ति च । (**छा० उ०** ६. ४. १) । किञ्च,

त्यागोत्साहौ च रक्तेन शान्तिः सत्यं च शुक्लतः ।
श्यामाद् विश्वास-वीर्ये द्वे दयाथाऽपि प्रतीयते ॥ (२-२७) तथा
राष्ट्रस्याग्रगतिं विद्यात् तन्मध्यस्थितचक्रतः ।
तदर्थं सततं कर्माचरणं देशवासिनाम् ॥ (२-२८)

इत्यादिकं सर्वमपि तात्पर्यजातम् आकर एव समुन्नेयमित्यलं बहुना ।

मन्दिरगात्रप्रत्युप्तानां मूर्तीनां तात्पर्यम्

देवालयस्य सर्वेषामप्यंगानां नियमेनैव केनचित्तात्पर्येण भवितव्यमित्येतदंशतः पूर्वमेवोपलब्धम् । साम्प्रतं मन्दिरप्राचीरेषु प्रत्युप्तानामपि मूर्तीनां तात्पर्यं दिङ्मात्रेणानुसन्धीयते । उपाख्यानविशेषव्यञ्जकानां मूर्तीनां प्रायश उपलब्धव्यानां तात्पर्यन्तु आपातगम्यमस्ति । किन्तु सुपवित्रभक्तिभावमात्रयोग्येष्वपि मन्दिरेषु कोणार्कसूर्यमन्दिरप्रभृतिषु नितान्तं नग्नानां निर्लज्जभावेन मैथुनासक्तानां नारीपुरुषयुगलानां किम्वा तात्पर्यं स्यादिति तु चिन्त्यम् । तत्र तावदधोलिखितक्रमेण विभिन्नानि व्याख्यानानि उपलम्यन्ते । (१) प्रथमं मन्दिरगात्रे भोगमत्तस्यानित्यसंसारस्य चित्रं दृष्ट्वा अभिज्ञाः सन्त एव वयं मन्दिरं प्रविशामः । तत्र क्षुद्रतरमूर्तिरूपेण स्थितं शाश्वतमवलोकयामः । तदेवं नित्यानित्ययोर्भेदावसायः स्यादित्येके । एतच्च व्याख्यानमापातत एव नितान्तमलीकमिति निपुणा एवात्र प्रमाणम् । (२) देवतायाः समक्षं गन्तुं ततः प्रागेव पार्थिवभोगलिप्सा देवालयाद् बहिरेव परित्याज्या । तदेव सूचयितुं मन्दिरस्य बहिःप्राचीर एव पार्थिवभोगसूचकानां मैथुनासक्तयुगलानां चित्रणं भवतीत्येके । किन्तु एतदपि व्याख्यानमस्माकं हृदयं नावर्जयति । यतो हि दैवमैथुनपार्थिवमैथुनभेदेन भारतीयैर्नैव कोऽपि भेद उररीकृतः । (३) मन्दिरस्थितानां पण्यस्त्रीभूतानां देवदासीनाँ विज्ञापनार्थं रत्यर्थं तेषां सहजलभ्यत्वसूचनार्थमेव मन्दिरप्राचीरे मिथुनमूर्तीनां प्रदर्शनं भवतीत्यपरमपि किञ्चिद् व्याख्यानम् ए० एल० वाशाम्महोदयेन **दि वण्डार देत् वज् इण्डिया**—ग्रन्थे परामृष्टमस्ति । किन्तु एतदपि व्याख्यानं नितान्तमलीकमिति किमु वक्तव्यम् ।[1] तथा हि वर्षकतिपयमात्र-

१. बुद्धदेववसुमहोदयस्य—मूर्त ओ अमर्त्य—इति वंगीयनिबन्ध (नरनारी, वैशाख, ५३७४)—च्छायानुग्रहणक्रमेण लिखितोऽयं व्याख्यानसारः ।

स्थायिन्याः पण्यस्त्रियो विज्ञाप्रनार्थं सरस्त्राधिकवर्षस्थायिन्याः प्रस्तरमूर्ते-र्निर्माणमभवदिति कथञ्चिदपि विश्वासभूमिं नावतरति । किञ्च विशाला-काराणां तत्रत्यनारीदेहानां स्वल्पमेव मानवीदेहेन सादृश्यमस्तीति कृत्वा मन्दिरगात्रस्था युगलमूर्तिर्नैव मानवीदेहोपभोगं सूचयितुमर्हति । तदेवंविधेषु मतभेदेषु सत्सु इदमत्रास्माकं समाधानम्—

शिवलिंगमूर्तिरथवा योनिमुद्राथवार्धनारीश्वरमूर्तिरथवोमामहेश्वरयुगल-मूर्तिरथवा राधामाधवयोर्युगलमूर्तिर्यथा भक्तानां मनसि लेशतोऽपि कामभावं न जागरयति तथैव मन्दिरगात्रस्थशृंगारासक्तयुगलमूर्तिरपि पार्थिवकाम-भावातिरिक्तमलौकिकमेव कञ्चिद् भावं समुद्भावयति । तथा हि प्रथमतः इयमेव युगलमूर्तिः श्रीचक्रस्थस्त्रीपुरुषत्रिभुजयुगलस्थानीयत्वेन विश्वप्रपञ्चस्य सृष्टिक्रमं सूचयति । किञ्च चुम्बनालिंगनाद्यासक्तानां पीवरपयोधराणां नितम्बभारालसानामपि प्रमदानां देहे तादृशी काचनालौकिकी निर्भरता आविर्भवति यया च ताः देहवत्वेऽपि देहच्युता इव, भारवत्वेऽपि निर्भारा इव प्रतिभान्ति । तदेवमेकस्मिन्नपि देहे जीवात्मपरमात्मयोर्युगपदुपस्थिति-रभिव्यज्यते । तदेवं संसार एव मोक्षस्यांकुरः, सृष्टिक्रम एव लयक्रमस्य सद्भावः क्षणस्थायिमैथुनोद्भुतेऽप्यानन्दे भूमानन्दस्य बीजमिति च सूच्यते । तदेवं निर्विवादं बहुधा कल्पितस्य द्वैताद्वैततत्त्वस्यैवायं विषयः । किञ्च एषु प्रस्तरप्रत्युप्तेषु स्थविरेषु निश्चलेष्वपि मैथुनासक्तयुगलेषु अनुरागादिभावा-वेगेन देहव्यापि किञ्चित् चाञ्चल्यमनुभूयते काचन चलद्रूपताभिव्यज्यते । इयञ्चात्र पूर्वोक्ताप्टिकार्ट्न्यायेनाभिव्यज्यमाना चलद्रूपता विश्वप्रपञ्चस्य नियतां चलद्रूपताम् (इउनिभार्सेल् फ्लाक्स्) अभिव्यनक्ति । इयमेव चलद्रूपता अनुपदमेव वक्ष्यमाणायां नटराजमूर्तावप्यभिव्यज्यते प्रकामम् । किञ्च भावावेगसम्भूतं चाञ्चल्यमप्यतीत्य मैथुनकार्यव्यग्रतामप्यतिक्रम्य स्त्रीपुरुषयुगलयोर्मुखे तथाविधा काचन प्रशान्तिरभिव्यज्यते तथाविधा काचन स्तब्धताऽभिव्यज्यते यादृशी प्रशान्तिर्यादृशी च स्तब्धता नृत्यकर्मचञ्चल-स्यापि नटराजस्य मुखेऽभिव्यज्यते । सेयं प्रशान्तिः रत्नद्वीपगतस्य निष्कल-शिवस्य प्रशान्तिः श्रीयन्त्रस्य वा शून्यकेन्द्रस्य प्रशान्तिरित्यत्रापि द्वैताद्वैत-वादस्य सद्भावोऽनुसन्धेयः । किञ्च श्रीयन्त्रादिसाधने यथा तन्मयीभवन-योग्यतया साधकस्य मनसि क्रमात्क्रमं परमात्मतत्त्वोपलब्धिसम्भूता प्रशान्ति-राविर्भवति तथैव अत्रापि मैथुनासक्तयुगलदर्शनेनापि तत्तात्पर्यानुसन्धान-क्रमेण द्रष्टुर्मनसि सैव स्थिरप्रशान्तिस्समुदेति । एवमेव रसचर्वणायामपि प्रथमं विभावाद्यनुसन्धानं तदन्तरं रतिक्रोधादिभावानुसन्धानक्रमेण सहृद-यस्य हृदये किञ्चित् चाञ्चल्यस्यानुभूतिः पार्यन्तिकदशायां च तन्मयीभवन-

क्रमेण विगलितवेद्यान्तरानन्दमुखेन अभिनवगुप्तपादप्रदर्शितदिशा (पृ. ८८-९०) स्वात्मसाक्षात्कारेण काचन अनाविला विश्रान्तिरेवानुभूयते। तदेवं सर्वास्वपि कलासु एकमेव प्रतीकतत्त्वमनुसज्यते इति दर्शयितुं साम्प्रतं प्रसंगक्रमेण नटराजतत्त्वमपि परामृश्यते।

नटराजमूर्तितात्पर्यम्

यन्त्रेषु यथा श्रीयन्त्रं प्रतीकभूतत्वेन प्रकृष्टं निदर्शनं तथैव भारतीय-मूर्तिषु सर्वथा नटराजमूर्तिरेव प्रकृष्टतमा। (५ संख्यकं चित्रम्)। तथा हि बहुधा बहुविधपरिमाणवत्तया विनिर्मितापीयं मूर्तिर्मूलतस्तु एकरूपा एव। येषान्तु विषयाणां सर्वास्वपि मूर्तिषु सद्भाव उपलभ्यते साधारण्येन तेषां परामर्शोऽग्रेलिखितनान्दीवाक्य एव समुन्नेयः। यदाह कश्चित्—

लोकानाहूय सर्वान् डमरुकनिनदैः घोरसंसारमग्नान्
दत्त्वाभीतिं दयालुः प्रणतभयहरं कुञ्चितं पादपद्मम्।
उद्धृत्येदं विभुक्तेरयनमिति कराद् दर्शयन् प्रत्ययार्थं
बिभ्रद् वह्निं सभायां कलयति नटनं यश्च पायान्नटेशः॥

तथा हि चिदम्बरे स नटेशः शिवः नृत्यति। स च जटाधरः चतुर्भुजः। ऊर्द्ध्वसव्यहस्ते डमरुकं धारयति। डमरुकनादेन लोकानां दृष्टिमाकर्षयति। डमरुकनादक्रमेणैव नृत्यलयं निर्धारयति। व्यञ्जनावैभवमहिम्ना डमरुकस्या-श्रूयमाणोऽपि नादः श्रूयते। नादतालक्रमेणैवानवलोक्यमानोऽपि नृत्यलयोऽ-वसीयते। डमरुकनाद एव नादब्रह्म। तदेव नादब्रह्म डमरुकेणाभिव्यज्यते। नादश्च आकाशगुणः। आकाशश्च पञ्चमहाभूतेषु परममहत्परिमाणवान्। आकाशादिक्रमेण स्थूलप्रपञ्चस्य सृष्टिरिति कृत्वा डमरुकेणैव सृष्टिक्रमोऽपि सूच्यते। सव्येतरोद्ध्वहस्तोऽर्द्धचन्द्रमुद्रायां वह्निं धारयति। वह्निश्च स्थूल-प्रपञ्चस्य ध्वंसं सूचयति। तदेवमुभाभ्यामपि हस्ताभ्यां सृष्टिलयौ सूच्येते ताभ्यां च संसारचक्रमिति श्रीयन्त्रादिसाधारण्येनैव व्याख्यानक्रमः। अपरश्च दक्षिणहस्तोऽभयमुद्रां प्रदर्शयति। तदेवं यद्यपि सः वह्निना ध्वंसं सूचयन् कठोर इति प्रतिभाति तथापि स एव लोकेषु अभयं वितरतीति तस्मिन्नेव शोभनाशोभनादिक्रमेण सम्भावनासम्पन्नं यत्किञ्चिदपि विपरीतधर्मयुगलं वरीवृत्यते। कुञ्चितमुत्तोलितं यद्दक्षिणेतरं पादपद्मं तदपि भक्तानां संसार-चक्राद् विमुक्तिं सूचयति। गजहस्तमुद्रायां स्थितेन विघ्ननाशकगणेशसूचकेन निम्नवामहस्तेन कुञ्चितपादपद्मस्यैव तात्पर्यं द्रढयति। वामपादेन सूचिता भक्तिलभ्या मुक्तिरपि भक्तस्याज्ञानापनोदनसापेक्षा। तदेवाज्ञानस्थगनं दक्षिणपादनिस्पेषितेनापस्मारपुरुषेण सूच्यते। अपस्मारपुरुषो यस्यां वेदि-

५ संख्यकं चित्रम् पृ० २४४



नटराजमूर्तिः

कायां वर्तते तत एव आरभ्य वर्तमानं किञ्चित् प्रभामण्डलं नृत्यरतं नटराजं समावृणोति। तच्च प्रभामण्डलं विश्वप्रपञ्चस्य तथा तद्गतानां जीवानां शक्तिमत्तां सूचयति। तदेवमेतन्नृत्येन परमेश्वरस्य पञ्च क्रियाः संसूच्यन्ते, ताश्च नामतो यथा—संसारस्य सृष्टिः, स्थितिः, संहारः, तत्त्वस्य तिरोभावः, तथा जीवान् प्रति अनुग्रह इति।[1] समासेन च नटराजमूर्तेर्व्यंग्यार्थः समग्रोऽपि त्रिधैवमुपस्थापयितुं शक्यते यथा—(१) प्रभामण्डलेन सूचितस्य विश्वप्रपञ्चस्य या सामग्रिकी गतिः सा खलु नटराजस्य लीलानृत्येन तद्गतेन लयेन च सूच्यते। (२) एतदेव लीलानृत्यं समग्रमपि जीवलोकं मायाजालात् समुद्धरति। (३) चिदम्बरमेव लीलानृत्यस्थानम्। अर्थाद् विश्वप्रपञ्चव्यापि महेश्वरस्य यल्लीलानृत्यं तज्जीवस्य हृदयेऽपि वर्तते।[2] तथा हि विश्वप्रपञ्चस्य यः सृष्टिक्रमः जीवदेहस्यापि स एव सृष्टिक्रमः। श्रीयन्त्रादिषु साधको यथा स्वकीयं स्वरूपमुपलभते तथैव नटराजमूर्तावपि साधकः शिवोऽहं शिवोऽहमिति भावेन स्वरूपमुपलभ्य विश्वप्रपञ्चेन तथा तदन्तर्निहितेन ब्रह्मतत्वेनात्मनोऽभिन्नतामनुभवति इति सर्वथा ब्रह्माण्डपिण्डाण्डयोरभेदावगतिरेवात्रापि साधनाया मुख्यं फलम्।

इदन्तु अत्र विशेषतो लक्षणीयम्। निश्चलायामपि नटराजमूर्तौ पूर्वोक्ताप्टिकार्ट्साधारण्येन काचन चलद्रूपता चक्षुषः समक्षभाविर्भवति। नटराजः खलु नृत्यकाले डमद्-डमद्-डमद् इति डमरुकनादग्रथिततालेन[3] सलयं वामाद्दक्षिणभागं भ्रमति। तच्च चक्राकारं घुर्णनं तथा हस्तपादादीनां ललितवलितत्वेन वर्तुलत्वं तथा प्रभामण्डलस्य मण्डलरूपता च गतिशीलस्य चक्रविशेषस्याभिव्यञ्जनेन विश्वप्रपञ्चस्यैव चलद्रूपतां द्योतयन्ति। प्रायशः सर्वासामपि एवंविधानां भारतीयमूर्तिनामियमभिव्यज्यमाना चलद्रूपता वैशिष्ट्यरूपेणाविर्भवति। किन्तु श्रीचक्रस्य चलद्रूपतामतिवृत्य यथा निश्चलं

1. Ananda Coomaraswamy, **The Dance of Shiva**, p. 87; Zimmer, **Myths and Symbols in Indian Art and Civilization**, p. 154
2. Ananda Coomaraswamy, **The Dance of Shiva**, p. 93
3. अयञ्च डमरुकनादः लंकेश्वररावणकृतशिवताण्डवस्तोत्रेऽपि अतीवसुन्दरभावेन वर्णितोऽस्ति यथा—

जटाटवीगलज्जलप्रवाहप्लावितस्थले
गलेऽवलम्ब्यलम्बितां भुजंगतुंगमालिकाम्।
डमड् डमड् डमड् डमन्निनादवड्डमर्वयम्
चकार चण्डताण्डवं तनोतु नः शिवः शिवम्॥ इति।

निर्विकारं शून्यं ब्रह्मतत्त्वं वर्वर्ते तथैव नटराजस्य चलद्रूपतामतिवृत्य तस्य मुखे काचन अनिर्वचनीया निर्लिप्तता प्रकटीभवति। तस्या एवानुधावनक्रमेण साधकोऽपि संक्षोभरहितां वीतविघ्नां परमशान्तिमनुभवति। सैव संविद्-विश्रान्तिः रसचर्वणाया विगलितवेद्यान्तर आनन्दः। सैव संविद्विश्रान्ति-रभिनवगुप्तपादोक्ता · पार्यन्तिकरसचर्वणायाः शान्तरसानुभूतिः।[1] तदेवं सर्वथा रसाभिव्यञ्जनेऽपि प्रस्तरमूर्तिरियं प्रवल्गतीति रहस्यं व्यञ्जना-प्रपञ्चस्यैव महत्त्वमातनोति। विशेषस्तु इयानेव यद्भास्कर्येऽभिव्यज्यमानः सामाजिकहृद्गतोऽयं भावो रसपदेन नाभिधीयते इति। वस्तुतस्तु प्रस्तर-मूर्त्यादिदर्शनेन सहृदयहृदये यावान् भावावेगः चित्रविशेषदर्शनेनापि तावा-नेवेति भारतीयचित्रकलाया विशेषत्वम्। तदेवं भारतीयचित्रकलाऽपि सर्वथा व्यञ्जनाप्रपञ्चस्यैव विषयीभूता इत्यग्रे दिङ्मात्रेण दर्शयिष्यते। साम्प्रतं काव्यविषयकप्रतीकतत्त्वस्योपासनाविषयकप्रतीकतत्त्वेन यो निगूढ-तमः सम्बन्धः स परीक्ष्यते।

रसतत्त्वोपासनातत्त्वयोः सम्बन्धः

व्यञ्जनावादिनामथवा ध्वनिवादिनामथवा प्रतीकवादिनां विशेषतः प्रतिपाद्यं वस्तु रस एव। विशेषतो रसानुरोधेनैव व्यञ्जनाव्यापारोऽपि स्वीकृतः। किञ्च रसचर्वणायामपरिहार्यत्वेन वर्तमानं यत् हृदयसंवादतत्त्वं तदेव पाश्चात्यप्रतीकवादस्यापि मूलं तत्त्वमित्यग्रे दर्शयिष्यते। उपासनाया-मपि प्रतीकोपासना विशेषस्थानं लभते। प्रतीकोपासनायाः प्रकृष्टतमो निदर्शनस्तुः श्रीयन्त्रसाधनमेवेति पूर्वमेवोक्तम्। यन्त्रोपासनाया नटराजादि-मूर्त्युपासनया कीदृशः सम्बन्धः सोऽपि प्रदर्शितः। साम्प्रतं रसतत्त्वोपासना-तत्त्वयोः सम्बन्धो दिङ्मात्रेण निभाल्यते। **भावनोपनिषदो** मते (सू–१०) ज्ञातृज्ञानज्ञेयानामभेदभावनमेव प्रतीकोपासना भवति।[2] रसचर्वणायामपि तथैव प्रमाता स्वात्मानमेवानुभवति विगलितवेद्यान्तरमानन्दं च स्वदत इति कृत्वा अभेदभावनमेव पार्यन्तिकं फलमिति प्रागेव प्रदर्शितम्। तदपि च

---

१. रसचर्वणायां यथा नायकस्य कवेः श्रोतुः समानोऽनुभवो जायते तथैवात्रापि शिवोऽहमिति भावेन साधकः शिवेन तादात्म्यमनुभवति अर्थादत्रापि हृदय-संवादस्तथा साधारणीकरणं प्रसक्तौ स्तः।

२. (१) यदुक्तम्—ज्ञानमर्घ्यं ज्ञेयं हविः ज्ञाता होता ज्ञातृज्ञानज्ञेयानामभेदभावनं श्रीचक्रपूजनम्—इति। (**भावनोपनिषद्**—१०)

(२) द्रष्टव्यम्—Avalon, **Tantrarājatantra**, Vol. I, Introduc-tion, P. 4

हृदयसंवादादिपूर्वकतया इत्युक्तम् । साम्प्रतमभेदभावनविषये किञ्चिद् विस्पष्टतरमेव पूर्वसूरिवचनं परामृश्यताम् । तथा हि—

सुखप्रायेषु सम्पन्नः ऋतुमाल्यादिसेवकः ।
पुरुषः प्रमदायुक्तः शृंगार इति संज्ञितः ॥

(**नाट्यशास्त्रम्**, ६-४६)

इति भारतमुनिवचनस्य टीकायामभिनवगुप्तपाद आह—"**पुरुष** इति भोक्ता संवेदनात्मकोऽभिप्रेतः । भोक्तैव च स्थायिसंविद्रूपः । व्यभिचारिणस्तु भोगस्वभावाः । **तेन रतिरेव पुरुषः** । तथा चोक्तम्—श्रद्धामयोऽयं पुरुष—इति ।..." (**अभिनवभारती**, पृ. ३११) । तदेवं ज्ञातृज्ञानज्ञेयानामभेदभावनं रसचर्वणायामपि नियमेनैवोपलब्धव्यम् । सति चैवं **काव्यसाम्राज्यगतस्य प्रतीकतत्त्वस्य प्रतीकोपासनातत्त्वेन न केवलं नामत एव साहश्यं किन्तु तदुभयस्यापि मूलं दर्शनम् एकमेवेति दिक्** ।

भारतीयचित्रकलाया अभिव्यञ्जनसामर्थ्यम्

भारतीयचित्रकलाया अपि साहित्यकलासाधारण्येन सुविशालमभिव्यञ्जनसामर्थ्यमस्ति । विशेषतस्तु रसाभिव्यञ्जने चित्रकलाया विशेषपाटवं स्वीकृतमस्ति । तद्यथा राजपूतचित्रांकनसम्प्रदाये विभिन्नरागाणां चित्रणं भवति । तत्र तत्तद्रागनिबद्धसंगीतश्रवणेन श्रोतुर्मनसि यादृशो भाव आविर्भवेत् तत्तद्रागनामधेयानां चित्राणां दर्शनेनापि द्रष्टुर्मनसि तादृश एव भाव आविर्भवेदित्याशयः । संगीतश्रवणेन रसानुभूतिस्यादिति सर्वेषामप्यनुभवसिद्धमेतत् । तदेवं चित्राणामपि तत्तद्रागनाम्नाभिधानेन चित्रकलायामपि रसाभिव्यक्तिर्भवतीति प्रत्याय्यते । तथा हि राजपूतसम्प्रदायस्य चित्रेषु **रागिणी तोडी**ति नाम्ना किञ्चित् चित्रमस्ति । तस्य दर्शनेन सहृदयस्य मनसि तोडीरागिणीनिबद्धसंगीतश्रवणसमनियतभावेनैव रसानुभूतिस्यादित्याशयः ।[1]

---

1. "In the famous Rajput School of Painting, we have some works named after some musical moods. Thus, e. g., in the work Rāgiṇī Toḍī, the painter has aimed at evoking in the spectator, the same mood which he experiences when he listens to the musical mode Toḍī, sung by a good musician. This is an attempt to express in colours a mood which has been already expressed in sound." (S. L. Bhyrappa, **Truth and Beauty**, P. 13)

इदन्त्वत्रावधेयम्। भारतीयचित्रकलायां चित्रे निवेश्यमानो विषयो गौण एव। अवलम्बनभूतेन तेन विषयेण यो भावोऽभिव्यज्यते स एव मुख्यः। अत्र भावपदेन रसोऽवगन्तव्यः। तदेवं काव्ये, स्थापत्ये, भास्कर्ये, चित्रांकेन तथा संगीते इति सर्वत्रैव सुकुमारकलासु रसाभिव्यक्तिरेव मुख्यं फलम्। रसानुभूतिश्च विगलितवेद्यान्तरानन्दरूपेति पूर्वमेवोक्तम्। तत एव यत्रैव वेद्यविषयस्याल्पत्वमनिर्वचनीयत्वं वा तत्रैव भावस्य वेद्यविषयनिरपेक्षत्वेनायासलभ्यत्वेन वीतविघ्नप्रतीतियोग्यत्वेन च रसानुभूतिर्गरीयसी सञ्जायते। तादृशी च कला तदितरकलाविशेषानतीत्य वर्तते। अत एवास्माभिरधुना समासेनालौकिकचमत्कृतिजननविषये संगीतकलायाः स्वकीयं प्राधान्यमनुसन्धीयते।

न हि संगीतात् परा विद्या

सर्वास्वपि कलासु एकमखण्डं ब्रह्मतत्त्वमेवाभिव्यज्यत इति प्रागेवोक्तम्। विशेषतस्तु सुकुमारकलासु ब्रह्मतत्त्वस्योपलब्धिः स्फुटतरा। परन्तु अन्यासामपि कलानां पारिशेष्यात् सुकुमारकलात्रय एवान्तर्भावः। सुकुमारकलात्रयस्य च तत्त्वं यथाक्रमं शब्दब्रह्म–नादब्रह्म–वास्तुब्रह्मेति नामभिर्निर्दिश्यते। पाश्चात्येस्तु पञ्च सुकुमारकलाः स्वीक्रियन्ते। तैस्तु भास्कर्य–चित्रांकन–योरपि स्वातन्त्र्येण स्वीकरणं भवति। भारतीयकलाशास्त्रे तु भास्कर्य–चित्रांकनयोर्वास्तुकलायामेवान्तर्भाव इष्यते। न खलु अनेन भारतीयकलाशास्त्रे भास्कर्यचित्रांकनयोरपलापप्रसंगः शंकनीयः। एतेनैव च केनचित्पाश्चात्यविदुषा यदुक्तं[1] "पौराणिकदेवतानामस्वाभाविकाकृतियुक्तत्वात् तासां सुकुमारकलासु रूपणार्हत्वं नास्ति, सम्भाव्यते यत् तस्मादेव कारणाद् भारतवर्षे भास्कर्यं तथा चित्रांकनं सुकुमारकलारूपेण न विज्ञायेते।" इति तत् प्रत्युक्तम्।

नादब्रह्मात्मकसंगीतकला च साक्षादेव विगलितवेद्यान्तरमानन्दं जनयतीति सैव सर्वोत्तमा। वास्तुकलावत्पार्थिववस्तुविशेषाश्रयत्वाभावात्तथा काव्यकलावत्पार्थिववस्त्वादिपरकपदार्थविशेषाश्रयत्वाभावादपार्थिवनाद-

---

1. "Sir George Birdwood considers that the monstrous shapes of the Puranic deities are unsuitable for the high forms of artistic representation; and this is possibly why sculpture and painting are unknown as fine arts in India." (**Quoted** from **Industrial Arts of India**, 1880, p. 25 by Ananda Coomaraswami, **The Dance of Shiva**, p. 96)

विशेषमात्रं समुद्भावयति तथा रसिकचेतसि अलौकिकमेकघनमानन्दविशेषमाविर्भावयतीति हेतोः वस्तुतः संगीतमेव प्रकृष्टा कला इति केचित्। न हि संगीतात्परा विद्या इति वचनस्यापि तदेव तात्पर्यमिति प्रतिभाति। तिसृष्वपि कलासु एकमेव ब्रह्मतत्त्वमभिव्यज्यत इति हेतोर्नास्ति सुकुमारकलाया एकोऽपि विषयो यत्र व्यञ्जना न प्रसरति, यत्र वस्तुतो व्यञ्जना स्वे महिम्नि प्रतिष्ठिता न वर्तते।

कलासु चातिरिक्ततया यावान् अर्थोऽभिव्यज्यते तावति कलाकारः स्वयमेव स्रष्टा। स च स्वप्रतिभाबलेन अधिकाधिकमप्यर्थजातमाविर्भावयति। अस्मिन् च विषये पाश्चात्त्यप्रतीकवादिनां भारतीयप्रतीकवादिभिर्नास्ति तिलशोऽपि भेदः। किञ्च पूर्वप्रदर्शितदिशा भारतीयनये यथा संगीतस्य प्राधान्यं स्वीकृतं तथैव पाश्चात्त्यप्रतीकवादिभिरपि संगीतमेवोत्कृष्टतमं प्रतीकमिति प्रतिपादितम्।[1] अत एवानन्तरदर्शने पाश्चात्त्यप्रतीकतत्त्वमपि

---

१. (१) यद्यपि प्रतीकवादिषु नान्तर्भूक्तस्तथापि प्रतीकवादिनामप्युपजीव्यभूतो वाल्टार् पेटार्–महोदयः सर्वविधानामपि कलानां संगीतावस्थाप्राप्तये समीहामाविष्करोति। तन्मते हि सर्वास्वपि कलासु (शुद्धसंगीतव्यतिरिक्तासु) प्रकाशभंगीतः प्रकाश्यविषयः पृथक्कर्तुं शक्यते। तत्र च बुद्धिरवश्यमेव प्रगल्भते। किन्तु प्रकाश-वेद्यविषययोर्भेदस्थगनमेव कलायाः समीहिततमं वस्तु। अर्थात् संगीतन्यायेन सर्वत्रैव विगलितवेद्यान्तर आनन्दोऽभिलष्यते।

"All art constantly aspires towards the condition of music. For while in all other kinds of art it is possible to distinguish the form, and the understanding can always make this distinction, yet it is the constant effort of art to obliterate it."—Walter Pater, "The School of Giorgione", in **The Renaissance** (Modern Library edition), p, 111.

(२) साहित्यस्य संगीतरूपत्ववाद ऊनविंशशतिकाया उत्तरार्धे नूतनां सूक्ष्मतामलभत। सा च सूक्ष्मता अष्टाविंशशतिकाया अनुकरणवादादपि मसृणतरा आसीत्। अयञ्च साहित्यस्य संगीतरूपत्ववादः फ्रान्स्देशे प्रतीकवादस्य विशिष्टस्थानमधिचकार।

"The concept of Poetry as 'music' in the later 19th century arrived at a new subtlety, far refined beyond mimetic views of the 18th century, and in France this was a notable part of symbolist thinking." (**Literary Criticism : A Short History,** p. 489)

समासेन परामृश्यते ।

---

(३) स्वप्नेन संगीतेन च काव्यस्य यदेतत्सादृश्यं तत् खलु फ्रान्स्देशीयप्रतीकवादिनां समग्रामपि चिन्ताधारामभिव्याप्नोति ।

"...and this analogizing of poetry to dream and to music was to run all the way through the speculations of the French symbolists." (**Ibid**, p. 589)

(४) काव्यस्य संगीतरूपत्वापादनार्थं या प्रचेष्टा सैव प्रतीकवाद इति वक्तुं युज्यते—वस्तुतस्तु भेलेरिमहोदयः प्रतीकवादं १९२६ ख्रिस्ताब्दे तथैव वर्णयामास ।

"The symbolist movement may be described as the effort to bring poetry to the condition of music—indeed Valery did so describe it in 1926." (Ibid, p. 593)

(५) काव्यस्य संगीतरूपतां प्रति प्रतीकवादिनां या महती श्रद्धा आसीत् सापि अनल्पं प्राधान्यमभजत । तेषां समये वेग्नार्–इत्यभिधस्य कलाकारस्य संगीतमेवालौकिकज्ञानस्य महत्तमप्रकाशरूपेण स्वीकृतमभवत् ।···तस्मिन्नेव वेग्नार्महोदयस्य संगीते तादृशोऽलौकिकः चमत्कारः चकास्ते यमेव स्वकीयकाव्येनापि प्रकाशयितुमैच्छन् प्रतीकवादिनः ।

"No less important was the regard which the symbolists had for the musical element in poetry. The great revelation for their age was the music of Wagner.···In it they found an excitement which seemed to be just what what they wished to convey through their own poetry. (C. M. Bowra, **The Heritage of symbolism**, p. 8)

(6) "1t has been a commonplace of modern aesthetics—though now somewhat discredited—that music is the center and ideal of all the arts." (**Literary Criticism : A Short History**, p. 374)

पञ्चमं दर्शनम्

पाश्चात्त्यप्रतीकवादस्य ऐतिह्यम्

सिम्बलिजिमतत्त्वस्य स्वरूपम्

धर्मविशेषप्रसूताद् द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसम् (**वैशेषिकसूत्रम्**–४) इत्येवमाह कणादः। एतन्मुनिभणितन्यायानुसरणक्रमेणैवास्माभिरभीष्टसिद्धयेऽत्र पाश्चात्त्यभारतीययोः प्रतीकतत्त्वयोस्साधर्म्यवैधर्म्ये अनुसन्धीयेते। आंगलभाषायां प्रतीकमेव सिम्बल् इत्युच्यते। प्रतीकवादश्च सिम्बलिजिम् इत्युच्यते। पाश्चात्त्यदेशेऽपि धर्मविषयकेषु वाङ्मयेषु च प्रतीकस्य व्यवहारः प्राचीनकालादेव आसीत्। काव्यतत्त्वविधायिनामपि बहुभिरेव प्राचीनकालादेव साक्षात्सम्बन्धेनाथवा प्रकारान्तरेणापि प्रतीकतत्त्वमंशत उररीकृतम्। किन्तु तथापि ऊनविंशशतकस्योत्तरार्धाद् विंशशतकस्य प्रथमभागपर्यन्तं वर्तमाना केचन विशिष्टकाव्यतत्त्वविद एव प्रतीकवादिन उच्यन्ते। तेषामपि प्रतीकवादिरूपेण परिचितानां काव्यतत्त्वविधायिनां पारस्परिकं किञ्चिन्मतानैक्यमाविष्कर्तुं शक्यते। तेषां वचनेष्वपि तथा नाम म्लिष्टप्रतीतत्वमस्ति येन प्रतीकतत्त्वस्य वादिनामेकवाक्यतया समासेनोपस्थापनमेव न सम्भवति। तत एव च सिम्बलिजिम् इति पदस्य सुस्थिरतात्पर्यविशेषविषय एव जनानां महान् सन्देहः समुपजायमानोऽपि सहनीय एव। किञ्च एतदपि जनानां सिद्धान्तितं भवेद् यद्रोमान्तिकभावधारावदयमपि प्रतीकवादः दूरत एव यथा कथञ्चित् सम्बद्धानां बहुमुखिनां भावप्रवाहानां समन्वयमात्रम् इति। तथापि प्रतीकतत्त्वस्य लक्षणप्रतिपादनसमीहया आह—

'वस्तुत एव कदाचित् कश्चन प्रतीकवादः प्राभवन्नवेति चिन्त्यम्। प्रतीकसम्प्रदायान्तःपाती यः कोऽपि कविविशेषः एकस्मिन्नेव ऐतिहासिकसम्प्रदाये समावेशमसहमानस्य सुविशालस्य कलातत्त्वविशेषस्यावान्तरभदविशेषमेव परिपोषं निनाय प्रकटयामास च। किन्तु काव्यतत्त्वान्तरवैलक्षण्येन सर्वेऽपि प्रतीकवादिनः काव्यभाषास्वरूपविषये मालार्मेमहोदयेनैक्यमत्यमभजन्त[1]। काचन अर्द्धविस्मृता अर्द्धजीविता आदिमा भाषा

१. तदनुमता च काव्यभाषा नियमेनैव व्यञ्जकत्वगर्भा इत्यग्रे दर्शयिष्यमाणं तथ्यमत्र ऊह्यमस्ति।

प्रत्येकस्मिन् मनुष्य एवानुषक्ता वर्तते इत्यस्मादेव प्रत्ययाद् भाषागतव्यञ्जकत्वविषयकं तत्त्वं प्रभवति। इयञ्च काव्यभाषा (व्यञ्जनाप्रधाना) संगीतेन स्वप्नेन चालौकिकं सादृश्यं समावहति[1] इति। अस्माच्च वचनाद् वस्तुद्वयं निभालयितुं शक्यते। तथा हि मालार्मेमहोदय एव प्रतीकवादिनामग्रेसरः इत्येकं वस्तु। अपरञ्च काव्यभाषाया नियमेनैव व्यञ्जकत्वं स्यादिति च। यद्यपि प्राचीनकालादेव पाश्चात्त्यदेशेष्वपि प्रतीकस्य बहुधा बहुत्रापि व्यवहारः बहुभिरेव कृतस्तथापि सम्प्रदायविशेषसूचकत्वेन प्रतीकवादस्य पारिभाषिकत्वे स्वीकृते सति फ्रान्स्देशीया बोड्लेयार्-भार्लेइन्-मालार्मे-नामानः प्रतीकवादसरणिव्यवस्थापकाः अन्ये च केचन इउरोपदेशीयास्तन्मतानुयायिनः प्रतीकवादसमीक्षायां विशेषभावेन परामर्शमर्हन्ति। यदाह— 'काव्यतत्त्वविषयकमतवादविशेषस्तु तन्मतसमर्थकैरेव परिचेतुं शक्यते। प्रतीकवादानुयायिनः प्रधानकवयस्तु बोड्लेयार्-भार्लेइन्-मालार्मे इति त्रय एव। तेषु च बोड्लेयार्महोदयः सर्वप्राथम्येन प्रतीकानां महार्हत्वं प्रतिपादयामास। भार्लेइन् महोदयः स्वभावप्रेरिततया प्रतीकानां प्रयोगं चकार। मालार्मेमहोदयस्तु प्रतीकतत्त्वस्य व्याख्यानार्थं प्रतीकप्रयोगस्य सार्थक्यं सूचयितुं च किञ्चन प्रतीकवाददर्शनमेवावतारयामास[2]।' इति। तदेवं मालार्मेमहोदयस्य मतानुसन्धानेनैवास्माकं पाश्चात्त्यप्रतीकवादस्य

---

2. 'Whether a real school of symbolism ever existed, remains a problem of speculation...Each poet developed and represented a single aspect of an aesthetic doctrine that was perhaps too vast for one historical group to incorporate... But more than on any other article of belief, the symbolists united with Mallarmé in his statements about poetic language. The theory of the suggestiveness of words comes from a belief that a primitive language, half-forgotten, half-living, exists in each man. It is language possessing extraordinary affinities with music and dreams.'
(**Mallarmé**, p. 264, quoted in **Literary Criticism : A Short History**, p. 596)

2. 'A poetical movement is recognised in its exponents, and the chief poets of Symbolism are Baudelaire, Verlaine and Mallarmé. Baudelaire was the first to exalt the value of symbols; Verlaine used them instinctively, and Mallarmé erected a metaphysics to explain and justify them.'
(C. M. Bowra, **The Heritage of Symbolism.** p. 1)

मूलतत्त्वमवगतं स्यात् ।

मालार्मेमतपरामर्शः

मालार्मेमहोदयस्य मते "काव्यम् इतिवृत्तमात्रस्यैवाभिधानं न कुर्यात् किन्तु सर्वथा अभिव्यञ्जनमेव कुर्यात् । तच्च सहृदयहृदये चित्तवृत्तिविशेषमाविर्भावयेत् । न खलु काव्यं वस्तुविशेषं नामतोऽभिदधीत किन्तु तद्वस्तुमात्रानुकूलत्वेनावस्थाविशेषमुपस्थाप्य तस्याभिव्यञ्जनमात्रं कुर्यात् ।"[1] अतश्चैतत् स्फुटं स्याद् यत् तन्मते व्यञ्जना एव काव्यस्योपनिषद्भूतं तत्त्वं तथा व्यंग्यविषयेष्वपि चित्तवृत्तिरूपत्वेन रसादिरेव प्रधानतमं वस्तु इति च । रसाद्यनुभूतेः प्राधान्यस्वीकारादेव तेन काव्यस्यापि संगीतरूपत्वं समीहितम् । संगीताच्च कथं नितान्तं वीतविघ्नो विगलितवेद्यान्तर आनन्द आविर्भवेदिति पूर्वमेवोक्तम् । अत्रैव तस्य 'सर्वविधानां कलानां संगीतरूपत्वप्राप्तये समीहा वर्तते' इति वाल्टार् पेटार् महोदयभणितेरनुसरणं समुन्नेतुं शक्यते । तदेवं व्यञ्जकत्वावश्यकत्वस्वीकरणाद्रसादिप्राधान्यस्वीकरणाच्च बाहुल्येनैव मालार्मेमतस्य ध्वनिवादेन सादृश्यमनुभूयते । तत एव च कृष्णचैतन्यमहोदयस्य 'ष्टिफेन् मालार्मे ऊनविंशशतकीयफ्रान्स्देशस्य आनन्दवर्धनः' इति वचनं सङ्गच्छते[2] । रसाद्यभिव्यक्तये काव्यस्य संगीतरूपत्वमभीष्टम् । संगीतरूपत्वारोपणार्थञ्च विशिष्टशब्दानां चयनं तस्याभिमतम् । तदर्थञ्च सति प्रयोजने भाषाया व्याकरणविषयकसाधुत्वत्यागोऽपि क्षमणीय एव । काव्ये शब्दानामर्थस्य न तथाविधमपेक्षणीयत्वं यथाविधञ्च तेषां सांगीतिकमूल्यस्य । अत्रैव मालार्मेमतस्य ध्वनिवादेन कश्चन विशेषोऽपि उपलभ्यते । प्रतीकवादिनां मते काव्यगतोऽपि शब्दः अर्थनिरपेक्षतयैव साक्षात्सम्बन्धेनैव शुद्धसंगीतसमशीर्षिकतयैव सहृदयचेतसि रसानुभूतिं जनयति । यदाह—

'यदा चित्रकल्पवादी (इमेजिष्ट्) वस्तुविशेषस्य विशुद्धां प्रतिभामुपस्थापयितुमिच्छन् केवलं लोचनस्यैवानुरञ्जनं करोति तदा प्रतीकवादी काव्यस्य संगीतसमतामभिलषते, विशेषतो वेग्नारस्य संगीतेन तुल्यता-

---

1. 'His theory, put briefly, is that poetry should not inform but suggest and evoke, not name things but create their atmosphere.' (C. M. Bowra, **The Heritage of Symbolism**, p, 9)
2. 'Stephane Mallarmé is the Ānandavardhana of nineteenth century France.' (Krishna Chaitanya, **Sanskrit Poetics**, p. 147)

मिच्छति । तदर्थं यथा संगीतकारः स्वराणां प्रयोगं करोति तथैव शब्दानामन्वययोग्यार्थनैरपेक्ष्येणैव प्रयोगं करोति । तादृशानां शब्दानामनुषंगेण तथा संघटनावैचित्र्येण च सहृदयचेतसि तथाविधमवस्थाविशेषमुपजनयितुमिच्छति यथाविधस्तु एम्० एलिबि० ब्रिमण्डस्य मते यौगिकसमाधितुल्य एव[1] ।' इति ।

ध्वनिवादिनापि काव्ये प्रयुज्यमानस्य शब्दस्य रसाभिव्यञ्जनसामर्थ्यं स्वीक्रियते । तथा हि समग्रायामपि वर्णमालायां केचन वर्णविशेषा एव शृंगाररसानुकूलाः । अन्ये च केचन वर्णाः शृंगारादिरसाननुकूलाः सन्तः बीभत्सादिरसानुकूला दृश्यन्ते । तत एव वर्णाः रसाभिव्यक्तिसमर्था इति मन्तव्यम् । ननु विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिरिति भरतस्य रससूत्रे सति अर्थरहितानामपि केवलवर्णानां रसाभिव्यञ्जकत्वे किं मानमिति प्रश्ने आनन्दवर्धनः समाधत्ते—

"तत्र वर्णानामनर्थकत्वाद् द्योतकत्वमसम्भवीत्याशंक्येदमुच्यते—

शषौ सरेफसंयोगौ ढकारश्चापि भूयसा ।
विरोधिनः स्युः शृंगारे तेन वर्णा रसच्युतः ॥
त एव तु निवेश्यन्ते बीभत्सादौ रसे यदा ।
तदा तं दीपयन्त्येव तेन वर्णा रसच्युतः ॥"

(**ध्वन्यालोकः** ३. ३–४) इति

रसाभिव्यक्तावेवंविधानामनर्थकानामपि वर्णानां शुद्धसंगीतरूपतां बोधयितुमभिनवगुप्तपाद आह "श्रोत्रैकग्राह्योऽपि च स्वभावो रसनिष्यन्दे व्याप्रियत एव, अपदगीतध्वनिवत् पुष्करवाद्यनियमितविशिष्टजातिकरणघ्राद्यनुकरणशब्दवच्च[2] ।" इति (**लोचनम्**. पृ. ३०५) । तदेवं वर्णानां केवला-

1. "But whereas the Imagists, aiming at clear, precise images, appealed almost exclusively to the eye, the aim of the symbolists was to approximate poetry to music, in particular to the music of Wagner, using words as the musician uses notes, not to convery logical meaning, but by their associations and patterned sounds to induce or evoke in the reader a state of mind which M.L 'Abbe' Bre 'mond likens to the mystic trance." (Grierson and Smith, **A Critical History of English Poetry**, P. 507)

२. अत्र काव्यमालासंस्करण (१९२८) धृतः पाठः "घ्राणाद्यनुकरण" इति । तत्रैव निर्दिष्टं "करणप्रभावाद्यनुहारशब्दवत्" इति पाठान्तरम् । मन्मते "जातिकरणघ्राणाद्यनुकरणशब्दवच्च" इत्येव ज्यायान् पाठः ।

नामपि रसविशेषानुगुणत्वे स्वीकृते सत्यपि ध्वनिवादे अर्थनैरपेक्ष्येण रसाभिव्यञ्जकत्वं नाभिलष्यते वर्णानामिति परिलक्षणीयम् । ध्वनिवादमते काव्यस्य रसस्तु विभावादिरूपतया **अर्थेनैव** द्योतनीयः । तस्यैव विभावादिद्योत्यस्य रसस्यानुकूलत्वेन निरर्थकोऽपि वर्णः रसाभिव्यञ्जको भवतीत्यत्रैव शुद्धसंगीतात् काव्यस्य भेदः । तमेव भेदमुपोद्वलयितुं वर्णानां रसाभिव्यक्तौ सहकारितां स्फुरयन्नभिनवगुप्तपाद आह—

"एतदुक्तं भवति—यद्यपि विभावानुभावव्यभिचारिप्रतीतिसम्पदेय रसास्वादे निबन्धनम् । तथापि विशिष्टश्रुतिकशब्दसमर्थ्यमाणास्ते विभावादयस्तथा भवन्तीति स्वसंवित्सिद्धमदः । तेन वर्णानामपि श्रुतिसमयोपलक्ष्यमाणार्थानपेक्ष्यपि श्रोत्रैकग्राह्यो मृदुपरुषात्मा स्वभावो रसास्वादे सहकार्येव । अत एव च सहकारितामेवाभिधातुं निमित्तसप्तमी कृता वर्णपदादिष्विति । न तु वर्णैरेव रसाभिव्यक्तिः, विभावादिसंयोगाद्धि रसनिष्पत्तिरित्युक्तं बहुशः ।" इति । (**लोचनम्**. ३. पृ. ३०४–३०५)

यत्तु काव्यमिति परिचीयते तन्नियमेनैवार्थगर्भं स्यात् । तत्रैव काव्यसंगीतयोर्भेदः । अर्थनैरपेक्ष्येण शुद्धसंगीतधर्मिकाव्यं रचयितुं न शक्यते । शब्दास्तु अर्थेन नियतरूपाः । अत एव केवलं स्वराद्यनुरोधेनैव शब्दा प्रयोक्तुं न शक्यन्ते । स्वातन्त्र्येण शुद्धसंगीतवत्सहृदयहृदयमावर्जयितुमर्थेनार्गलितः काव्यशब्दो नैव प्रभवतीत्यस्मादेव कारणान्मालार्मेमहोदयो महत्तमं काव्यं विरचयितुं न प्राभवत् । अत एव च तस्य प्रतीकवादः साकल्येन निर्दोषो नासीदिति वक्तुं शक्यते ।[1] परन्तु यद्यपि ध्वनिवादेन मालार्मेमतस्य इयान् भेदस्तथापि रसस्य प्राधान्यस्वीकरणेन काव्यस्य व्यञ्जकत्वावश्यकताङ्गीकारेण च तस्य ध्वनिवादसमर्थकत्वं निर्विवादमेव । किञ्च, रसाभिव्यक्तौ यद्यपि अर्थनिरपेक्षत्वेनैव काव्यस्य कर्तृत्वमभिहितं तथापि वस्तुमात्रव्यञ्जनायां त्वर्थस्य कर्तृत्वं तेन समर्थितम् । तदेवं वस्तुमात्राभिव्यञ्जनार्थं समासोक्त्यादिन्यायेन प्रतीकप्रयोगस्तस्यास्याभिप्रेत एव प्रकामम् । वस्तुमात्रस्य साक्षादुपस्थापनं हेयम् । तस्य क्रमादभिव्यञ्जनमेव ज्याय इति मतमपि तेन महता कण्ठेन समुद्घोषितम् । तत्रैव च व्यञ्जनाप्रपञ्चस्य गौरवं परिचेतव्यम् । यथाह १८९१ खिस्ताब्दे मालार्मेमहोदयः—

···पार्नासियानभिधाः[2] कवयः वस्तुविशेषं सामग्र्येण साकल्येनोपस्था-

1. C. M. Bowra, **The Heritage of Symbolism**, P. 14.

२. ऊनविंशशतकीयांगलकवीनां स्वल्पप्रख्यातसम्प्रदायविशेषः पार्नासियानुपदेन परामृश्यते ।

पयन्ति। तत्रैव तेषां काव्यं रहस्यदरिद्रतां गतम्। ते च सहृदयमानसाद् वस्तुविशेषसृष्टिसामर्थ्यबोधजनितमानन्दमपहरन्ति। वस्तुविशेषस्य क्रमशोऽनुसन्धानेन काव्याद् य आनन्द उपलभ्यते, वस्तुनो नाम्ना अभिधानेन तस्यानन्दस्य पादत्रयमेवापहृतं स्यात्। यत्तु नाम वस्तुनोऽभिव्यञ्जनं तदेव चमत्कारः। रहस्यस्य सफलभावेनोपस्थापन एव प्रतीकवादस्य आविर्भावः। प्रतीकवादे च क्रमात् क्रमश एव वस्तुविशेष उपस्थाप्यते येन मानसिकावस्थाविशेषोऽभिव्यज्यते। अथवा वस्तुविशेषस्वरूपादेव रहस्योद्घाटनक्रमेण मानसिकावस्थाविशेषस्याभिव्यञ्जनमेव प्रतीकवादस्वरूपम्[1]।" इति।

एवं क्रमेण तर्हि व्यञ्जनातत्त्वमेव प्रतीकवादस्यापि मूलतत्त्वम्। किन्तु यत्रैवाभिधानव्यतिरिक्ततयाभिव्यञ्जनस्य सद्भावस्तत्रैव कवेः सहृदयस्य च काचन स्वकीया सृष्टिक्षमता अवश्यं स्वीकर्तव्या। एतदपि भारतीयप्रतीकतत्त्वस्यानुमतमित्यनुपदमेव वक्ष्यते।

प्रतीकवादिनामभिव्यञ्जनावादित्वे कारणम्

इतश्चापि मालार्ममहोदयस्तथा तदनुयायिनः प्रतीकवादिन इत्युच्यन्ते सार्थकभावेन, यतः परिदृश्यमानवस्तुभिस्ते काञ्चन अलौकिकीमनुभूतिमाविर्भावयितुं समीहन्ते। तदर्थं च तैः प्रयुज्यमानः प्रायशः एकैकोऽपि शब्दः प्रतीकरूप एव। न खलु ते शब्दा अभिधानार्थमुपयुज्यन्ते किन्तु इन्द्रियातीतस्य सत्यविशेषस्यैव बोधं मनसि आविर्भावयितुमिति मन्तव्यम्[2]।

---

1. "...the Parnassians, for their part, take the thing as a whole and show it; that's where they are deficient in mystery, They deprive the mind of the delicious joy of believing that it is creating. To name an object is to do away with three quarters of the enjoyment of the poem which is derived from the satisfaction of guessing little by little; to suggest it, that is the illusion. It is the perfect handling of the mystery that constitutes the symbol : to evoke an object little by little in order to show a state of mind or inversely to choose an object and to disengage from it a state of mind by a series of unriddlings." (**Literaary Criticism : A Short History**, p. 592. Originally quoted in **La Doctrine Symboliste : Documents**, p. 74 from **Re' ponse a une Enquete** (1891).
2. "He and his followers are rightly called Symbolists, because they attempted to convey a supernatural experience in the language of visible things, and therefore almost every word

मालार्मेमहोदयस्यास्य मतस्य मूलं तावत्तत्पूर्वभाविनः प्रतीकवादिनः कविप्रवरस्य बोड्लेयार्महोदयस्य काव्ये अनुसन्धेयम्। बोड्लेयार्मते समग्रमपि प्रकृतिराज्यं परमार्थस्य शाश्वतसत्यस्य प्रतीकम्। प्रकृतिराज्येऽपि वस्तूनां परस्परं तथाविध**मानुरूप्यम**स्ति येन यत् किञ्चिद् वस्तु परम्पराक्रमेणान्यद् वस्तुजातमभिव्यनक्ति। एतदेव बोड्लेयारस्य सुप्रसिद्धमानुरूप्यतत्त्वम्, यत्तु आंगलभाषायां थियोरि अब् करेस्पण्डेन्स् इत्युच्यते। तेन तावत् **करेस्पण्डेन्स्-नामके पद्ये** स्वोपज्ञमानुरूप्यतत्त्वमेवमभ्यधायि—

La Nature est un temple oú de vivants piliers
Laissent parfois sortir de confuses paroles;
L'homme y passe á travers des forets de symboles
Qui l'observent avec des regards familiers.
Comme de longs échos qui de loin se confondent
Dans une ténébreuse et profonde unité,
Vaste comme la nuit et comme la clarté,
Les parfums, les couleurs et les sons se répondent.

अस्यायमाशयः। समग्रमपि प्रकृतिराज्यं किञ्चिन्मन्दिरं भवति, तच्च किञ्चित् स्वाभाविकं मन्दिरं यत्र वृक्षा एव सजीवस्तम्भरूपाः। अस्मिन् प्रतीकारण्ये वायौ वहति सति प्रायशोऽविस्पष्टाः भ्रान्तिजनकाः शब्दाः श्रूयन्ते। कविरेव स्वकीयप्रतिभाबलेनैषां शब्दानां तात्पर्यमवगन्तुं प्रभवति। सर्वेषामपि वस्तूनां प्रतीकात्मकत्वेन तादृशं तात्पर्यं कविभिरेवावगन्तव्यम्। प्रकृतिराज्यस्य प्रत्येकवस्तुनः केनचिदाध्यात्मिकसत्येन विशेषसम्बन्धो विद्यते। वस्तूनां परस्परं सारूप्यमस्ति। तच्च सारूप्यं स्वेतरेन्द्रियविषयेणापि भवति। तत एव शब्द-रूप-गन्धादीनामपि परस्परं सारूप्यमस्ति। शब्दरूपगन्धादीनामपि प्रातिस्विकभावेन परमसौन्दर्येण नियतः सम्बन्ध इति परम्पराक्रमेणापि विभिन्नविषयाणां परस्परं सारूप्यमस्ति। इति। तदेवं परिदृश्यमानप्रकृतौ परमार्थतत्त्वविषयकं यद्व्यञ्जकत्वं तदेव काव्यशब्दमप्यभिवाप्य वर्तत इति बोड्लेयार्महोदयस्य हृदयम्।

बोड्लेयार्मतस्य पृष्ठभूमिः—एड्गार् एल् एन् पो

प्रकृतिराज्यं परमार्थतत्त्वमभिव्यनक्तीत्यस्मिन् विषये बोड्लेयार्-

---

is a symbol and is used not for its common purpose but for the associations which it evokes of a reality beyond the senses." (C. M. Bowra, **The Heritage of Symbolism.** p. 5)

महोदयेन आमेरीकादेशीयाद् एड्गार एल् एन् पो-महोदयादेव भावादर्शः गृहीतः। तन्मते हि जगत उर्द्ध्वं परमसौन्दर्यमस्ति। जागतिकं यत्सौन्दर्यं तत्तु परमसौन्दर्यस्यैव प्रतिफलनम्। प्रतिफलनरूपं जगदेव परमसौन्दर्यस्याभिव्यञ्जकं प्रतीकमस्ति। तस्य तावत्परमसौन्दर्य-(सुपार्नेल् विउति) तत्त्वस्य रसतत्त्वेन सादृश्यमस्ति। "तस्यैव सौन्दर्यस्य पुनः पुनरनुसन्धानेनैव तादृगानन्दजनकमूर्द्ध्वगमनमनुभूयते तादृगात्मन उत्तेजनमनुभूयते यच्च काव्यरस इत्युच्यते अस्माभिः। अत एव मया व्यवहृतं सौन्दर्यमिति पदं परमार्थतत्त्वमपि क्रोडीकरोति। मन्मते सौन्दर्यमेव काव्यस्य विषयः।" इत्येवं तेन सौन्दर्यतत्त्वं प्रत्यपादि[1]। किन्तु कुत्रैतत् सौन्दर्यमस्ति। अस्यानुभूतिं विहाय कुत्र वा सौन्दर्यं पदं कुरुते? तत्रोच्यते। सौन्दर्यपदेन न तु गुणविशेषोऽवगन्तव्यः किन्तु सौन्दर्यस्य कार्यमेवावगन्तव्यम्। तच्च आत्मन एकान्ततोऽनाविलभावेनानुभूतोऽवस्थाविशेष एव..... सौन्दर्यस्य पुनःपुनरनुसन्धानेन सौन्दर्यस्य चर्वणया एव असौ अवस्थाविशेष आविर्भवति[2]। एतच्च मतं सर्वथा रसतत्त्वेन तुलनामर्हति इति किमु वक्तव्यम्। एवंक्रमेण प्रतीकवादिनां कृते रसस्य कियत्प्राधान्यं तदन्यथाप्यग्रे प्रदर्श्यते।

उइलियाम् बाट्लार् येट्स्

उनविंशशतकस्यान्तिमभागादारभ्य विंशशतकस्य प्रथमभागपर्यन्तम् आयार्लेण्डदेशीयः येट्स्महोदयः प्रावर्तत। स च साक्षादेव मालार्मेमतेनानु-

1. "**That** pleasure which is at once the most pure, the most elevating, and the most intense, is derived, I maintain, from the contemplation of the Beautiful. In the contemplation of Beauty we alone find it possible to attain that pleasurable elevation or excitement, **of the soul**, which we recognize as the Poetic Sentiment...I make Beauty, therefore—using the word as inclusive of the Sublime—I make Beauty the province of the poem." (E. A. Poe, **The Poetic Principle**, quoted in **Literary Criticism : A Short History**, pp. 478f.)
2. "But where is 'beauty' located? Where but in the very experience of itself? 'When, indeed, men speak of Beauty they mean, precisely, not a quality...but an effect—they refer, in short just to that intense and pure elevation of **soul**...which is experienced in consequence of contemplating the beautiful." **(Literary Criticism : A Short History**, p. 479)

प्राणित इत्यस्मिन् विषये नास्ति कोऽपि सन्देहावकाशः[1]। तस्य यत् प्रतीकतत्त्वं तत्प्रायशः साकल्येन एव भारतीयप्रतीकतत्त्वेन सादृश्यं समश्नुते।

रसानुभूतिविषये येट्स्महोदय एवमाह—

"सर्वे शब्दाः सर्वे वर्णाः सर्वाश्च आकृतयः पूर्वंप्रकल्पितेन शक्तिविशेषेण अथवा सुदीर्घसाहचर्यबलेन कञ्चन अनिर्वचनीयं किन्तु विस्पष्टं भावं जागरयन्ति अथवा मन्मते शब्दादिभिरस्माकं हृदये केचन अवयवरहिताः शक्तिविशेषाः समुद्भाव्यन्ते अस्माकं हृदये निहिताः येषां पदक्षेपध्वनय एवास्माभिः रस इत्युच्यन्ते[2]।

कवेः रसाभिव्यक्तिसामर्थ्यं तन्मत ऐन्द्रजालिकशक्तितुल्यम्। किञ्च कविकर्माऽपि इन्द्रजालरूपमेव। कवित्वशक्तिरेव इन्द्रजालशक्तिरूपा। तादृशी इन्द्रजालशक्तिराधुनिककालेऽपि उपलभ्यते। तादृशशक्तिषु प्रबलतमा प्रतीकमेव। प्रतीकमैन्द्रजालिकैरिच्छाकृतभावेनैव प्रयुज्यते। ऐन्द्रजालिकोत्तराधिकारिभिस्तु कवि-संगीतकार-कलाकारप्रभृतिभिरबुद्धिपूर्वकमेव प्रयुज्यते[3]। तदेवं भारतीयप्रतीकवादे यथा एकमेव तत्त्वं काव्यं तथा यन्त्रमण्डलादिकमप्यभिव्याप्नोति तथैव येट्स्महोदयमते एकमेव प्रतीकतत्त्वं काव्यादिकं सर्वमपि समाश्लिष्यति।

येट्स्महोदयमते काव्याज् ज्ञानं जायते। काव्येन सहृदयः आत्मस्वरूपं तथा सत्येन आत्मनः सम्बन्धं च जानाति। एवमेव स परमज्ञानं लभते। किन्तु जागतिकज्ञानाद्विलक्षणमेवैतज्ज्ञानम्। सर्वकर्मोपरमेणैवैतज्ज्ञानं सम्भवति। ततश्च तन्मते मृतस्यैव केवलं प्रकृष्टज्ञानं समुदेति। अथवा जीवितावस्थायामनुभूयमानं तज्ज्ञानं तथा नाम सूक्ष्ममस्ति येन ज्ञाता ईषन्मात्रेणापि

---

1. **Literary Criticism : A Short, History**, p. 597
2. "All sounds, all colours, all forms, either because of their preordained energies or because of long associations, evoke indefinable and yet precise emotions, or, as I prefer to think, call down among us certain disembodied powers, whose footsteps over our hearts we call emotions," (W. B. Yeats, **Ideas of Good and Evil**, p. 243)
3. That power, Yeats declares, is alive today, and symbols are still the "greatest of all powers whether they are used consciously by the masters of magic, or half unconsciously by their successors. the poet, the musician and the artist." (**Literary Criticism : A Short History**, p. 599)

न तस्य ज्ञानस्य ज्ञानं लब्धुं शक्नोति। वस्तुतस्तु एतज्ज्ञानमात्मन एव आत्मना ज्ञानम्। स्वात्मन्येवात्मनि लीयमाने तज्ज्ञानं जायते। तच्च ज्ञानं संविद्विश्रान्तिरूपतया रसचर्वणापार्यन्तिकदशारूपतामासादयति[1]। तदेतत्स्वसंवेदनं तेनैवं वर्ण्यते—

Considering that, all hatred driven hence,
The soul recovers radical innocence
And learn at last that it is self-delighting,
Self-appeasing, self-affrighting,
And that its own sweet will is Heaven's will...
(**Collected Poems**, p. 187)

एतदनुरूपभावो यथा **प्रबोधचन्द्रोदये**—

अन्तर्नाडीनियमितमरुल्लंघितब्रह्मरन्ध्रं
स्वान्ते शान्तिप्रणयिनि समुन्मीलदानन्दसान्द्रम्।
प्रत्यग्ज्योतिर्जयति यमिनः स्पष्टलालाटनेत्र-
व्याजव्यक्तिकृतमिव जगद्व्यापि चन्द्रार्धमौलेः॥ इति नान्दीपद्ये।

आर् जि कलिङ् उद्

येट्स्महोदयस्य यदात्मज्ञानतत्त्वमथवा आत्मसाक्षात्कारतत्त्वं तदेव विस्पष्टतरं प्रतिपादयति आंगलदेशीयः प्रतीकवादी अद्वैतवादी कलिङ् उद्महोदयः। स च **प्रिन्सिपोलस् अब् आर्ट** ग्रन्थे विस्पष्टमाह—

एतदुक्तं भवति यदयं कविरात्मानं जानाति, आत्मनो भावग्रामं जानाति इति। वस्तुतस्तु तेनैवात्मज्ञानेन स आत्मनो जगदपि जानाति। ये च शब्दरूपरसादयस्तस्य प्रतिभां जागरयन्ति ते सर्वेऽपि आत्मज्ञानेनैव ज्ञायन्ते। तदेतज्ज्ञानद्वयमपि तत्कृते एकमेव ज्ञानं भवति। यतो हि शब्दरूपरसादयोऽपि स्वकीयचित्तवृत्तिभिरेवानुषक्ता वर्तन्ते। शब्दरूपरसादिरूपया भाषया एव चित्तवृत्तिः स्वसमक्षं प्रकटीभवति। तस्यैतत् जगद् एव तस्य भाषा। यदेतज्जगत् कथयति तत्तमेवाधिकृत्य कथयति। जगतः प्रतिभा-

1. "It is so completely detached from the life of action that Yeats says more than once that only the dead have true wisdom; or else he regards such true wisdom as the living may enjoy to be something so deep and instinctive that its possessor hardly knows that he possesses it"—**Ibid**, p. 602)

प्रसूतं दर्शनमात्मन एव दर्शनम्[1]। इति। येट्स्महोदयेनापि अन्यत्र एतदनुरूपतयैवाभाणि। कलिङ् उद्महोदयस्य मते—

कवेरात्मज्ञानमात्मन एव निर्माणम्।.....जगतः ज्ञानमपि जगतो निर्माणमेव। कविना ज्ञातश्च जगद् भाषामयमेव यस्मिन् जगति सर्वमपि वस्तुजातं रसमभिव्यनक्ति। एतच्च व्यञ्जनाप्रवणं जगत् कविना स्वयमेव सम्पादितम्।

रसानुभूतिर्नाम···स्वसंवेदनं तथा स्वस्य जगतो ज्ञानम्। इयमेव तावदात्मनो विनिर्माणम् आत्मनो जगतो विनिर्माणं च[2]।

प्रतीकवादानुषक्तं दर्शनम्

मालार्मेप्रभृतीनां पूर्वोक्तमतपूगपर्यालोचनेन प्रतीकवादोपनिषद्भूतं दर्शनमस्माकं विस्पष्टतरमाविर्भवति। तथा हि प्रतीकवादमते—(१) काव्यस्य नियमेनैव व्यञ्जकत्वं स्यात्। (२) यश्च सहृदयः स काव्याद् यावल्लभ्यते ततोऽप्यधिकतरं स्वयमेव विनिर्माति। (३) कविरपि स्रष्टा भवति। (४) कविश्च प्रतिभाबलेन सृजति। (५) कविकृतजगत्सृष्टौ शब्द एव उपादानम्। (६) शब्दस्य चार्थेनाभिन्नरूपता। (७) शब्द एवार्थरूपेण परिणमते। (८) सहृदयहृदयेन कविहृदयेन वा जगतस्तादात्म्यमस्ति। (९) विश्वप्रपञ्चेन परब्रह्मतत्त्वस्याभिन्नत्वम्। (१०) विश्वप्रपञ्च एव परमात्मतत्त्वस्याभिव्यञ्जकः। एषु तावत्कवेः सृष्टिकर्तृत्वं विशदतरं परामृश्यते।

---

1. **The Principles of Art** (Oxford, 1938), p. 291

2. "But this knowing of himself is a making of himself... Moreover, his knowing of this new world is also the making of the new world which he is coming to know, The world he has come to know is a world consisting of language; a world where everything has the property of expressing emotion. In so far as this world is thus expressive or significant, it is he that has made it so.....

The aesthetic experience...is a knowing of oneself and of one's world...It is also a making of oneself and of one's world..."

(The Principles of Art, p. 291–292)

प्रतिभादर्शनम्

भारतीयप्रतीकवादे ध्वनिवादे वा या प्रतिभा इत्युच्यते सैव पाश्चात्य-प्रतीकवादे इमाजिनेशन् इत्युच्यते । इमाजिनेशन् इत्यस्य स्थानेऽस्माभिरत्रापि प्रतिभापदमेव प्रयुज्यते । प्रतिभाशब्दः प्रतिमाशब्देन सम्बद्धः । प्रतिभाशब्दो भा-दीप्ताविति धातोर्निष्पन्नः । प्रतिमानिर्माणमेव भास्कर्यमित्युच्यते । तत्रापि भा-दीप्ताविति धातुरनुषक्तः । तथैव इमाजिनेशन्पदस्य इमेज्पदेन सम्बन्धः । इमेज्पदस्यापि प्रतिभा इत्यर्थः । यदेतत्प्रतिभातत्त्वं तदेव समग्रस्यापि प्रतीकवादस्य मूलमित्यवगन्तव्यम् । तत्रैव प्रतीकवादस्य समग्रमपि दर्शनमन्तर्निहितमस्ति । प्रतिभा च घटप्रदीपन्यायेनाज्ञातस्य समुद्भासनेन ज्ञापनेन वा मूलत एव व्यञ्जनसमर्था । तस्मादस्मन्मते अल्पीयसि बहुतरस्य परिसीमिते भूम्नः प्रतिभानमेव प्रतिभा । भानं नाम ज्ञानम् । तत एव पो-कलिङ् उद्-प्रभृतीनामात्मज्ञानतत्त्वे प्रतिभातत्त्वमनुषक्तमस्ति । आपातत एव पो-कलिङ् उद्-प्रभृतीनामात्मज्ञानतत्त्वमद्वैतवादपर्यवसायि । तदेवं प्रतीकवादानुषक्तं यदद्वैततत्त्वं तदेव प्रतिभातत्त्वेऽप्यनुसन्धेयम् । यदाह—

सर्वेऽपि प्रतीकवादान्तर्गतमतवादा अद्वैतवादविशेषमाश्रयन्ते अथवा परमार्थतत्त्ववास्तविकजगतोर्मूलतः परमार्थतत्त्वरूपत्वेनैवाविच्छिन्नभावेन सद्भावाभ्युपगमेन द्वैतवादं निराकुर्वन्ति ।···प्रायशः सर्वेऽपि प्रतीकवादिकवयः काव्यतत्त्वार्थदर्शिनश्च शुद्धाद्वैतवादिरूपेणैवाविर्भवितुमुपक्रमन्ते ।[1] इति ।

अन्यत्रापि ख्रिस्तीयद्वैतवादात् प्रतिभातत्त्वानुकूलस्याद्वैतवादस्य भेदमुपोद्बलयन्नाह—

तदेवं प्राचीनमतसंरक्षणपरो हिउल्म्महोदयः प्रतिभातत्त्वं निराकरोति यतो हि प्रतिभातत्त्वं ख्रिस्तीयद्वैतवादस्य स्थाने अद्वैतवादं प्रतिष्ठापयति,

---

1. 'All symbolist doctrines seem to rest either upon some kind of idealism or else to deny the dualism of ideality and materialism altogether by considering these opposed concepts to be abstractions out of a prior and deeper reality in which they lie undifferentiated...Most symbolist poets and critics, including those already discussed in this chapter, tend to be rather pure idealists.' (**Literary Criticism: A Short History, p. 600**)

मनुजमेव च ईश्वररूपेण स्वीकरोति । निरूपादानसृष्ट्यर्थं कविगता येयं प्रतिभाशक्तिरभ्युपगता सा तु ईश्वरत्वान्नैव भिद्यते ।[1] इति ।

पाश्चात्त्यप्रतिभातत्त्वप्रतिपादकेषु विद्वद्वरेष्वग्रगण्यः कोलेरिज्महोदयस्तस्य सुप्रसिद्धे **दिजेक्शन् एन् ओद्**-पद्ये एवं प्रतिभातत्त्वं प्रतिपादयति—

हे भद्रे, यदस्माभिर्दीयते तदेव लभ्यते । अस्माकं जीवन एव प्रकृतिर्जीवति । तस्या यद्विवाहाभरणं यद्वा मरणदिवसीयमाच्छादनं तदस्माभिरेव समर्पितम् । यदि तावद्दरिद्राः निःस्नेहाः सततमुत्कण्ठिता इतरजना निर्जीवशीतलजगद्रूपेण यल्लभन्ते ततोऽधिकतया किञ्चिन्महार्हतरमभिलष्यते तर्ह्यहो तदस्माकं हृदयादेव परिस्फुरेत् । तच्च गौरवोज्ज्वलं ज्योतिः तच्च शोभनं समुज्ज्वलं मेघखण्डमस्माकं हृदयादेवाविर्भूय पृथिवीं समावृणोति । सर्वेषामपि सुमधुरशब्दानां जीवनामृतभूता उपादानभूता तज्जीवनपिशुना काचन पीयूषशोभना सजीवा वाणी हृदयदेशादेवाविर्भवेत् ।[2] इति ।

एवं तर्हि हृदयाद् बहिरुपलभ्यमानं सर्वमपि वस्तुजातमात्मना तादात्म्यं समश्नुते । एतच्च कोलेरिज्मतं शुद्धाद्वैतवादरूपं स्थालीपुलाकन्यायेन समग्रस्यापि प्रतिभातत्त्वस्य मूलरूपं विस्पष्टयति । परन्तु योऽयं शुद्धाद्वैतवादः

---

1. '...Thus Hulme, defending the view of the classicist, rejects a concept of imagination which would substitute a monism for Christian dualism and would make of a man a god. For the attribution to man of the power to create absolutely, **ex nihilo**, could mean little less.' (Murray Krieger, **The New Apologists for Poetry**, Minneapolis, 1956, pp. 33-34)

2. O Lady, we receive but what we give,
And in our life alone does Nature live :
Ours is her wedding-garment, ours her shroud.
And would we aught behold, of higher worth,
Than that inanimate cold world allowed
To the poor loveless everanxious crowd,
Ah, from the soul itself must issue forth
A light, a glory, a fair luminous cloud.
Enveloping the Earth—
And from the soul itself must there be sent.
A sweet and potent voice, of its own birth,
Of all sweet sounds the life and element.
(Coleridge, **Dejection, an Ode**)

सोऽपि अंशतो द्वैतवादं सहते। अयञ्च अद्वैतवादः समन्वयं समभिप्रैति, द्वैतभावेन प्रतिपन्नयोर्विपरीतधर्मयुगलयोरद्वैतभावं क्रोडीकरोति। ततश्च शुद्धाद्वैतवादव्याजेनायमस्माभिः प्रथमत एव बहुधा प्रतिपादितो द्वैताद्वैतवाद एव। तादृशः **समन्वयवादः शर्मण्यदेशीयात् शेलिमहोदयादनुसृतः**। कयोः समन्वय इति चेद् आत्मन एव चेतनजडरूपतया अवस्थाद्वयोः समन्वयः, विषयवेत्तृरूपेणापि च वर्तमानयोरवस्थाद्वयोः समन्वय इति दिक्। प्रतिभावादिना कोलेरिज्महोदयेन कथं शर्मण्यदेशादागतोऽयं समन्वयवाद उररीकृत इति तस्य **बायग्राफिया लिटारेरिया** ग्रन्थे कथितमस्ति। शेलिमहोदयस्य समन्वयवादस्तु तस्य शुद्धाद्वैतवादस्यान्तर्भूक्तः। शर्मण्यदेशीयानां शेलि–फिष्ते–(Fichte) प्रभृतीनाञ्च शुद्धाद्वैतवादः (एब्सल्युट् आइदियेलिजिम्) कान्तमहोदयस्य सीमिताद्वैतवादस्यैव[1] परिणतिस्वरूप इत्यास्तां तावत्।

---

१. कान्तमहोदस्य दर्शनमांगलभाषायां साब्जेक्टिभ् आइदियेलिजिम् इत्युच्यते। एतन्मते हि ज्ञातृज्ञेययोर्भेदो नास्तीति अद्वैतवादोऽभ्युपगतः। किन्तु ईश्वरजीवयोर्भेदाभ्युपगमात् शुद्धाद्वैतवादादस्य मतं भिद्यत इति कृत्वा सीमिताद्वैतवाद इत्यस्माभिरत्राभिहितम्। तथा हि तन्मते बहिरुपलभ्यमानं वस्तु वस्तुतोऽसदेव। केवलं तद्विषयकं ज्ञानमेव सदिति स्वीकार्यम्। ज्ञानस्याप्यात्मरूपत्वेन आत्मनोऽभिन्नमेव बहिरुपलभ्यमानं वस्तु इति सारः। एतच्च मतं विज्ञानवादेन नितरां तुलनामर्हति। विज्ञानवादाभिप्रायं प्रसंगक्रमेणोपस्थापयन् यदाह पार्थसारथिमिश्र :—

ननु सर्वं एव निरालम्बनः (शाबरभाष्यम्) इत्यादिना पूर्वोक्तहेतुद्वयनिमित्तमिथ्यात्वाक्षेपेण शून्यवादी प्रत्यवतिष्ठते। तथा हि यत्र कारणदोषज्ञानं बाधकज्ञानं वा तत्र मिथ्यात्वम्, अन्यत्र सत्यत्वमिति व्यवस्था नोपपद्यते, सर्वज्ञानानां मिथ्यात्वात्। सर्वमेव हि ज्ञानमात्मांशपर्यवसितमनादिवासनावशादात्मानमेव बाह्यतयाऽध्यवस्यन् मिथ्यैव। इति।

(शास्त्रदीपिका, पृ. १४०–१४२)

पुनरप्यन्यत्र विज्ञानवाद्यभिप्रायं विस्पष्टयन्नाह—

विज्ञानवादी हि सर्वमेव विज्ञानमात्मानमेव गृह्णाति नान्यत्, आत्मनैव च गृह्यते नान्येन, तस्याप्यन्यस्य स्वात्मपर्यवसायित्वादिति वदति, यथोक्तम्—

नान्योऽनुभाव्यो बुद्धयाऽस्ति तस्या नानुभवोऽपरः।
ग्राह्यग्राहकवैधुर्यात्स्वयं सैव प्रकाशते॥ इति।

(शास्त्रदीपिका. पृ. १५४)

प्रतिभावादे वेत्तृवेद्ययोरभेद उररीकृतः। भारतीयप्रतिभावादे शब्दार्थयोरप्यभेदः स्वीकृतः। तत्र तावत् शब्द एव पदार्थः। शब्द एव अर्थभावेन विवर्तते। शब्दत एव जगतः प्रक्रिया इति **वाक्यपदीये** (१, १) प्रतिपादितम्। एतदनुरूप एव भावस्तावत् कोलेरिज्महोदयेनापि क्रोडीकृतः। तथा हि तेनैवंरूपस्य कस्यचन ग्रन्थस्य विरचनं परिकल्पितमासीद् यत्र शब्दार्थयोः प्राचीनभेदो विनष्टः स्याद् यत्र शब्द एव पदार्थरूपेण, सजीवपदार्थरूपेण च परिणतः स्यात्।[1] लर्ड् वाय्रन्महोदयेनापि तादृश एव भावः प्रकटीकृत इति परिलक्ष्यते। तथा हि तेनोक्तम्—

ममायं दृढविश्वासः यत्तत्र तादृशाः शब्दास्सन्ति ये च स्वयमेव पदार्था भवन्ति यद्यपि तादृशाः शब्दा मया कदापि नोपलब्धाः।[2] इति।

मध्ययुगीयस्त्रिस्तीयव्यवस्थायां प्रतीकव्यवहारः

पाश्चात्त्येतिहासस्य मध्ययुगे धर्मप्रधान आसीत्। धर्मप्रधाने समाजे धर्मविषयकचिन्ताधारा एव प्राधान्येन प्रावर्तत। तत एवालंकारशास्त्रप्रभृतीनां मानवीयसृष्टिविषयकानां मानवीयकर्तृत्वस्वीकरणपरकानां विषयाणामालोचना नियमेनैव विरला एव आसीत्।[3] तथापि वास्तविक-

---

प्रथमतरशास्त्रदीपिकाग्रन्थे शून्यवादीतिपदेन विज्ञानवादी एवावगन्तव्यः। अत्र शून्यवादस्य बाह्यार्थशून्यवाद इत्येवाभिप्राय इत्यस्य सुभणत्वात्। अयमेव विज्ञानवादो योगाचारप्रवक्तृणामसंगवसुबन्धुप्रभृतीनां निरालम्बनवाद इत्यप्युच्यते।

(D. Venkataramiah, **Śāstradīpikā**, English translation, P. 57, foot note No. 29)

1. "...In something of this sort I would endeavour to destroy the old antithesis of Words and Things; elevating, as it were, Words into Things and living things too." (**Unpublished Letters of S. T. Coleridge**, ed. E. L. Griggs, London, 1932, 1. P. 155–6)
2. "I do believe,
   Though I have found them not, that there may be
   Word which are things." (Lord Byron, **Childe Harold**, Canto III, stz. CXIV)
3. "In short it was an age of theological thinking in a theologically oriented and treocratic society. Such a society does not characteristically promote the essentially humanistic activity of literary criticism....." (**Literary Criticism : A Short History**, P. 154)

प्रतीकव्यवहारविषये मध्ययुगीयचिन्ताधाराया अपि महान् प्रभावोऽवसाययितुं शक्यते। तथा हि एद्गार् एल् एन् पोमहोदयस्य मते यथा विश्वप्रपञ्चः परमसौन्दर्यमभिव्यनक्ति तथैव ख्रिस्तीयधर्ममीमांसकानां मते ईश्वरेण सृष्टोऽयं जगत्प्रपञ्चः प्रतीकात्मकग्रन्थविशेषरूप एव। जगच्चान्तर्निहितार्थविशेषस्यावरणरूपम्। कश्चन गोपनोऽर्थस्तेनैवावृतो वर्तते। तदर्थं प्रति प्रवेशद्वाररूपं जगत्। तच्च महत्तरस्यार्थविशेषस्य प्रतीकभूतमिति ख्रिस्तीयधर्ममीमांसकानां हृदयम्।[1] यदा चेदमीश्वरेण सृष्टं समग्रमपि जगत् प्रतीकरूपं तदा तेन वस्तुत एव विरचितः बाइबेल्ग्रन्थः प्रतीकसमृद्धः एव भवेदिति किमु वक्तव्यम्। तदेवमीश्वरो न केवलं शब्दैरेवार्थं प्रतिपादयति किन्तु शब्दप्रतिपादितैः पदार्थैरपि पदार्थान्तराणि प्रत्याययति। अत एव **सुम्मा थियोलजिया**ग्रन्थस्य प्रारम्भ एव सेन्त् टमास् एकुइनास् महोदय आह—

ईश्वरः पुण्यग्रन्थस्य विरचयिता। स च स्वशक्त्या स्वाभिप्रेतमर्थं न केवलं शब्दैरेवाभिधते किन्तु तदभिहितवस्तुभिरपि। अत एव यदा तावदन्येषु शास्त्रेषु शब्दा एव वस्तूनि अभिदधते तदा अस्मिन् शास्त्रे शब्दाभिहितानां वस्तुनामपि स्वकीयं किञ्चितात्पर्यं वर्तते।...स च शब्दार्थेन प्रतिपादितोऽर्थः आध्यात्मिकः, अभिधेयादर्थात् प्रवर्तते[2]। इति।

---

1. ··· and in medieval theologians, the view according to which the created world in its radiant order and hierarchy is God's symbolic book. The world is the shell or cover (**cortex**) of an inner meaning (**nucleus**), the veil over a hidden meaning, the entrance to such a meaning, the lower symbol of a higher meaning." (**Ibid.** P. 147)

2. "The author of Holy Scripture is God, in whose power it is to signify His meaning, not by words only but also by things themselves. So, whereas in every other science things are signified by words, this science has the property that the things signified by the words have themselves also a signification. ...That signification whereby things signified by words have themselves also a signification is called the spiritual sense, which is based on the literal, and presupposes it." (Quoted in **Literary Criticism : A Short History,** p. 147)

तदेवमस्मिन् ग्रन्थे शब्दानामभिधायकत्वव्यतिरेकेण व्यञ्जकत्वमपि स्वीकृतम्। किञ्च सेन्त् टमास् एकुइनास् प्रभृतिभिः जलसूर्यप्रभृतीनामपि धर्मीयग्रन्थस्थितानां प्रतीकरूपत्वमुररीकृतम्। तादृशप्रतीकानामर्थोऽप्यनुसन्धितः। एवंरूपस्य वास्तविकप्रतीकव्यवहारस्य काव्ये काव्यमीमांसायाश्च विस्पष्टमनुपलभ्यमानोऽपि सुदूरप्रसारी प्रभावः प्रावर्तत। तदेवं यद्यपि मध्ययुगीयख्रिस्तीयव्यवस्थायां जगतः प्रतीकरूपत्वमुररीकृतं, यद्यपि शब्दानां व्यञ्जकत्वमपि प्रकारान्तरेणाभ्युपगतं यद्यपि च वास्तविकप्रतीकानां प्रयोगः स्वीकृतस्तथापि पाश्चात्त्यालंकारशास्त्रस्य प्रतीकवादेन तथा भारतीयवास्तविकप्रतीकव्यवहारेण मध्ययुगीयख्रिस्तीयप्रतीकव्यववहारस्य महान् एव भेदः प्रावर्तत। तथा हि मध्ययुगीयख्रिस्तीयव्यवस्थायामपि प्रतीकसमृद्धानामुपाख्यानानां प्राचुर्यमासीत्। तत्र तावद् यन्त्रमण्डलादिकानामपि व्यवहार आसीत्। किन्तु भारतीययन्त्रादिसाधनायां तथा समग्रेऽपि प्रतीकराज्ये यथा ज्ञातृ-ज्ञेय-ज्ञानानामभेदोऽभ्युपगतः न तथा ख्रिस्तीयधर्मव्यवस्थायामपि। तत्र ज्ञातृ-ज्ञेय-ज्ञानादीनां परस्परं विस्पष्टं भेद एव उररीकृतः। तत्रैवाधुनिकप्रतीकवादेनाप्यस्य भेदः। आधुनिकप्रतीकवादे अद्वैतवादोऽथवा द्वैताद्वैतवादः स्वीकृतः। मध्ययुगीयख्रिस्तीयधर्मव्यवस्थायां तु विस्पष्टभावेनैव द्वैतवादो व्यवस्थितः। तदेवं तत्र प्रतीकव्यवहारे सत्यपि आधुनिकप्रतीकवादस्य मूलमन्यत्रैवानुसन्धेयम्। तत् खलु ग्रीसदेशीयस्य रोमवास्तव्यस्य दार्शनिकप्रवरस्य प्लटिनास्महोदयस्य नव्यप्लेटनिवदर्शने मृग्यम्। तच्च दर्शनमद्वैतवादात्मकम्। अत एव तदद्वैतवादेन ख्रिस्तीयद्वैतवादस्य वैलक्षण्यं संलक्षयितुमाह—

उद्देशवैचित्र्यरञ्जितस्य (?) स्रष्टृसृष्टयोरभेदस्वीकरणपरकस्य प्लटिनास्महोदयस्य उद्गमवादस्य स्थाने एकुइनास्महोदयस्य ख्रिस्तीय–एरिष्टटोलीयमतं संस्थापितं यत्र सनिश्चयम् ईश्वरादीश्वरकार्याणां भेदः प्रख्यापितः।[1] इति।

किन्तु इदमत्रावधार्यम्। यद्यपि प्रतीकवादान्तर्निहितोऽद्वैतवादः ख्रिस्तीयदार्शनिकैर्न स्वीकृतस्तथापि प्रतीकव्यवहारस्तैरपि बाहुल्येनोरीकृतः। किञ्च तेषु व्यंग्यार्थस्यापि व्यवहारस्तथा नाम बाहुल्येन बभूव येन मध्य-

1. 'The Plotinian theory of emanation, a theory of continuity between Creator and created, a shading of values, is supplanted in the Christian Aristotelianism of Aquinas by an emphatic distinction between God and his works.' (**Literary Criticism : A Short History**, p. 126)

युगीयः सेन्त् अगस्ताइन्महोदयः शशंके—ननु किमर्थं साक्षादभिधानस्य स्थाने प्रतीकानां व्यवहारः स्यादिति । आह च—

अनयोर्विषययोर्न कस्यापि सन्देहः स्याद् यत् प्रतीकैरेव ज्ञाने लभ्यमाने अधिकतर आनन्दः स्यात् तथा यस्यानुसन्धाने कष्टं स्यात् तस्य समासादने महत्तर आनन्द आविर्भवेत् ।[1] इति ।

प्लटिनास्महोदयस्य नव्यप्लेटनिकमतवादः

खिस्तीयतृतीयशतके रोमनगर्यां वर्तमानस्य प्लटिनास्महोदयस्य दर्शनम् उद्गमवाद इति नाम्नाऽपि ज्ञायते । तन्मते हि एकः स्वर्गीयः परमार्थः सर्वेषां जीवानां तथा वस्तुजातानां मूलम् । तत एव सर्वेषामुद्गमः । अत एव सृष्टपदार्थानां मूलतस्तेन परमार्थेन अभेदः । तन्मते हि स्वर्गीयादेकरूपादेव परमार्थात् जीवानामुद्गमः (टोल्मा) तथा तं प्रति प्रत्यावर्तनं (एपिष्ट्रफि) भवतः ।[2] ग्रीसदेशीयप्लेटमहोदयमतानुसारं तन्मतेऽपि हि जगदेतद् आभासिकमेव । इत ऊर्द्ध्वमेव सत्तत्त्वमस्ति । जीवे तथा विश्वप्रपञ्चे चेति उभयत्रापि आत्मा (सुषे) संविद् (नउस्), तथा ऐक्यम् (तु हेन्) इति तत्त्वत्रयं विद्यते । एतच्च तत्त्वत्रयं साकल्येन प्रत्येकस्मिन् वस्तुनि तथा समग्रे विश्वप्रपञ्चे तथा परमार्थतत्त्वे चानुषक्तमस्ति ।[3]

---

1. '...Nobody, however, has any doubt about the facts, both that it is pleasanter in some cases to have knowledge communicated through figures, and that what is attended with difficulty in the seeking gives greater pleasure in the finding.' (**Ibid**, p 125)

२. आनन्दो ब्रह्मेति व्यजानात् । आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते । आनन्देन जातानि जीवन्ति । आनन्दं प्रयन्त्यभिसंविशन्ति । (तै. उ. ३-६-१) इत्यादिकं तुलनीयम् ।

3. "It is a philosophy of Being through emanation (**tolma**) from, and return (**epistrophe**) to, the Divine One, There is this world, an appearance, as for Plato, and there is the reality which is Yonder. The grades of a kind of trinity, Soul (**psuche**), intelligence (**nous**), and Oneness (to hen), occur as microcosmic and macrocosmic counterparts : in the individual things of this world, in the whole world, and in the Yonder."

(**Literary Criticism : A Short History**, p. 113)

विभिन्नपदार्थानां यदैक्यं तेनैव विश्वप्रपञ्चः प्रवर्तते। आभ्यन्तरीणमैक्यं विना न किञ्चिदपि वस्त्ववस्थातुं शक्नोति। किं बहुना, यत्किञ्चिदेकं गृहं या काचनैका नौका यदि ऐक्येन परिहीयते तर्हि स्वावस्थितिमेव न समासादयति। तदेतदेव ऐक्यं समग्रमपि विश्वप्रपञ्चमभिव्याप्नोति[1]। तदेव ऐक्यतत्त्वमाधुनिकप्रतीकवादस्यापि परम्पराक्रमेण बीजमिति निपुणानामभिमतम्। किञ्च पाश्चात्त्यप्रतिभावादस्यापि मूलं प्लटिनास्महोदयस्य दर्शन एव समुन्नेतुं शक्यते। तथा हि काव्येषु वस्तूनां वर्णनविषये कवीनां विशेषसौकर्यमस्तीति तन्मतम्। ग्रीसदार्शनिकस्य प्लेटोमहोदयस्य मते[2] जागतिकवस्तुविशेषः परमार्थतत्त्वस्यानुकरणम्। काव्ये वर्णितस्सन् स एव वस्तुविशेषः अनुकरणस्याप्यनुकरणं भवति। तदेवं काव्ये वर्णितस्य जगतः परमार्थतत्त्वात् परमसत्याद् द्विगुणं दूरत्वम्। प्लटिनास्महोदयस्य मते तु एतदेवं न भवति। कविस्तु परमार्थतत्त्वादेवोद्गतायाः संविदः अधिकतरं भागं लभते। इतरजनेभ्य आधिक्येन एव स्वर्गीयसंविदोंऽशं गृह्णाति। परमार्थतत्त्वस्य सत्यं सौन्दर्यं साकल्येन एवानुभवितुं शक्नोति।[3] परमार्थतत्त्वोद्गतया संविदा एव कविरयं काञ्चन सृष्टिक्षमतां लभते। सैवास्मन्मते प्रतिभा इति वक्तुं युज्यते। यदाह—

कविभिः सृष्टानां वस्तूनां प्रायशः सर्वमपि कविभिः स्वयमेव सृष्टम्। ते च सौन्दर्यं रूपयन्ति। येन विषयेण प्रकृतिरूना तं विषयं स्वयमेव पूरयन्ति। इति।[4]

---

1. "....Deprived of unity, a thing ceases to be what it is called : Even house and ship demand unity, one house, one ship : unity gone neither remains." (**Ennead** VI, ix, 1, **Ibid**, p, 114)
2. N. N. Choudhuri, **Kāvyatattvasamīkṣā**, pp. 313–314
3. "....artists, far from being at a disadvantags, as on the Platonic view of double removal from reality, actually, enjoy a more than usual divine radiation of **nous**, a more than usually full participation in the Divine Intelligence and realization of the beautiful reality of the Yonder."
(**Litetarary Criticism : A Short History**, p. 117)
4. ....."that much of their work is all their own; they are molders of beauty and add where nature is laking. "(**Ennead, V.** viii, 1, quoted in **Literary Criticism : A Short History,** P. 117)

कवेरियं प्रतिभा एव वस्तुजातं स्वसमक्षं प्रतिभासयन्ति—वस्तुजातानां मानमात्मनस्समक्षमानयति। अत एवोक्तम्—

लोचनस्य सूर्यसदृशत्वाभावे सूर्यदर्शनसामर्थ्यं न स्यात्। तथैवात्मनः स्वकीयसौन्दर्याभावे आद्यसौन्दर्यस्य (परमसौन्दर्यस्य) अनुभूतिसामर्थ्यं न स्यात्।[1] इति। (**एनिद्** १-६-९)

एतदनुरूपस्तु भावः कोलेरिज्महोदयवचने "हे भद्रे, यदस्माभिर्दीयते तदेव लभ्यते" इति पद्ये पूर्वमेव उपलब्ध इत्यलं बहुना।

सिंहावलोकनेन भारतीयप्रतिभातत्त्वस्य परामर्शः

नैसर्गिकी च प्रतिभा श्रुतं च बहु निर्मलम्।
अमन्दश्चाभियोगोऽस्याः कारणं काव्यसम्पदः॥

(**काव्यादर्शः** १-१०३)

इत्याह दण्डी। तन्मते हि काव्यनिर्माणे इतरहेतुवैलक्षण्येन प्रतिभायाः प्राधान्यं नास्ति। यतो हि तेनैव पुनरेवमप्यभाणि—

न विद्यते यद्यपि पूर्ववासना गुणानुबन्धि प्रतिभानमद्भुतम्।
श्रुतेन यत्नेन च वागुपासिता ध्रुवं करोत्येव कमप्यनुग्रहम्॥

(**काव्यादर्शः** १-१०४)

इति। भामहस्य मते तु काव्योत्पतौ प्रतिभैव मुख्यो हेतुः। केवलस्य प्रतिभानवत एव काव्यं प्रसरेत्। यदाह—

गुरुपदेशादध्येतुं शास्त्रं जडधियोऽप्यलम्।
काव्यं तु जायते जातु कस्यचित्प्रतिभावतः॥

(**काव्यालंकारः** १-५) इति।

तदेवं भामहमतानुकूलतया[2] आनन्दवर्धनोऽपि केवलायाः प्रतिभाया एव मुख्यकाव्यहेतुत्वं स्वीचकार। आह च—

---

1. "Never did the eye see the sun unless it had first become Sun-like, and never can the soul have vision of the First Beauty unless itself be beautiful." (**Ennead** I, vi, 9, quoted in **Literary Criticism : A Short History**, P. 121)

२. आनन्दवर्धनः स्वदेशीयं पूर्वाचार्यं भामहं प्रति विशेषतः श्रद्धाशील आसीदित्यस्माकं प्रतिभाति। मन्मते भामह मतानुसारमेव माधुर्यादिगुणत्रयमेवानन्दवर्धनेन स्वीकृतम्। एवं वक्रोक्त्यादिविषयेऽपि च भामहमतं साकल्येनैवानुससार। तथैवात्रापि प्रतिभाया मुख्यहेतुत्वे उभयोरपि मतसादृश्यं विशेषतः परिलक्षणीयम्। किञ्च, "कवित्वबीजं प्रतिभानम्"

सरस्वती स्वादु तदर्थवस्तु निःष्यन्दमाना महतां कवीनाम् ।
अलोकसामान्यमभिव्यनक्ति परिस्फुरन्तं प्रतिभाविशेषम् ॥
(ध्व०, १-६) इति ।

अन्यत्रापि च काव्यस्य वैचित्र्यविधाने प्रतिभागुणस्यावश्यकतां दर्शयन्नाह—

ध्यनेरित्थं गुणीभूतव्यंग्यस्य च समाश्रयात् ।
न काव्यार्थविरामोऽस्ति यदि स्यात्प्रतिभागुणः ॥
(ध्व०, ४-६) इति ।

"सत्स्वपि पुरातनकविप्रबन्धेषु यदि स्यात्प्रतिभागुणः, तस्मिंस्त्वसति न किञ्चिदेव कवेर्वस्त्वस्ति ।" इति च **तद्वृत्तौ** । आनन्दवर्धनमते प्रतिभाया एव मुख्यहेतुत्वमिति बोधयितुं राजशेखरेणापि निगद्यते—"प्रतिभा-व्युत्पत्योः[1] प्रतिभा श्रेयसी इत्यानन्दः । सा हि कवेरव्युत्पत्तिकृतं दोषमशेष-माच्छादयति । तदाह—

अव्युत्पत्तिकृतो दोषः शक्त्या संव्रियते कवेः ।
यस्त्वशक्तिकृतस्तस्य झगित्येवावभासते ॥
(**काव्यमीमांसायां** कविरहस्ये पञ्चमाध्यायः । पृ. १६)" इति ।

अत्र तावत्प्रतिभापदस्य स्थाने शक्तिपदं व्यवहृतम् । रुद्रटमम्मटादिभिरपि प्रतिभापदस्य स्थाने शक्तिपदं व्यवह्रियते ।[2] तथा चाह रुद्रटः—

"त्रितयमिदं व्याप्रियते शक्तिर्व्युत्पत्तिरभ्यासः ।"
(**काव्यालंकारः**, १-१४) इति ।

मम्मटेनाप्यभाणि—

शक्तिर्निपुणतालोकशास्त्रकाव्याद्यवेक्षणात् ।
काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे ॥
(**काव्यप्रकाशः**, १-३) इति ।

(काव्यालंकारसूत्र १-३-१६) इति सूत्रस्य वृत्तौ कवित्वस्य बीजं कवित्वबीजं जन्मान्तरागतसंस्कारविशेषः कश्चित् यस्मात् विना काव्यं न निष्पद्यते, निष्पन्नं वाऽवहास्यायतनं स्यात् ।" इति वामनेन यदुक्तं तदपि चानन्दनर्धनेन सर्वथा समर्थितमासीदिति प्रतिभाति ।

१. "बहुज्ञता व्युत्पत्तिः" (**काव्यमीमांसा**, पृ. १६)

२. **अग्निपुराणेऽ**पि तथैव—नरत्वं दुर्लभं लोके विद्या तत्र सुदुर्लभा ।
कवित्वं दुर्लभं तत्र **शक्तिस्तत्र** सुदुर्लभा ॥ इति समुन्नेयम् ।

तदेवं मम्मटेनापि यद्यपि प्रतिभाया आवश्यकत्वं स्वीकृतं तथापि तस्या इतरवैलक्षण्येन मुख्यत्वं नाभ्युपगतम्। राजशेखरेण तु शक्तिपदस्य विशिष्ट एव अर्थः स्वीकृतः। तन्मते हि प्रतिभा शक्त्यधीना। किन्तु प्रतिभामप्यंगीकृत्य वर्तमाना शक्तिरेव केवलं काव्यस्य हेतुः। यदाह—

"सा केवलं काव्ये हेतुः इति यायावरीयः।.....शक्तिकर्तृके हि प्रतिभाव्युत्पत्तिकर्मणी। शक्तस्य प्रतिभाति शक्तश्च व्युत्पद्यते।" (**काव्यमीमांसा**, कविरहस्ये चतुर्थोऽध्यायः, पृ० ११) इति।

हेमचन्द्रस्य मते खलु प्रतिभा एव काव्यस्य कारणम्। उक्तवांश्च सः "प्रतिभास्य हेतुः" (**काव्यानुशासनम्**, १, पृ० ५) इति।

पण्डितराजेनापि तदुपजीव्यभूताऽनन्दवर्धनमतसमर्थनपरकतया समुद्घोषितम्—

"तस्य (काव्यस्य) च कारणं कविगता केवला प्रतिभा" (**रसगंगाधरः**, १, पृ० ८) इति। तदेवं प्रायशः सर्वैरपि प्रतिभायाः प्राधान्ये आवश्यकत्वे च स्वीकृते नियमेनैवोदेत्ययं प्रश्नः—ननु का नाम प्रतिभा, किं वा तस्या लक्षणम् इति। उच्यते। "सरस्वती स्वादु" (**ध्व**, १-६) इत्यानन्दवर्धनकारिकाया व्याख्याने अभिनवगुप्तपादाचार्य आह—प्रतिभा अपूर्ववस्तुनिर्माणक्षमा प्रज्ञा (**लोचनम्**, पृ० ९२) इति। अभिनवगुप्तपादस्य गुरुणा भट्टतोतेन इतः पूर्वमेवोक्तमासीत् "प्रज्ञा नवनवोल्लेखशालिनी प्रतिभा मता।" इति।[1] इयमेव च प्रतिभा प्लटिनास्महोदयस्य संविदा (नउस्) कोलेरिज्प्रभृतीनां प्रतिभया (इमाजिनेशन्) च समशीर्षिकतां विगाहते। प्रतिभा नाम अपूर्ववस्तुनिर्माणक्षमता यया समृद्धः सन्नेव—

अपारे काव्यसंसारे कविरेकः प्रजापतिः।
यथास्मै रोचते विश्वं तथेदं परिवर्तते॥

(**ध्वन्यालोकवृत्तिः**, ३४, पृ० ४९८)।

तत एव च शृङ्गारी त्रेत् कविः काव्ये जातं रसमयं जगत्।
स एव वीतरागश्चेन्नीरसं सर्वमेव तत्॥

(**ध्वन्यालोकवृत्तिः**, ३४, पृ० ४९८)

---

१. ग्नोलिमहोदयेन गृहीतोऽयं पाठः (**The Aesthetic Experience According to Abhinavagupta**, Introduction, p. XXX.) शंकररामशास्त्रिसम्पादिते **भामहालंकारे** (पृ० ६) प्रज्ञां नवनवोन्मेषशालिनीं प्रतिभां विदुरिति पठितम्।

किञ्च प्रतिभायाः स्वीकरणेन कवेस्तावती महती शक्तिः स्वीकृता भवति यया च—

भावानचेतनानपि चेतनवच्चेतनानचेतनवत् ।
व्यवहारयति यथेष्टं सुकविः काव्ये स्वतन्त्रतया ॥

(**ध्व.** वृत्तिः, ३, पृ० ४९८) इति ।

अत्र तावदयं प्रश्नः समुदेति—ननु सुकविः काव्ये स्वतन्त्रतया यथेष्टं व्यवहरतीत्युक्तम् । किन्तु काव्य एव व्यवहरति, न तद्बहिः । किञ्च अपारे काव्यसंसार एव कविः प्रजापतिरित्युक्तम् । तेन च तस्य साक्षात् सृष्टिकर्तृत्वमीश्वररूपत्वं वा न समायाति । तेन च पाश्चात्त्यप्रतीकवादे पाश्चात्त्यप्रतिभावादे वा स्वीकृते सति तद्विरोधिभिः कवेर्यदीश्वरत्वं शंकितं तदप्यमूलकमेव । सति चैवं प्रतिभावादिनामद्वैतवादस्वीकाराडम्बरोऽपि व्यामोह एव । इति । तत्रोच्यते । शब्दोपादानात्मिका कवेरियं या सृष्टिः सा तु ईश्वरसृष्टेर्न भिद्यते । वस्तुतस्तु ईश्वरस्यापि विश्वप्रपञ्चसृष्टिर्व्यावहारिकी अथवा आभासिकी एव । तथैव कवेरपि सृष्टिराभासिकीत्युच्यताम् । किञ्च व्यावहारिकस्यापि आभासिकस्यापि विवर्तरूपस्यापि विश्वप्रपञ्चस्यापि शब्दमूलकत्वमेव । परावाग्रूपतः शब्दादेव जगतः सृष्टिर्भारतीयप्रतिभावादिभिरभ्युपगता । तथैव पाश्चात्त्यैरपि कोलेरिज्प्रभृतिभिः शब्दार्थयोरभेदः समाशंकितः । परावागादिक्रमेण या सृष्टिप्रवणता तस्याः प्रतिभा न भिद्यत इति तदेव सूचयितुमभिनवगुप्तपादाचार्य आह—

"कवेरपि सहृदयायतनसततोदितप्रतिभाभिधानपरावाग्देवतानुग्रहोत्थितविचित्रापूर्वार्थनिर्माणशालिनः प्रजापतेरिव कामजनितजगतः ।" (**अभिनवभारती**–१, पृ० ४) इति ।

प्रथमे हि विद्वांसो वैयाकरणाः । तेऽपि शब्दस्यैव जगन्मूलत्वं कथयन्ति यथा—

शब्देष्वेवाश्रिता शक्तिर्विश्वस्यास्य निबन्धनी ।
यन्नेत्रः प्रतिभात्मायं भेदरूपः प्रतीयते ॥

(**वाक्यपदीयम्**–१, पृ० ९३) इति ।

अस्याशयस्तु **भावप्रदीपे** एवं निभालितः—

"बाह्यस्य वस्तुनो भावात् प्रतिभैव वाक्यार्थः । तथा हि यथावस्थिते वनितात्मनि बाह्येऽर्थे वासनानुसारेण कुणप इति कामिनीति भक्ष्यमिति प्रतिभा भवन्ति, तथा असत्यपि व्याघ्रागमने व्याघ्र आगत इत्युक्ते शूराणामुत्साहः कातराणां भयं भवतीति शब्दादर्थप्रतिभा भवति इति प्रतिभामात्रं

जगत्, अत एव असत्यपि बाह्येऽर्थे एष वन्ध्यासुतो याति, राहोः शिर इत्यादिवाक्यतोऽर्थप्रतिभा इति शब्द एव तत्तदाकारेण विवर्तत इति।" इति। वस्तुतस्तु वाक्तत्त्वमेव भोक्तृभोग्यभोगरूपेण[1] विवर्तते, न वाह्यं वस्तु किञ्चिदस्तीति भावः। अत्रैव तावत् प्लटिनासादिसमर्थितानामैक्यवादादीनां सादृश्यमनुसन्धेयम्। अत्रैव च "शब्दज्ञानानुपाती वस्तुशून्यो विकल्प" इति विकल्पसूत्रमपि तुलनामर्हतीत्यलं बहुना।

किञ्च प्रतिभा नाम नवनवोल्लेखशालिनी प्रज्ञा इत्युक्तम्। तत्र तावद् राजशेखरः प्रज्ञापदं व्याख्यानयन्नाह "बुद्धिस्त्रिविधा। स्मृतिर्मतिः प्रज्ञेति। अतिक्रान्तस्यार्थस्य स्मर्त्री स्मृतिः। वर्तमानस्य मन्त्री मतिः। अनागतस्य प्रज्ञात्री प्रज्ञेति।" (**काव्यमीमांसा**. कविरहस्ये चतुर्थोऽध्यायः, पृ० १०)।

या शब्दग्राममर्थसार्थमलंकारतन्त्रमुक्तिमार्गमन्यदपि तथाविधमधिहृदयं प्रतिभासयति सा प्रतिभा। अप्रतिभस्य पदार्थसार्थः परोक्ष इव। प्रतिभावतः पुनरपश्यतोऽपि प्रत्यक्ष इव।" (**काव्यमीमांसा**, पृ० ११–१२ इति।)

प्रज्ञां नवनवोन्मेषशालिनीमितिपद्यचरणसमभिव्याहृते पद्यार्धे भट्टतौत एव प्रज्ञायास्त्रैकालिकीत्वं प्रतिपादितवान् इति प्रतिभाति। यदाह—

स्मृतिर्व्यतीतविषया मतिरागामिगोचरा।
बुद्धिस्तात्कालिकी प्रोक्ता प्रज्ञा त्रैकालिकी मता॥ इति।
(शंकररामशास्त्रिसम्पादितः **भामहालंकार**, पृ० ६)।

प्रतिभायास्त्रैकाल्यविषयत्वं प्रतिपादयता महिमभट्टेनाप्यभ्यधायि—

रसानुगुणशब्दार्थचिन्तास्तिमितचेतसः।
क्षणं स्वरूपस्पर्शोत्था प्रज्ञैव प्रतिभा कवेः॥
सा हि चक्षुर्भगवतस्तृतीयामिति गीयते।
येन साक्षात्करोत्येष भावांस्त्रैकाल्यवर्तिनः॥
(**व्यक्तिविवेकः**, २, ११७–११८) इति।

वस्तुतस्तु इयं प्रतिभा अलौकिकेन योगजलक्षणसन्निकर्षेणैवातीतानागतानामसन्निकृष्टानामपि पदार्थानां बोधं जनयति। कवेरेवंविधात् त्रैकाल्यदर्शित्वादेव आर्षत्वं स्वीकृतम्। पाश्चात्यदेशेष्वपि रीम्बोड्प्रभृतिभिः प्रतीकवादिभिः कविरयम् ऋषिरितिपदेन (सियेर् इति पदेन) अभिहितः[2]। भारतवर्षेऽपि आदिकवेरार्षत्वमत्रोपलक्षणम्। तदेवादिकवेरार्षत्वं योगजदृष्टिञ्चोपोद्बलयन् भोजराज आह—

---

१. तुः—वा० प० १–४

2. **Literary Criticism : A Short History**, p. 594

अथ सरसिजयोनेराज्ञया रामवृत्तं करबदरसमानं प्रेक्ष्य दृष्ट्या प्रतीच्या ।
शुभमतनुत काव्यं स्वादु रामायणाख्यं मधुमयभणितीनां मार्गदर्शी महर्षिः ॥
इति । (**चम्पूरामायणम्**–१) ।

किञ्च वेदेषु ऋषिरेव कविरिति व्यपदेशमपि लभते । कविर्नाम क्रान्तदर्शी । तत एवायं कविः स्वानुभूतिपूर्वकतया एव कविकर्म समातनोतीति भट्टतौतेनापि प्रतिपादितम् ।[1] तदेवं "प्रतिभावतः कवेः परोक्षोऽप्यर्थः अपरोक्ष इव भवति । अस्या एवानुग्रहेण भगवान् वाल्मीकिः पिशितलोचनेनादृष्टमपि कृत्स्नं रामचरितं तिलशस्तिलशो वर्णयामास । सर्वं तस्य मुनेः प्रत्यक्षं संजातम् । तत्र च कारणं प्रतिभाया उदयः । तस्याश्च कारणं पुनर्ब्रह्मणा प्रदत्तो वर एव[2] ।' अस्मिन् विषये प्रमाणन्तु **रामायणे** बालकाण्डे द्वितीयसर्गे (२३–३५) समुन्नेयम् ।

प्रतिभानवतामतीतानागतविषयकं यज्ज्ञानं तस्य प्रामाण्यमुपस्थापयन् भर्तृहरिरप्याह—

आविर्भूतप्रकाशानामनुपप्लुतचेतसाम् ।
अतीतानागतज्ञानां प्रत्यक्षान्न विशिष्यते ॥
(**वाक्यपदीयम्**, १–३७) इति ।

प्रतिभानवतामार्षत्वमुपोद्बलयन्नाह—

अतीन्द्रियानसंवेद्यान् पश्यन्त्यार्षेण चक्षुषा ।
ये भावान् वचनं तेषां नानुमानेन बाध्यते ॥
(**वाक्यपदीयम्**, १–३८) इति ।

परन्तु इयं योगजदृष्टिरियं प्रतिभाशक्तिः केवलस्य निर्मलहृदयस्यैवाविर्भवति । अत एवोक्तं भर्तृहरिणा 'अनुपप्लुतचेतसाम्' इति । तथा हि यथा लोकः स्वमुखमपश्यन्नपि स्वच्छदर्पणे प्रतिबिम्बरूपेण पश्यत्येवम् ऋषयः तपसा विशुद्धे अन्तःकरणे इतरजनैरग्राह्यमपि वस्तु अव्यभिचरितं पश्यन्ति । तच्च ज्ञानं योगजप्रत्यक्षजन्यमित्याशयः । अत एव पाश्चात्त्यैः प्लटिनास्प्रभृतिभिरप्येतदुक्तं यन्निर्मलचेतसामेव मनसि काव्येषु वर्णनीयं परम-

---

1. 'The Vedic Seer-poet was called **Rishi** and **Kavi**, 'Seer' and 'Maker', which as the 10th c Kashmirian critic Tota explained, emphasized that poetry depended both on vision and expression.'

(**Encyclopadea of Poetry and Poetics**, p. 383)

२. **काव्यतत्त्वसमीक्षा**, पृ० २३.

सौन्दर्यं परिस्फुरति इति ।[1] अत एव च रीम्बोड्महोदयेनाप्युक्तं यत् सकलेन्द्रियाणां सयत्नमुपरमेण कविना केनचिद्दृषिणा भवितव्यम् इति ।[2]

किञ्च, कविर्यथा स्वप्रतिभया अपूर्वं वस्तु विनिर्माति तथैव सहृदयोऽपि प्रतिभाबलेनैव कविना समुपस्थापितमपूर्वं वस्तुजातमाविष्करोति । अत एव सहृदयस्यापि विशदीभूतमनोमुकुरवत्त्वमभिप्रैत्यभिनवगुप्तपादाचार्यो यथा—'येषां काव्यानुशीलनाभ्यासवशाद् विशदीभूते मनोमुकुरे वर्णनीयतन्मयीभवनयोग्यता ते स्वहृदयसंवादभाजः सहृदयाः ।' (**लोचनम्**, पृ. ३८–३९) इति । तदेवं कविसहृदययोरुभयोरपि प्रतिभावत्त्वं प्रकीर्तयन् काव्यस्य परिस्फुरणे उभयोरपि समं प्राधान्यं[3] संसूचयन् प्रतिभातत्त्वस्यापि महत्त्वं संस्थापयन्नभिनवगुप्तपादाचार्य आह—

अपूर्वं यद्वस्तु प्रथयति विना कारणकलां
जगद् ग्रावप्रख्यं निजरसभरात् सारयति च ।
क्रमात् प्रख्योपाख्याप्रसरसुभगं भासयति तत्
सरस्वत्यास्तत्त्वं कविसहृदयाख्यं विजयते ॥
(**लोचनम्**, १, पृ. १) इति । शम् ।

---

1. 'Therefore the Soul must be trained—to the habit of remarking, first, all noble pursuits, then the works of beauty produced not by the labour of the arts but by the virtue of men known for their goodness : lastly, you must search the souls of those that have shared these beautiful forms.' (**Ennead** I, vi. 9 quoted in **Literary Criticism : A Short History,** p 116)
2. 'The poet makes himself **voyant** by a long, vast, reasoned derangement of all the senses.' (**Letters du Voyant,** 1871, quoted in **Literary Criticism : A Short History,** p. 594)
3. सहृदयस्य प्राधान्यविषये **विषमबाणलीलायाम्** आनन्दवर्धन आह—

ताला जाअन्ति गुणा जाला दे सहिअएहिं घेप्पन्ति ।
रइकिरणाणुग्गहिआइं होन्ति कमलाइं कमलाइं ॥
(ध्वन्यालोकः–२, पृ. १७०)

तदा जायन्ते गुणा यदा सहृदयैर्गृह्यन्ते ।
रविकिरणानुगृहीतानि भवन्ति कमलानि कमलानि ॥ इति छाया ।

षष्ठं दर्शनम्

विश्वप्रपञ्चस्य व्यञ्जनाप्रपञ्चत्वम्

विश्वप्रपञ्चस्य प्रतीकरूपत्वम्

अयं नामरूपात्मको विश्वप्रपञ्चः परमार्थतत्त्वस्य प्रतिकम्। भारतीय-प्रतीकवादिनां तथा पाश्चात्त्यप्रतीकवादिनामपि एष एव राद्धान्तः। यत्-किञ्चिदपि वस्तु केनचिन्नाम्ना समालिंगितम्। यच्च नाम्ना समालिंगितं तदेव मूर्तं तदेव रूपवद् भवति। केवलं परमात्मतत्त्वमेवानिर्वचनीयन्तथा नामरूपादिरहितम्। तद्विषयकञ्च ज्ञानं नामाद्यनवगाहित्वेन निर्विकल्प-कमेव। जागतिकवस्तूनान्तु नामरूपादिसहिततया सविकल्पकमेव ज्ञानं समुदीयात्। जागतिकवस्तूनां नियमेनैव नाम्ना समालिंगितत्वे प्रमाणं यथा—

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन गम्यते॥
(**वाक्यपदीयम्**–१. १२३) इति।

अत एव निर्विकल्पकं केवलं सन्मात्रविषयमिति अद्वैतवादिनः। यदाह पार्थसारथिमिश्रः—"तच्च सन्मात्रविषयमिति केचित्। भेदस्य विकल्पवेद्य-त्वादगृहीते च भेदे विशेषाणामग्रहणात्। किं चेतरेतराभावो भेदो न चासौ प्रत्यक्षेण ग्रहीतुं शक्यते न तरां निर्विकल्पकेन। अतश्च नेह नानास्ति किंचन·इत्यादिनिषेधानां प्रत्यक्षादिविरोधाभावात् एकमेवाद्वितीयम् इत्यादि-श्रुतिभिरद्वितीयं ब्रह्म सिद्धम्॥' (**शास्त्रदीपिका**, पृ० ११०–१११) इति। सोऽयं निर्विकल्पकप्रत्यक्षविषयको विचारो यथा तथा वा भवतु। किन्तु यथैव काचन प्रतिमा अथवा किञ्चित् प्रतिकम् इष्टदेवताया अभिव्यञ्जकं भवति तथैव विश्वप्रपञ्चस्य यत्किञ्चिदपि वस्तु परमार्थतत्त्वमेवाभिव्य-नक्ति प्रकामम्। एतच्च विश्वप्रपञ्चस्य परमार्थतत्त्वप्रतीकभूतत्वं पाश्चा-त्यानामपि प्रतीकवादिनां सम्मतम्। यदाह—

"प्रतीके स्रष्टृसृष्टयोः सम्बन्धोऽपि आपातलभ्यो वर्तते। जुलस् ले बेल् महोदयेनापि अभिधीयते यत्-प्रत्येकमपि कार्यं वस्तु स्वर्गीयपरिपूर्ण-ताया इव प्रतिबिम्बमस्ति, प्रत्येकमपि अलौकिकसत्यस्य प्राकृतिकं तथा प्रत्यक्षयोग्यं चिह्नं भवति। इति। एवमेव तेन पोल्महोदयस्य-प्रत्येकस्मिन् दृष्टे वस्तुन्यदृष्टमन्तर्निहितमस्तीति मतस्य तथा सेलाष्टमहोदयस्य-जगदिदं

प्रतीकभूतं वस्तु इति निश्चयस्यैव अनुवादः कृतः। लेन्ड्रिट्महोदयोऽपि सुदृढं प्रतिपादयति यत्-येन सम्बन्धेन सृष्टं जगद् भगवता सम्बद्धं येन च वास्तविकं जगदाध्यात्मिकेन सम्बद्धं तत्सम्बन्धविषयकमेव विज्ञानं प्रतीकवादो नाम। प्रतीकवाद एव विश्वप्रपञ्चगतविभिन्नवस्तूनां पारस्परिकसम्बन्धं, (सारूप्यं तथा सादृश्यं), यो हि सम्बन्धः सृष्टिक्रममर्थात सर्वेषामपि वस्तूनां वास्तविकत्वमभिव्याप्य वर्तते, तमेव प्रतिपादयितुं प्रवर्तमानं विज्ञानमस्ति[1]।" इति।

पाश्चात्यैः विश्वप्रपञ्चस्य प्रतीकत्वे स्वीकृतेऽपि तस्मिन् विषये प्राच्यदेशीया एव नियमेनैव सरणिनिर्देशका इति पाश्चात्यैरेवोररीकृतम्। यदाह—

"मनस्तात्त्विकानां मते प्रतीकं प्रायशः सम्पूर्णभावेन मनसि एव वर्तते। तत एव बहिः प्रकृतौ उपाधीयते। तदर्थञ्च भाषा एव प्रतीकरूपेणाथवा प्रतीकप्रकाशप्रणालिकारूपेण उपादीयते अथवा नाटकीयपात्रमेव तथा उपादीयते। किन्तु प्राच्यैस्तथा रहस्यवादिभिरन्यथैव प्रतीकत्वमवलोकितम्। तेषां मते हि ब्रह्माण्ड-पिण्डाण्डसृष्टिक्रमयोरभेदे एव प्रतीकतत्त्वं प्रतिष्ठितम्। अत एवाह रेणि गुवेनोन्महोदयः—यत् सारूप्यं परमार्थतत्त्वस्य विभिन्नानां प्रकाशानां योगसूत्ररूपं, यच्च परस्परं तान् सम्बध्नाति, यच्चान्ततो गत्वा लौकिकं प्रकाशमलौकिकेन तद्रूपेण सम्बध्नाति तदेव सारूप्यं प्रतीकवादस्य यथार्थं मूलम्। एतत्सारूप्येणैव समग्राऽपि प्रकृतिः प्रतीकरूपा, अर्थादस्यास्तात्पर्यं तदैव बोधगम्यं भवेद् यदेयमलौकिकस्या-

---

1. "The connexion between created and Creator is also apparent in the symbol. Jules Le Bele recalls that 'every created object is, as it were, a reflection of divine prefection, a **natural and perceplible sign** of a supernatural truth', thus echoing the Pauline proposition **Per visibilia ad invisibilia,** as well as the assertion of Sallust that 'The world is a symbolic object.' Landrit insists that 'symbolism is the science of the relations which unite the created world with God, the material world with the supernatural; the science of the harmonies existing between the diverse parts of the universe (correspondences and analogies)', operating within the process of involution, that is, of the materiality of all things." (J. E. Cirlot, **A Dictionary of Symbols,** Introduction, p. XXX)

थवाऽध्यात्मिकतत्त्वस्य प्रतिपादकत्वेन परिचीयते । एतदेवाऽध्यात्मिकतत्त्व-प्रतिपादनं प्रतीकवादस्य सारभूतं कर्म...इति ।"[1] इति ।

सारूप्यादेव हृदयसंवादः

सारूप्येणैव जागतिकपदार्थानां परस्परसम्बन्धः । एकत एव परब्रह्मणः सर्वेषामपि प्रसूतिरित्यत एवैतत् सारूप्यम् । एतदेव सारूप्यं हृदयसंवादस्य बीजम् । हृदयसंवादेनैव च रसानुभूतिर्जायते । मनुष्येतराणामपि प्राणिनां सारूप्यात्मकत्वात् तैरपि हृदयसंवादः सम्भवति । एतदेव तत्त्वं मनसि निधाय अभिनवगुप्तपादेन भरतस्य रससूत्रस्य व्याख्याने भयानकरसस्योदाहरणरूपेण सर्वप्राथम्येन मृगपोतकभावप्रकाशनपरकं ग्रीवाभंगाभिरामम्-मिति कालिदासीयपद्यमेव समुदाहृतम् । (**अभिनवभारती**, ६, पृ. २७६) । अनेन हृदयसंवादेन एकस्य मनोभावो यदन्येनाप्यनुभवितुं शक्यते तदेव नितरां चित्रम् । कविरेवं चित्ररूपं हृदयसंवादमुपजनयतीति हेतोः येट्स्-महोदयेन कविकर्म ऐन्द्रजालिककर्मत्वेनैवांगीकृतम् । किञ्च कविकर्म-साधारण्येन ऐन्द्रजालिकमपि कर्म चित्तवृत्तिविशेषमुपजनयितुं प्रभवतीति कारणादैन्द्रजालिककर्मण्यपि तस्य महती श्रद्धा समजनि । किञ्च काव्यमपि तन्मते ऐन्द्रजालिककर्मविशेष एव । किन्तु सर्वप्रकाराणामपि ऐन्द्रजालिक-कर्मणां बीजरूपत्वेन तेन तत्त्वत्रयमुरीकृतम् । तथा हि—

---

1. "For psychologists, the symbol exists almost wholly in the mind, and is then projected outwards upon Nature, either accepting language as its being and its form or converting being and form into dramatic characters, but it is not seen in this way by orientalists and esoteric thinkers, who base symbolism upon tne incontrovertible equation macrocosm = microcosm. For this reason Rene Guenon points out that : 'The true basis of symbolism is, as we have said, the correspondance linking together all orders of reality, binding them one to the other, and consequently extending from the natural order as a whole to the supernatural order. By virtue of this correspondance, the whole of Nature is but a symbol, that is, its true significance becomes apparent only when it is seen as a pointer which can make us aware of supernatural or 'metaphysical' truths—metaphysical in the proper and true sense of the word, which is nothing less than the **essential function of symbolism**...' (J. E. Cirlot, **A Dictionary of Symbols**, Introduction, p. XXXI)

(१) अस्माकं मनसां प्रत्यन्तभागस्य नियतगतिशीलता वर्तते। तत एव बहूनां मनसां परस्परस्पर्शेन एकत्र गत्वा मिलनं सम्भवति। फलतः एकमखण्डं मनः एका अखण्डा शक्तिरेव वा समुपजायते।

(२) अस्माकं स्मृतेरपि प्रत्यन्तभागो नियतगतिशीलः। तदेवमस्माकं स्मृतिरर्थादस्माकं व्यक्तिगतसंस्कारो महत्तरस्य प्रकृतिगतस्यैव महासंस्कारस्यांशविशेष एव।

(३) एतदखण्डं मनस्तथायं महासंस्कारः प्रतीकेणैवाभिव्यञ्जयितुं शक्येते[1]। इति। किञ्च, बोड्लेयार्महोदयस्य सारूप्यतत्त्वेनापि हृदयसंवादतत्त्वमिदं प्रकामं समर्थितम्।

रूपं रूपं प्रतिरूपो बभूव

सर्वेषामपि जागतिकवस्तूनां प्रतीकभूतत्वमेव "रूपं रूपं प्रतिरूपो बभूव" इत्युपनिषद्वाक्येनाऽपि प्रतिपाद्यते। तथा चोक्तम्—

अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव।
एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च॥
वायुर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव।
एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च॥ इति।
(कठोपनिषद्, २. २. ९-१०)।

यत्तु मूर्तमनित्यं कार्यं जगति प्रकाश्यमानं भेदवच्च तदेव रूपम्। तदेव प्रतिरूपस्य प्रतीकं भवति। प्रतिरूपस्तु अमूर्तः नित्यः साक्षादप्रकाश्यमानः अखण्डश्च। प्रतिरूप एव अरूप इत्यप्युच्यते। रूपेणैवारूपः प्रकाशमेति। अर्थाद् रूपम् एवारूपमभिव्यनक्ति। रूपस्य आपातलभ्यं रूपं वाच्यार्थस्थानीयम्। रूपेण योऽरूपोऽभिव्यज्यते स तु व्यंग्यार्थस्थानीयः। परमेश्वर एव प्रतिरूपः। स एव अरूपः। किन्तु अरूपरूपोऽयं रूपस्य व्यंग्यार्थः

---

1. 'The doctrines were :
(1) That the borders of our minds are ever shifting, and that many minds can flow into one another, as it were, and create or reveal a single mind, a single energy. (2) That the borders of our memories are as shifting, and that our memories are a part of one great memory, the memory of Nature herself. (3) That this great mind and great memory can be evoked by symbols.' (**Ideas of Good and Evil,** quoted in **Literary Criticism : A Short history,** p. 599)

न सर्वैरप्यवगम्यते। यस्तु सहृदयः यस्तु वाच्यार्थविमुखः स एव व्यंग्यमर्थं समासादयति। यथाह आनन्दवर्धनः—

तद्वत् सचेतसां सोऽर्थो वाच्यार्थविमुखात्मनाम्।
बुद्धौ तत्त्वार्थदर्शिन्यां झटित्येवावभासते॥

(**ध्वन्यालोकः** १-१२) इति।

तथैव य एवोपलभते 'न प्रतीके न हि सः' (ब्रह्मसूत्रम्-४. १. ४) इति यस्तु सचेताः साधकः तत्त्वमेवानुसन्धत्ते स एव प्रतिरूपमुपलभते। तं प्रति रूपमेव अरूपं प्रकाशयति। अत एव साधकः रूप एवारूपमनुसन्धत्ते। अत एव रवीन्द्रनाथेनाप्यगायि—

'रूपसागरे डुब दियेछि
अरूप रतन आशा करि' इति।

(**गीताञ्जलि**-४७)

यस्तु रूपस्य तत्त्वं जानाति स एवारूपं प्राप्नोति। अत एव रूपारूपयोरुभयोरपि तत्त्वज्ञानं लिप्सते साधकः। तच्च तत्त्वज्ञानं भगवत्कृपया एव सम्भवति। अत एव वाग्देवतायाः स्तुतौ साधको गायति—

ऐं ऐं ऐं इष्टमन्त्रे कमलभवमुखाम्भोजभूतिस्वरूपे।
रूपारूपप्रकाशे सकलगुणमये निर्गुणे निर्विकारे॥
न स्थूले नापि सूक्ष्मेऽप्यविदितविषये नापि विज्ञाततत्त्वे।
विश्वे विश्वान्तराले सुरवरनमिते निष्कले नित्यशुद्धे॥

इत्यादि (**स्तवकवचमाला**, पृ. ७६१)

रूपारूपस्वरूपोपलब्धये ज्ञानविज्ञानदृष्टिः

रूपारूपयोरुभयोरपि स्वरूपमुपलब्धव्यम्। तच्च ज्ञानविज्ञानदृष्ट्या सम्भवति। तथा हि यस्य कस्यापि वस्तुविशेषस्य दर्शनार्थं दृष्टित्रयं स्वीकृतमस्ति। नामतः—शिरोमूला, पादमूला, चक्षुर्मूला चेति। सूक्ष्मात् स्थूलं प्रत्यनुधावनमेव शिरोमूलादृष्टिः। सैव ज्ञानदृष्टिरथवा सञ्चरदृष्टिरित्युच्यते। स्थूलात् सूक्ष्मं प्रत्यनुधावनमर्थात् स्थूलप्रतीकात् सूक्ष्मार्थलाभार्थमभिनिवेश एव पादमूला दृष्टिः। सैव प्रतिसञ्चरदृष्टिरथवा विज्ञानदृष्टिरित्युच्यते। यस्याञ्च स्थूलसूक्ष्मयोस्तथा ज्ञानविज्ञानयोरुभयोरपि समन्वय उपलभ्यते सैव तृतीया चक्षुर्मूलादृष्टिः ज्ञानविज्ञानदृष्टिरित्युच्यते[1]। उक्तञ्च बालगंगाधरतिलकमहोदयेनापि—

---

१. वासुदेवशरण अग्रवाल, (**K. P. Bhatnagar Com. Volume**, P. 333)

सृष्टावनेकप्रकारेषु अनेकविनश्वरपदार्थेषु एक एवाविनश्वरः परमेश्वरोऽन्तर्निहितो वर्तत इत्यस्य एव बोधस्य ज्ञानम् इति नाम भवति।

यदा भूतपृथग्भावमेकस्थमनुपश्यति।
तत एव च विस्तारं ब्रह्म सम्पद्यते तदा॥
(गीता–१३. ३०)

इत्यादिवचननिर्दिष्टदिशा एकस्मादेव नित्यपरमेश्वराद् विविधनश्वरपदार्थानामुत्पत्तिरिति बोधस्यैव विज्ञानमिति नाम वर्तते।[1] इति। ज्ञानविज्ञानसमन्वितदृष्ट्या तु पुरुषः सर्वभूतेषु आत्मानं पश्यति, आत्मन एव सर्वभूतानीति च जानाति। तथा चोक्तम्—

सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि।
ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः॥
(गीता, ६–२९) इति।

पुनरपि ज्ञानविज्ञानसमन्वितं पुरुषं परामृश्य गीतायामुच्यते—

ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेन्द्रियः।
युक्त इत्युच्यते योगी समलोष्टाश्मकाञ्चनः॥ (गीता, ६–८)।

एवन्तर्हि ज्ञानविज्ञानदृष्टिसमन्वितस्य सर्वोऽपि भेदबुद्धिर्दूरीभवति। किन्त्वत्रायं प्रश्नः समुदेति—ननु यदि ब्रह्मण एव जगदुत्पद्यते, यदि जगत्यपि सर्वत्र समत्वमेव विराजते तर्हि विश्वप्रपञ्चेन परमात्मनः कीदृशः सम्बन्ध इति। अस्य समाधानं तावदग्रे समुपस्थाप्यते।

ब्रह्मप्रपञ्चयोः सम्बन्धः

तत्त्वमसि, अयमात्मा ब्रह्म—इत्यादिभिर्वचनैः कार्यभूतस्य जीवस्य कारणभूतब्रह्मणोऽनन्यत्वमुपपादितम्। तथैव सर्वं खल्विदं ब्रह्म, जीवो ब्रह्मैव नापरः, ब्रह्म सत्यं जगन्मिथ्या इत्यादिभिरपि वचनैरद्वैतवाद एवोपपादयितुमभिलषित इति व्याख्यायते। ज्ञानविज्ञानदृष्ट्यापि अद्वैतवाद एवोपलब्धव्य इति प्रतिभाति। किन्तु तथापि क्वचन भेदः, क्वचन द्वैतभावोऽगत्या एव स्वीकार्यः। यद्यपि चाभेदं विना हृदयसंवादो न संगच्छते तथापि हृदयसंवादतत्त्व एव क्वचन द्वैतभावो निगूढो वर्तते इति निपुणैरुन्नेयम्। तथापि किं नाम प्रपञ्चब्रह्मणोरनन्यत्वमित्यत्र विशिष्टाद्वैतवादी शैवः श्रीकण्ठः प्राह—

प्रपञ्चब्रह्मणोरनन्यत्वं नाम मृद्घटयोरिव गुणगुणिनोरिव च कार्य-

१. तिलक, गीतारहस्य (वंगीय) पृ. ७२९

कारणत्वेन विशेषणविशेष्यत्वेन च विनाभावरहितत्वम्। न हि मृदं विना घटो दृश्यते, नीलिमानं विना चोत्पलम्। तथा ब्रह्म विना न प्रपञ्चशक्तिस्थितिः, शक्तिव्यतिरेकेण न कदाचिदपि ब्रह्म विज्ञायते, बह्निरिवौष्ण्यं विना। येन विना यन्न ज्ञायते तत् तेन विशिष्टमेव। तत्त्वं च तस्य स्वभाव एव। अतः सर्वथा प्रपञ्चाविनाभूतं ब्रह्म तस्मादनन्यदित्युच्यते। भेदश्च स्वाभाविकः। तस्माद् विश्वस्मादधिकमेव परं ब्रह्म। इति। (**श्रीकण्ठभाष्यम्** २-१-२२, पृ० ३१-३२) किन्तु द्वैताद्वैतवाद एव व्यञ्जनातत्त्वस्यानुकूलतमः। स च द्वैतवादाभ्युपगमपूर्वकतया अद्वैतवादस्वीकारः। कियाञ्चन द्वैतभावस्त्ववश्यमेवाभ्युपगन्तव्यः। तथा हि "सर्वं खल्विदं ब्रह्म" इत्यत्र सर्वस्य ब्रह्मणो भिन्नतया निर्देशः। एवं "ब्रह्म सत्यं जगन्मिथ्या" इत्यत्रापि यथा सत्यमिथ्याभेदेन स्वरूपद्वयमुद्दिष्टं तथैव ब्रह्मजगतोरपि प्रथमतो भिन्नशब्दाभ्यामेव निर्देश आवश्यकः। एवमेव तादात्म्यसम्बन्धेन सम्बद्धयोरपि सम्बन्धं दर्शयितुं प्रथमतो **भिन्नशब्दाभ्यामेवोपस्थापनं** कार्यम्। भिन्नशब्दद्वयव्यतिरेकेण सम्बन्धस्तु दुर्भण एव। एतच्च तत्त्वमस्माभिरितः प्रागेव बहुधा प्रतिपादितम्। तथाप्यत्र प्रसंगसंगत्या पुनरप्यनूद्यते। किञ्च योऽयमद्वैतवादः सोऽपि द्वैतवादनिषेधपरकतया एव न द्वैतः अद्वैत इत्यवगन्तव्यः। तदेवमेव व्यावहारिकदशायां द्वैतवादोऽपि पादप्रसारं लभते। वस्तुतस्तु परिशुद्धभावेन योऽद्वैतभावः अथवा ऐक्यभावः स तु अनिर्वचनीयः, यथायथं निर्णेतुं वचसा याथातथ्येन प्रकाशयितुं वा न शक्यते। न खलु व्यञ्जनावादेऽपि अथवा प्रतीकवादेऽपि स ऐक्यभावोऽथवा शुद्धः अद्वैतवादो निराक्रियते। किन्तु तस्य द्वैतभावाभ्युपगमपूर्वकतयैवोपलब्धिर्जायत इति संसूच्यते। शुद्धाद्वैतरूपस्य परब्रह्मणोऽनिर्वचनीयत्वेनैव श्रीयन्त्रस्य केन्द्रभागः शून्यो वर्तते इति पूर्वमेव प्रतिपादितम्। अयञ्चास्मदभिप्रेतो द्वैताद्वैतवादो व्यञ्जनावादिभिरवश्यमेवाभ्युपगन्तव्यः। नोचेत् व्यञ्जनायाः स्वरूपमेव व्याहन्येत। तथा हि आत्मानं प्रकाशयन्नेव परावभासको व्यञ्जक इत्युच्यते। अत एव व्यञ्जनायां कियाञ्चन स्वपरभावोऽर्थाद् द्वैतभावोऽवश्यमेव स्वीकार्यः। किञ्च इयमेव परावभासनरूपा व्यञ्जना समग्रमपि विश्वप्रपञ्चमभिव्याप्नोति। अत एव ब्रह्मप्रपञ्चयोः सम्बन्धेऽपि प्रथमतो व्यावहारिकभावेन कियाञ्चन द्वैतभावः स्वीकार्यः। तथा हि—

यज्ज्योतिरग्र्यं स्वपरप्रकाशं कूटस्थमव्यक्तमनन्तरूपम्।
नित्यञ्च दीर्घादिविशेषणाद्यैर्हीनं परं तच्च वयं न भिन्नाः॥
(**कालिकापुराणम्**, ११-५६)

इति प्रथमदर्शनोद्धृते एव श्लोके स्वपरप्रकाशकत्वेन ब्रह्मणो व्यञ्जकत्वमुक्तम्। किन्तु सत्यपि स्वपरभावे अभ्युपगन्तव्येऽपि द्वैतभावे "वयं न भिन्ना" इत्यनेन ब्रह्मप्रपञ्चयोरद्वैतभावश्च सुविस्पष्टं प्रतिपादितोऽस्ति। किञ्च "वयं न भिन्ना" इत्येतदेव रसानुभूतिविषयकस्य हृदयसंवादस्यापि मूलम्। एवं तर्हि व्यञ्जनाप्रक्रियायामन्ततो गत्वा अद्वैतभाव एवावशिष्यते। तमेव पक्षं द्रढयितुं पुनरपि विश्वप्रपञ्चस्य व्यंग्यव्यञ्जकभावसमालिंगितत्वं प्रदर्श्यते।

विश्वप्रपञ्च एव व्यञ्जनाप्रपञ्चः

न तत्र सूर्यो भाति न चन्द्रतारकम्।
नेमाः विद्युतो भान्ति कुतोऽयमग्निः।
तमेव भान्तमनुभाति सर्वं[1]
तस्य भासा सर्वमिदं विभाति॥

(कठोपनिषद् २-२-१५)

इत्येतदुपनिषद्वाक्यानुसारं ब्रह्म आलोकस्थानीयम्। आलोकः प्रदीपो यथा घटमभिव्यनक्ति तथैव सर्वमिदंपदेन परामृष्टं विश्वप्रपञ्चं ब्रह्म एवाभिव्यनक्ति। विश्वप्रपञ्चस्तु सूर्यचन्द्रादिक्रमेण भेदवान्। ब्रह्मणि सूर्यचन्द्रादिक्रमेण भेदो नास्ति। यद्यपि तस्य भासा एव सूर्यचन्द्रादिकं विभाति तथापि सूर्यचन्द्राद्यात्मकस्य प्रपञ्चस्य पारमार्थिकत्वं नास्तीत्येतदप्यस्मिन् उपनिषद्वाक्य एव सूचितम्। अत एवेयं प्रपञ्चस्याभिव्यञ्जना शुक्तिरजतन्यायेन भ्रमात्मिका एव।[2] वस्तुतस्तु शुक्तिरजतस्थले शुक्तौ प्रतिफलितः सूर्यालोक एव रजतरूपेण गृह्यते। तथैवात्रापि ब्रह्मणो ज्योतिरेव प्रपञ्चरूपेण गृह्यते। एवमेव प्रपञ्चस्य व्यंग्यरूपत्वस्वीकाराद् द्वैतवादोऽभ्युपगतः। किन्तु प्राथमिकद्वैतभावं व्यतीत्यात्रापि पार्यन्तिकदशायामद्वैतवाद एवाविर्भवति। तथा हि ब्रह्मतत्त्वमेव आलोकः। शुक्तिरजतन्यायेन स आलोक एव विश्वप्रपञ्चरूपेण गृह्यते। यस्तु ग्रहीता तस्याप्यालोकरूपत्वं स्यात्। नोचेद् ग्रहणमेव न सम्भवति। अत्रैव प्लटिनास्महोदयस्य दर्शनं, कान्तमहोदयस्य सीमिताद्वैतवादः, विज्ञानवादः, स्फोटवाद इत्यादिकानाम् उप-

---

१. अत एव गीतायामपि श्रीभगवान् आह—

यदादित्यगतं तेजो जगद् भासयतेऽखिलम्।
यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम्॥

(१५-१२) इति।

२. अयमेव पक्षः आभासवादस्याथवा प्रतिबिम्बवादस्यापि अनुमतः।

योगोऽनुसन्धेयः। तदेवं ग्रहीतृग्राहकग्राह्याणामभेदाविष्करणाद्वैतवाद एव पारिशेष्यादवशिष्यते। यावच्च माया प्रभवति तावदेव दोषः। यावच्च दोषस्तावदेव भ्रान्तिः। यावच्च भ्रान्तिः तावदेवाभिव्यञ्जना। यावच्चाभिव्यञ्जना तावदेव द्वैतभावः। व्यपगते तु द्वैतभावे शुक्तिरपि न वर्तते रजतमपि न वर्तते।[1] शुक्तिरजतालोकग्रहीतृग्राहकाणां समभाव एवावशिष्यते। तदा नास्त्येव द्वैतभावस्यावकाशः। यदाह—

---

१. अम्भः शीतकरान्तरीक्षनगरस्वप्नेन्द्रजालादिवत्
कार्यं मेयमसत्यमेतदुदयध्वंसादियुक्तं जगत्।
शुक्तौ रूप्यमिव स्रजीव भुजगः स्वात्मावबोधे हरावज्ञाते प्रभवत्यथास्तमयते तत्त्वावबोधोदयात्॥
(**प्रबोधचन्द्रोदयः** ६–२२) इति।

द्वितीयदर्शने समुद्धृतं पद्यमत्रापि परामर्शमर्हति। किञ्च,

'सरूपज्योतिरेवान्तः परा वागनपायिनी।
तस्यां दृष्टस्वरूपायामधिकारो निवर्तते॥...

परायां गोचरीभूतायां योगिनां समाधौ **अधिकारः दूरीभवति। अधिकारो नाम लौकिकमेदव्यवहारः** इति' द्वितीयदर्शनोक्तोऽपरोऽपि ग्रन्थः अत्र तुलनामर्हति।

विश्वकविना रवीन्द्रनाथेनाप्यनेनैव भावेनागायि—

आमार माझे तोमार लीला हवे,
ताइ तो आमि एसेछि एइ भवे।
एइ घरे सव खुले यावे द्वार,
घुचे यावे सकल अहंकार,
आनन्दमय तोमार ए संसारे
आमार किछु आर वाकि ना रवे।
मरे गिये वाचँव आमि, तवे
आमार माझे तोमार लीला हवे।
सव वासना यावे आमार थेमे
मिले गिये तोमारि एक प्रेमे,
दुःखसुखेर विचित्र जीवने
तुमि छाडा आर किछु ना रवे।

(**गीताञ्जलि**–१३०)

ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेन्द्रियः ।
युक्त इत्युच्यते योगी समलोष्टाश्मकाञ्चनः ॥
(गीता ६–८) इति ।

अत एवास्माभिरुक्तं द्वैतभावादेवाद्वैतभाव उपलब्धव्य इति । द्वैतभावात्मिक्या अभिव्यञ्जनया रसे अभिव्यक्ते सति केवलं विगलितवैद्यान्तर आनन्द एवानुभूयते **नान्यत्** किञ्चित् । तदा च सच्चिदानन्दरूप आत्मा आत्मानमेवानुभवतीति सर्वं सुसमञ्जसम् । इति शम् ।

यस्माद् विश्वमुदेति यत्र रमते यस्मिन् पुनर्लीयते
भासा यस्य जगद् विभाति सहजानन्दोज्ज्वलं यन्महः ।
शान्तं शाश्वतमक्रियं यमपुनर्भावाय भूतेश्वरं
द्वैतध्वान्तमपास्य यान्ति कृतिनः प्रस्तौमि तं पूरुषम् ॥

अनुशीलितग्रन्थपञ्जी

अग्निपुराणम् ।

अभिज्ञानशाकुन्तलम् , कालिदासकृतम्, ए. वि. गजेन्द्रगड्कारसम्पादितम्, पपुलार् बुक् ष्टोर, सुराट् , षष्ठं संस्करणम् ।

अभिज्ञानशाकुन्तलम् , राघवभट्टकृतया अर्थद्योतनिकया समलंकृतम्, गणेश-का।शिनाथकालेसम्पादितम्, लक्ष्मीवेंकटेश्वरमुद्रणालयः, मुम्बई, १८३८

अभिधावृत्तिमातृका, मुकुलभट्टकृता, काव्यमाला, खि्र. १९१६

अभिनवभारती, भरतस्य नाट्यशास्त्रस्य टीका, अभिनवगुप्तपादकृता, एम्. आर. कविसम्पादिता, नाट्यशास्त्रेण सहैव मुद्रिता ।

अर्थद्योतनिका, राघवभट्टकृता शाकुन्तलटीका ।

अलंकारसर्वस्वम् , रुय्यककृतम्, निर्णयसागरमुद्रणालयसंस्करणम् खि्र. १९३९ ।

अष्टाध्यायी, पाणिनिमुनिकृता ।

अहिर्बुध्न्यसंहिता, (भलिउम्—१), देवशिखामणिरामानुजाचार्यसंशोधिता, आदियार लाइब्रेरी, १९१६ ।

आधुनिक हिन्दी कविता में प्रेम और सौन्दर्य, रामेश्वरलाल खाण्डेलवालकृतम् । दिल्ली, १९६४ ।

ईशानशिवगुरुदेवपद्धति ।

ईशोपनिषद् ।

उत्तररामचरितम् , भवभूतिकृतम्, जि. के. भाट्-सम्पादितम् ।

ऋग्वेदभाष्योपक्रमणिका, सायणाचार्यकृता, पशुपतिनाथशास्त्रिणा सम्पादिता, कलिकाता, खि्र. १९२५ ।

ऋग्वेदसंहिता ।

ऋग्वेदे सायणभाष्यम् ।

ऐतरेयब्राह्मणम् ।

औचित्यविचारचर्चा, क्षेमेन्द्रकृता ।

कठोपनिषद् ।

कर्पूरमञ्जरी, राजशेखरकृता ।

कामधेनुतन्त्रम् ।

कालिकापुराणम्, (१) वेंकटेश्वरमुद्रणालयः, मुम्बई, १८२९ शाके।
(२) चौखम्बा प्रकाशन, १९७१।

कालीविलासतन्त्रम्, एभेलन्सम्पादितम्

काव्यतत्त्वसमीक्षा, नरेन्द्रनाथचतुर्धुरिकृता, दिल्ली १९५९

काव्यप्रकाशः, मम्मटकृतः, भाण्डारकर ओरियेण्टेल रिचर्स इन्स्तितिउत्, पुणा, १९५०

काव्यमीमांसा, राजशेखरकृता, गाइकोवाड ओरियेण्टेल सिरीज, तृतीयं संस्करणम्, १९३४

काव्यादर्शः, दण्डिकृतः, भाण्डारकर ओरियेण्टेल रिचर्स इन्स्तितिउत्, पुणा, १९३८

काव्यालंकारः, भामहकृतः बालमनोरमा प्रेस, माद्राज, १९५६

काव्यालंकारः, रुद्रटकृतः

काव्यालंकारसारसंग्रहः, भट्टोद्भटकृतः, नारायणदशरथबनहट्टिसम्पादितः १९२५

काव्यालंकारसूत्रवृत्तिः, वामनकृता, निर्णयसागरमुद्रणालयसंस्करणे प्रकाशिता

किरातार्जुनीयम्, भारविकृतम्

कुमारसम्भवम्, कालिदासकृतम्

केनोपनिषद्।

कौलावलीनिर्णयः, एभेलन्सम्पादितः

गाथासप्तशती, हालकविकृता, काव्यमाला २१, निर्णयसागरः, मुम्बाइ

गीतगोविन्दम्, जयदेवकृतम्

गीताञ्जलिः, रवीन्द्रनाथकृता (वंगीया)

गीतारहस्यम्, वालगंगाधरतिलककृतम्, महाराष्ट्रीयभाषातो वंगीयभाषायामनूदितम्

चम्पूरामायणम्, श्रीभोजराजविरचितम्

चर्यापद, मनीन्द्रमोहनवसुसम्पादितं वंगीयं संस्करणम्, १९६६ खिस्ताब्दे पुनर्मुद्रितम्

छन्दोमञ्जरी, गङ्गादासकृता

छान्तोग्योपनिषद्, आनन्दगिरिटीकासहिता, इलाहाबाद १९१८

तत्त्वप्रदीपिका, चित्सुखाचार्यकृता, उदासीनसंस्कृतविद्यालयः, काशी, १९५६

तन्त्रराजतन्त्रम्, एभेलन्सम्पादितम्

तन्त्रवार्तिकम्, भट्टकुमारिलकृतम्

तार्किकरक्षा, वरदराजकृता

तिलकटीका, रामकृता रामायणटीका, निर्णयसागरः १६३०
तैत्तिरीयब्राह्मणम् ।
तैत्तिरीयसंहिता ।
तैत्तिरीयोपनिषद् ।
दशरूपकम् , धनिककृतम्, धनञ्जयकृतावलोकसहितम्
देवीभागवतम् , शैवनीलकण्ठटीकासहितम्
ध्वन्यालोकः, आनन्दवर्धनकृतः, अभिनवगुप्तपादकृतलोचनसहितः, बालप्रिया-दिव्याञ्जनाभ्यां समुपेतः, चौखम्बा संस्कृत सिरीज आफिस, वाराणसी, खि्. १६४०
नरनारी, (वंगीयमासिकपत्रिका), वैशाख १३७४
नाट्यशास्त्रम् , भरतमुनिकृतम्, (भलिउम् १), एम्. आर. कविसम्पादितम्, बरोदा १६५६
निरुक्तम् , महर्षियास्ककृतम्, दुर्गाचार्यकृतटीकासहितम्, बोम्बे संस्कृत एण्ड प्राकृत सिरीज सं० ७३, खि्. १६१८
नीतिशतकम् , भर्तृहरिकृतम्
नैषधचरितम् , श्रीहर्षकृतम्
न्यायकुसुमाञ्जलिः, उदयनाचार्यकृता
न्यायकोशः, भाण्डारकार ओरियेण्टेल रिचर्स इन्स्तितिउत् इत्यनेन संकलितः
न्यायमञ्जरी, जयन्तभट्टकृता, काशी संस्कृत सिरीज, १६३६
न्यायमालाविस्तरः आनंदाश्रमसंस्कृतग्रन्थावलिः, खि्. १६४६
न्यायरत्नमाला, पार्थसारथिमिश्रकृता, नायकरत्नाख्यव्याख्योपेता, ओरियेण्टेल इनस्तितिउत्, बरोदा, १६३७
न्यायसूचीनिबन्धः, वाचस्पतिमिश्रकृतः, न्यायसूत्रभाष्येण सह प्रकाशितः, पुणा ओरियेण्टेल सिरीज १६३६
न्यायसूत्रभाष्यम् , मम. गङ्गानाथ झासम्पादितम्, पुणा ओरियेण्टेल सिरीज, सं० ५८, पुणा, १६३६
पञ्चदशी, माधवविद्यारण्यकृता
पताकाम्नायः, मनोरञ्जनशास्त्रिकृतः, नलवारी, १६६६
परमलघुमञ्जूषा, नागोजीभट्टकृता, चौखम्बा संस्कृत सिरीज आफिस १६४६
पारस्करगृह्यसूत्रम् ।
पुरोहितदर्पणम् , (वंगीयम्), सुरेन्द्रमोहनभट्टाचार्यसंकलितम्, ३३श सं, कलिकाता, १३६८ बङ्गाब्दे
प्रबोधचन्द्रोदयम् , श्रीकृष्णमिश्रकृतम्

प्रमाणवार्तिकम्, धर्मकीर्तिकृतम्
प्रमाणविनिश्चयः, धर्मकीर्तिकृतः
प्राचीनसाहित्य, (वंगीयभाषायाम्), रवीन्द्रनाथकृतम्
प्राच्यभारती, (१-१), मुकुन्दमाधवशर्मसम्पादिता, असमसंस्कृतबोर्डतः प्रकाशिता संस्कृतशोधपत्रिका
बालप्रिया, ध्वन्यालोकस्याधुनिकटीका, महादेवशास्त्रिविरचिता, चौखम्बा संस्कृत सिरीज आफिस १६४०
बालबोधिनी, झलकीकरकृता काव्यप्रकाशटीका, भाण्डारकार ओरियेण्टेल रिसर्च इन्स्तितिउत्, पुणा, १६५०
बृहदारण्यकोपनिषद्।
ब्रह्मसूत्रभाष्यम्, शंकरभगवत्पादकृतम्
ब्रह्मसूत्रे श्रीकण्ठभाष्यम्, द्वितीयं सम्पुटम्, श्रीमदप्पयदीक्षितकृतशिवार्क-मणिदीपिकाख्यव्याख्यासहितम्, निर्णयसागरः, १६१८
भल्लटशतकम्, भल्लटकविकृतम्
भागवतपुराणम्।
भावनोपनिषद्, श्रीशंकराचार्यकृता, सौन्दर्यलहरीग्रन्थेन सहैव प्रकाशिता, महीशूरविश्वविद्यालयः; द्वितीयं संस्करणम् १६४५
भाषापरिच्छेदः (कारिकावली), सिद्धान्तमुक्तावलीसहितः, विश्वनाथ-न्यायपञ्चाननकृतः
मनुसंहिता।
महाभारतम्।
महाभाष्यम्, निर्णगसागरमुद्रणालयात्प्रकाशितम्
महाभाष्ये पस्पशाह्निकम्, क्षितीशचन्द्रचट्टोपाध्यायसम्पादितम्, कलिकाता १६५७
महावीरचरितस्य जानकीरामभाष्यम्, आनन्दरामवरुवाकृतम्
मानमेयोदयम्, नारायणकृतम्
मार्कण्डेयपुराणम्।
मालविकाग्निमित्रम्, कालिदासकृतम्
मालतीमाधवम्, भवभूतिकृतम्
मीमांसासूत्रम्, जैमिनिकृतम्, बिब्लोथेका इण्डिका-संस्करणम्
मुक्तावलीसंग्रहः, भाषापरिच्छेदस्य आधुनिकटीका
मुण्डकोपनिषद्।
मृच्छकटिका, शूद्रककृता

मेघदूतम् , कालिदासकृतम्, सुशीलकुमार डे-सम्पादितं साहित्य एकाडेमि-संस्करणम्

योगसूत्रभाष्यम् , शंकरभगवत्पादानां यो. सू. भा. विवरणसहितम्, माद्राज ओरियेण्टेल सिरीज सं० ६४

रघुवंशम् , कालिदासकृतम्

रसगंगाधरः, पण्डितराजजगन्नाथकृतः, नागेशभट्टकृतया टीकया समेतः निर्णय-सागरः १८८८

रामायणम् ।

लघुवृत्तिः प्रतीहारेन्दुराजकृता काव्यालंकारसारसंग्रहटीका

लघुमञ्जूषा, नागोजीभट्टकृता

ललितासहस्रनामस्तोत्रम् , एभेलन्सम्पादितम्

वज्जालग्गम् , जयवल्लभकृतम्, एन्. ए. गोरे-सम्पादितम्, पञ्चमं संस्करणम्, पुणा १६५६

वाक्यपदीयम् , भर्तृहरिकृतम्, भावप्रदीपाख्याधुनिकटीकासहितं ब्रह्मकाण्डम्, चौ. सं. सि. आफिस, १६६३

विक्रमोर्वशीयम् , कालिदासकृतम्

विघ्नेशजन्मोदयनाटकम् , श्रीकविसूर्यविरचितम् (डॉ० सत्येन्द्रनाथशर्म-सम्पादिते 'रूपकत्रये' द्रष्टव्यम्)

वेणीसंहारः, भट्टनारायणकृतः

वेदान्तपरिभाषा, धर्मराजाध्वरीन्द्रकृता, मम. अनन्तकृष्णशास्त्रिसम्पादिता, कलिकाता विश्वविद्यालयः, खि्र. १६३०

वैयाकरणभूषणसारः, कौण्डभट्टकृतः

वैराग्यशतकम् , भर्तृहरिकृतम्

वैशेषिकसूत्रम् , कणादकृतम्

व्यक्तिविवेकः, महिमभट्टकृतः, डॉ० रेवाप्रसादद्विवेदिकृतहिन्दीव्याख्यानसहितः, वाराणसी, १६६४

व्यक्तिविवेकविमर्शः, रुय्यकृतः, उक्ते व्यक्तिविवेकसंस्करणे प्रदत्तः

शतपथब्राह्मणम् ।

शब्दकल्पद्रुमः ।

शब्दव्यापारविचारः, मम्मटभट्टकृतः, अभिधावृत्तिमातृकया सह प्रकाशितः, निर्णयसागरः ।

शब्दशक्तिप्रकाशिका, जगदीशतर्कालंकारकृता

शाबरभाष्यम् , बिब्लोथेका इण्डिका, कलिकाता, प्रथमं खण्डं १८७३, द्वितीयं खण्डं १८८६

शारदातिलकतन्त्रम् , एभेलन्सम्पादितम्

शास्त्रदीपिका, पार्थसारथिमिश्रकृता, युक्तिस्नेहप्रपूरण्याख्यव्याख्यया समलंकृता, चौ. सं. सि. आफिस, १६१६

शिल्परत्नम् , श्रीकुमारकृतम्

शिशुपालवधम् , माघकृतम्

श्रीभक्तिसन्दर्भः, श्रीजीवगोस्वामिकृतः, कलिकताविश्वविद्यालयीयं संस्करणम्, खि. १६६२

श्रुतबोधः, कालिदासकृतः

श्लोकवार्तिकम् . भट्टकुमारिलकृतम्

श्वेताश्वतरोपनिषद् ।

सर्वंकषा, मल्लिनाथकृता शिशुपालवधटीका

संस्कृत साहित्येर परिचय, (वंगीयभाषायाम्), हरिपददत्तकृतः, प्रथमं संस्करणम्, रामपुरहाट, खि. १६६३

सागरिका, (६-२), सागरविश्वविद्यालयस्य त्रैमासिकी संस्कृतशोधपत्रिका, खि. १६६७

सांख्यतत्त्वकौमुदी, वाचस्पतिमिश्रकृता, चौ. सं. सि. आफिस, खि. १६३७

सांख्यदर्शनम् , (असमीयभाषायां सांख्यकारिकाणां व्याख्यानम्), राधानाथफुकनकृतम्, प्रथमं संस्करणम्, योरहाट १८७१ शाके

सांख्यदर्शनम् , महर्षिकपिलकृतम्, विज्ञानभिक्षुविरचितप्रवचनभाष्यसहितम्

साहित्यदर्पणम् , विश्वनाथकविराजकृतम्

सिद्धान्तमुक्तावली, भट्टोजिदीक्षितकृता

सौन्दर्यलहरी, शंकराचार्यकृता, एन्. एन्. स्वामिधनपति—सम्पादिता, द्वितीयं संस्करणम्, महीशूरः, १६४५

स्तवकवचमाला, श्रीकालीप्रसन्नदेवशर्मणा सम्पादिता, पञ्चमं संस्करणम्, १३३२ वंगाब्दे

स्वतन्त्रकलाशास्त्र, (हिन्दी), कान्तिचन्द्रपाण्डेयकृतम्, चौ. सं. सि. आफिस, १६६७

स्याद्वादमञ्जरी, मल्लिसेनकृता, चौ. सं. सि. आफिस १६००

हर्षचरितम् , बाणभट्टकृतम्

हयशीर्षपञ्चरात्रम् ।

A Critique on the Vivaraṇa School : By B. K. Sengupta, Calcutta, 1959.

A Dictionary of Symbols : By J. E. Cirlot, translated from the Spanish original by Jack Sage, Routledge & Kegan Paul, London, 1962.

Aesthetic Experience According to Abhinavagupta : By Raniero Gnoli, Roma, 1956.

A History of Indian Literature : Vol. I, Part 1, by M. Winternitz, Calcutta University, 2nd edition, 1959.

Appreciations, with an Essay on Style : By Walter Pater, London, 1889.

A Second Handful of Popular Maxims : By G. A Jacob, Nirnaya Sagara Press, 1909.

Asyavāmasya Hymn : By Kunhan Raja, Madras, 1956.

Bhavabhuti and His Place in Sanskrit Literature : By Anandoram Borooah, Calcutta, 1878.

Bhavan's Journal : August 1963.

Bhoja's Śṛṅgāra-prakāśa : By V. Raghavan, Madras, 1963.

De Poetica of Aristotle : Translation by Ingram Bywater, Oxford 1946.

Education in the Vālmīki Rāmāyaṇa : By K. Saratchandran, D. Phil. Thesis available in type-script in the Library of the University of Gauhati, 1967.

Eight Essayists : By A. S. Cairncross, Macmilan & Co. Ltd. 1957.

Eight Poets : Oxford University Press, 1952.

Encyclopaedia of Poetry and Poetics : Edited by Alex Preminger, Princeton University Press, 1965.

Hala's Sattasai : Edited by Weber.

History of Sanskrit Literature : By A. B. Keith, Oxford University Press, 1948.

Ideas of Good and Evil : By W. B. Yeats, Macmillan & Co., London, 1903.

Indian Aesthetics : By K. C. Pandey, 1st edition, Banaras, 1950.

Indian Culture : Vol. XV, Nos. 1-4, July 1948-June 1949.

Indian Theories of Meaning : By K. Kunjunni Raja, Adyar Library, Madras, 1963.

Introduction to Metaphysics : By H. Bergson, London, 1912.

Iran & Its Culture : By F. C. Davar, New Book Co. Ltd., Bombay, 1953.

Journal of the University of Gauhati, Vol. IX, No. *1, Arts 1958.

K. P. Bhatnagor Commemoration Volume, Kanpur, 1961.

Language & Reality : By W. M. Urban, George Allen and Unwin, London, 1939.

Literary Criticism : A Short History : By William K. Wimsatt Jr. and Cleanth Brooks, Indian edition, 1964, 2nd reprint.

Meghadūta, Sahitya Akademy Edition : Ed. By S. K. De, New Delhi, 1st edition, 1957.

Myths and Symbols in Indian Art and Civilization : By H. Zimmer, Bollingen Series VI, 4th printing, May 1963.

Outlines of Islamic Culture : By A. M. A. Shushtery, Bangalore, 1954.

Patañjali's Mahābhāṣya, (paspaśāhnika) : Edited by K. C. Chatterjee, Calcutta, 1957.

Presidential Address, A I O C, XXII Session : By V. S. Agarawala, Gauhati, 1965.

Proceedings and Transactions of the XXII A I O C : Vol. I. and Vol. II. Edited by M. Neog, Gauhati, 1966.

Professor Birichi Kumar Barua Commemoration Volume : Edited by M. Neog and M. M. Sharma, Local Committee, XXII A I O C, 1966.

Remarks on Similies in Sanskrit Literature : By J. Gonda, Utrecht, Leiden, E. J. Brill, 1949.

Report of the Sanskrit Commisson, 1956-57.

Rūpakatrayam : Ed. By Dr. Satyendra Nath Sharma, Asam Sahitya Sabha, 1962.

Sanskrit Poetics : By Krishna Chaitanya, Asia Publishing House, Bombay, 1965.

Sāstradipikā : English translation by D. Venkataramiah, Gaekawad Oriental Series, Baroda, 1940.

Selected Essays : 1917 – 1932, by T. S. Eliot, New York, 1932.

Span : Sept. 1965, A Monthly Magazine published by the United States Information Service, New Delhi–1.

Symbolism, Its Meaning and Effect : By A. N. Whitehead, Cambridge, 1958.

The Chequer'd Shade : By Jhon Press, Oxford University Press, 1958.

The Dance of Shiva : By Ananda Coomaraswamy, Asia Publishing House, Bombay, 1948.

The Heritage of Symbolism : By C. M. Bowra, Macmillan & Co., London, 1954.

The Idea of Poetry in France : By Margaret Gilman, Harvard University Press, 1958.

The Meaning of Meaning : By Ogden and Richards, Routledge and Kegan Paul Ltd., London, 10th edition, 1952.

The Nature of Physical World : By Eddington.

The Mirror and the Lamp : Romantic Theory and Critical Tradition : By M. H. Abrams, Oxford University Press, New York, 1953.

The New Apologists for Poetry : By Murray Kreger, Mynneapolis, 1956.

The Philosophy of Word and Meaning : By Gauri Nath Śāstri, Sanskrit College, Calcutta, 1959.

The Principles of Art : By R. G. Collingwood, Oxford University Press, Oxford, 1938.

The Rāmāyaṇa : A linguistic Study, by Satyavrat, Delhi, 1964.

The Sacred Wood : By T. S. Eliot.

The Significance of Prefixes in Sanskrit Philosophical Terminology : By Betty Heimann, The Royal Asiatic Society, London, 1951.

The Social History of Kāmarūpa : Vol. I, by N. N. Vasu, 1922.

The Sphinx Speaks : By Jwala Prasad Singhal, Sadgyan Sadan, New Delhi, 1963.

The Trend of Modern Poetry : By Geoffrey Bullough, Oliver and Boyd, 1949.

Theory of Suggestion in Poetry, Translation of Dhvanyāloka : By K. Krishnamoorthy, Poona, 1955.

Trend in 20th Century Drama : By Frederick Lumley, Barrie & Rockliff, London, 1960.

Truth and Beauty : By S. L. Bhyrappa, M. S. University Baroda, 1965.

Unpublished Letters of S. T. Coleridge : Edited by E. L. Grigges, London, 1932.

Vākyapadiya of Bhartṛhari : By K. A. Subramaniya Iyer, Deccan College, Poona, 1965.

This work is sub-titled *Tulanātmaka-Pratīkatattva-Vimarśaḥ* in Sanskrit, and *A Critique on Comparative Symbolism* in English. The concept of Vyañjanā or Suggestion, as pertaining to the domain of Sanskrit Poetics, Mīmāṁsā and Nyāya schools of Philosophy and Grammar is first examined and the relation of Vyañjanā with Lakṣaṇā, Anumān and Arthāpatti is also duly analysed in ch. II. The tradition of the use of suggestion in the area of verbal expression is traced back to the Vedic literature, and the art of symbolic expression belonging to the poetry of all ages and drama is duly sorted out in ch. III. In ch. IV it is shown that the technique of symbolic expression pertains not only to the field of literature but also to other forms of art like sculpture, painting and music. The comparative study of this chapter is made with reference to Indian forms and principles of art. It is further shown that the same art of suggestion belongs also to the domain of religious or esoteric symbolism, and artistic symbolism and esoteric symbolism are basically of same nature and they aim at the same goal. In ch. V Western concepts of symbolism are discussed in their historical perspective and the whole treatment is designed to identify the points of similarity and dissimilarity between Indian and Western notions of symbolism. Ch. VI aims at establishing a philosophy of symbolism by way of showing that the whole cosmos is a symbolic phenomenon and that the aesthetic appreciation of symbolic arts converges with the realisation of a spiritual unity of the various objects and individuals of the Universe.

Rs. 20-00